भारतस्य सांस्कृतिकनिधिः



डॉ. रामजी उपाध्याय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ श्री ॥

विद्याभवन प्राच्यविद्या ग्रन्थमाला

१८

भारतस्य सांस्कृतिकनिधिः

डॉ० रामजी उपाध्याय

एम०ए०, डी०फिल०, डी० लिट्०

चौखम्बा विद्याभवन

वाराणसी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशक—
चौखम्बा विद्याभवन
(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
चौक (बनारस स्टेट बैंक भवन के पीछे),
पो० बाक्स नं० ६९
वाराणसी २२१००१

सर्वाधिकार सुरक्षित

तृतीय संस्करण १९९०
मूल्य १००

अन्य प्राप्तिस्थान—
चौखम्बा सुरभारती प्रकाशन
(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)
के० ३७/११७, गोपालमन्दिर लेन
पो० बा० नं० ११२९, वाराणसी २२१००१
दूरभाष : ५५३५७

*

चौखम्बा संस्कृत प्रतिष्ठान
३८ यू. ए., जवाहरनगर, बंगलो रोड
दिल्ली ११०००७

मुद्रक—
श्रीजी मुद्रणालय
वाराणसी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

VIDYABHAWAN PRACYAVIDYA GRANTHAMALA

18

BHĀRATASYA SĀṂSKṚTIKANIDHIḤ

(Cultural Heritage of India)

Dr. Ramji Upadhyaya
M.A., D.Phil., D. Litt.

CHOWKHAMBA VIDYABHAWAN

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CHOWKHAMBA VIDYABHAWAN
CHOWK (Behind The Benares State Bank Building)
Post Box No. 1069
VARANASI 221001

Telephone : 63076

Also can be had of
CHAUKHAMBA SURBHARATI PRAKASHAN
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
VARANASI 221001

CHAUKHAMBA SANSKRIT PRATISHTHAN
(Oriental Publishers & Distributors)
38 U. A., Jawaharnagar, Bungalow Road
DELHI 110007
Post Box No. 2113

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूमिका

संस्कृतिलक्षणमेव राष्ट्रम् । संस्कृतिः राष्ट्रमिति नाम सार्थकं करोति । अतएव संस्कृति-संरक्षणमेव कस्यचिद्राष्ट्रस्य परम कर्तव्यम् । यदि नाम राष्ट्रिया संस्कृतिर्विनष्टा स्यात्, तर्हि सर्वमेव विनष्टं भवति ।

न काचित् संस्कृतिरेकस्मिन् दिने केनचिदेकेन पुरुषेण पुरस्क्रियते । यथा काचिन्नदी बहूनां स्रोतसां सारितां च जलमादाय स्वरूपं विदधाति, तथैव संस्कृतिरसंख्यानां लोकानां मनीषिणां सम्प्रदायानां च आचार-विचार-शिल्पकलादीनात्मसात्कुर्वाणा प्रचरति । एवंभूतेऽपि यथा गङ्गा हिमालयस्य वैशद्यं स्वकीये प्रवाहे सर्वत्र सततं धारयति, तथैव भारतीया संस्कृतिर्वेदस्य सार्वभौमत्वमुररीकृत्य सर्वोपकारक्षमा प्रवर्तते ।

निःसन्देहं संस्कृतिस्तु नित्यं संवर्धते, नूतनतत्त्वानि सन्धारयते च । तथापि नूतनानि तत्त्वानि परिधानानीव शाश्वतसंस्कृतिशरीरं प्रसाधयन्ति, न तस्य हानिं कुर्वन्ति । अनेन प्रकारेण संस्कृतेर्निर्जरत्वं विधीयते ।

भारतवासिनो भारतीयसांस्कृतिकपथं सम्यगनुसृत्य पुनः गौरवास्पदं पदं प्राप्तुं समर्थाः सन्ति । भारते परतन्त्रीभूते भारतवासिनः प्रायशः स्वदेशस्य सांस्कृतिकपरम्परां प्रति विस्मरणशीलाः सञ्जाताः । स्वतन्त्रताया अभ्युपगमे पुनरपि स्वदेशस्य संस्कृतेः संस्कृत-साहित्यस्य च निधिः सम्यगवगन्तव्यः ।

भारतीयसंस्कृतेर्विवेचनं बहुधा योरपीयविचारणापद्धतिमनुसृत्य कृतम् । प्रकृतप्रबन्धे प्राचीनसंस्कृतिधारा भारतीयदृष्ट्या विभाविता वर्तते, तस्याः पर्यालोचनं च भारतीय-वैज्ञानिकप्रणालीमवलम्ब्य समारब्धम् । अत्र न केवलं भारतीयसंस्कृतेः सिद्धान्तपक्ष उपवर्णितः, अपि तु तस्या व्यावहारिकस्वरूपमपि समुदाहृतम् । भारतीयसंस्कृतेः प्रवृत्तीनां परिज्ञानाय काचिद्विशिष्टानुसन्धानपद्धतिरनुसर्तव्येति मे मतिः । तस्याः परिलक्षणं प्रबन्धेऽस्मिन् पदे पदे भविष्यति ।

विदुषां वशंवदः
रामजी उपाध्यायः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनुक्रमणिका

१.	आमुखम्	१–१५
२.	संस्कारः	१६–३२
३.	आश्रम-व्यवस्था	३३–८३
४.	सामाजिकसंस्थानम्	८४-१३५
५.	उपभोग्यानि	१३६–१७१
६.	व्यवसायाः	१७२–२०२
७.	मनोविनोदाः	२०३–२३१
८.	राजतन्त्रम्	२३२–२६५
९.	दार्शनिकप्रवृत्तयः	२६६–२८८
१०	धार्मिकप्रवृत्तयः	२८९–३२६
११.	शिल्पसाधना	३२७–३५३
१२.	विज्ञानम्	३५४–३७३
१३.	काव्यसाधना	३७४–३८८
१४.	वैदेशिकोऽनुबन्धः	३८९–४०५
१५.	उपसंहारः	४०६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आमुखम्

मानवस्येतरप्राणिभ्यः सुखप्रवृत्तौ स्वभावतो वैशिष्ट्यं वर्तते । यद्यपि मानवः 'आहार-निद्राभयमैथुनेन पशुभिः समानः किन्तु पशुवदाभिरेव प्रवृत्तिभिस्तस्य प्रगतिर्नावरुद्धा । सुखार्थिनः पशवो नूनमेवाहारविहारनिद्रादिकं यथेष्टं वाञ्छन्ति भयकारणानि निवारयन्ते च— मानवोऽपि तद् वाञ्छति तानि निवारयते च किन्तु पशूनामाहारविहारस्य सामग्रीषु साधनेषु च युगानुसारं परिवर्तनं किञ्चिन्मात्रमेव भवति । तेषां जीवनविधिरधुनापि प्रायः तादृशो यथा सहस्रवर्षपूर्वमेवासीत् । इत्थं पशुजीवनं प्राकृतिकं भवति। तस्माद् विपरीत-मेव मानवजीवनं सांस्कृतिकं भवति । अत्रैव वर्तते मानववैशिष्ट्यम् । मानवस्य जीवन-विधिः प्रतियुगं नवतरो दृश्यते । कदापि स आहारविहारादिषु सर्वथा परितुष्टो न भवति । स नित्यमेव नवीनसामग्रीणां साधनानां च सम्पादनेन परितुष्टतरमात्मानं कर्त्तुं चेष्टते। इहैव मानवस्य बुद्धिः सहायरूपेण तिष्ठति । बुद्धियोगेन स जगतो नित्यं कल्याणपरं नवीनतरं रूपं विदधाति । मानवो बुद्धेरुत्कर्षेण पशुभ्य उत्कृष्टतरो भवति ।

मानवीयानन्दस्य सामान्यतः चत्वारि क्षेत्राणि वर्तन्ते—(१) आधिभौतिकम् (२) आध्यात्मिकम् (३) रसात्मकम् (४) सेवात्मकं च ।[1] आधिभौतिकक्षेत्रे मानव ऐन्द्रियकसुखलाभाय ज्ञानविज्ञानबलेन पञ्चतत्त्वनिर्मितवस्तूनामधिकाधिकोपयोगिस्वरूपं परि-ज्ञाय विधाय चात्मानं बहु मन्यते। अस्यां दिशि परमाणुशक्तेराविष्कारोऽधुना सर्वोच्चोन्न-तिर्दृश्यते । आध्यात्मिकक्षेत्रे योगस्य दर्शनस्य च महिमा वर्तते । योगदर्शनाभ्या-मात्मनः परमात्मनश्च ज्ञानेनानुभूत्या च परानन्दो लभ्यते । समाधिर्ब्रह्मनिष्ठता चात्मनोऽ-स्य चरमविकासो वर्तते । रसात्मकक्षेत्रे काव्यकलाशिल्पानामतिशयो राजते । तेभ्यो हृदय-द्वारानन्दः प्राप्यते । सेवात्मकक्षेत्रे शीलानामात्मगुणानां चाभिवृद्धिः सामाजिकसंविधाने धर्मव्यवहारेण क्रियते ।[2] अनेनैव 'परोपकाराय सतां विभूतयः' 'वसुधैव कुटुम्बकम्' 'आदानं हि विसर्गाय' 'परोपकारः पुण्याय' 'एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये' इत्यादयः शिष्टाचारस्य प्रकाशस्तम्भाः सनातनाः सन्ति ।

चतुर्षु क्षेत्रेष्वनन्तोऽयमुन्नतिपथः । निरवधिकालं मानवो ज्ञानेन, दर्शनेन, रसवृत्त्या, धर्मभावेन चाधिकतरानन्दस्य प्राप्तये यत्नं करिष्यति । प्रकरणमिदमधिकृत्य मानवो बुद्धे-

---

१. तद्यथा गौतमेन त्रिविधं शरीरं व्याकृतम्—स्थूलं, सूक्ष्मं, मनोमयरूपं च । एतेषां प्रत्येकशो भोगा-नुरूपो भवति आनन्द-विषयः [दीघनिकाये पोट्ठपादसुत्ते] रवीन्द्रनाथठक्कुरेणापि मानवस्या-वस्थात्रयं प्रतिपादितम्—प्राकृतिकम्, नैतिकम्, आध्यात्मिकं च । शान्तिनिकेतने पृ० २०० ।

२. एतस्य परमोदाहरणं मृच्छकटिके चारुदत्तः—'दक्षिणतया परकीयमिवात्मानमवगच्छति शरणागत-वत्सलश्च' ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रध्यात्मवृत्तेः, सौन्दर्यभावनायाः, शीलभावस्य च नित्यमेव संवर्धनं कृतवान् करिष्यति च। इयमेव संवर्धनप्रक्रिया मानव-संस्कृतिरिति ख्याता। संस्कृतिर्मानव-जीवनस्य कला, व्यक्तित्वस्य विकसनं वा भवति।[१]

संस्कृतेरुपकरणानि

प्राकृतिकदशा

सांस्कृतिकप्रवृत्तयः प्रधानतः प्रकृतिप्रदत्तसाधनै रूप्यन्ते। मानवस्तु प्रकृतिप्रदत्तवस्तुभिर्जीवनधारणं करोति। प्रकृतिश्चेदुदारा, तर्हि स्वल्पश्रमेणैव जीवनोपाया लभ्यन्ते। तया प्रभाविता जनाः स्वयमेवोदारा जायन्ते। प्रकृतिश्चेद् दुस्साध्या भवेत्तर्हि कठोरश्रमेण जीवनोपायानुत्पादयन्तो जनाः स्वयमेव कठोरा भवन्ति। मानवः प्रथमं प्रकृतेरेवौदार्यस्य सहिष्णुतायाश्च शिक्षां गृह्णाति। प्रकृते रम्यप्रदेशेषु मनीषिणो दार्शनिकमाध्यात्मिकं च तत्त्वं विदन्ति। कलाविदः प्रकृतेरुपादानानि गृहीत्वा तस्याः सौष्ठवं सौन्दर्यं च काव्यचित्रमूर्तिवास्तुभिर्व्यञ्जन्ति। प्राकृतिकसंविधानानुरूपं हि भारतस्य सांस्कृतिकं सामाजिकं राजनीतिकमैक्यं विकसितम्।

राजनीतिकदशा

सांस्कृतिकविकासे राजनीतिकस्थितीनां प्रभावो वरीवर्ति। प्राचीनयुगे राजा संस्कृतेः संरक्षकोऽभवत्। 'यथा राजा तथा प्रजाः' इति सिद्धान्तानुसारं राज्ञो गुणाः प्रजासु प्रतिबिम्बिता अभवन्। राज्ञो रुचिमनुवर्त्य सांस्कृतिकसंस्थानां प्रादुर्भावोऽभ्युदयश्चाभवताम्। भारतस्येतिहासे प्रतियुगं राजनीतिकस्थितीनां सांस्कृतिकसंघटनविघटनयोरुपरि प्रभावः सुप्रकटित एव।

महापुरुषाणां कर्तृत्वम्

महापुरुषाणां कृतिभिराचार्यत्वेन च संस्कृतेरभिनवा दिशा जायते। बहवस्तत्रासन् महर्षय आचार्याश्च तीर्थङ्कररूपेणावताररूपेण वा येषामभावे भारतीयसंस्कृतेः सुषमं स्वरूपं न प्रादुर्भवेत्। आधुनिकयुगे महात्मनो गाँधिमहाभागस्य सांस्कृतिकप्रभावोऽनुत्तम एव।

स्वाभाविकप्रवृत्तयः

कस्यापि राष्ट्रस्य संस्कृतिपथे तत्रत्यनिवासिनां स्वाभाविकप्रवृत्तीनां प्रभावो विद्यते। भारतवासिनस्तु स्वभावतो दार्शनिका भवन्ति परम्परावादिनश्चाङ्गलदेशवासिनः। ईदृशीनां प्रवृत्तीनां प्रतियुगं संस्कृतिविन्यासे छाया प्रतिफलति।

---

१. संस्कृतिशब्दः प्रथमं यजुर्वेदे ७.१४ वर्तते। 'सा संस्कृतिर्विश्ववारा' इति। ऐतरेयब्राह्मणेऽपि निगदितम्—आत्मसंस्कृतिर्वाव शिल्पानि—एतैर्यजमान आत्मानं संस्कुरुते। ६२.५.१। उभयत्र संस्कृतिशब्दः प्रायोऽस्मिन्नर्थे प्रयुक्तः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपरिनिर्दिष्टोपकरणानुसारं भारते कश्चिद् विशिष्टः समायोगः समुदभवत् । तस्मिन्नेव संविधानके भारतीयसंस्कृतिः सम्यग् विकसिता । तदेव सम्प्रति पर्यालोचनीयम् ।

सांस्कृतिकसमायोगः

प्राकृतिकभूमा

'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति । भूमैव सुखं भूमा त्वेव विजिज्ञासितव्यः' इति छान्दोग्योपनिषदि सन्देशः । नित्यमेव भूमात्मसात्करणीय इति समुद्दिश्य सन्ध्याविधौ 'भूर्भुवः स्वः' पदानि मानसे भावितानि । अनेन पाठेन मानवस्योपभोगपरिधौ पृथिव्या सह वायुलोकः स्वर्गलोकश्च समाविष्टौ । अमुना विचारेण मानवः शरीरकुटुम्बग्रामराष्ट्रादिभ्यः परिधिभ्यो बहिर्निर्गतो भूमानमन्वभवत् ।[1]

इयमेव सा निःसीमता, यया भारतीयानां व्यक्तित्वमतिशयोदात्तं निर्मापितम् । तेषां मानसपटले पृथिव्या आकाशलोकस्य च समृद्धिः सौन्दर्यञ्च प्रतिबिम्बिते । अधुनापि स एवाकाश अस्माकमावरणम् । दिवा तस्य नीलिमा रात्रौ चागणिततारकाणां प्रभा रमणीयतमौ; किन्तु पृथ्वी प्राचीनयुगे भव्यतरासीत् ।[2] वैदिकयुगे पृथिव्या औदार्यं कविना गीतम्—

भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम् ।
संविदाना दिवा कवे श्रियां मा धेहि भूत्याम् ।। अथर्व० १२. १. ६३

पृथिव्या गुणानुरूपं राष्ट्रियचरित्रं विकसितम् । तस्याः सान्निध्ये ऋषिणोच्चरितम्—

यद्वदामि मधुमत् तद् वदामि यदीक्षे तद्वनन्ति मा ।
त्विषीमानस्मि जूतिमानवान्यान् हन्मि दोधतः ।। अथर्व० १२. १. ५८

भारतभूमेः समतलत्वेन तस्यां विन्यस्तपथानां सारल्येन मानवजीवने समत्वं कार्यपद्धतौ चार्जवं प्रतिफलिते ।

भारतीयप्रकृतेर्महत्त्वपूर्णोपकरणानि—पर्वताः, नद्यः, समुद्राः, वनानि, ऋतवः, पशुपक्षिणश्च सन्ति । एषां सांस्कृतिकप्रभावः परीक्षणीयः ।

भारते हिमालयः श्रेष्ठपर्वतोऽस्ति । अस्माकं देशस्यैक्यं हिमालयेन समुद्रैश्च सुरक्षितम् । चतुर्दिक्षु सुरक्षिते भारते पुरा वैदेशिकाः स्वल्पसंख्यका एवागताः । तेऽपि भारतीयसंस्कृतौ रञ्जिताः । हिमालयस्तु तपोभूमिः विद्याभूमिश्चाभवत् । अत्रैव विद्यार्थिनस्तपस्विनश्च सुखेन निवसन्तोऽनायासेनैव जीवनधारणायावश्यकवस्तूनि प्राप्तवन्तः । हिमालयानुरूपमेव तेषामाध्यात्मिकदर्शनं प्रस्फुटितम् । अधुनापि बदरी-कैलास-गौरी-नन्दाप्रभृतीनि सोहर-

१. अथर्व० १२. १. ५३
२. आधुनिकयुगे वनानि नष्टप्रायाण्येव कासारजलाशयाश्च शोषिता एव क्षेत्रीकृताश्च, नद्योऽपि प्रणालीप्रवाहेण शुष्का एव वर्तन्ते । पर्वतप्रदेशे नवीनसंस्कृतिप्रवणा जना वसतिं विधाय तत्रत्यनैसर्गिकशोभामपहरन्त्येव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थानानि महर्षीणां कीर्तिस्तम्भरूपेण सम्मानितानि। महर्षीणामुपदेशं समादृत्य सन्तोऽद्यापि तेषां माहात्म्यं समीकर्तुं हिमालयं पर्यटन्ति। हिमालयस्तु तीर्थमेव।

अन्येषामपि पर्वतानां न्यूनाधिकं हिमालयवत् प्रभावो लक्ष्यते। रामायणानुसारं चित्रकूटस्य रमणीयता रामस्य मनोभावेन व्यज्यते। तद्यथा

न राज्याद् भ्रंशनं भद्रे न सुहृद्भिर्विना भवः।
मनो मे बाधते दृष्ट्वा रमणीयमिमं गिरिम्॥

दक्षिणभारते विन्ध्यमेकलमलयमहेन्द्रसह्यादीनां गिरीणां समाहारो वर्तते। आसु पर्वतमालासु बह्वो गुहा निर्मिताः। वनान्तरमणीयासु गुहासु धर्माणां दर्शनानाञ्चोन्नायका अवसन्। अस्मिन् पर्वतप्रदेशे नैसर्गिकरमणीयतामाश्रित्य मानवस्य कलात्मकप्रवृत्तयः चित्रमूर्तिवास्तुरूपाः प्रस्फुटिताः।

नदीभिः पर्वतप्रदेशेषु समतलप्रदेशेषु च तत्रत्यनिवासिभ्यो जीवनोपाया उपायनीकृताः। नदीनां तटप्रदेशान् समाश्रित्य मुनीनां नागरिकाणाञ्च वसतयः संवर्धिताः। तासां जलं स्नानाय, पानाय, जलविहारादिमनोरञ्जनाय चाभवत्।

सर्वा नद्योऽन्तःशोधपावनाः सन्ति। तथा हि

सर्वप्रस्रवणाः पुण्याः सरांसि च शिलोच्चयाः।
नद्यः पुण्यास्तथा सर्वा जाह्नवी तु विशेषतः॥

सागरस्य विपुलविस्तारो निरवधिः परिधिश्च मानवस्य परमतामादधाति। पौराणिकमतेन सागरस्य मन्थनमभवत्। ततः चतुर्दशरत्नानि प्राप्तानि। सागरोऽयं विष्णोः शयनमभूत्, वरुणस्य गृहमभवत्, इन्द्रवज्रेभ्यः भीतानां पर्वतानामाश्रयश्चासीत्। भारतस्य समृद्धिमपि सागरः संवर्धयति। बहुविधरत्नमुक्ताफलानि प्रदाय स आत्मनः रत्नाकरत्वं साधयत्येव। नाविकाः सागरस्य परं पारं गत्वा भारतीयं संस्कृतिदीप-पादपं द्वीपेषु महाद्वीपेषु च रोपितवन्तः।

भारतीयसंस्कृतेः निर्माणमरण्यवासिभिर्मुनिजनैरधिकांशतः कृतम्। भारतीयप्रकृतिर्वनभागेषु विशेषोदारतराभवत्। वैदिककालतोऽरण्यानी देवी प्रतिष्ठिता वर्तते, वनस्पतिश्च वनराजो वटवृक्षः सोमश्चास्ति। ऋषिभिर्वनानि रम्याणीति गीतम्। वनभागेषु यत्र जीवनोपायाः—जलानि फलकुसुमादीनि–सुलभा आसन्, तत्र महर्षीणामाश्रमाः स्थापिताः राजभिश्च नववसतयः कारिताः। रामायणे निगदितं वनसौरभं स्पृहणीयमेव—

पश्य रूपाणि सौमित्रे वनानां पुष्पशालिनाम्।
सृजतां पुष्पवर्षाणि तोयं तोयमुचामिव॥
पुष्पसंछन्नशिखरा मारुतोत्क्षेपचञ्चलाः।
अमी मधुकरोत्तंसाः प्रगीता इव पादपाः॥

एषु वनेषु निवसद्भिर्महर्षिभिः संस्कृतेः सर्वाङ्गसम्पन्ना धारा प्रवाहिता। तस्यां न

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केवलं भारतवासिनोऽपि तु वैदेशिका अपि सततं निष्णाताः ।[1] ठक्कुरेण रवीन्द्रनाथेन वनानामनुपमा सांस्कृतिकोपयोगिता सन्दिष्टा—'यदि भारता योरपीयसांस्कृतिकपद्धतिमनुसरन्ति तर्हि न ते योरपीया भवन्ति किन्तु केवलं दूषितभारता एव भवन्ति । अनेनैव कारणेन तेषां सिद्धान्तानामनुसन्धानमेवास्मकं परं कर्तव्यं वर्तते यैर्भारताः स्वकीयात्मानं अवगच्छन्तु। न ते सिद्धान्ता व्यापारे राष्ट्रियभावनायाः संवर्धने वान्तर्हिताः। सा विश्वात्मकभावना सर्वेषामभ्युदयाय वर्तते । न सा केवलमात्मज्ञानेन सीमिता, वरमात्मविजयस्वरूपिणी सा समर्पणमेवात्मनः । प्राचीनभारतीयवनेषु प्रथममेव तेषां सिद्धान्तानामवबोधोऽभवत् । वनेषु तेषु सिद्धान्तानुसारमाचरणपद्धतिः स्वीकृता । उपनिषदि प्रथमघोषणा विद्यते तस्य सत्यस्य; गीतायां तस्य व्याख्या च कृता । बुद्धस्तु सांसारिकतां परित्यज्याखिलमानवतायै तं सन्देशं सुलभं कर्तुं प्रायतत ।[2]

भारतीयवनसम्पत्तिः सदैव देशेषु विदेशेषु च बहुमूल्याभिमता। भारतीयकाष्ठं सहस्रयोजनदूरेऽपि विदेशे भवननिर्माणाय प्रेषितम् । चन्दनैः पत्रपुष्पैश्च प्रसाधनानि रचितानि। वन्यपशुचर्मणोर्णेन च बहुविधानि परिच्छदादीनि वस्तूनि निर्मितानि । इत्थं राष्ट्रस्यौद्योगिकाभ्युदयेऽपि वनानां महत्त्वं विशिष्टमेवासीत् ।

ऋतुसौरभम्

भारतीयप्रकृतेश्चारुता ऋतुक्रमेण विपरिवर्तते । षड्तुक्रमेण वर्षे षड्रूपाण्येव प्राकृतिकपरिधानानि जायन्ते । न कोऽपि ऋतुः कदापि तावत् कठोरः भवति येन पीडिता जनाः कार्यविरता भवेयुर्न च कस्मिन्नपि ऋतौ भोजनपानवस्त्रादीनां वैशिष्ट्येन विना जीवनयापनं दुर्भरं जायते । प्राचीनभारते प्रायः सर्वेषु प्रदेशेषु अधिकतरा वर्षा न्यूनतरोष्णता चास्ताम् । ऋत्वनुसारं भोजन-परिधान-प्रसाधन-व्रत-मनोरञ्जनादीनि व्यवस्थापितानि ।

ऋतूनां प्राकृतिकमनोहारितामनुसृत्य कविभिश्चित्राचार्यैश्च कलाकृतयः समुद्भाविताः । कालिदासस्य ऋतुसंहारे स्पष्टमेतत् ।

राजनीतिकमान्यता

राजा तु भारते देव इति सम्मानितः । देववद्राजाऽपि लोककल्याणाय सदैव सचेष्टो भवत्विति राजनीतिकजीवनस्य प्रथमा मान्यता । इन्द्रविष्णुवरुणादिभ्यः प्रजापालनस्य रीतिः प्रचिता । एषां देवानामंशावतारो भवति राजेति भारतीया धारणा ।

राजा वर्णाश्रमधर्मस्य संरक्षक इति शास्त्रवचनम् । सर्वेष्वाश्रमेषु वर्णेषु च वर्तमानानां

---

१. तेषामृषीणां कुटीरा भारतीयसंस्कृतेः परमोत्साः । तत्रैव राजापि समागत्य नतमस्तकोऽभवत्, ऋषिपथं च स्वीचकार । तेषामेवादर्शान् सर्वे समीकर्तुं समीहन्ते स्म । न खलु राजधानी पुरा संस्कृतेः केन्द्रमभिमतं सताम् ।

2. The Message of the Forest.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रजानां व्यक्तित्वस्य परमविकासाय, तासां कर्तव्ये नियोजनमकर्तव्यान्निवारणं च राजधर्मः। भारतीये साहित्ये पुराणेतिहासे च बहूनामादर्शनृपाणां चरितगाथाः सन्ति तेषु राम-युधिष्ठिराशोक-विक्रमादित्यहर्षभोजादयो वरेण्याः।

राजनीतिस्तु भारते मन्वादिभिः स्मृतिकारैः शाश्वतं व्यवस्थापिता। तदनुसारं मनोः सनातनशासनपद्धतिः सामान्यतो वैदेशिकशासकैरपि भारते प्रचारिता। अस्यां स्थितौ भारते सांस्कृतिकजीवनस्य शृंखला अनवच्छिन्ना वर्तन्ते।

ऐतिहासिकसंघटनम्

प्राचीनकालादेव सदा भारतेऽनेकधर्मावलम्बिनोऽनेकभाषाभाषिणश्च निवसन्ति।[१] सर्वेषामेव तेषां यथाकालं परस्परं सम्मिश्रणं समभवत्। इत्थमेका राष्ट्रियता संस्कृतिर्निर्मिता, राष्ट्रभाषा समुदभवच्च।

देवासुरमानवराक्षसगन्धर्वनागादयो वैदिकसाहित्ये वर्णिताः सन्ति। अन्येऽपि बहवो जनसमूहा महाभारते, रामायणे, नाटयशास्त्रे चोल्लिखिता यवन-किरात-गान्धार-चीन-शबर-बर्बर-शक-तुषार-कङ्क'पह्लवान्ध्र-मद्रक-पौण्ड्रपुलिन्द-रमठ-काम्बोजाश्च। एतेषां प्रत्येकस्य प्रथमं विशिष्टा सत्ता संस्कृतिश्चास्ताम्।[२] कालान्तरे पारस्परिकसम्मिलनेनास्तित्वमपि तेषां विलुप्तप्रायमेव।

ऐतिहासिकयुगे ग्रीकशककुशनहूणादयो ये केचिद्भारते आगतास्तेषां संस्कृतिर्भारतीयसंस्कृतौ समीकृता।

महापुरुषाणां प्रभावः

महापुरुषाणामप्रतिमप्रभावो भारतीयसंस्कृतौ वर्तते। प्रथमं वैदिकदेवेषु कतिपयाः—इन्द्ररुद्रविष्णुवरुणादयः स्वकीययुगानां महापुरुषा एवासन्। कालान्तरे तेषां व्यक्तित्वं तादृशमेव दिव्यगुणैः समनुगमितं यथा रामकृष्णबुद्धादीनां महापुरुषाणमवतारत्वं संजातम्। शिवविष्णुगौतमादीनां चरितगाथाभिर्भारतीयसंस्कृतिः काव्यकलाधर्मदर्शनादिषु प्रभाविता।

परवर्तिवैदिकयुगे याज्ञवल्क्याजातशत्रुजनकादयो महर्षय उपनिषत्सु वेदान्तदर्शनस्याध्यात्मिकसाधनायाश्चादर्शं प्रस्थापयामासुः। वैदिकेतरसंस्कृतेः तीर्थङ्कराणां बोधिसत्त्वानां चाविर्भावः संजातः। कालान्तरे ऋषिपरम्परायां शङ्कररामानुजादीनां प्रादुर्भावोऽभवत्। सर्वे च ते सनातनाचार्या भारतीयसंस्कृत्यै काञ्चिदभिनवां प्रदीप्तिं प्रदायास्माकं राष्ट्रं तामसिकप्रवृत्तेः परित्रातवन्तः।

सामाजिकेभ्योऽभिरामजीवनदर्शनप्रदानेन महाकवीनामतिमात्रं श्रेयो विद्यते। आदि-

---

१. जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्। अथर्ववेदे १२. १. ४५

२. आधुनिकनृतत्त्वविज्ञानानुसारं भारतीयसमाजे आर्य-नेग्रिटो-प्रोटोआस्ट्रालायड-मंगोल-भूमध्यसागरीयद्राविडादीनां सम्मिश्रणं वर्तते।

Nepal Sanskrit Academy, Kathmandu Collection

कविर्वाल्मीकिर्व्यासश्च रामायणमहाभारतादिषु राष्ट्रनिर्माणाय यां पद्धतिं चक्रतुस्तामेवानुसृत्याश्वघोष-कालिदास-भारवि-श्रीहर्षादयो भारतेभ्यः सततजागरणस्य सन्देशमददुः। पूर्वाचार्याणां कलाविज्ञानशास्त्रादीनां परम्परा सानुबन्धा विद्यते।

स्वाभाविकमान्यताः

स्वभावत एव भारतीया देवपराः सन्ति। पञ्चतत्त्वानि सामान्यतः शिवतनुरिति सम्मितम्। सर्वं खल्विदं ब्रह्मेति महावाक्यं जगतो दिव्यतां निदर्शयति। आचार्यातिथि-माता-पितृ-गो-ब्राह्मण-सूर्य-चन्द्रादय ऋषिभिर्देवा एवाभिमताः अनेन प्रकारेण भारतवासिनां जगदिदं सर्वदेवमयं विद्यते। अस्मिन् दिव्यसन्नियोगे मानवस्य व्यक्तित्वं प्रकृत्यैव दिव्यं भवति।

अपरा विशेषता भारतीयस्वभावस्य दिक्कालावच्छिन्नानि वस्तूनि प्रत्यनुरागाधिक्यमेव। अस्यां दशायां न कापि सांस्कृतिकधारा कदापि सर्वथा विलुप्ता। केवलं निकटस्थमेव समाराधनं नार्हति, अपितु दूरस्थमपि लोकानुग्राहकं वस्तु पूज्यते। तथा हि हिमालयो गङ्गा च भारतस्य दूरस्थभागेष्ववस्थितानां लोकानां दर्शनीयो अर्चनीयौ च मन्येते। अधुनापि प्राचीनयुगस्य वेशविन्यासधर्मादयो बहुभिर्धार्यन्ते भारतीयसमाजे। प्राचीनयुगस्य वीरगाथा, महर्षीणां ज्ञानदर्शनानि च लोकः स्वीकर्त्तुं समुत्सुको वर्तते।[1] काव्येषु दर्शनग्रन्थेषु च पुरातनप्रवृत्तीनां नवावतारः समीहितः। तद्यथा प्रतिपादितं मनुना—

येनास्य पितरो याता येन याता पितामहाः।
तेन यायात् सतां मार्गं तेन गच्छन्न रिष्यते॥

सांस्कृतिकप्रवृत्तिषु ज्ञानेन्द्रियैरनुभूतानि तत्त्वानि तावन्मात्रमुत्कृष्टानि न सम्मितानि यावद् योगदृष्टिभिः परिगृहीतान्यध्यात्मतत्त्वानि। अनया दिशा ऋषीणां वाणी परमप्रमाणरूपमाप्तवचनमेवाभिमता। इत्थं चाध्यात्मसुखं सर्वोच्चमिति परमाशयः।

दर्शनक्षेत्रे भारतस्य विचारस्वातन्त्र्यं सुव्यक्तमेव। वैदिकदर्शनमाश्रित्य परस्परविरोधिनामपि षड्दर्शनानां प्रवर्तनमद्भुतमेव प्रतिभाति। संस्कृत्याः संवर्धनायान्येषामपि देशिविदेशिविदुषां ज्ञानसम्पत्तेः स्वीकरणे भारतीयाः सदैव तत्परा आसन्। अनेन प्रकरणेन भारतीयस्वभावस्य सहिष्णुता परिचीयते।

उपर्युक्तैः सांस्कृतिकतत्त्वोन्मेषकैः समायोगैर्भारतीयसंस्कृतेः कानिचिद् वैशिष्ट्यानि संजातानि। तेषां पर्यालोचनं विधेयम्।

---

१. अधुनापि कर्णाटप्रदेशे बहवो ब्राह्मणा वेदोपनिषदः कण्ठाग्रं कुर्वन्ति, कृष्यादिकर्मसु निरता वेदपाठं कुर्वन्ति च। राजेन्द्रप्रसाद की आत्मकथा पृ० ५११

Owing to the remarkable continuity of Indian culture the religions and social institutions of modern India are constantly illustrated by those of the past, Macdonell: History of Sanskrit Literature Preface Page VII

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सांस्कृतिकवैशिष्ट्यम्

देवर्षिपरायणता

'सर्वं देवमयम्' इति प्रागेव निर्दशितम्। एकस्मात् पुरुषाद् ब्रह्मणो वा जगतः सृष्टिविकासं मत्वा तस्मिन् ब्रह्मणि लय एव जीवनोद्देश्यमिति निश्चित्य मुक्तिः सम्भाविता। एकदेवादाविर्भूतानिन्द्रप्रमुखान् सुरानुद्दिश्य यज्ञाराधनपूजादिकं विहितम्। एषां देवानां प्रसादेन स्वर्गप्राप्तिरिति भारतीयधर्मस्य प्रधाना प्रवृत्तिः।

भारतीयाः प्रवृत्तयः सामान्यतो देवपराः सञ्जाताः।[1] भारतास्तु देववाणीमब्रुवन्, तेभ्यो वैदिकनिधिरपि देवेभ्यः प्राप्तः। ते सत्कर्मसु व्यापृता आसन्, यतो देवाः सत्कर्मभिः प्रसन्ना भवन्ति। असत्कर्मणस्ते भीता आसन्, यतः पापकारिणो जनान् देवा दण्डयन्ति। गीतानुसारं तु—

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥ ९·२७

प्राचीनयुगे ब्रह्मचारिणो ब्रह्मसंस्था भवितुं ब्रह्मचर्यमचरन्। ते एव मूलरूपेण ब्राह्मणा आसन्। गृहस्था ब्रह्मयज्ञे शिष्येभ्यो ब्रह्मज्ञानं दत्तवन्तः, देवपितृयज्ञयोर्देवार्चनं कृतवन्तः, भूतयज्ञे सर्वेषां प्राणिनां दिव्यस्वरूपं हृदि धारयन्तः तेभ्यो भोजनं दत्तवन्तः, अतिथियज्ञे च विष्णुरूपमेवातिथिमागतं मत्वा तस्य सत्कारं कृतवन्तः। वानप्रस्थाः तपसा तत्त्वज्ञानेन च ब्रह्मविद्यारहस्यं ज्ञातुमयतन्त। संन्यासिनस्तु ब्रह्मसंस्था एवाध्यात्मिकमानन्दमन्वभवन्। देवपरा एव सर्वेषां कलाशिल्पानां विकासाः सामान्यतः परिभाविताः। इदमेवानुसृत्य गीतायां दर्शितम्—

देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥

इमामेव देवपरायणतामाश्रित्य राष्ट्रस्य सांस्कृतिकमैक्यं सुप्रतिष्ठितं 'वसुधैव कुटुम्बकम्' इति भावना समाधारिता च। जैना बौद्धाश्च देवसंस्कृतेर्विपरीता बभूवुः।

यथा देवास्तथैव ऋषयस्तु सर्वैर्भारतवासिभिः स्वकुलस्य प्रथमपुरुषा एव सम्मानिताः। तेषामृषीणां चरितानि लोकानामादर्शभूतानि काव्यकलेतिहासादिषु गीयन्ते। महापुरुषा अपि ऋषिभिस्तुल्या राष्ट्रचरित्रनिर्मातारः सन्ति। तथा हि—

यद्यदाचरते श्रेष्ठस्तत्तदेवेतरो जनः॥

धर्मपरता

भारतीयसंस्कृतौ धर्मपदस्यातिव्यापकवृत्तिर्वर्तते। जीवनस्य प्रथमश्वासतोऽन्तिमश्वास-पर्यन्तं प्रतिक्षणं मानवेन कथं व्यवहर्तव्यमिति धर्मो बोधयति। सर्वेषां वर्णाश्रमाणां सर्वेषां

---

१. तथा हि—यद्देवा अकुर्वंस्तत् करवाणीति शतपथे ६.३.२६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पदानां चाधिष्ठातॄणां कर्तव्याकर्तव्यावबोधनं धर्मेण कार्यते। धर्मशास्त्रेषु संस्कारविधिः, आश्रमव्यवस्था, जाति-व्यवस्था, भोजन-पानालङ्करणावासादि-व्यवस्था, मनोरञ्जनविधानम्, राजनीतिः, शिल्पकलादर्शाः सर्वाण्यपि सम्यक् प्रकाशितानि। भारतीयबौद्धिकगवेषणा प्रायो धर्मप्रवणाभवत्। तद्यथा प्रतिपादितं मैकडानलमहोदयेन The intellectual life of Indians has, in fact, all along been more dominated by religious thought than that of any other race[1].

सर्वजनीनता

भारतस्यातिविशाले प्राङ्गणे बहूनां सांस्कृतिकसमुदायानामाचार-व्यवहार-परम्पराः क्रोडीकुर्वन्ती भारतीया संस्कृतिरवश्यमेव सर्वजनीनतामुद्वहति।

आध्यात्मिकता

प्राचीनयुगे भारता ऐहलौकिकीषु पारलौकिकीषु च प्रवृत्तिषु समानमेव समुन्नता बभूवुः। अध्यात्मपथिका यथाशीघ्रमाधिभौतिकपरिग्रहान् परित्यज्य मोक्षपरायणा अभवन्। ईदृशा मोक्षपरायणाः साधवः सर्वाधिकं सम्मानिता बभूवुः। सम्राजोऽपि तेषां समक्षं नतमस्तका अभवन्। अस्यां दशायां राजापि गृहस्थाश्रमं परित्यज्य वानप्रस्थे प्रवृत्तः सन्नात्मनः पदवृद्धिमेवामन्यत।

सर्वाङ्गीणता

सर्वेषां वर्णानामाश्रमाणां च विकासं प्रस्तावयति भारतीया संस्कृतिः। तत्र देवलोकः, राजप्रासादः, कृषाणकुटीरः, शिल्पागारः, तपोभूमिश्च एते सर्वे कथं रूपिताः सन्तो महत्तमलोककल्याणं विधास्यन्तीति प्रथमा विचारणा। धर्मार्थकाममोक्षाणां चतुर्वर्गाणां स्थापनया जीवनस्य पूर्णता सम्यग्विलसति भारतीयसंस्कृतौ।

कर्मफलम् जन्मान्तरवादश्च

सर्वासु भारतीयसंस्कृतिषु कर्मफलस्यानिवार्यता वर्तते। कर्मणः फलमस्मिन्नेव जीवने प्राप्यत एव, अतःपरमपि मरणोत्तरकाले स्वर्गे, नरके, नानाविधयोनिषु परिभ्रमणेऽपि कर्माणि न त्यजन्ति कर्त्तारम्। अयं विश्वासः सदाचारस्य महानाधारः।

सत्याग्रहः

समीहितं यथेष्टमुचितं वा स्वामिनः कारयितुं प्रेरणा सत्याग्रहेण समुद्भावितेति विशिष्टा पद्धतिर्भारतवासिनां वर्तते। कठोपनिषदि नचिकेतसः, रामायणे भरतस्य, पुराणे प्रह्लादस्य तादृश्यः कथाः प्रथिताः सन्ति। राजतरंगिणीवर्णनानुसारं तु बहुषु स्थानेषु ब्राह्मणाः प्रायोपवेशेन राज्ञो न्यायोचितपथं प्रचरितुं प्रेरितवन्तः। कश्चिद् गोपालो राजानमन्यायपथाद् विरमयितुमग्निशरणमवापेति तत्रैवोल्लिखितम्—

चरके धर्मधनूनामुत्तब्धेऽपि तदाश्रितैः।
वह्नि गोपालकोऽप्येकः कारुण्यप्रवणोऽविशत्॥ राजत० ८.२२२६

---

१. A History of Sanskrit Literature P. 7

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वे सुखिनः सन्तु

आत्मसुखाभिलाषुका बहवस्तत्र सन्तु सर्वत्र, किन्तु सर्वेषां सुखाय यत्नकारिणो भारतीयसंस्कृतौ एव प्रतिष्ठिता बभूवुः।[१] इदमेव निर्वार्य सुकृतिन आत्महिताय स्वल्पवस्तूनामेवोपयोगं समीचीनं मन्यन्ते। अस्यां दशायां परेषां शोषणमसम्भवं भवति। 'सर्वे सुखिनः सन्तु' इत्यस्य सिद्धान्तस्य श्रेष्ठानुयायी महाराजोऽशोकोऽभवत्। तस्य मतेन यत्किञ्चित् सत्यं शिवं सुन्दरं चास्ति तत् सर्वेषामेव भवतु।

सनातनता

भारतीयसंस्कृतौ कतिपयसनातनादर्शा राजन्ते। न ते परिवर्तनमर्हन्तीति लोकधारणा। तद्यथा—वेदानां प्रमाणं, सत्याहिंसादीनां पालनं वा। त एवादर्शा भारतीयां संस्कृतिममरीकुर्वन्ति। तद्यथा ऋषेः प्रार्थनास्ति।

मा नः पथः पित्र्यान्मानवादधि दूरं नैष्ट परावतः। ऋ० ८.३०.३

निःसीमता

संस्कृतेः सर्वेषु क्षेत्रेषु निःसीमता स्पष्टमेव वर्तते। सांस्कृतिकाभ्युत्थानाय बहुविधा योजनाः कृताः; किन्तु तासां निर्मातारः कदापि स्वयोजनायाः सर्वोत्कृष्टत्वं न प्रत्यपादयन्। नित्यं नवीनतरा मान्यताः स्वीकृताः। विज्ञानशिल्पकलादिष्वपि सर्वत्र नवीनाः प्रयोगाः समीकृताः। विशालेऽस्मिन् भारतप्राङ्गणे भारतीयसंस्कृतेः विविधदृश्यावलीभिः समलङ्कृता निःसीमता समन्वयात्मिका वर्त्तते। दार्शनिकभूमौ निःसीमतायाः सर्वोच्चविकासो गीतायां लभ्यते। निस्सीमतया बहुसंख्यकानां वर्गाणामेकसूत्रेणोपनिबन्धनं सम्भावितम्।

तपसःफलोत्पादकत्वम्

भारतीयसंस्कृतौ तपसः प्रभावोऽत्युच्चोऽभिमतः। सृष्टेः समारम्भ एव प्रजापतेस्तपसोऽभवत्। सर्वेषु आश्रमेषु धर्मेषु, पराक्रमेषु च तपसैव सिद्धिः समाम्नाता। तपस्तु त्यागस्य परमं रूपम्

भारतस्यैक्यम्

भारतस्यैकत्वं प्राचीनयुगे सदैव सम्प्रतिष्ठितमासीत्। न केवलं भारतवासिनोऽपितु वैदेशिकविद्वांसोऽपि कश्मीरप्रदेशात्कन्याकुमारीपर्यन्तं सिन्धुतो ब्रह्मपुत्रपर्यन्तं च भूभागमेकदेशमेवामन्यन्त।[२] विष्णुपुराणेऽस्य देशस्यैकत्वमनेन श्लोकेन निर्दशितम्—

---

१. माता यथा नियं पुत्तं आयुसा एकपुत्तमनुरक्खे।
एवं पि सब्बभूतेसु मानसं भावये अपरिमाणं। सुत्तनिपाते मेत्तसुत्तं ७
साम्त्वनेनान्न प्रदानेन प्रियवादेन चाप्युत।
समदुःखसुखो भूत्वा स परत्र महीयते॥

२. ह्वेनसाङ्गो भारतस्यैकत्वं क्षेत्रं च निदर्शयन् लिखति—The Whole territory was about 9000 li in circuit, with snowy mountains on the north and the sea on its three sides. ग्रीसादिदेशानां विदुषामपि मतमीदृशमेव वर्तते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥ २·३१

जम्बूदीपस्य प्रधानमेकं वर्षं भारतं सुप्रसिद्धमेव ।

भौगोलिकदृष्टया स्पष्टत एको विश्लिष्टभूभागः प्रतिभाति भारतम् । भारतीयेतिहासे सततमेवास्य देशस्यैकता प्रतिफलति । भारतस्य संस्कृतिप्रकृत्योर्विभूतीनां गणनाप्रसङ्गे प्रायशोऽस्य सर्वभागेष्ववस्थितानां नदीनां गंगा-यमुना-गोदावरी-सरस्वती-सिन्धु-कावेरीणाम्, नगरीणां अयोध्या-मथुरा-माया (हरद्वार) काशी काञ्च्यवन्तिका-द्वारवतीनाम्, पर्वतानां महेन्द्रमलयसह्यशुक्तिमदृक्षविन्ध्यपारियात्राणां चाकलनं क्रियतेऽधुनापि । शङ्कराचार्यस्तु भारतस्य सीमान्तप्रदेशे विश्वविद्यालयरूपान् मठान् बदरीद्वारका-कांची-पुरीषु स्थापयामास । चक्रवतिराजेभ्यः समग्रं भारतमर्थशास्त्रानुसारं चक्रवर्तिक्षेत्रमासीत्, यथा—

तस्यां हिमवत्समुद्रान्तरमुदीचीनं योजनसहस्रपरिमाणं तिर्यक्चक्रवर्तिक्षेत्रम् ।

पुरा भारतस्य सर्वेषु भागेषु संस्कृतभाषा राष्ट्रभाषा विद्वद्भाषा चासीत् । इत्थमेव सर्वभागेषु सर्वेषां विज्ञानदर्शनधर्माणां वेदोपनिषद्रामायण - महाभारत - नाट्यशास्त्रमहाकाव्यादीनां तेषां रचयितॄणां च प्रसरणमभवत् । रामकृष्णमहावीरगौतमशंकराचार्य-विवेकानन्द-महात्मगान्धि-रवीन्द्रनाथादीनां परिभ्रमणोपदेशभूमिः प्रायो भारते सर्वत्रैवाभवत् । देशेऽस्मिन्नधुनापि प्रायः सर्वत्रैव सामाजिकव्यवस्थैकरूपैव वर्तते ।

राजनीतिकविचारेण भारतस्यैकत्वमसन्दिग्धमेव वर्तते। समग्रभारतं सदैवैकच्छत्राधीनं नाभवदिति सत्यमेव । तथापि बहवस्तत्र महाराजा बभूवुर्येषां दिग्विजयप्रवृत्तिर्भारतस्यैक्यमेव राजनीतिकदृष्ट्यापि निदर्शयति । प्राचीनभारते राजा तु मनोः प्रतीकमात्रमेवासीत् । कस्मिंश्चिदपि काले भारतस्य विभिन्नभागेषु राजमाना बहवो राजान एकस्य मनोरनेकरूपाण्येवासन् । अस्मिन् प्रसङ्गे राज्ञो महत्त्वं न वर्तते । महत्त्वपूर्णं तदासीन्मनुमार्गेण प्रणिहिता राजनीतिर्या समस्ते भारते एकैवाभवत् ।

भारतस्य सर्वेषां भागानां जना इतरभागेषु गत्वा तत्र वस्तुं स्वतन्त्रा आसन्, विद्यार्थिनस्तु भारते सर्वेषु भागेषु पठितुं पर्यटन्ति स्म । विद्यावदाता आचार्याः कवयः कलाकाराश्च सर्वेषु जनपदेषु परिभ्रम्य तत्रत्यजनान् पर्यानन्दयन् । तेषां कृतिषु सर्वं भारतमेव प्रतिफलितमासीत् । तद्यथा कल्हणः कश्मीरराजस्य मातृगुप्तस्याभिषेकं वर्णयन् भारतस्य विविधभागानां विभूतीः संस्मरति—

तस्य विन्ध्यतटव्यूढवक्षसः परिनिर्लुठत् ।
सशब्दमभिषेकाम्बु रेवास्रोत इवाबभौ ॥
राजत० ३,२४७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्लोकेऽस्मिन् काश्मीरकः कविर्विन्ध्यस्य रेवायाश्च सौभाग्यसौन्दर्यं विपुलयति उपमाद्वारेण। न कदापि भारतस्य ह्रस्वो विशालो वा कश्चिद् भागः संकुचितमतिभिरपि स्वात्मसंकोचाय परिकल्पितः ।

अपरं च भारते न काप्यासीत् तादृशी राज्यानां शाश्वतसीमा ध्रुवं वा क्षेत्रं यादृशी योरपीयराज्येष्वधुना वर्तते । यः कश्चिदधिकतरं शक्तिशाली राजा बभूव स यथेष्टं क्षेत्रमधिकृत्य स्वराज्यसीमां निर्मितवान् । अस्यां स्थितौ बहुषु राज्येषु स्थितेष्वपि देशस्यास्य साकल्यं न विलुप्तम् । ततो न कदाप्यस्य छिन्नाङ्गत्वं समर्थनीयम् ।

संस्कृतिः सभ्यता च

सभायां साधुरिति सभ्यः । तस्य भावः सभ्यता । कस्यापि मानवस्य समाजस्य वा तान् गुणानधिकृत्य सभ्यता जायते यैस्ते समाजस्य संघटनं कुर्वन्ति, परस्परं संवर्धयन्ति, सौहार्दं सहिष्णुतां च दर्शयन्ति । इत्थं सभ्यातापदेन मानवस्य सर्वोच्चगुणाः सामस्त्येन व्यक्ता भवन्ति । संस्कृतिस्तु कस्मिंश्चिदपि वस्तुनि सर्वोच्चयोग्यताया आधानमेव संक्षेपेण भवति । मानवीयसंस्कृत्या मानवव्यक्तित्वस्य विकासः परिलक्ष्यते, किन्तु तेन विकासेन सार्वजनिकं कल्याणं भवति न वेत्यनिश्चितमेव । कल्याणकारित्वं च संस्कृतेः सभ्यतया संजायते । कोऽपि वैद्यराजः प्राप्तविद्यः संस्कृतोऽपि यदि रोगिणामार्थिकशोषणं करोति तर्हि सोऽसभ्य एव ।[1]

अस्मिन्पुस्तके प्रथमं संस्कृतेर्निदर्शनं क्रियते प्रसङ्गतः सभ्यताया वर्णनमपि भविष्यति । सभ्यतासंस्कृत्योः सामञ्जस्यगतिः सर्वथा प्रशस्ता ।

संस्कृतिज्ञानस्य साधनानि

भारतीयसंस्कृतेर्ज्ञानार्थं सामान्यतोऽस्माकं पूर्वजानां कृतयोऽवशिष्टानि च तासां रूपाणि विदेशतो भारते आगतानां यात्रिणां लेखास्तत्रत्यविदुषां निबन्धाश्च सोपयोगानि सन्ति ।[2] पूर्वजानां कृतयः साहित्यपुराणेतिहास-पट्टावली-वंशावलीशिलालेख-ताम्रपत्र-मुद्रा-शिल्पास्त्र-शस्त्रादिरूपाः प्राप्यन्ते । आसु प्राचीनतमानि प्रस्तरयुगस्यास्त्राण्येव सन्ति । तस्मिन्युगे जनाः काष्ठस्यास्थ्नः प्रस्तरस्य वास्त्राणि निर्मितवन्तः । अस्त्रार्थं धातुप्रयोगोऽज्ञात एवासीत् । दक्षिणभारते 'वेल्लारी' प्रदेशे प्रस्तरयुगस्य बहुसंख्यकान्यस्त्राणि बहुविधान्यपररूपाण्यवशिष्टानि च प्राप्यन्ते । शेषभारतेऽपि इतस्ततः समकालिकावशिष्टानि वस्तूनि लभ्यन्ते ।

साहित्यम्

भारतवर्षस्य पुरातनः साहित्यिकनिधिरतिशयसमृद्धो वर्तते । तत्र प्रथमं स्थानं वैदिक-

---

१. दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥

२. कल्हणेन राजतरङ्गिण्यां [illegible] वर्णितानि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साहित्यस्यैवास्ति। वैदिकसाहित्येन वेदसंहितानां, ब्राह्मणग्रन्थानामारण्यकोपनिषदां च निर्देशो भवति। पश्चात् श्रौतगृह्यधर्मसूत्राणां स्मृतीनां च ग्रन्था वर्तन्ते। प्रायोऽस्मिन्नेव युगे महाभारतरामायणयो रचना कृता। इमे द्वे संस्कृतिज्ञानायाकररूपे स्तः। आभ्यां सह पालिग्रन्थानां रचना समारब्धा। पालिसाहित्यस्य त्रिपिटकानि मूलग्रन्थाः। इमानि समाश्रित्य परवर्तियुगे दर्शनधर्मादिकमधिकृत्य विपुलसाहित्यं विरचितम्। वेदाङ्गानां शिक्षाकल्पनिरुक्तच्छन्दोज्योतिषव्याकरणविषयाणां ग्रन्था वैदिकयुगे विरचिताः। कालान्तरे तेषामभाव एव सञ्जातः, किन्तु वेदाङ्गपरम्परा सदैव सानुबन्धाभवत्। पाणिनिर्व्याकरणमधिकृत्याष्टाध्यायीमरचयत्। तामेव समाश्रित्य पतञ्जलिना महाभाष्यं रचितम्। मौर्ययुगे कौटिल्येनार्थशास्त्रस्य रचना कृता। उपर्युक्तैः सर्वैर्ग्रन्थैः प्राक्खृष्टयुगस्य संस्कृतिधारा परिचीयते।

रामायणमहाभारतयोः शैलीमनुकृत्य परवर्तियुगेऽष्टादश पुराणानि, उपपुराणानि च विरचितानि सङ्कलितानि वा। एषु ग्रन्थेषु सृष्टेरादिकालत एव मानवजीवनस्य सर्वाङ्गीणा विशदा गाथा प्राप्यते। अपराणि च तत्र सन्त्येव नीतिशास्त्राणि कामशास्त्राणि च, यैः समकालिकजीवनस्य लौकिकपक्षः प्रकाश्यते।

खीष्टाब्दसमारम्भादेव भारते काव्यग्रन्थानां प्राचुर्यं वर्तते। तत्र खलु महाकाव्य-रूपक-गद्यकाव्यादीनां महानिचयो वर्तते। अश्वघोष-कालिदासभारवि-भवभूति-बाणभट्ट-माघ-दण्डि-सुबन्धु-श्रीहर्ष-कल्हणप्रमुखा असंख्यास्ते महाकवयो येषां कृतयोऽधुनापि लभ्यन्ते। ततोप्यधिकतरा संख्या तेषां सरस्वतीललितानां, येषां काव्यवैखरी कालेन कवलीकृता।

जैनसंस्कृतेः परिचयार्थमङ्गोपाङ्गपुराणादिकमतिसमृद्धं साहित्यं संस्कृत-प्राकृतापभ्रंश-भाषासु लभ्यते। तामिलभाषायामपि प्राचीनसंस्कृतेरमूल्यानि पुस्तकानि विद्यन्ते।

शिल्पायुर्वेद-यन्त्र-सैन्यविधानादीनि कला-ज्ञान-विज्ञानात्मकान्यधिकृत्य पुस्तकानि वर्तन्ते।

नगरध्वंसावशेषाः

प्राचीनतमसंस्कृतेः सुस्पष्टज्ञानाय प्रायः चतुःसहस्रवर्षपूर्विकायाः सिन्धुसभ्यताया नगरध्वंसावशेषा विशेषमहत्त्वपूर्णा वर्तन्ते।[1] तैरवशेषैः तत्रत्यलक्षाधिकनागरिकाणां जीवनविधिः संस्कृतिर्वा प्रायः सामस्त्येन ज्ञायते। तस्मिन् युगे उत्तरभारतस्य बहुषु स्थानेषु सिन्धु-सभ्यतायाः प्रसारोऽभवत्। विशेषतो राजस्थाने गंगानगरजनपदस्य कालिवंगाग्रामे, उदयपुर-जनपदस्य अहारग्रामे, घग्घरघाटीषु च सिन्धुसभ्यतानुवर्तिन्यो वसतय आसन्नित्युत्खननेन प्रमाणितम्। अन्याः समकालिकवसतयः पंचनद-सौराष्ट्र-महाराष्ट्रोत्तरप्रदेशेषु च प्राप्ताः।

---

१. सिन्धुसभ्यतायाः पुरातननाम डिल्मुन इत्यासीत्। एतन्मतं पेनसिल्वानिया-विश्वविद्यालयस्य डा० सेमुयलक्रेमर-महोदयेन पुरस्कृतम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बहवस्तत्र वर्तन्ते प्राचीननगराणां ध्वंसावशेषाः। तेषु केषाञ्चिदेव खननं सम्पादितम्। तथा हि हस्तिनापुर-तक्षशिला-पाटलिपुत्र-कौशाम्बी-नालन्दादिषु प्राप्ता अवशेषा दर्शनीया एव।

ताम्रपत्रशिलालेखादयः

प्राचीनसंस्कृतेः प्रामाणिकमैतिहासिकं च ज्ञानं शिलालेखस्तम्भलेखताम्रपत्रादिभिरेव भवति। ख्रीष्टाब्दतः त्रिशताब्दं प्रागेवाशोकेन भारतस्य विभिन्नभागेषु शिलालेखाः स्तम्भलेखाश्च प्रतिष्ठापिताः। तेषु लेखेषु महाराजस्याशोकस्य प्रजानामभ्युदयाय संवर्धनाय चोदात्ता नीतिरद्यापि विपुलसन्देशं ददाति। ख्रीष्टाब्दतः त्रिशताब्दं प्रागुत्कलप्रदेशे जैनराजेन खारवेलेन हाथीगुम्फाशिलालेखः कारितः। परवर्तिनो गुप्तस्य यशोधर्मणश्च लेखा प्रमुखाः सन्ति।

प्राचीनकाले दानानि सामान्यतस्ताम्रपत्रैः प्रमाणितानि। ईदृशेषु ताम्रपत्रेषु दानोद्देश्यानि, दातुर्वंशावली, सामाजिकस्थितिश्च प्रायो दर्शितानि। शिलालेखानां ताम्रपत्राणां च सम्पादितसंग्रहा, बहुषु ग्रन्थेषु प्रकाशिता वर्तन्ते।

मुद्राः

मुद्रा अपि पूर्ववदुपयोगिन्यो भवन्ति। तासु राज्ञां प्रमुखेतिवृत्तानि, तेषां राजचिह्नानि, पूज्यदेवतानां प्रतिकृतयश्चाङ्कितानि वर्तन्ते। मुद्राभिः प्रायशः कलाप्रमाणा ज्ञायन्ते। वैदेशिकमुद्राभिर्विदेशव्यापारोऽनुमीयते।

शिल्पकलाः

प्राचीनध्वंसादिषु प्रचुरशिल्पसामग्री विद्यते। सिन्धुसभ्यताया युगात्प्रभृति प्रायः सदैव सर्वत्र च कलाकृतयोऽभवन्। वैदिकजैनबौद्धप्रमुखासु संस्कृतिषु शिल्पकलानामतिशयमाहात्म्यं बभूव। फलतो देवालयस्तूपगुहादयः कलाकृतयः निर्मिताः। न केवलं भारते परन्तु लङ्का-वर्मा-स्याम-जावा-सुमात्रा-बाली-चीन-जापानादिषु देशेषु भारतीयकलाप्रमाणादर्शाः प्रतिष्ठापिताः। शिल्पकलाधिष्ठानेषु प्रायशस्तत्रत्यः समकालिकश्च सामाजिकजीवनविधिः सामस्त्येन निर्दर्शितो वर्तते।

वैदेशिकलेखाः

प्रथमं तु वैदेशिको लेखो मेसोपोटामियाप्रदेशे प्राप्तः। अस्मिन् लेखे वैदिकदेवानां चर्चा विद्यते। अनेन ऋग्वेदस्य रचनाकालादीनां परिचयः प्राप्यते। ततः पश्चाद् ग्रीसदेशस्य यवनयात्रिणामितिहासज्ञानां च निबन्धनं महत्त्वपूर्णं विद्यते। हेरोडोटस-मेगस्थनोज-प्लीनी-स्ट्राबो-डायोडोरसारयनादयः प्रमुखयवनलेखका बभूवुः, येषां कृतिषु भारतवर्णनं विद्यते।

चीनदेशस्य बहवो यात्रिणो भारतीयविद्याभिलाषिणो भूत्वा परिभ्रम्य चास्माकं देशस्य विविधभागेषु स्वकालिकमितिवृत्तं लिखितवन्तः। ह्वेनसांगफाह्यानेत्सिगादयः तेषु यात्रिषु प्रमुखा आसन्। बहवो भारतीयविद्वांसो बृहत्तरभारते तुर्किस्तानचीनजापानेण्डोचीनपूर्वि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वीपसमूहेषु भारतीयसंस्कृतेः प्रचारार्थं गताः। तेषु तेषु देशेषु निवसन्तः तेऽगणितग्रन्थान-रचयन्। तेषु ग्रन्थेषु भारतीयसंस्कृतेर्वर्णनं विद्यते। पूर्विद्वीपसमूहेऽधुनापि रामायणमहा-भारतादिकं समाश्रित्य लिखिता बहवो ग्रन्थाः प्राप्यन्ते। अरबदेशवासिनः कतिपयविद्वांसः सुलेमानाबूजैदुलहसनेब्नखुर्दवादयः भारतीयेतिवृत्तं संक्षिप्तमेव लिखितवन्तः।

सांस्कृतिकयुगविभाजनम्

संस्कृतिमधिकृत्य भारतीयेतिहासस्य त्रयो विभागाः कल्पिताः—प्राचीनः मध्ययुगीनः, अर्वाचीनश्च। प्राचीनयुगं सृष्टेरादिकालादारभ्य खीष्टस्य पश्चात् द्वादशशताब्दपर्यन्तं वर्तते। ततः परं मध्ययुगमारभ्यते। मध्ययुगे भारतीयसमाजो वैदेशिकसंस्कृतीनां प्रवृत्ति-भिरंशतः प्रभावितोऽभूत्। खीष्टस्य पश्चादष्टादशशताब्दपर्यन्तमेव मध्ययुगीनाः प्रवृत्तयो वर्तन्ते। तस्य पश्चात् योरपीयजातीनां समागमेन भारते पाश्चात्त्यसंस्कृतेराविर्भावोऽभूत्। अस्मिन् नवयुगे भारतीयसंस्कृतिः पाश्चात्त्यसंस्कृत्या प्रभाविता लक्ष्यते।

उपर्युक्तसांस्कृतिकयुगविभाजनं तावन्मात्रमेवावितथं यावन्मात्रं गङ्गायास्त्रिभागाः— पर्वतदेशीयः, समतलदेशीयः, सङ्गमदेशीयश्च कथ्यन्ते। वस्तुतस्तु गङ्गाधारा सदाधारा त्वेकैव। तथैव भारतीयसंस्कृतिरेकैव वर्तते। कालान्तरे जातानां परिवर्तनानां विकास-प्रवृत्तीनां च परिचयार्थं त्रयाणां युगानां विभाजनं स्वीकृतम्। अधुनापि प्राचीनसंस्कृति-र्बाह्यतो वैदेशिकसंस्कृतिभिः क्वचित् सम्पृक्तापि भारतीयानामभ्युदयपथं प्रकाशयति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कारः

व्यक्तित्वस्य विकसनमेव संस्कृतिः। संस्कृतेः समारम्भो भारते प्रथमं संस्कारेभ्यो भवति। यत्किञ्चिदपि प्रागाकलितं विकाससौरभ्यं मानवतायां विद्यते, तस्य भावेन भावनमेव संस्कारः। संस्कारेणैव शिशौ मानवतायाः प्रथमोद्बोधो भवति। गर्भाधानात् प्रभृति मरणपर्यन्तं संस्कारविधिना पुरुषस्य शरीरतः मनसश्च शुद्धिर्जायते समक्षं च तस्य भाविजीवनस्योत्थानमयी परम्पराविष्क्रियते[१]। व्यक्तित्वस्य विकासाय तत्सम्बन्धितत्त्वानुशीलनम्, उपदेशश्रवणम्, गुरुजनानां वैदिकमन्त्रैः शुभाशंसा चावश्यमेव प्रभावोत्पादकानीति भारतीयानां धारणा।

भारतीयकल्पनानुसारं सर्वेषु समारंभेषु देवानां सहायता सोपयोगं वर्तते। व्यक्तित्वस्य विकासनेऽपि पदे पदे तेषां सहायता याचनीया भवति। देवाः प्रार्थिताः सन्तोऽदृश्या अपि सहायतां कर्तुं सन्मार्गे नियोजयितुं च प्रस्तुता भवन्ति। संस्कारप्रक्रियासु तेषां समक्षं शुद्धसंस्कृतोन्नतिप्रवणाय भाविजीवनाय प्रतिज्ञा क्रियते।

एषु संस्कारेषु षोडश एव प्रायशो धर्मग्रन्थेषु संगृहीताः। तेषां प्रमुखसंस्कारणां नामानि गर्भाधान-पुंसवन-सीमन्तोन्नयन-विष्णुवलि-जातकर्म-नामकरण-निष्क्रमणान्नप्राशन-चौलोपनयन-चतुर्वेदव्रत-समावर्तनविवाहाः सन्ति। व्यक्तित्वस्य विकासदृष्ट्या ब्रह्मचर्यमतिशयमहत्त्वपूर्णं विद्यते। ब्रह्मचर्यस्यारम्भ उपनयनविधेरनन्तरं भवति। प्रायशः संस्काराः शैशवे सम्पाद्यन्ते।

संस्काराणां सर्वजनीनत्वं प्रत्यक्षमेव वर्तते।[१] शूद्राणां स्त्रीणां च संस्कारा मन्त्रविहीनाः कृताः।

स्त्री-संस्कार-विषये मनुना प्रोक्तम्—

> अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः।
> संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्॥ मनु० २·६६

संस्कारा अपरिहार्या आसन् प्राचीनयुगे। अकृतसंस्कारा जना जातिच्युताश्चाण्डालशूद्राणां समकक्षत्वं प्राप्ताश्चेति प्रमाणितम्। उपनयनं तु द्वितीयं जन्मैव येनार्यो द्विजो भवति।

प्राचीनयुगे पितॄणामत्यधिका चिन्ता पुत्रस्य व्यक्तित्वविकसनाय बभूव। 'आत्मा वै जायते पुत्रः' इति शास्त्रवचनानुसारं पिता स्वयमेव पुत्ररूपेण जायते। अस्यां दशायां

---

१. तथा हि राजशेखरः काव्यमीमांसायाम्—'संस्कारो ह्यात्मनि समवैति, न स्त्रैणं पौरुषं वा विभागमपेक्षते।'

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पिता स्वकीयाभावानपि पुत्रसमृद्ध्या परिपूर्यात्मानं बहु मन्यते स्म । प्राचीनयुगस्य धर्मपरायणतापि संस्कारं सर्वजनग्राह्यं विदधाति स्म ।

गर्भाधानम्

शिशोर्मातुर्गर्भे बीजरूपेण प्रतिष्ठापनं हि गर्भाधानम् । वैदिककालेऽस्मिन्नवसरे विष्णुत्वष्टृ-प्रजापति-सरस्वतीनां स्तवनं कृतम् । वृहदारण्यकोपनिषदि विशिष्टगुणैः समन्वितान् पुत्रान् प्राप्तुं विशिष्टभोजनानां विधानं वर्तते ।

परवर्तियुगे गर्भाधानाय तिथीनां नक्षत्राणां च शुभाशुभत्वं पर्यालोचितम् । विज्ञानसम्मतं प्रतिभाति विधानमिदम् ।[1] गर्भे स्थाप्यमानः शिशुर्मातुर्मानसपटलाङ्कितपुरुषस्य सादृश्यं प्राप्नोति । अत एव हीनाः पुरुषास्ततो न द्रष्टव्या इति केषाञ्चित् शास्त्रकाराणां मतम् ।

मातुः पितुश्चोदात्तविचाराणां सङ्कल्पनम्, तेजस्विपुत्रप्राप्तिकामना, दिव्यशक्तीनां सान्निध्यं चास्य संस्कारस्य वैशिष्ट्यानि । 'संस्कारोऽयं किमात्मनिःश्रेयसाय, उत पुत्रनिःश्रेयसाय । पुत्रनिःश्रेयसायेति प्रमाणम् ।

पुंसवनम्

गर्भस्थशिशोः पुत्रत्वं विधातुं पुंसवनं क्रियते । प्रथमं तावत् देवानां स्तुतयः कृताः, तेभ्यश्च देवेभ्यः पुत्रप्राप्तये वरो याचितः । अस्मिन्नवसरे गर्भरक्षणार्थं पुत्रोत्पत्तये चायुर्वेदोक्तौषधीनां प्रयोगश्च कृतः ।[2] पुंसवनसीमन्तोन्नयनसंस्कारविधिषु समायोजितं सोल्लासं कृत्यं स्वास्थ्यसंवर्धनाय भवति, गर्भस्थशिशोः कल्याणं जायत इति सुनिश्चितमेव ।[3]

वैष्णवसंस्कृतौ पुंसवनार्थं वर्षपर्यन्तं विष्णोः स्तुतिः तस्याराधना पूजा च कर्तव्या इति विहितम् ।[4]

सीमन्तोन्नयनम्

सीमन्तोन्नयनमुत्सवप्रायमभवत् । संस्कारेऽस्मिन् पतिः पत्न्याः केशपाशमलङ्कुर्वन् तस्मिन् सीमन्तमरचयत् । गौणतो गर्भभारक्लान्ता माता प्रमोदिताभूत् । वैदिकयुगे सीमन्तोन्नयनावसरे वीणागाथिनो वीणावाद्यपूर्वकं सोमराजस्य स्तुतिमकुर्वन् । सीमन्तोन्नयनं गर्भाधानात् चतुर्थे मासे सम्पादितम्, यदा शुक्लपक्षे पुंसा नक्षत्रेण चन्द्रमा युक्तोऽभवत् ।

---

१. R. B. Pandey : Hindu Samskaras p. 89

२. पुंस्त्वलक्षणानामाविर्भावात्प्राग्गर्भस्थशिशोर्लिङ्गपरिवर्तनं कर्तुं शक्यत इति स्पष्टं मतमायुर्वेदस्य । चरके शारीरस्थानेप्रकरणे ८. ३—२५ ।

३. समानयोगक्षेमा हि माता तदा गर्भेण केषुचिदर्थेषु । शारीरस्थाने ४.१६

४. भागवते ६. १८—१९ अध्यायतः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विष्णुबलिः

गर्भाधानादष्टमे मासे विष्णुबलिसंस्कारेण विष्णवे चतुष्षष्टिवलयः समर्पिता वैदिकसूक्तैश्च तस्य देवस्य स्तुतिः कृता। प्रभावेणास्य संस्कारस्य गर्भस्थशिशोः संरक्षणं निरापद् प्रसूतिश्चामन्येताम्। सोष्यन्तीकर्मसंस्कारेणासन्नप्रसवाया मातुः कल्याणार्थं सुखेन प्रसवार्थं चायोजनं कृतम्।

जातकर्म

शिशौ जाते महान् हर्षो जायते। प्रथमं तावत् वैश्वानरस्य परितुष्टिः सम्पाद्यते। वैश्वानरस्य परितोषेण जातस्य शिशोः कालान्तरे तेजस्वितायाः समृद्धेः शक्तेश्च सम्भावना अभिमता। नाभिवर्धनात्प्रागेव पंचभिर्ब्राह्मणैः शिशोरनुप्राणनमक्रियत। अनेन विधानेन तस्य पूर्णजीवनस्याभ्युदयस्य चाशा सम्भाविता। ब्राह्मणानां संसर्गो रहस्यविधिना शिशोर्ब्राह्मणत्वविधायक इति धारणासीत्। पश्चात् पृषदाज्यस्याहुतिः कृता। अस्मिन् हवने पिताकामयत—

"अस्मिन्सहस्रं पुण्यासमेधामनः स्वे गृहे। अस्योपसंद्यां माच्छैत्सीत् प्रजया च पशुभिश्च स्वाहा। मयि प्राणाँस्त्वयि मनसा जुहोमि स्वाहा। यत्कर्मणात्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टात्स्विष्टकृद्विद्वान्स्विष्टँ सुहुतं करोतु नः स्वाहा" इति।

ततः पितास्य दक्षिणं कर्णमभिनिधाय

"वाग्वागिति त्रिरथ दधिमधुघृतं संनीयानन्तर्हितेन जातरूपेण प्राशयति, भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि, भूर्भुवः स्वः सर्वं त्वयि दधामि" इति सन्दिष्टवान्।[1]

वैज्ञानिकदृष्ट्या मानवस्तु ब्रह्माण्डस्याखिलस्य सूक्ष्मं स्वरूपमेव। अस्य तत्त्वानुशीलनस्य मानसिकप्रतिष्ठायै शिशोर्जन्म प्रथमोऽवसरोऽभवत्। अनेन प्रकारेण मानव-व्यक्तित्वस्य विश्वात्मकत्वं नियोजितम्।

पश्चात् पिता शिशोर्नाम कृतवान् 'वेदोऽसि' इति गुह्यमेव नामाभवत्। ततः शिशुं मात्रे प्रदाय पिता तस्मै स्तनं प्रयच्छति सरस्वतीं प्रार्थयते च—

यस्ते स्तनः शशयो यो मयोभूः येन विश्वा पुष्यसि वार्याणि।
यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवेऽकः॥

ततः पितास्य मातरमभिमन्त्रयते—

इलासि मैत्रावारुणी वीरे वीरमजीजनत्।
सा त्वं वीरवती भव, यास्मान् वीरवतोऽकरदिति।

---

१. बृहदारण्यके ६.४। वाक् समयवेदानां प्रतीकोऽस्मिन् प्रकरणे। आयुर्वेदानुसारं दध्नेन्द्रियशक्तिर्वर्धते, मधुरस एवौषधीनां व्रतं च पशूनां तेजः। ऐतरेयब्राह्मणे ८.२०। त्रीणि चेमानि वैदिकयुगस्य श्रेष्ठं भोजनम्। शतपथ ९. २. १. ११

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिशुं सम्बोध्य तत्रत्या गुरुजना आहुः—

अतिपिता बताभूरतिपितामहो बताभूः। परमां बत काष्ठां प्रापच्छ्रिया यशसा ब्रह्मवर्चसेन, य एवंविदो ब्राह्मणस्य पुत्रो जायते।

आश्वलायनानुसारं दधिमधुघृतं प्राशयन् पिता शिशवे शतवर्षाणां पूर्णायुरकामयत। ततः शिशोर्मेधाजननं कुर्वन् तस्य श्रवणसमीपं मुखमानीयागायत्—

मेधां त्वे देवः सविता मेधां देवी सरस्वती।
मेधां त्वे अश्विनौ देवावाधत्तां पुष्करस्रजौ॥

शिशोः स्कन्धं स्पृशन् पिताकामयत—

अश्मा भव, परशुर्भव हिरण्यमस्तृतं भव
वेदो वै पुत्रनामासि जीव शरदः शतमिति
इन्द्र श्रेष्ठानि द्रविणानि धेह्यस्मै
प्रयन्धि मघवन्नृजीषन्।

उपर्युक्तप्रक्रियायाः प्रत्यक्षस्वरूपमपि प्रदर्शितमासीत्। तद्यथाश्मा परशुर्हिरण्यं क्रमश उपर्युपरि निधाय तस्योपरि शिशुः प्रतिष्ठापितः। अनेन विधिना शिशोः सर्वोच्चत्वं प्रसाधितम्।

केषुचिदभ्युदयशीलेषु कुलेषु शिशुं ब्रह्मलोकपरायणं विधातुं जन्मदिने निरन्तरमग्निः प्रज्वालितः[१]। पुत्रजन्मोत्सवे पिता प्रायशो दानमकरोत्।

नामकरणम्

नाम्नोऽतिमहत्त्वमिति विदितं सर्वेषाम्। नाम्नो महत्त्वमधिकृत्य बृहदारण्यकोपनिषदि संवादोऽयं प्राप्यते—

याज्ञवल्क्येति होवाच—यत्रायं पुरुषो म्रियते किमेनं न जहातीति। नामेत्यनन्तं वै नामानन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति।[२]

जातकर्मसंस्कारे गुह्यं नाम कृतम्। जन्मनो दशमे द्वादशे वा दिने पुण्ये मुहूर्त्ते नक्षत्रे वा सर्वजनप्रकाशनीयं नामाक्रियत।

नाम्नो मधुरध्वनिः स्पृहणीय एव। चतुरक्षरं द्व्यक्षरं वा घोषवदाद्यन्तस्थं पुंसाम्, ईकारान्तमयुजाक्षरं च स्त्रीणामेव कृते नाम्नि, शुचि तत्कुलं भवतीति। द्व्यक्षरनाम्ना लौकिकैश्वर्यस्य, चतुरक्षरेण चाध्यात्मिकाभ्युदयस्य कामना प्रकटीकृता।

बौधायनानुसारं पुरुषाणां नामानि ऋषिदेवपूर्वजानां नामान्याश्रित्य भवेयुः।

---

१. असातमन्तजातके

२. बृ० उ० ३.२.१२। बृहस्पतिमतं नामाधिकृत्य प्रमाणितम्—

नामाखिलस्य व्यवहारहेतुः शुभावहं कर्मसु भाग्यहेतुः।
नाम्नैव कीर्तिं लभते मनुष्यस्ततः प्रशस्तं खलु नामकर्म॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साक्षादेव देवानां नामानि न ग्रहीतव्यानि इति। केषुचिद्धर्मशास्त्रेषु विहितम् तद्यथा—ब्रह्मप्रकाशः, शिवदासः, देवदत्तः इति शोभननामानि, न तु रामः, विष्णुः, सुरेन्द्रो वा पुरुषाणां नामानि भवेयुः। स्त्रीणां नामान्यधिकृत्य मनुना निर्दिष्टम्—

स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोरमम्।
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत् ॥ २. ३३

विष्णुपुराणानुसारं तु—

गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयो.।
नार्थहीनं न चाशस्तं नापशब्दयुतं तथा ॥
नामङ्गल्यं जुगुप्स्यं वा नाम कुर्यात्समाक्षरम्।
नातिदीर्घं नातिह्रस्वं नातिगुर्वक्षरान्वितम् ॥
सुखोच्चार्यं तु तन्नाम कुर्याद्यत्प्रवणाक्षरम्। ३. १०. ९—११

नाम्ना देवानां महापुरुषाणां चोदात्तादर्शा मानवतायाः समक्षं प्रतिष्ठापिताः।[१] नाम्नैवाभ्युत्थानाय प्रेरणा प्रथममेव ग्रहणीया भवेदिति शास्त्रकाराणां मतम्। येन केन प्रकारेण महतां देवानां नामोच्चारणेन पुण्योदयस्य धारणा वर्तते। क्वचिन्मृतशिशूनां पुत्रा भिक्षाचरादयो वा संज्ञिताः। तत्तेषां जीवनार्थमासीत्। नाम्नः प्राक् श्रीशब्दस्य योजनं रीतिरासीत् प्रायः।

निष्क्रमणम्

जन्मनश्चतुर्थमासे शिशोर्गृहान्निष्क्रमणमभवत्। मातुर्गर्भान्निष्क्रम्य प्रसवगृहे ततः निष्क्रम्यान्येषु गृहेषु विचरन् शिशुः सङ्कीर्णपरिधौ वसति। तस्मादपि निष्क्रम्य विश्वविभूतीनां संग्रहणाय विश्वात्मकं व्यक्तित्वं संवर्धयेत् शिशुरित्युद्दिश्य सूर्यचन्द्रादीनां दर्शनमकारि। सामाजिकसीम्नो निष्क्रम्य स ब्रह्मपथमनुसरिष्यतीति समीहितमुपर्युक्तक्रमेण।

निष्क्रमणदिवसे तत्र सूर्यस्य दर्शनं प्रथमं समासादितम्। सूर्यस्तु भारतीयदृष्ट्या ज्ञानविज्ञानयोः परमं निधानमेव। आचार्य एव सूर्यः सविता वा दिव्यज्ञानाय। सूर्यदर्शनं कारयन्नेव पितागायत्—

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।
पश्येम शरदः शतं जीवेम शरदः शतम्।
शृणुयाम शरदः शतं प्रब्रवाम शरदःशतम्।
अदीनाः स्याम शरदः शतं भूयश्च शरदः शतात् ॥

रात्रौ निष्क्रमणविधौ चन्द्रदर्शनं कारितम्। एतासां दिव्यविभूतीनां दर्शनस्य शिशोः सर्वतः संवर्धने हितकरः प्रभावो जातः।

---

१. चाण्डालानामपि नामानि शोभनानि [illegible] दृश्यते बहुशः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

अन्नप्राशनम्

शिशोर्जन्मकाले दधिमधुघृतानां प्राशनमभूत्। पश्चात् शिशोः षष्ठमासेऽन्नप्राशनं कृतम्।[1] आयुर्वेदानुसारं लघुहितमन्नं शिशवे दातव्यम्। अन्नस्य न केवलं जीवनधारणायैव महत्त्वमपि तु व्यक्तित्वस्य विकासायान्नस्योपयोगिताभिमता। तद्यथा—

आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः इति।[2]

अस्यां दशायां स्पष्टमेव प्रतिभाति यत् शिशवे प्रदत्तं प्रथमं भोजनं व्यक्तित्वस्य विकासमुद्दिश्यैव निर्णीतमासीत्। सामान्यतोऽन्नप्राशनाय दधिमधुघृतमिश्रं भक्तमेव दत्तम्। भोजनग्रासं ददद‍ेव पिता 'भूर्भुवः स्वः' इत्युच्चारणमकरोत्। केचिद्धर्मशास्त्रकाराः समांसं भोजनमन्नप्राशनाय निर्दिशन्ति।[3]

भारतीयधारणानुसारमन्नं देवतारूपं वर्तते। अस्मिन् संस्कारे पदे पदेऽन्नदेवस्य स्तुतिर्विहिता।

कालान्तरेऽन्नप्राशनावसरे शिशोर्भाविजीवनस्य जीविकोपायस्य निर्णयः कृतः। देवानां सान्निध्ये बहूनां व्यवसायानां प्रतीकाः समुपस्थापिताः। तेषु यानि कानिचित् शिशुरचिनोत् तैरेव शिशोर्जीविका सम्भाविता।

चूडाकरणम्

चूडाकरणं शिशोः प्रथमेऽब्दे तृतीये वा सम्पादितम्। केशानां कर्तनं विधाय शिरसि चूडा कृता। केशकर्तनस्य लाभा आयुर्वेदानुसारं सन्ति। यथा—

पापोपशमनं केशनखरोमापमार्जनम्।
हर्षलाघवसौभाग्यकरमुत्साहवर्धनम्॥
पौष्टिकं वृष्यमायुष्यं शुचिरूपं विराजनम्।
केशश्मश्रुनखादीनां कर्तनं संप्रसाधनम्॥ चरकसंहितायाम्

चूडाकरणात्प्रभृति शिखाग्रहणं भवति। आयुर्वेदानुसारं शिखाया महत्त्वं विद्यते। तथा हि—शिरसः शिखरे शिरा-सन्धीनां सम्मिलनं भवति। अस्य स्थानस्याधिपती रोमावर्तः। तत्र केनापि प्रहारेण शीघ्रमेव मृत्युर्भवति।[4] अस्य कोमलस्थानस्य रक्षा शिखया भवति।

---

१. षण्मासं चैतमन्नं प्राशयेल्लघुहितं च। सुश्रुते शारीरस्थाने १०.६४

२. छान्दोग्ये ७.२६.२। गीतायामपि समर्थनं दृश्यतेऽस्य मतस्य। गीता १७.८.१०

३. षाण्मासिके शिशौ मांसभोजनस्य पाचनयोग्यता न विद्यते। कथं मांसभोजनमन्नप्राशनाय समर्थितमिति समस्या। पारस्करस्तु मांसभोजनं समर्थितवान्—भारद्वाज्या मांसेन वाक्प्रसारकामस्य। मत्स्यैर्जवनकामस्य। आट्या ब्रह्मवर्चसकामस्य। १.१९.५.१२

४. सुश्रुत-शारीरस्थाने ६.८३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

केशकर्तनस्य समारम्भः स्वयमेव पिताकरोत् । देवेभ्यः स्तुतिं कुर्वन् सोऽकामयत— शिशुर्दीर्घायुः यशस्वी सानन्दश्च भवतु । शिरसि कुलरीतिमनुसृत्य चूडा विहिताः । तद्यथा—

'दक्षिणतः चूडा वसिष्ठानाम् । उभयतोऽत्रिकाश्यपानाम् । मुण्डा भृगवः । पंचचूडा अङ्गिरसः । केश-पंक्तिर्मङ्गलार्थं, शिखिनोऽन्ये । यथाकुलधर्मं वा ।'

चूडासंख्या प्रायशो प्रवरसंख्यासमा एवाभवत् ।[1]

उपनयनम्

आचार्येण ब्रह्मविद्याया अध्यापनाय विद्यार्थिनः शिष्यभावेन स्वीकरणमुपनयनम् ।[2] ततः पंचविंशतिवर्षपर्यन्तं ब्रह्मचर्याश्रमस्य विधानम् । पिता स्वयमेव स्वपुत्रमाचार्यसमीपं नीत्वा तस्योपनयनाय प्रार्थयत । उपनयनसंस्कारे विद्यार्थी तस्याचार्यस्य पुत्ररूपेण पुनरजायत । पुत्रीकरणस्येयं प्रक्रियाऽथर्ववेदे प्रथमं वर्णिता—

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ॥

वैदिककाले विद्यार्थी स्वयमेवाचार्यसमीपं गत्वा न्यवेदयत्—ब्रह्मचर्यमागामिति ।

आचार्यो विद्यार्थिनमाह—

को नामासीति । प्रजापतिर्वै कः ।

स तस्य हस्तं गृह्णाति ।

आचार्योऽभाषत—इन्द्रस्य ब्रह्मचार्यसि । अग्निराचार्यस्तव । अहमाचार्यस्तव । आचार्यः ताभ्यां देवताभ्यां विद्यार्थिनं परिददाति । पश्चात् स तं भूतेभ्यः, प्रजापतये, सवित्रे च परिददाति कथयति च—एते वै श्रेष्ठे वर्षिष्ठे देवते । एताभ्यामेवैनं श्रेष्ठाभ्यां वर्षिष्ठाभ्यां देवताभ्यां परिददाति । तथा ह्यस्य ब्रह्मचारी न काञ्चनार्तिमार्च्छति । पश्चात् स विद्यार्थिनमद्भ्य ओषधीभ्यो द्यावापृथिवीभ्यां विश्वेभ्यो भूतेभ्यश्च परिददाति ।

पश्चादाचार्योऽवदत्—ब्रह्मचार्यसि । अपोऽशानेत्यमृतं वा । कर्म कुरु इति । वीर्यं कर्म । वीर्यं कुरु । समिधमाधेहीति । समित्स्वात्मानं तेजसा ब्रह्मवर्चसेन । मा सुषुप्थाः । मा मृथाः । आपोऽशानेत्यमृतं वा । तदेनमुभयतोऽमृतेन परिगृह्णाति । अथैनं सावित्रीमन्वाह ।[3]

अनेन प्रकारेणोपनयनविधिर्वैदिककालेऽनतिदीर्घ आसीत् । उपनिषदि सरलविधिः सत्यकामस्योपनयनप्रकरणे वर्णितः । उपनिषद्युगे गृहस्था अपि आत्मन उपनयनमकारयन्

---

१. प्रवरास्तु कस्यापि कुलस्य महर्षय एव । प्रवरैः कुलस्योच्चता परिचीयते । 'प्रवरसंख्यासमाः चूडाः महर्षिसमो भवितुं प्रोत्साहयन्तु' इति धर्मशास्त्रकाराणां मतं प्रतिभाति ।

२. उपनयनस्यापरं नामाचार्यकरणमस्ति । पाणिनिः १.३.३६ । स्वीकरणमेवोपनयनस्य धात्वर्थः । काशिका १.३.३६

३. शतपथब्राह्मणे ११.५.४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदि कदापि तेषां मनसि ब्रह्मज्ञानं प्राप्तुमिच्छाजायत । तस्मिन् युगे प्रायो द्वादशवार्षिका बालका ब्रह्मचर्यार्थमाचार्यकुलवासिनोऽभवन् ।

परवर्तियुगे तु सुदीर्घ एवोपनयनविधिर्विकसितः । उपनयनाय योग्यकालो निर्धारितः— वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं शरदि वैश्यम् । गर्भाष्टमे ब्राह्मणं गर्भैकादशेषु राजन्यं, गर्भद्वादशेषु वैश्यम् । विभिन्नवर्षेषूपनयनसम्पादनेन विविधानि काम्यानि साध्यानि स्युः । तद्यथा सप्तमे ब्रह्मवर्चसकामम्, अष्टमे आयुष्कामम्, नवमे तेजस्कामम्, दशमेऽन्नाद्य-कामम्, एकादश इन्द्रियकामम्, द्वादशे पशुकाममिति । मनुस्तूपनयनावस्थाया अल्पत्वमेव समीचोनममन्यत । तद्यथा—

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पंचमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥ २,३७

उपनयनाय परमावस्थाऽपि निर्धारिता । मन्वनुसारम्—

आ षोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते ।
आ द्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥ २.३८

परिवर्तियुगे विस्तृतोपनयनविधेः प्रमुखाङ्गान्यधोलिखितानि—विद्यार्थिन उत्तरीय-वासोधारणम्, मुण्डनम्, मेखलादण्डधारणम्, हवनम्, समिदाधानम्, सावित्रीशिक्षणं च । एषु विधिषु पदे पदे वैदिकमन्त्रैर्देवस्तुतिः व्रतानि सङ्कल्पाश्च कृतानि । पश्चादाचार्योऽवदत्—"मम व्रते हृदयं ते दधामि । मम चित्तमनुचित्तं तेऽस्तु । मम वाचमेकव्रतो जुषस्व । बृहस्पतिष्ट्वा नियुनक्तु मह्यम् ।"

विद्यार्थिने ब्रह्मचर्यव्रतस्येदृशं विधानमाचार्यः प्रस्तुतवान्—"ब्रह्मचार्यसि । अपोऽशान, कर्म कुरु, दिवा मा स्वाप्सीः, आचार्याधीनो वेदमधीष्व" इति ।

अस्मिन्नुपनयनविधौ विद्यार्थिनः मानसिकशुद्धयै सर्वोच्चज्ञानाय च सा योजना निहिता, या विद्यार्थिनमुल्लासितवती तथा तस्य तपोमये त्यागपूर्णे च जीवने रसमानन्दं च सृष्टवती । शिष्याचार्यसम्बन्धोऽयं देवानां सान्निध्ये प्रतिष्ठापितः सन् गौरवान्वितोऽभूत् ।

यज्ञोपवीतम्

सूत्रनिर्मितस्य आधुनिकयज्ञोपवीतस्य वैदिककाले प्रचलनं नाभवत् । तदानीं यज्ञावसरे उत्तरीयं यज्ञोपवीतविधिना धृतम् । समग्रं जीवनं यज्ञ एवेति मत्वा सदैव यज्ञोपवीतोत्त-रीयस्य परिधानं नियतम् ।[1] सूत्रयुगे सूत्रनिर्मितयज्ञोपवीतस्य प्रचलनं प्रारम्यत । उत्तरीयं तु प्रायशो मृगचर्मणा निर्मितम् । तस्य स्थाने सूत्रस्य यज्ञोपवीतस्य परिधानं शनैः शनैः

---

१. तथा हि मृच्छकटिके—
अमौक्तिकमसौवर्णं ब्राह्मणानां विभूषणम् ।
देवतानां पितृणां च भागो येन प्रदीयते ॥ १०.१८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समवर्धत। अधुनाप्युपनयनविधौ प्रथमं मृगचर्मणो यज्ञोपवीतं ध्रियते, तत्प्रतीक एव प्राचीन-युगस्योत्तरीयस्य ।

कन्यकानामुपनयनम्

वैदिककाले विद्यार्थिनीनां कन्यकानामुपनयनविधानं सुप्रचलितमासीत् । ईदृशीनां कन्यकानां संख्या तदानीमपि निःसंशयमेव नोऽसीदधिका । परवर्तियुगे तासां संख्या स्वल्पतरा बभूव । उपनयनमाचारमात्रमभवत् । कन्यकानामुपनयनं केवलं विवाहकाले धार्मिकविधानस्य पूर्तयेऽभवत् । बाणस्तु कादम्बर्यां तपस्विन्या महाश्वेताया वर्णने तस्याः शरीरे ब्रह्मसूत्रस्योल्लेखं करोति ।

उपनयनस्य पश्चाद् गुरुः शिष्यं शौचमाचारमग्निकार्यं सन्ध्योपासनं च प्रथममशिक्षयत् । ततः परं वेदस्याध्यापनं प्रायशः चतुर्विंशतिवर्षपर्यन्तमभूत् । पंचविंशे वर्षे विद्योपेतानां विवाहार्थिनां छात्राणां समावर्तनसंस्कार आचार्येण सम्पादितः । आजीवनं ब्रह्मचर्यनिष्ठा बृहद्व्रतधारिणो नैष्ठिकब्रह्मचारिणो वा विख्याताः । विवाहकामा निवेशार्थिन इति संज्ञिताः ।

समावर्त्तनम्

आचार्याश्रमेऽध्ययनं परिसमाप्य प्रायशो विद्यार्थिनः स्वगृहमागच्छन् । आश्रमाद् गृहागमनं समावर्तनम् । अस्मिन्नवसरे समावर्तनसंस्कारः सम्पादितः । समावर्तनसंस्कारे विद्यासम्पन्नस्य ब्रह्मचारिणो विधिवत्स्नानमभूत् । इदं परिलक्ष्य समावर्तनस्यापरनाम स्नानमेव । समावर्तनसम्बन्धि स्नानमिदं कृत्वैव स स्नातकोऽभवत् । पाणिनिस्तु स्नातकस्यापरपर्यायं स्रग्वीति निर्दिशति । इदं नाम तस्य मालाधारणमुद्दिश्य कृतम् । ब्रह्मचर्यकाले विद्यार्थी सर्वथा भोगविलासादिभ्यो विरक्तोऽभवत् । समावर्तकाले स शरीरस्य प्रसाधनं कृतवान् । स्नातकस्य वेशविन्यासः गृहस्थानामिवाभवत् ।

वैदिकयुगादारभ्य प्रायः सदैव स्नातकः समाजस्य सर्वोच्चपुरुषोऽगण्यत । अथर्ववेदानुसारं— स स्नातो बभ्रुः पृथिव्यां बहु रोचते । समावर्तनकाले स्नातका आचार्यं प्रति कृतज्ञताभावं न्यवेदयन् । ते तमभिनन्दितवन्तः—"त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति ।"[१] आचार्या अपि जीवनोपयोगिसनातनशिक्षामदुः—सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजतन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि, नो इतराणि । यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि, नो

---

१. प्रश्नोपनिषदि ६.८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इतराणि ।[1] बृहदारण्यकोपनिषदि 'द' अक्षरेण स्नातका उपदिष्टाः —दाम्यत दत्त दयध्वं चेति ।[2]

ब्राह्मणाय सदा देयं ब्रह्म शुश्रूषवे तथा ।
भवन्तो बहुलाः सन्तु वेदो विस्तार्यतामयम् ॥
नापरीक्षितचारित्रे विद्या देया कथंचन ।
न नियोज्याश्च वा शिष्या अनियोगे महाभये ॥
यथामति यथापाठं तथा विद्या फलिष्यति ।
सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ॥
वेदस्याध्ययनं हीदं तच्च कार्यं महत्स्मृतम् ।

स्नातकास्तु —अन्योन्यं संविभाष्यैवं सुप्रीतमनसः पुनः ॥
विज्ञापयन्ति स्म गुरुम् पुनर्वाक्यविशारदाः ।
शैलादस्मान्महीं गन्तुम् कांक्षितं नो महामुने ॥
वेदाननेकधा कर्त्तुं यदि ते रुचितं प्रभो ।
व्यासः —शिष्याणां वचनं श्रुत्वा पराशरसुतः प्रभुः ॥
प्रत्युवाच ततो वाक्यं धर्मार्थसहितं हितम् ।
क्षितिं वा देवलोकं वा गम्यतां यदि रोचते ॥
अप्रमादश्च वः कार्यो ब्रह्म हि प्रचुरच्छलम् ।

स्नातकास्ते व्यासेनानुज्ञाताः तस्य प्रदक्षिणं कृत्वा मूर्ध्नाभिवाद्य च जग्मुः । कतिपयाश्चोपात्तविद्याः छात्रा आचार्याय दक्षिणादानमेव प्रथमं कार्यममन्यन्त राजानः प्रायशः सादरं तेषामुद्देश्यपूर्तिमकुर्वन् ।[3] साधारणतस्तु दक्षिणा स्वल्पैवाभूत् तद्यथा मनुः —

क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमन्ततः ।
धान्यं शाकं च वासांसि गुरवे प्रीतिमाहरन् ॥ २.२४६

स्नातकास्तु त्रिविधा अभवन्–विद्यया स्नातीत्येके । तथा व्रतेनाष्टचत्वारिंशत्परिमाणेन । विद्याव्रतेन चेत्येके । तेषु सर्वेषु स्नातकवृत्तिः । स्नातकस्याचारव्यवहारौ जीवनविन्यासश्चोदात्तौ बभूवतुः ।

स्नातकानां जीवनविधानं मनुना निर्दिष्टम्—

क्लृप्तकेशनखश्मश्रुर्दान्तः शुक्लाम्बरः शुचिः ।
स्वाध्याये चैव युक्तः स्यान्नित्यमात्महितेषु च ॥ ४.३५

---

१. अग्रे द्रष्टव्या तैत्तिरीयोनिषदि शिक्षावल्ली ११ ।
२. बृ० उ० ५.२
३. रघुवंशे कौत्सस्य रघोर्गुरुदक्षिणाप्राप्तै रम्या कथा वर्तते । पंचमसर्गो द्रष्टव्यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च ।। ४.६६

स्नातकस्तु सर्वत्र मधुपर्केण सम्मानितोऽभवत् । प्रथममाचार्य एव तस्मै मधुपर्कंसमर्पणमकरोत् । तस्य जीवनविन्यासः समाजायादर्श इति प्रमाणितम् ।

समावर्तनमनु स्नातकस्य गृहस्थाश्रमपरिपालनाय गृहिण्या अपेक्षाभूत् ।[1] सा तु विवाहसंस्कारेण लभ्यासीत् ।

विवाहः

विवाहस्तु सन्तानकामाय, प्राकृतिकसुखाय, धर्मसम्पादनाय चाभवत् । संस्कारस्यास्य सातिशयं महत्त्वमस्ति ।

वरवधूनां योग्यता

वरवधूनां योग्यतायाः परीक्षा बाह्याभ्यन्तरं कृता । बाह्यतः सौन्दर्यं पुरुषत्वं नारीत्वमवस्था च दर्शनीयानि । आभ्यन्तरदृष्ट्या तयोर्विद्वत्ता चरित्रं कुलं च परीक्षणीयानि ।

पुरा वैदिकयुगे विवाहावस्था गृहस्थाश्रमस्य योग्यतामनु प्रमाणिता । सावस्था क्रमशः वराय वध्वै च पंचविंशतिवर्षाणि षोडशवर्षाणि चाभिमता । स्मृतौ कन्यकानां विवाहावस्था स्वल्पीकृता । दशवर्षीया द्वादशवर्षीया वा कन्या परिणेयेति मतम् ।[2]

कामसूत्रानुसारं तु वरकन्ययोरवस्थान्तरं त्रिवर्षमात्रमेव भवेदिति मतं समीचीनं प्रतिभाति । स्वयंवराणां वर्णनेन स्पष्टं स्यात् यत् पुरा वधूवराणां योग्यताविषये देशभेदो नासीद्विचारणीयः । जातिभेदस्यापि महत्त्वं स्वल्पतरमेवासीत् ।

बाह्यदृष्टितो गुणप्रकर्षः शारीरिकसौन्दर्यञ्चापेक्ष्येते । वैदिककालत एवास्मै प्रयोजनाय स्वयंवरविधिः प्रचलितः । तस्मिन्युगे कन्यकानां सौन्दर्यनिरूपणाय शाश्वतमानदण्डाः सुप्रतिष्ठिता आसन् । तद्यथा—

एवमेव हि योषां प्रशंसन्ति पृथुश्रोणिं विमृष्टान्तराम् । सा मध्ये संग्राह्या ।[3]

सूत्रयुगे लक्षणसम्पन्नान् स्वस्थान् पुरुषांश्च वररूपेण चेतुं विधानं स्वीकृतम् । मनुस्तु कन्यकायाः सौन्दर्यं बहु मन्यते । 'कन्यारत्नं दुष्कुलादपि ग्रहणीयम् ।' कामसूत्रानुसारं तु रूपशीललक्षणसौन्दर्यस्वास्थ्यैः सम्पन्नस्य वरस्येदृशैर्गुणैः सम्पन्नायाः कन्याया विवाहो भवितुमर्हति ।

---

१. भारतीयधारणानुसारम्—न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते । सा तु अर्धाङ्गिनी । पत्नी भूत्वा सा यज्ञकर्मणि सहायाभूत् । तस्याः पुत्रं प्राप्य पुरुषः पूर्णोऽभवत् । पुत्रलाभेन पितॄणामृणाद् मुक्तिः सम्भाविता । 'आत्मा वै जायते पुत्रः' इत्यात्मजननायापि, पत्न्या महती वर्तत आवश्यकता ।

२. वसिष्ठस्मृतौ १५; महाभारतस्यानुशासनपर्वणि ३३ अध्यायतः । ब्रह्मपुराणे १.५; वैखानसे १,६; पराशरस्मृतौ ७.८—९

३. शतपथे १ २.५ १६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भरद्वाजस्तु तदेव समर्थयन्नाह—

यस्यां मनोऽनुरमते चक्षुश्च प्रतिपद्यते।
तां विद्यात्पुण्यलक्ष्मीकां किं ज्ञानेन करिष्यति ॥

भासस्तु वरस्य वरणीयगुणानुल्लेखयन् मतं समर्थयति प्रतिज्ञायौगन्धरायणे—

कुलं तावच्छ्लाघ्यं प्रथमभिकांक्षे हि मनसा
ततः सानुक्रोशं मृदुरपि गुणोह्येष वलवान्।
ततो रूपे कान्ति न खलु गुणतः स्त्रीजनभयात्
ततो वीर्योदग्रं न हि न परिपाल्यायुवतयः ॥ २. ४

अनुलोमविवाह एव प्राचीनयुगे सम्मत आसीत्। अनया रीत्या ब्राह्मण-क्षत्रिय-वैः वराणां क्रमशः चतुस्त्रिद्विवर्णोत्पन्नाभिः कन्याभिर्विवाहो योग्यः। सगोत्रसपिण्डसप्र विवाहानां निषेधोऽभवत्। भागवतानुसारं तु

ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः।
तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ॥

विवाहभेदाः

पुरा विवाहस्याष्ट भेदा आसन्—ब्राह्मः, दैवः, आर्षः, प्राजापत्यः, आसुरः, गान्ध राक्षसः, पैशाचश्च। अस्मिन् प्रकरणे विवाहशब्दस्यार्थो विशिष्ट एव। गार्हस्थ्यध सम्पादनाय पतिगृहे वहनाय च कन्या येनोपायेन प्राप्ता तमेवोपायमुद्दिश्य विवाहप्र निर्दिष्टः। अस्मिन्प्रकरणे विवाहः संस्कारद्योतको नास्ति। उपर्युक्तविधिभिः कन्यां संस्क विनिश्चित्य होमविधिः परिणयश्च विहितौ। देवलेनेदमधिकृत्य निर्दिष्टम्—

प्राप्तेषूर्ध्वं विवाहेषु विधिर्वैवाहिकः स्मृतः।
कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः ॥

पुरा भारते बहुविधेषु सांस्कृतिकस्तरेषु विविधवर्गाणां जना बभूवुः। तद्यथ ब्रह्मपरायणा वेदवादिनो वा ब्राह्मणाः, देवपरायणा यज्ञवादिनो वा ब्राह्मणाः, मन्त्र ऋषयः, प्राजापत्यपरायणा मानवाः,[१] समृद्धिशालिन आर्येतरा असुराः, भोगकलावि परायणा गंधर्वाः, वलशालिनो युद्धपरायणा राक्षसाः, छलपरायणाः पिशाचाः स्ववर्गस्य वैशिष्ट्येन विवाहार्थं कन्याग्रहणं तेषु तेषु वर्गेषु प्रचलितम्। ब्राह्मणा व मानवाश्चार्यवर्गीया बभूवुः। आर्यवर्गीया द्विजा ब्रह्मचर्यव्रतेन स्नातका भूत्वा श दात्तोपायैर्विवाहार्थं कन्यां प्राप्नुवन्।

---

१. तद्ये ह वै तत्प्रजापतिव्रतं चरन्ति ते मिथुनमुत्पादयन्ते। तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मच सत्यं प्रतिष्ठितम्। प्रश्नोपनिषद् १.१५

२. एष्वष्टवर्गेषु चत्वार आद्या आर्या बभूवुः। अपर आर्येतरा आसन्। आर्या द्विजाः प्रायशो ब्र क्षत्रिया वैश्याश्च बभूवुः। असुरराक्षसा प्रायः सर्वे क्षत्रिया वैश्या वा बभूवुः, के ब्राह्मणा बभूवुः। गन्धर्वा अपि केचित् क्षत्रिया; प्रायः वैश्याः शूद्रा वा बभूवुः। सर्वे पिशा शूद्रतां प्रतिपन्नाः। उपर्युक्तप्रथमचतुर्विवाहेषु वरणविधिरवगन्तव्यः। शेषेषु वरणं नापेक्ष्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्राह्मविवाहे वेदविदे ब्राह्मणायालङ्कृता कन्या प्रदेयासीत् । बौधायनानुसारम् 'श्रुतशीले विज्ञाय ब्रह्मचारिणेऽर्थिने कन्या देया स ब्राह्मः' । अस्मिन्विवाहे वरस्य वेदवित्त्वं महत्त्वपूर्णमासीत् । दैवविवाहे यज्ञस्य ऋत्विजे दत्ता कन्या दक्षिणारूपैवासीत् । ब्राह्मदैवविवाहौ ब्राह्मणस्यैव, नेतरेषाम् । ब्राह्मणानामृषिवर्गे वरात् गोमिथुनस्य ग्रहणं कृत्वैव तस्मै कन्याप्रदानस्य प्रचलनमभवत् । तस्मिन्युगे गोमिथुनस्य मूल्यमद्यतनैकरूप्यकादपि न्यूनमभवत् । तस्यां स्थितौ गोमिथुनस्य ग्रहणं शुल्करूपं नासीत्; अपितु साम्प्रदायिकरीतिरेवासीत् । आर्षविवाहोऽपि ब्राह्मणवर्ग एव प्रचलित आसीत् ।[1] सामान्यतो ब्राह्मणा एव ऋषय आसन् ।

प्राजापत्यविवाहः आर्यवर्गे प्रायः सर्वाधिकलोकप्रिय आसीत् ।[2] स्नातका अस्नातकाः सर्वेऽपि गार्हस्थ्यधर्मनिर्वहणाय समयबन्धनं कृत्वा प्राजापत्यरीत्या परिणीताः । आसुरविवाहस्तु प्रथममसुरवर्गेषु पश्चात् क्षत्रियवैश्यवर्गेषु प्रचलितः । विवाहेऽस्मिन् कन्यायाः सौन्दर्यातिशयं प्रतिष्ठापयन्नेव वरस्तस्या ज्ञातिभ्यो धनमदात् ।[3] गान्धर्वविवाहस्य प्रचलनं प्रथमं गन्धर्ववर्गेषु पश्चात् राजन्यवैश्यशूद्रवर्गेषु चाभवत् । गान्धर्वे तु वरकन्ययोः परस्पराकर्षणमात्रेण समागमप्रवृत्तिरुद्भूता । परस्पराकर्षणं तु सौन्दर्यं नृत्यसंगीताभिनयकौशलमपेक्षते । वरकन्ययोः परस्परमेलनं गन्धर्वेषु सुप्रचलितमासीत् ।[4] कामिनां कृते गान्धर्वविवाहोऽनुरागसंवर्धनादनुत्तमोऽनुमतः । राक्षसविवाहः प्रथमं राक्षसवर्गेषु पश्चात् क्षत्रियेषु प्रचलितः । अस्मिन्विवाहे बलप्रयोगेण कन्याप्राप्तिरभवत् । राक्षसाः क्षत्रिया वा बलशालिनो बभूवुः । बलशालिनां कन्याहरणं प्रतिष्ठाद्योतकमेवाभवत् । तेषां विवाहस्यापरं नाम क्षात्र एव । पैशाचविवाहः प्रथमं पिशाचेषु पश्चात् शूद्रेषु प्रचलितोऽभवत् । मन्वनुसारम्—

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचः प्रथितोऽष्टमः ॥ ३.३४

उपर्युक्तविवाहास्तु प्रवृत्तिद्योतका एव । सर्वेषु वर्गेषूच्चाधमप्रवृत्तयो जना वर्तन्ते । तेषां न केवलं विवाहोऽपितु सर्व एव जीवनविन्यास आत्मप्रवृत्त्यनुरूपो भवति । एभिर्विवाहोपायैः कन्यायाः वरणमभूत्, पश्चात् संस्कारविधिः सम्पादितः ।

---

१. वैदिकर्षीणां गोधनस्यातिशयता सुविदितैव ऋग्वेदे—६.२८.१; १.१५.४, ६; ४.३३.१ समुद्रमन्थनावसरे तैर्गोरत्नं स्वीकृतम् ।

२. मनुस्तु प्रजापतिः शतपथ० १३.४.३.३, १४, तस्य नाम्ना प्रचलितोऽयं प्राजापत्यो विवाहः । मनुरयं गृहस्थाश्रमस्य श्रेष्ठत्वमावश्यकत्वं च भृशतरं प्रोक्तवान्—प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थं च मानवा इति ।

३. पाण्डोर्विवाहार्थं माद्री क्रीतासीत् भीष्मेण ।

४. तीक्ष्णकामास्तु गन्धर्वाः । रामायणे किष्किन्धा० ५९.९ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विवाहसंस्कारविधिः

वैदिककाले विवाहसंस्कारस्य विधिः सरलोऽभूत् । स्नातक इष्टमित्रैः सम्बन्धिमिश्च सह कन्याया गृहमागच्छत्, तत्र सर्वेषां च तेषां सत्कारः सुस्वादुभोजनादिभिः कृतः ।[1] कन्यायाः पाणिग्रहणकाले वरोऽगायत्—

गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगोऽर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥

पिता देवानां विशेषतश्चाग्नेः समक्षं कन्यादानमकरोत् । नववध्वा उपस्थितजना आशोर्वचनं ददुः—

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥
इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु ।
दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥

पतिगृहे गमनस्यावसरे वधूपहारस्य, वध्वाः सख्युः तस्या दूकूलस्य च वर्णनं कृतमासीत् ।

रामायणकाले वैवाहिको विधिः सरलतर आसीत् ।[2]

परवर्तियुगे आर्यवर्गस्य विवाहविधौ आर्येतरवर्गाणां विवाहविधीनामपि समन्वयोऽभूत् । अस्यां दशायां भारतस्य विविधभागेषु स्थानीयविधीनां समवायात् विभिन्नरूपाः संस्कारविधयः समजायन्त । इदं परिलक्ष्याश्वलायनो निर्दिष्टवान्—

अथ खलूच्चावचा जनपदधर्मा ग्रामधर्माश्च । तान् विवाहे प्रतीयात् । यत्तु समानं तद्वक्ष्यामः —

पश्चादग्नेर्दृषदमश्मानं प्रतिष्ठाप्योत्तरपुरस्तादुदकुम्भं समन्वारब्धायां हुत्वा तिष्ठन् प्रत्यङ्मुखो वरः प्राङ्मुख्या कन्याया आसीनाया गृभ्णामि ते सौभगत्वाय हस्तमित्यङ्गुष्ठमेव गृह्णीयात् यदि कामयीत पुमांस एव मे पुत्राः जायेरन्निति । अङ्गुलीरेव स्त्रीकामः । रोमान्ते हस्तं साङ्गुष्ठमुभयकामः ।

प्रदक्षिणमग्निमुदकुम्भं च त्रिः परिणयञ्जपति—'अमोहमस्मि सा त्वं सा त्वमस्यमोहं द्यौरहं पृथिवी त्वं सामाहमृक् त्वं ताविह विवहावहै । प्रजां प्रजनयावहै सुप्रियौ रोचिष्णू सुमनस्यमानौ जीवेव शरदः शतमिति ।

वरः परिणीय परिणीयाश्मानमारोहयति—इममश्मानमारोहाश्मेव त्वं स्थिरा भव । सहस्व पृतनायतोऽभितिष्ठ पृतन्यत इति ।

---

१. ऋग्वेदे १०.८५; १०.१७.१; ४.५८.९ । अथर्ववेदे ६.६०; १४.२.५९

२. वाल्मीकि रामा० बाल० सर्ग ७२, ७३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वध्वञ्जलावुपस्तीर्य भ्राता भ्रातृस्थानो वा द्विर्लाजानावपति । त्रिर्जामदग्न्यानाम् । प्रत्यभिघार्यं हविरावपति । अवत्तं च प्रतिघार्यावपति । एषोऽवदानधर्मः । पश्चात् वरो हवनं कुर्वन् प्रार्थयत—

'अर्यमणं नु देवं कन्या अग्निमयक्षत । स इमां देवोऽर्यमा प्रेतो मुञ्चातु नामुतः स्वाहा ।

वरुणं नु देवं कन्या अग्निमयक्षत । स इमां देवो वरुणः प्रेतो मुञ्चातु नामुतः स्वाहा ।

पूषणं नु देवं कन्या अग्निमयक्षत । स इमां देवः पूषा प्रेतो मुञ्चातु नामुतः स्वाहा ।' इति

अविच्छिन्दत्यञ्जलिं स्रुचेव जुहुयात् कन्या । अपरिणीय शूर्पपुटेनाभ्यात्मं तूष्णीं चतुर्थं (हवनम्) ।

ओप्योप्य ह एके लाजान्परिणयन्ति । तथोत्तमे आहुती न सन्निपततः । अथास्यै शिखे विमुञ्चति यदि कृते भवतः ।

ऊर्णास्तुके केशपक्षयोर्बद्धे भवतः । 'प्र त्वा मुञ्चामि वरुणस्य पाशात्' इति । उत्तरा मुत्तरया ।

अथैनामपराजितायां दिशि सप्तपदान्यभ्युत्क्रामयति—इषे एकपदी । ऊर्जे द्विपदी । रायस्पोषाय त्रिपदी । मायोभव्याय चतुष्पदी । प्रजाभ्यः पंचपदी । ऋतुभ्यः षट्पदी । सखा सप्तपदी भव । सा मामनुव्रता भव । पुत्रान्विन्दावहै बहून् । ते सन्तु जरदष्टय इति ।

आचार्य उभयोः सन्निधाय शिरसी उदकुम्भेनावसिंचति ।

ब्राह्मण्याश्च वृद्धाया जीवपत्न्या जीवप्रजाया अगार एकां रात्रिं वसेत् । ध्रुवमरुन्धतीं सप्तर्षीनिति दृष्ट्वा वाचं विसृजेत्—जीवपत्नी प्रजां विन्देयेति ।

प्रयाण उपपद्यमाने—पूषा त्वेतो नयतु हस्तगृह्येति । यानमारोहयेत् ।

अश्मन्वतीरीयते संभरध्वमित्यर्धर्चेन नावमारोहयेत् ।

उत्तरेणोत्क्रमयेत् ।

जीवं रुदन्तीति रुदत्याम् ।

विवाहाग्निमग्रतोऽजस्रं नयन्ति ।

कल्याणेषु देशवृक्षचतुष्पथेषु 'माविन्दन्परिपन्थिनः' इति जपेत् ।

'वासे वासे सुमङ्गलीरियं वधूः ईक्षकानीक्षेत ।

'इह प्रियं प्रजया मे समृध्यताम्' इति गृहं प्रवेशयेत् ।

विवाहाग्निमुपसमाधाय पश्चादस्य आनडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुप

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विष्टायां समन्वारब्धायाम्—आ नः प्रजां जनयतु प्रजापतिरिरिति चतसृभिः प्रत्यृचं हुत्वा 'समञ्जन्तु विश्वेदेवाः' इति दध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वानक्ति हृदये ।

स्वयंवरः

भारतीयसाहित्ये स्वयंवरस्य प्रचुरवर्णनं प्राप्यते ।[1] स्वयंवरेषु निमन्त्रितानां वरेण्यानां कस्यचिदेकस्य रूपसौन्दर्येण, गुणातिशयेन पराक्रमौदात्त्येन वा जिता सती कन्या स्वयमेव जयमालया वरमलंकुर्वाणा तस्यैवाभूत् । चित्रद्वारापि पुरा स्वयंवरोऽभवत् । काश्चित् कन्यकाः योग्यवरान्वेषणाय सुरक्षिताः सत्यः परिभ्रमन्ति स्म । केषुचित् स्वयंवरेषु बुद्धिपरीक्षापि नियोजिता । कालिदासस्य विवाहकथा तादृशो वर्तते । पुरा कतिपयकन्यकाः स्वयंवरेभ्योऽपहृताः । ईदृशेषु स्वयंवरेषु युद्धावसरः स्वाभाविक एव । अस्मात्कारणादेव स्वयंवरस्य प्रचलनं विलुप्तप्रायमेव ।

रामायणानुसारं रामस्य विवाहः स्वयंवरविधिनाभवत् । रामः शिवस्य धनुषो भङ्गं कृत्वैव सीतां प्राप्तवान् । सीतास्वयंवरमधिकृत्य जनकस्य प्रतिज्ञासीत्—

यद्यस्य धनुषो रामः कुर्यादारोपणं मुने ।
सुतामयोनिजां सीतां दद्यां दाशरथेरहम् ॥ बाल० ६६.२६

प्रतिश्रवानन्तरं पितृकार्यं च, वरस्यार्थे सुखोदयं गोदानादिकं च सम्पादितम् ।

विवाहार्थं प्रपामध्ये वेदिः निर्मिता, समन्ततः गन्धपुष्पैरलंकृता च । तत्र सुवर्णपालिकानां साङ्कुराणां छिद्रकुम्भानामङ्कुराढ्यानां शरावाणां सधूपकानां धूमपात्राणां शंखपात्राणां स्रुवाणां स्रुचामर्घ्यपूरितपात्राणां लाजपूर्णानां पात्रीणां संस्कृतानामक्षतानां च शोभा समायोजिता । वेदिर्दर्भैरास्तृता । वेद्यां मन्त्रपुरस्कृतमग्निमाधाय वसिष्ठमुनिर्जुहाव । ततः सर्वाभरणभूषिता सीता समानीता । तामग्नेः समक्षं संस्थाप्य रामाभिमुखं जनकोऽब्रवीत्—

इयं सीता मम सुता सहधर्मचरी तव ।
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना ॥
पतिव्रता महाभागा छायेवानुगता सदा । बाल ७३.२७,२८

इत्युक्त्वा जनको मन्त्रपूतं जलं प्राक्षिपत् । ततोऽग्निप्रदक्षिणा कृता । अस्मिन्नवसरेऽप्सरसां नृत्यं गन्धर्वाणां गायनं चाभूताम् ।

कुमारसंभवे पार्वतीपरिणयः स्वयंवरविधिना घटितो वर्तते । पार्वतीतपसा प्रीणितः शिवो निवेदितवान्—

'अद्यप्रभृत्यवनताङ्गि तवास्मि दासः, क्रीतस्तपोभिः' इति ।

ततः सप्तर्षयः पार्वतीपितुः समीपं शिवार्थं कन्यायाचनाय गतवन्तः । कालिदासानुसारं विवाहसम्बन्धस्थापने स्वेच्छाचारस्तु न श्लाघ्यः, अपितु—

---

१. प्रथममृग्वेदानुसारं सूर्यायाः स्वयंवरो दृश्यते । स्वयंवरेऽस्मिन् सर्वे देवाः समागताः । तेषामाजो विजयस्तत्रासीदश्विद्वयस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'विक्रियायै न कल्पन्ते सम्बन्धाः सदनुष्ठिताः'।

प्रतिनिधिमण्डलमिदं कन्यापित्रे शिवेच्छां प्रोवाच। पिता कन्यामातुः समर्थनमैच्छत्। यतः—

'प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः।'

तस्याः समर्थने जाते पिता कन्यां प्रत्यवदत्—

एहि विश्वात्मने वत्से भिक्षासि परिकल्पिता।
अर्थिनो मुनयः प्राप्तं गृहमेधिफलं मया॥

ऋषयस्तु सर्वेषां समर्थनं प्राप्य शिवसमीपं गतवन्तः। अनेन प्रकरणेन प्राचीनयुगे विवाहसम्बन्धस्थापनस्य शालीना रीतिः स्पष्टा।

कालिदासानुसारं विवाहोत्सवे कन्याया नगरस्य ग्रामस्य वा सर्वे कुटुम्बिनः सर्वत्रालङ्करणं कृतवन्तः। सामाजिकोऽग्रमुत्सवोऽभूत्। कालिदासानुसारं तु पार्वतीविवाहप्रारम्भे—

अंकाद्ययावङ्कमुदीरिताशीः सा मण्डनान्मण्डनमन्वभुङ्क्त।
सम्बन्धिभिन्नोऽपि गिरेः कुलस्य स्नेहस्तदेकायतनं जगाम॥

तस्मिन्नवसरे पार्वत्याः शरीरे बन्धुस्त्रियो मनोरमतमं मंगलप्रसाधनं चक्रुः। पार्वत्या माता हरितालेनार्द्रेण मनःशिलया च तस्याः तिलकं कृतवती। पश्चात् पार्वती कुलदेवताभ्यः प्रणता बभूव सतीनां च पादग्रहणं चकार। सर्वासां माङ्गलिकमाशीर्वादं प्राप्तवती पार्वती विवाहक्रियायै सज्जिता बभूव।

शिवस्य पाणिग्रहणस्यानुरूपं प्रसाधनं मातृभिः सम्पादितम्। तेन सह सुशोभना वरयात्रा समारब्धा। सप्तर्षयः पौरोहित्ये नियुक्ताः। वरयात्रायाः प्रत्युद्गमनाय हिमालयबान्धवा गताः। श्वशुरः स्वयमेव शिवं स्वमन्दिरे प्रवेशयामास। शिवस्तु रत्नमर्घ्यं मधुमद्गव्यं नवे दूकूले च श्वशुरेणोपनीतानि प्रत्यग्रहीत्।[१] पश्चात् शिवः पार्वतीसमीपं नीतः। गुरुणा दत्तं तस्याः करं शिवो जग्राह। ततोऽग्निप्रदक्षिणाः कृताः। अग्नौ लाजमोक्षं पुरोधाः कारयामास। पार्वती लाजधूमगन्धं स्ववदनं निनाय। पुरोधास्तु पार्वतीं भर्त्रा सह धर्मचर्यां कर्त्तुमादिदेश। शिवः पार्वतीं ध्रुवदर्शनाय प्रयोजितवान्। पार्वती तं दृष्ट्वा प्रोवाच—'ध्रुवो दृष्टः' इति। विवाहक्रियायामित्थं समाप्तायां गुरूणामाशीर्वादो वरवधूभ्यां प्रायुज्यत। पश्चात् जनाः तयोरुपर्यार्द्राक्षतारोपणं कृतवन्तः। तयोर्मनोरंजनाय नाट्याभिनयोऽप्सरोभिः प्रादर्शि।

विवाहानन्तरं पुनः गर्भाधानादिसंस्काराणां समारम्भो भवति।

---

१. विवाहोपलक्ष्येण बहुषु अवसरेषु कन्यार्थं जामात्रर्थं वा बहुविधानि धनानि रथ-हस्ति-दासी-वस्त्रा-भूषणादीनि पितृकुलात् प्राप्तानि। जामातुः पक्षादपि वधूकुलसमागतेभ्यः सम्बन्धिजनेभ्यो रत्नादीनि प्रदेयानि आसन्। महाभारते आदिपर्वं [illegible] अध्यायम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

आश्रम-व्यवस्था

मानव-जीवनं शतवार्षिकमिति पुरा लोकधारणासीत् । तस्मिन् दीर्घजीवने न केवलमाधिभौतिकेन संग्रहेण अपितु ज्ञानेन दर्शनेन रसवृत्त्या धर्मभावेन चाधिक आनन्दः प्राप्य आसीत् । अनेनोद्देश्येन मानवः कदापि तपोमयं जीवनमधिकृत्याध्यय नं करोति स्म परिश्रमातिरेकं स्वीकृत्य धनमर्जति स्म वा । कतिपयजनास्तु मुनिधर्ममनुसृत्य सर्वं गृहोचितं परित्यज्य ऋषिचर्याय वने वसन्ति स्म ।

पशवस्तु प्रायशोऽनतिश्रमेण जीवन-धारणार्थमपेक्षितानि वस्तूनि स्वभावतो लभन्ते । मानवस्वभावो विपरीत एव । स सततश्रमेणैवात्मनः सर्वोच्चसुखमभ्युदयं च साधयति । श्रमस्तस्य पञ्चविधः—अध्ययनात्मकः, सर्जनात्मकः, तपस्यात्मकः, सेवात्मकः, योगात्मकश्च । इमाः श्रमप्रवृत्तीरधिकृत्य तस्य जीवनस्य चत्वारो भागः कल्पिताः । तेषु प्रत्येकं पञ्चविंशतिवर्षावधिकः कृतः । इमे भागा एवाश्रमाः । आ समन्तात् श्रमोऽत्रेत्याश्रमशब्दस्य व्याख्या ।[1] आश्रमसोपानेन आजीवनमधिकाधिकः श्रमः क्रियते । अध्ययनात्मको ब्रह्मचर्याश्रमः, सर्जनात्मको गृहस्थाश्रमः, तपस्यात्मको वानप्रस्थः, योगात्मकस्तु संन्यास एव ।[2]

ब्रह्मचर्याश्रमः

जीवनस्य प्रथमे भागे प्राप्तस्य ज्ञानालोकस्य प्रकाशे जीवनयात्रा प्रगुणरमणीया भवति । मानवजीवनस्य साफल्यस्य मात्रा तस्यार्जितज्ञानस्य मात्रयैव परिमिता । इदमेव ज्ञानस्य शाश्वतं सार्वत्रिकं च फलम् । एतदुद्दिश्य सदैव सर्वत्र च मानवसमाजे बाल्यं शिक्षणाय कल्पितम् । मूलतस्तु ब्रह्मचर्यं यावज्जीवमासीत् । तदेव व्याख्यातं महाभारते कथं भवति ब्रह्मचारीति प्रकरणे—

अपेतव्रतकर्मा तु केवलं ब्रह्मणि स्थितः ।
ब्रह्मभूतश्चरँल्लोके ब्रह्मचारी भवत्ययम् ॥ आश्व० २६·१६

ज्ञानस्य प्रतिष्ठा

भारतीयकल्पनानुसारं ज्ञानाधीनं हि देवत्वम् । विद्वांसो हि देवा इति[3] । अपरं च—

---

१. आश्राम्यन्त्यत्र अनेन वा इत्यपरा व्याख्या ।

२. चतुष्पदी हि निःश्रेणी ब्रह्मण्येषा प्रतिष्ठिता ।
एतामारुह्य निःश्रेणीं ब्रह्मलोके महीयते ॥
इति महाभारते ब्रह्मणां ज्ञानस्य, मानवानां गार्हस्थ्यस्य, ऋषीणां तपसः, यतीनां त्यागस्य च प्रवृत्तय एकस्यैव पुरुषस्य जीवने सहपर्यवसानाय चतुराश्रम-व्यवस्था समायोजिता । एषा हि निःसन्देहं पूर्णतालाभाय वर्तते।

३. शतपथब्राह्मणे ३.७.३.१०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रिये स्वाध्यायप्रवचने भवतः। युक्तमना भवति, अपराधीनोऽहरहरर्थान् साधयते, सुखं स्वपिति, परमचिकित्सक आत्मनो भवति, इन्द्रियसंयमश्च एकारामता च प्रज्ञावृद्धिः यशो लोकपक्तिः, प्रज्ञा वर्धमाना चतुरो धर्मान् ब्राह्मणमभिनिष्पादयति, ब्राह्मण्यं प्रतिरूपचर्या यशो लोकपक्तिम्, लोकः पच्यमानश्चतुर्भिः धर्मैर्ब्राह्मणं भुनक्ति--अर्चया च दानेन चाज्येयतया चावध्यतया च।[1]

उपनिषत्सु ब्रह्मज्ञानेन ब्रह्मत्वप्राप्तिः सन्दिष्टा।[2] त्रयो धर्मस्कन्धाः--यज्ञोऽध्ययनं दानमिति।[3] ब्रह्मचर्यरहितास्तु ब्रह्मबन्धव इति धिक्कृताः। अविद्वांसो नरके पतन्तीति भयकारणमेवाज्ञानं मतम्। विद्यया देवलोको जय्यः। देवलोको वै लोकानां श्रेष्ठः। तस्माद्विद्यां प्रशंसन्ति।[4]

महाभारतानुसारं तु

यो विद्यया तपसा जन्मना वा वृद्धः स पूज्यो भवति द्विजानाम् आदि ८४'२

मनुः वेदाध्ययनेनैव ब्राह्मणत्वं प्रतिपादयति। तथा हि--

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥ २'१६८

वेदाध्ययनं समर्थयन् मनुः प्राह--

स्नातकस्तु मनुना समाजस्य सर्वोच्चपुरुषो मतः। तदनुसारं ब्रह्मभूता एव जीवनकाले ब्रह्मतत्त्वज्ञाः—

वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥ १२.१०२

भागवतानुसारं शूद्रोऽपि ब्रह्मचर्यनिष्ठया परब्रह्म प्राप्तुं शक्नोति।[5]

पुरा तु विदुषां समक्षं धनस्य लौकिकप्रतिष्ठायाश्च महत्त्वं तृणवदासीत्। दिग्विजयिनो राजानोऽपि यदा विदुषां चरणरजसात्मानं पावयन्ति स्म तदा लोकवैभवस्य कापेक्षासीद्विद्वद्भ्यः।

राजानस्तु विदुषामाश्रया एव सम्मानार्थं तेभ्योऽग्रहारादिकं, गृहं, धनं, वेतनं च ददति स्म। राज्ञां समक्षमपि कतिपयकवयश्छत्रधारणाधिकृता बभूवुः। बहवो राजानोऽपि सिंहासनं परित्यज्याचार्यशरणमुपजग्मुरित्यतो नास्ति ज्ञानस्य प्रतिष्ठाया अपरं परं प्रमाणम्।

---

१. शतपथे ११.५.७.१
२. मुण्डके ३.२.९
३. छान्दोग्ये १.२३.१
४. बृहदारण्यके ४.४.११; १.५.१६
५. भाग० ९.२'९—१४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अध्ययनविधिः

वैदिकयुगे द्वादशवर्षाद्वेदाध्ययनं प्रारब्धम् । प्रायशः चतुर्विंशतिवर्षपर्यन्तं वेदाध्ययनं कृतम् । कतिपयब्रह्मचारिणस्तु समस्तजीवनमेवाध्ययनाय विनियोजितवन्तः । भरद्वाजस्तु त्रिभिरायुर्भिः ब्रह्मचर्यमुवास । तं ह इन्द्र उपव्रज्योवाच—यत्ते चतुर्थमायुर्दद्यां किमेतेन कुर्या इति । ब्रह्मचर्यमेवैतेन चरेयमिति होवाच ।[१] वैदिकयुगे प्रत्येक—वेदस्याध्ययनाय द्वादशवर्षावधिर्निश्चितः । अतः द्वादश, चतुर्विंशतिः षट्त्रिंशत्, अष्टचत्वारिंशत् वर्षाणि वेदाध्ययनाय नियतानि ।[२] मनुस्तु त्रयाणां वेदानामध्ययनार्थं षट्त्रिंशद्वर्षावधिं निश्चित्य विकल्पान् प्रस्तुतवान्—

षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् ।
तदर्धिकं पादिकं वा ग्रहणान्तिकमेव वा ॥ ३.१

ब्रह्मचर्यव्रतायोपनिषद्युगे गृहस्था अपि स्वीकृताः । यदा कदा पिता स्वपुत्रेण सह कस्यचिदाचार्यस्य शिष्यो भूत्वा ब्रह्मचर्यमुवास ।[३]

विद्याधिकारिण:

पुरा योग्यविद्यार्थिनां समागमाय गुरवः सदैव प्रयत्नशीला बभूवुः । प्रतिभाशालिन्या शिष्यपरम्परया आचार्यः परिश्रमेणार्जितं स्वज्ञाननिधिमक्षुण्णं कर्त्तुमियेष । कालिदासानुसारं तु—विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयति ।

वैदिककाले विद्याप्राप्तिसमर्थां प्रतिभां दृष्ट्वैवाचार्यः विद्यार्थिनः स्वीकरोति स्म । निष्प्रतिभास्तु गुरुगृहं परित्यज्य कृषिकर्मणि वस्त्रनिर्माणे वा नियोजिताः ।[४] विद्यार्थिनो मनोवृत्तिं परीक्ष्यैव व्यवसायनियोजनमक्रियत ।[५] शाश्वतोऽयं सिद्धान्तो विद्यादानमधिकृत्य मनुनोद्धृतः—

विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना ।
आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत् ॥
विद्या ब्राह्मणमेत्याह शेवधिष्टेऽस्मि रक्ष माम् ।
असूयकाय मां मा दास्तथा स्यां वीर्यवत्तमा ॥
यमेव तु शुचिं विद्यान्नियतब्रह्मचारिणाम् ।
तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने ॥२.११३-११५

---

१. तैत्तिरीयब्राह्मणे ३. १०. ११ ।
अनेन नैष्ठिकब्रह्मचर्येण ब्रह्मविष्टपगतिः प्राप्यत इति भागवते ११.१७,३०.

२. गोपथब्राह्मणे २. ५.

३. बृहदारण्यके ६. २. ४; छान्दोग्ये ५. ११ ।

४. ऋग्वेदे १०. ७१. ६ ।

५. ऋग्वेदे ९. ११२. १ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विष्णुस्तु परीक्षितमेवाध्यापयितुमादिदेश ।[1] अयोग्यविद्यार्थिनो नोपनेया इति हारीतेन समादिष्टम्—

यो वै धीरः शुश्रूषुरध्यायवृत्तो यस्मिन् शोचेन्न व्यथेन्नापि धर्मः ।
तस्मै ज्ञानं श्रद्धया संधेयं नान्तर्दुष्टे दुःखशीले कत्थने ।।

उपनिषत्सु विद्यार्थिनां स्वीकरणात्प्राक् तेषां परीक्षणस्य वृत्तानि सन्ति । प्रथमं तावद् गुरुभिः सह संलापात् प्रागेव तपसो विधानमासीत् ।[2] पिप्पलादस्तु कौशल्यस्य ब्रह्मिष्ठत्वं ज्ञात्वैव तं प्राणविद्याया दानाय स्वीचकार ।[3] कठोपनिषदि नचिकेतसः परीक्षाया वर्णनं वर्तते ।

शूद्राणां विद्याधिकारः

वैदिकयुगे शूद्रा अपि वेदाध्ययनाय स्वीकृताः । बहवस्तत्रार्येतरा विद्वांसो वेदमन्त्राणां रचयितारो बभूवुः । आश्वलायनगृह्यसूत्रे शूद्राणां समावर्तनस्य विधिर्वर्णितः ।[4] जातकेषु बहूनां शूद्रचाण्डालानां दार्शनिकज्ञानस्योत्कर्षो निर्दर्शितः । महाभारते आदिमचातुर्वर्ण्यप्रवृत्तिर्निर्दिष्टा—

इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती ।
विहिता ब्रह्मणा पूर्वं लोभादज्ञानतां गताः ।। शा० १८१.१५

अधुना द्विजादिभिः सुगृहीता याः काश्चिच्छिल्पविद्या इति प्रथिताः तासामध्येतारः शिष्याश्च प्रायशः शूद्रा एव बभूवुर्न ब्राह्मणादयः । मनुनापि शूद्राचार्या उल्लिखिताः । तेषां शिष्यास्तु अशूद्रा अपि बभूवुः ।

शूद्रा अपि बौद्धसंघे प्रविष्टाः सन्तो ज्ञानिनो बभूवुः । जैनसंस्कृतौ चाण्डालानामपि विद्याधिकारः । शिल्पकलादिषु श्वपाकानां शूद्राणां च परमं प्रावीण्यमासीदेव ।

स्त्रीणां विद्याधिकारः

सुकुमारीणां नारीणामध्ययनापेक्षितं तपोमयजीवनं सामान्यतो भवितुं नार्हति । वेदाध्ययनाय स्वल्पा एव नार्यो वैदिककालेऽपि समुत्सुका आसन्, किन्तु वेदाध्ययनं तस्मिन् युगे वर्जितं नासीत् । लोपामुद्रा, विश्ववारा, अपाला, आत्रेयी, काक्षीवती घोषा च ऋषिका बभूवुः । ताभिः कृतानि सूक्तानि संहितासु संगृहीतानि वर्तन्ते ।

अथर्ववेदानुसारं तु—ब्रह्मचर्येण कन्या युवानं विन्दते पतिम् ।[5] उपनिषत्सु मैत्रेयी

१. विष्णुधर्मसूत्रे २९.३.४ ।
२. छान्दोग्ये ८.७.३
३. छान्दोग्ये ४.४
४. आ० गृ० ३.८
५. अथर्व० ९.५.१८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गार्गी वाचक्नवी च प्रातःस्मरणीया विदुष्यो वर्णिताः। तस्मिन्काले विदुषीः कन्यकाः पुत्रीरूपेण प्राप्तुं गर्भाधाने विशेषायोजनानि कृतानि।[१]

कालान्तरे स्त्रिय आचार्या उपाध्यायाश्च बभूवुः।[२] स्त्रीछात्रास्तु 'अध्येत्री माणविका चेति' विख्याताः। छात्रा वेदाध्ययनमपि कृतवत्यः। ऋग्वेदस्य बह्वृचः शाखायाः विद्यार्थिन्यो बह्वृच्यः सम्बोधिताः। कतिपयस्त्रियोऽस्त्रशस्त्रविद्यासु शिक्षिता अभवन्। तासां सर्वासां समावर्तनविधिः आश्वलायनगृह्यसूत्रे निर्दिष्टः।[३]

महाभारतानुसारं स्त्रियो ललितकलासु शिक्षिताः। राजकुलदास्यश्चतुष्षष्टिविद्याविशारदाः, नृत्यादिकुशलाश्च बभूवुः। राजकुमारीणां शिक्षणस्योल्लेखाः सुविदिता एव। स्त्रियः स्वाध्यायं कुर्वन्ति स्म—

अपि चैताः स्त्रियो बालाः स्वाध्यायमधिकुर्वते अर० ३४.७०

रामायणे स्त्रीणां ब्रह्मचर्यं वर्णितमेव।[४]

महाभाष्ये कुमारश्रमणा, कुमारप्रव्रजिता, कुमाराध्यापिका, कुमारतापसी, कुमारपण्डितेति पदानां प्रचलनैः पतञ्जलिः स्त्रोणां प्रशिक्षणं प्रकटयति।

परवर्तियुगे स्त्रीणां काव्यरचना सुसमृद्धा वर्तते। गाथासप्तशत्यां कवयित्रीभी रचिताः पञ्चाशत्प्राया गाथाः सन्ति।[५] राजशेखरस्तु स्त्रीशिक्षाप्रवृत्तिं निदर्शयन्नाह—पुरुषवद्योषितोऽपि कवयित्र्यो भवेयुः। संस्कारो ह्यात्मनि समवैति। न स्त्रैणं पौरुषं वा विभागमपेक्षते। श्रूयन्ते दृश्यन्ते च महामात्यदुहितरो गणिकाः कौतुकिभार्याश्च शास्त्रप्रहतबुद्धयः कवयः।[६] शङ्करमण्डनमिश्रयोः विवादे मिश्रस्य पत्नी निर्णायिका नियुक्तेति विदितचरम्।

भारतीयधारणानुसारं सरस्वती पार्वती च विद्याया देव्यौ स्तः, अतएव कथं नाम स्त्रीणामध्ययनं वर्जितं स्यात्?

विद्यालयाः

विद्यालयस्तु भारते शाश्वतरूपेणाचार्याणां गृहमभवत्। तस्मिन्नाचार्यगृहे विद्यार्थिन आचार्यपुत्रैः सह निवसन्तः पठन्ति स्म। ब्रह्मयज्ञे सर्वेषां विदुषां ब्राह्मणानामध्यापनमेव

---

१. बृहदारण्यके ६.४.१७

२. पाणिनिसूत्रं ४.१.५९, ३.३.२१ अधिकृत्य काशिका

३. आश्वलायन० ३.८.११

४. बाल० २७.१३

५. परवर्तिकवयित्र्यः शीलभट्टारिका, देवी, विजयाङ्का, मधुरवाणी, अभिरामकामाक्षी, तिरुमलम्बा, मनोरमा, कमला, सुन्दरी, प्रियंवदा, वैजयन्ती, लक्ष्मीराज्ञी, ज्ञानसुन्दरी, राजम्म, क्षमादेवी च बभूवुः।

६. काव्यमीमांसायां दशमाध्यायतः। अर्थशास्त्रस्य गणिकाध्यक्षप्रकरणानुसारं वेतनं वाञ्छन्तीनां ललनानां गीत-वाद्य-नृत्य-प्रसाधनविषयकशिक्षायाः प्रबन्धः राजभिः स्वयमेव कृतः। एतदेव समर्थितं कामसूत्रे १.३.१२ दशकुमारे च।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नित्यकर्म मनुना निर्णीतम् ।[१] ईदृशानां महर्षीणामाचार्याणां च गृहाः प्रायः वनेषु ग्रामेषु वा स्थिताः । तेषामवस्थानं नगरेषु नासीत् । ईदृशोषु स्थलीषु वनपर्वतोपनदप्रदेशेषु च ग्रीष्मर्तौ : सन्तापो नासीत् । आचार्यकुलस्य गवार्थं शस्यं प्रचुरमविद्यत, हवनाय समिधः समजायन्त, विद्यार्थिनां स्नानाय सरोवरा नद्यो वाऽऽसन् । उतनिषत्सु ब्रह्मचर्यमरण्यवासस्य पर्यायो मतः । अरण्येषु वसतामृषीणां समीपमध्ययनाय विद्यार्थिनः समुपागताः ।[२]

महाभारते कण्वव्यासवसिष्ठभरद्वाजपरशुरामादीनामाश्रमाणां स्थितिर्वर्णिता । कण्वाश्रमस्तु मालिनीनद्याः समीपमवस्थितः । तद्यथा—

मनःप्रह्लादजननं दृष्टिकान्तमतीव च ॥
शीतमारुतसंयुक्तं जगामान्यन्महद्वनम् ।
सर्वर्तुकुसुमवृक्षैः सुखच्छायैः समावृतम् ॥
प्रेक्षमाणो वनं तत् तु सुप्रहृष्टविहङ्गमम् ।
आश्रमप्रवरं रम्यं ददर्श च मनोरमम् ।।आदि० अध्याय६४ तः
नदीं चाश्रमसंश्लिष्टां पुण्यतोयां ददर्श सः ।
सर्वप्राणभृतां तत्र जननीमिवाधिष्ठिताम् ॥

व्यासाश्रमो हिमालये प्रतिष्ठित आसीत् । भरद्वाजस्याश्रमो गङ्गा द्वारे आसीत् । आश्रमेऽस्मिन् धनुर्वेदोऽपि शिक्षितः । परशुरामस्याश्रमो महेन्द्रपर्वतेऽत्रस्थितः । वसिष्ठस्याश्रमो मेरुगिरौ बभूव ।

रामायणानुसारं प्रयागे गङ्गायमुनयोः सङ्गमप्रदेशे भरद्वाजस्याश्रम आसीत् । मुनिभिः सह तत्र मृगपक्षिणामावासोऽभवत् । छात्राणामावासाय पर्णशाला निर्मिताः । हवनस्याग्नयो वृक्षा मृगपक्षिणश्च लसन्ति स्म । आश्रमकुशलं 'शरीरेऽग्निषु शिष्येषु वृक्षेषु मृगपक्षिषु' पृच्छ्यते स्म ।

रामायणयुगे दण्डकारण्येऽगस्त्यस्याश्रमोऽभवत् । तस्य नैसर्गिकी शोभा शान्तिश्चास्य मनोरमे आस्ताम् ।

महाभारतयुगे तक्षशिलाविश्वविद्यालये भारतस्य विभिन्नप्रदेशेभ्यो विद्यार्थिन उच्चशिक्षणस्य प्राप्तये समागताः ।[३] पाणिनिः कौटल्यश्च सम्भवतो विद्यालयेऽस्मिन् शिक्षितौ । विद्यालयस्यात्रस्थितिरुपनदप्रदेशेऽभवत् विद्यालयभवनानि च गिरिप्रस्थे निर्मितानि बभूवुः ।

जातकसाहित्यानुसारं हिमाद्रिप्रस्थे बहवः शिक्षणाश्रमा अवस्थिताः । नैष्ठिकब्रह्मचारिणां महर्षीणां च विद्यालयास्तत्राभवन् । केषुचिद्विद्यालयेषु विद्यार्थिनां संख्या पञ्चशतप्रायाभूत् ।

---

१. अध्यापनं ब्रह्मयज्ञः । मनुस्मृतौ ३. ७०
२. मुण्डक १.२.११—१२ छान्दोग्य ८.५.३
३. सुसीमजातके धुसजातके च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पाणिनेर्जन्मभूमिः शालातुरी वैयाकरणाचार्याणामावासभूमिरभूत्। ह्वेनसांगमहोदयानुसारं नगरेऽस्मिन् व्याकरणज्ञानं परम्परानुसारं सातत्यमभजत। अध्ययनशीला अनुसन्धानपरायणाश्च ब्राह्मणा अस्य नगरस्य परमविख्याता बभूवुः।[1]

उपर्युक्तयुगे काशीपुरी वैदिकसाहित्यस्याध्ययनाध्यापनाभ्यां परां प्रसिद्धिं गता। बोधिसत्त्वेन प्रतिष्ठापिते काशीविद्यालये शतराष्ट्रेभ्यः समागता विद्यार्थिनो ब्राह्मणाः क्षत्रियाश्चाध्ययनपरायणा बभूवुः।[2]

गौतमबुद्धस्य युगे मगधकोसलादिषु देशेषु ब्रह्मदेयग्रामेषु वेदाध्यापनं समायोजितमासीत्। मनसाकटनामके ब्राह्मणग्रामे ब्रह्मविद्याध्यापिता।

परवर्तियुगे महर्षीणामाश्रमप्रदेशे देवमन्दिराणां निर्माणमकारि। अग्निपुराणानुसारं तु—

तीर्थे चायतने पुण्ये सिद्धक्षेत्रे तथाश्रमे।
कर्त्तुरायतनं विष्णोर्यथोक्तात् त्रिगुणं फलम्॥ ३८.१५

आचार्याणां विद्यालयास्तु मन्दिरैः सम्बद्धा आसन्। मन्दिराणां विद्यालयस्वरूपं ह्वेनसांगमहोदयस्य अधोलिखितोद्धरणेन प्रमाणितम्—

Beside the capital and close to the Ganges was the I—lan—na mountain, the dark mists of which eclipsed sun and moon; on this an endless succession of Rishis had always lodged and their teachings were still preserved in the Deva temples.[3]

मन्दिरेष्वध्यापनं पुण्यावहं सम्मतम्। अधुनाऽपि धारानगर्यां सरस्वतीमन्दिराणि विराजन्ते, येषु महाराजभोजस्य काले विविधविद्यानामध्यापनमकारि।

ह्वेनसांगमहोदयस्तु निजभारतयात्रावर्णनप्रसङ्गे विद्यालयानां विवरणं प्रस्तुतवान्। तस्यानुसारम्—असमप्रदेशे कामरूपं वैदिकविद्याया महाकेन्द्रमभूत्। विद्यालयोऽयं राज्ञा भास्करवर्मणा स्थापितः। काशीकलिङ्गोज्जयिनीचित्तौडादिभ्यः प्रदेशेभ्यः विद्यार्थिनस्तत्रागताः। तस्मिन् युगे काश्यां विंशतिर्देवमन्दिराणि बभूवुः। मन्दिरसमीपं सर्वत्र वृक्षकुञ्जानां छायाऽऽसीत्, तेषां मध्ये निर्मलजलप्रस्रवाः प्रवाहिताः। भारतस्य विविधप्रदेशेष्वीदृशानां विद्यामन्दिराणां संख्या त्वगण्यैवासीत्।

गुप्तयुगस्य रघुवंशे वसिष्ठस्य कादम्बर्यां जाबालेराश्रमाणां काव्योचितवर्णनेन तेषां रमणीयताधुनापि हृदयेऽङ्किता भवत्येव। हर्षचरिते बाणेन विन्ध्यवनाधिष्ठितस्य दिवाकरमित्रस्याश्रमस्य वर्णनं कृतम्। आश्रमेऽस्मिन् विभिन्नसम्प्रदायानां धर्माचार्याणां च परस्पर-

१. ह्वेनसांगे वाटर्सकृते प्रथमे भागे पृ० २२२।
२. नंगलीसजातके कोसियजातके च।
३. वाटर्स—ह्वेनसांग द्वितीयभागस्य पृ० १८८।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विवादेन ज्ञानं समवर्धत। वाणस्तु स्वयमेव चतुर्दशवर्षाणि गुरुकुलेष्वपठत्। तेषां विषये तेनालोचितम्—'शुकसारिकारब्धाध्ययनदीयमानोपाध्यायविश्रान्तिसुखानि साक्षात् त्रयीतपोवनानि बान्धवानां भवनानि भ्रमन् सुखमतिष्ठत्।' तत्र गुरुकुलेषु सदैव वेदपाठोऽभवत्, यज्ञाग्निः प्रज्वलितोऽभूत्, हवनं कृतं च।

खीष्टस्य पश्चात् दशशताब्दादारभ्य मन्दिरेषु प्रतिष्ठितानां शिक्षणसंस्थानां प्रायश ऐतिहासिकोल्लेखाः प्राप्यन्ते। बीजापुरजनपदस्य सलोत्गीग्रामे राष्ट्रकूटराजस्य कृष्णस्य मन्त्रिणा नारायणेन प्रतिष्ठापितस्य त्रयीपुरुषमन्दिरस्य प्रधानकक्षेऽध्यापनं कृतम्। विद्यार्थिनामावासार्थं सप्तविंशतिच्छात्रालया निर्मिताः। एकादशशताब्दे 'एन्नारियम्' नगरे वैदिकविद्यालयोऽर्काटप्रदेशे स्थापितः। विद्यालयेऽस्मिन् वेदानां सूत्राणां वेदाङ्गानां दर्शनानां चाध्यापनाय षोडशाध्यापका नियुक्ताः। विद्यालयेऽस्मिन् चत्वारिंशदधिकत्रिशद्विद्यार्थिनो विविधविषयाणां शिक्षां गृहीतवन्तः। ईदृशा विद्यालयाः चिंगलीपुटे वेंकटेश्वरस्य मन्दिरे हेब्बालनगरे भुजब्बेश्वरस्य मन्दिरे च स्थापिताः। कश्मीरेषु बहुषु मठेषु मन्दिरेषु आचार्यगृहेषु चाध्यापनमभवत्।[1] कल्हणो राजतरंगिण्यां यशस्करस्य राज्ञो मठस्य वर्णनं कृतवान्—'भूभुजा दानशौण्डेन पैतृके स्थण्डिले कृतः, छात्राणामार्यदेश्यानां तेन विद्यार्थिनां मठः'॥ इति।

दशमशताब्देऽग्रहारशिक्षणसंस्थानां विशेषाभ्युदयोऽभवत्। अग्रहारास्तु राजभिः समृद्धिमद्भिर्वा विद्वद्भ्यः प्रदत्ताः। अग्रहारभोगिनो विद्वांस आचार्यपथेन समाजस्याभ्युदयं कुर्वन्ति स्म। अग्रहारसमकक्षाः संस्था घटिका ब्रह्मपुरी च तस्मिन्युगे प्रचलिता आसन्। ईदृशीनां संस्थानां दक्षिणभारते प्राचुर्यमासीत्।

राष्ट्रकूटराजवंशैर्दशमशतके धारवाडजनपदे 'कदियुराग्रहारः' द्विशतब्राह्मणेभ्यो दत्तः। अस्मिन्नग्रहारे वेदकाव्यशास्त्रव्याकरणतर्कपुराणराजनीतीनामध्यापनमभवत्। विद्यार्थिभ्यो निःशुल्कभोजनमपि तस्याग्रहारस्यायैः प्रदत्तम्। सर्वे ब्राह्मणाः सर्वज्ञा एवाभवन्। उत्तरप्रदेशे विहारे वङ्गे चाग्रहारसमाः संस्थाः टोलनाम्ना विख्याता आसन्। नागरिकाणां भूदानैरर्थसाहाय्येन च तत्रत्याचार्याणां विद्यार्थिनां च वृत्तयो दत्ताः। आचार्या अपि विद्यार्थिनामावश्यकतापूर्त्यर्थं प्रयत्नं चक्रुः।

खीष्टस्य पश्चात् नवमे शतके शङ्कराचार्यो वैदिकशिक्षणाय विश्वविद्यालयानां स्थापनां कृतवान्। तस्य विश्वविद्यालया मठा इति ख्याता बभूवुः। तेषामवस्थितिर्भारतस्य चतुःसीमान्तप्रदेशेऽभवत्। तेन मठाः पुरीकाञ्चीद्वारकाबदरीषु प्रतिष्ठापिताः।

बौद्धविद्यालयाः

बौद्धविद्यालयानामादिप्रवर्तको गौतमबुद्धो बभूव। एषु विद्यालयेषु जीवनपर्यन्तं दशशिक्षापद-पञ्चशीलादिग्रहणस्यायोजनं कृतम्। अनेन प्रकारेण गौतमस्योपक्रमो वैदिक-

---

१. राज० २६; ८'१००। मन्दिरेषु मूर्तयो भवन्ति, न मठेषु। मठमन्दिरे उभे लोकानां चारित्रिकविकासाय प्रतिष्ठिते। तत्राचार्या महापण्डिताश्च नियोजिताः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतेर्नैष्ठिकब्रह्मचर्यवत् प्रतिभाति । यद्यपि बौद्धसंस्कृतावरण्यवासस्य महत्त्वं साधनापथे स्वीकृतमेव, किन्तु भिक्षार्थं नगरसमीपमेव निवसनं समीचीनं सम्मतम् । गौतमस्य जीवनकालादारभ्य प्रायः नगराणां समीपमेव विहाराणां निर्माणं क्रियते स्म पुरा समृद्धिमन्तः। श्रीमन्त आत्मकल्याणार्थमसंख्यविहाराणां रचनां कृतवन्तः। विहारास्तु प्रायः सदैव निर्मातु-रार्थिकपरिस्थित्यनुरूपाव बभूवुः । वास्तुविधानानुरूपः स्वास्थ्यप्रदः सुखकरश्च विहाराणां विन्यासोऽवर्तत ।

श्रावस्त्यां जेतवनविहारे विंशत्यधिकशतभवनान्यासन् । विहारेऽस्मिन्नुपदेशाय, समाधये, भोजनायाध्यापनाय च विभिन्नाः शाला अभवन् । औषधालयाः पुस्तकालयाः अध्ययन-कक्षाश्च पृथक्पृथक् निर्मिताः । विहारपरिधौ स्थितं जलाशयं परितो मनोरमा छायासीत् । विहारोऽयं प्राकारैः परिवेष्टित आसीत् । विहारस्य पुस्तकालये वैदिकसंस्कृतेरपि शिल्प-विज्ञानादिविषयाणाञ्च पुस्तकानि संगृहीतानि । सर्वेषां धर्माणामनुयायिनोऽस्मिन् विहारे आवासमकुर्वन् । गौतमेनादिष्टम्—'विहारभूमौ वृक्षारोपणं कुरु, राजमार्गमभितः वृक्षा-लङ्करणं भवतु' इति ।

गौतमेन सह सहस्राधिकविद्यार्थिनोऽपि परिभ्रमन्तः शिक्षां लब्धवन्तः । परिभ्रमन्नेव बुद्धो विहारेषु समागत्य शिक्षणमारब्धवान् । सर्वेषां विहाराणामनुशासनपूर्णव्यवस्था गौतमस्यैव भर आसीत् ।

विहारेषु जीवनस्य सामान्यतोऽपेक्षितानि सर्वाणि वस्तूनि समगृह्यन्त । स्नानागाराणि तत्रापूर्वकौशलेन विरचितानि । जलाशयेषु जलस्य बहिष्करणाय नवजलस्यागमनाय च नालिका निर्मिताः । भोजनवस्त्रादेः पर्याप्तराशिः तेषु विहारेषु संचितः ।

गौतमस्य पश्चात् बौद्धविद्यालयानां श्रेष्ठनिर्मापकोऽशोकोऽभवत् । तेनासंख्यका विहाराः कारिताः । ख्रीष्टतः प्रागेवाऽजन्तायां गुहाविहाराणामध्ययनार्थं रचना समारब्धा । ख्रीष्टस्य पश्चादष्टशतकपर्यन्तं तत्र विहाराणां रचना बभूव । तेषां विहाराणां चित्राल-ङ्करणं मूर्त्तितक्षणं चातीव मनोरमे । अजन्तायाः प्राकृतिकसौन्दर्यं भारतेऽप्रतिममेव प्रतिभाति । ईदृशैर्गुहाविहारैर्दक्षिणभारतमनेकत्र समलंकृतमिदानीमपि दृश्यते ।

फाह्यानानुसारम्—कश्यपबुद्धस्य संघारामः पञ्चतलगुहाविहार आसीत् । प्रथमतलं हस्त्याकारमासीत् । अस्मिन् तले पंचशतगुहागृहा आसन् । द्वितीयं तु सिंहाकारं चतुःशत-गृहसमायुक्तं तृतीयमश्वाकारं त्रिशतगृहयुक्तं चतुर्थं वृषभाकारं द्विशतगृहसमन्वितं पञ्चमं तु कपोताकारं शतगृहोपनिबद्धमासन् । विहारस्योपरिभागतो जलप्रपातः संघारामस्य द्वार-समीपं वक्रमार्गेणायातः । सर्वेषु गृहेषु गवाक्षा निर्मिताः । अधस्तादुपरि गन्तुं सोपान-व्यवस्थासीत् । फाह्यानानुसारं तस्मिन्युगे भारते सहस्राधिकविहारविद्यालया आसन् ।

ख्रीष्टस्य पश्चात् सप्तमे शतके चीनदेशात् ह्वेनसांग इति ख्यातनामा भारतीयविद्याभिला-षुकोऽस्माकं देशे समागतः । स तु भारतस्य विविधप्रदेशेषु परिभ्रम्य विदुषां साहाय्येन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वीयं ज्ञाननिधिं समवर्धयत । स्वयात्रावर्णने ह्वेनसांगो विशेषरूपेण सांस्कृतिकानां शैक्षणिकानां च संस्थानां वर्णनमकरोत् । ह्वेनसांगानुसारं तदा भारते षट्सहस्राधिकविहाराः सार्धद्विलक्षभिक्षुविद्यार्थिनः तेषामाचार्याश्चासन् ।

पञ्चमशतकादारभ्य कतिपयविहारा विश्वविद्यालयरूपेण विकसिताः । नालन्दाया वलभेर्विक्रमशिलायाश्च विश्वविद्यालयाः समस्तैशियामहाद्वीपे प्रख्याता बभूवुः ।

नालन्दाविश्वविद्यालयः

नालन्दासमीपमेका लघुनदी प्रवहति । प्राचीनयुगे तस्मिन्प्रदेशे वनराजेरपूर्वा शोभासीत् । अधुना तत्र शस्यश्यामला रमणीयता विराजते । नालन्दाया नातिदूरं गिरीणां स्रोतसां च शोभा मनो हरति ।

नालन्दा गौतमस्य प्रमुखशिष्यस्य सारिपुत्रस्य जन्मभूमिरासीत् तत्रत्याम्रवणे कतिपयदिनान्युषित्वा गौतमः शिष्येभ्यः सदाचारस्य विनयस्य च शिक्षामदात् । अशोकस्तु नालन्दायां विहारस्य निर्माणमकारयत् । खीष्टतः पञ्चमशतकादारभ्य शक्रादित्य-बुद्धगुप्ततथागत-नरसिंह गुप्तवज्रादयो बहवो राजानस्तत्र विहारान् कारयामासुः । वैदेशिका राजानोऽपि नालन्दायां विहारान् कारितवन्तः । सुमात्राया राजा बालपुत्रो नवमे शतके तत्र विहारं रचयामास स्वमित्रेण राज्ञा देवपालेन चात्मार्थं पञ्चग्रामाणां दानं च कारितवान् ।

राजभिः कृता विहारा तेषां राजपदयोग्या बभूवुः । ह्वेनसांगस्य समक्षं महाराजेन हर्षवर्धनेन तत्र कांस्यमन्दिरं रचितम् । चैत्येषु तेषु गौतमबुद्धस्य धातुनिर्मितमूर्तयः प्रतिष्ठापिताः ।

नालन्दाविश्वविद्यालयस्य घनवनकुंजेषु ह्वेनसांगस्य मनोऽरमत । मनोरमेषु कासारेषु च तत्र नीलोत्पलानां विकासोऽभवत् । काननवृक्षैस्तत्रत्यशोभा द्विगुणिता । तेषां रक्तकुसुमानां स्तबकैः सर्वेषां मनांसि हृतान्येव । तत्रत्याम्रमञ्जरीभिर्हरितपत्रैश्च नयनयोः सुखमजायत । विद्यालयस्य समीपमेव दश स्नानागाराणि निर्मितानि । तत्रत्यभवनानामुच्चतां सौन्दर्यं च वर्णयन् ह्वेनसांगो लिखति—मानमन्दिरं प्राभातिकतुषारेषु लीनं भवति। उपरिभूमयः प्रासादानां मेघेष्वलक्षिता भवन्ति । पर्वतसमोच्चभूमिषु ललितकलानां शिक्षा दीयते । प्रसाधनकर्म च सर्वेषां भवनानामतीव मनोहरं वर्तते ।

नालन्दाविश्वविद्यालयस्य ध्वंसावशेषा उत्खनिता एवाधुनापि दर्शनीया वर्तन्ते । भवनानां विन्यासः कलात्मकविधिना कृतः । व्याख्यानाय त्रिशतकक्षा वर्तन्ते । विश्वविद्यालयीयजीवनविन्यासस्य सर्वाङ्गीणपरिचयो ध्वंसावशेषैः प्राप्यते । खीष्टस्य पश्चात् द्वादशशताब्दे यवनाक्रान्तोऽयं विश्वविद्यालयः परिध्वस्तो विनष्टश्च ।

नालन्दाविश्वविद्यालये दशसहस्रविद्यार्थिनः शिक्षां लब्धवन्तः । प्रतिदिनं शतप्रायाणि व्याख्यानानि बभूवुः । तत्र बौद्धेतरविषयाणां व्याकरणतर्कसाहित्यादीनामपि शिक्षा दीयते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्म, वेदवेदान्तसांख्यादिविषयाश्च शिक्षिताः। विद्यार्थिनस्तु चीन-कोरिया-तिब्बत-तोखार-जापानादिविदेशेभ्यः समायाताः।

वलभिविश्वविद्यालयः

काठियावाडप्रदेशे स्थितोऽयं विश्वविद्यालयोऽष्टमशतकाब्दपर्यन्तं प्रावर्तत। संस्थेयं राजकुमार्या टुड्डुया प्रतिष्ठापिता। शनैः शनैः विहाराणां संख्या समवर्धत। ह्वेनसांगस्य युगे तत्र शताधिकविहारा बभूवुः विद्यार्थिनश्च तेषु षट्सहस्रपर्यन्ता आसन्। गुणमतिः स्थिरमतिश्च तत्र प्रसिद्धावाचार्यौ बभूवतुः। वलभेः स्नातकाः सर्वत्र सम्मानिता बभूवुः। विश्वविद्यालयस्यास्य प्रमुखद्वारे श्वेताक्षरैः सर्वोत्कृष्टविदुषामाचार्याणां च नामोल्लेखैस्तेषामादरोऽकारि।

विक्रमशिलाविश्वविद्यालयः

खीष्टस्य पश्चाददष्टमशताब्दादारभ्य त्रयोदशशतकपर्यन्तं विश्वविद्यालयोऽयं प्रावर्तत। तस्य स्थापना पालवंशस्य राजा धर्मपाल उपगङ्गं गिरिप्रस्थे कृतवान्। अपरेऽपि पालवंशीया राजानो भवनानि निर्मायास्य संवर्धनं कृतवन्तः। अस्य विनाशो बख्तियारेण यवनाक्रमणकारिणा कृतः। विश्वविद्यालयोऽयं कस्यचिद्राज्ञो दुर्ग इति स विभ्रान्तोऽभवत्।

विक्रमशिलाविश्वविद्यालये भारतस्य सर्वोच्चविद्वांसः आचार्या बभूवुः। फलतः स एशियामहाद्वीपे सर्वत्र प्रख्यातोऽभवत्। तत्र तिब्बतप्रदेशस्य छात्राणां विशेषनासो नियतः। द्वादशशतके विश्वविद्यालये त्रिसहस्रसंख्यका विद्यार्थिनोऽभवन्। प्रारम्भावस्थायामष्टाधिकशताचार्या तत्र नियुक्ताः। प्रमुखद्वारे दीपङ्करातिशादीनां चित्राणि दर्शितानि। तस्य षड्द्वारेषु तत्र द्वारपण्डिता विराजन्ते स्म। तैः परीक्षिता अनुमताश्च विद्यार्थिनः संस्थायां प्रवेशमलभन्त।

एकादशशतकस्यान्तिमभागे वङ्गमगधयो राजा रामपालो रामावतीनगर्यां जगद्दलविहारं रचयामास। सोऽपि नालन्दा-विक्रमशिलाविश्वविद्यालयाभ्यां सहैव विध्वंसितः। तत्र प्रमुखा आचार्याः—विभूतिचन्द्रः, दानशीलः, मोक्षाकरगुप्तः, शुभङ्करश्च बभूवुः। तिब्बतदेशादपि विद्यार्थिनोऽत्रागताः।

ओदन्तपुर्या विहारोऽपि तस्मिन् युगे समवर्धत। विहारेऽस्मिन् सहस्रभिक्षवोऽवसन्। महानाचार्यः प्रभाकरोऽस्मिन्नेव विहारेऽशिक्षयत्। पालवंशीयराजैरस्याः संस्थायाः सम्पोषणं कृतम्।

जैनविद्यालयाः

प्रारम्भिकयुगेऽनागाराणां दिगम्बराणां जैनाचार्याणां विद्यालया भवनेषु नाभवन्। आचार्यैः सह तेषां विद्यार्थिनः पर्यटनं कृतवन्तः। परवर्तियुगे चिरकालमेव गणधरैः सह विद्यार्थिनां पर्यटनरीतिरक्षुण्णाभूत्। शनैः शनैः कालान्तरे तेषां कृते गुहासु तीर्थेषु च

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्दिराणां विहाराणां च निर्माणमक्रियत ।[१] निर्माणव्यवस्था प्रायो वैदिकबौद्धसंस्थानुरूपाभवत् ।

अध्ययन-विषयाः

भारतीयसंस्कृतेरादिकालेऽध्ययनस्य विषयाणां स्वरूपं किमासीदिति सुनिश्चितं नास्ति । सिन्धुसभ्यताया ध्वंसावशेषैः तदानीन्तनभारतीयानां शिल्पकलाविज्ञानधर्मादिषु विषयेषु प्रावीण्यं प्रतीयते । तेषां विषयाणां शिक्षा प्रचलितासीत् । विद्यार्थिनस्तत्र लेखाभ्यासं कुर्वन्ति स्मेति तत्रत्यलेखैः निश्चितं प्रतिभाति । योगाभ्यासप्रवृत्तयोऽपि तेभ्यः प्ररोचन्ते स्म ।

वैदिकाध्ययनविषयाः

वैदिकयुगे विद्यार्थिनो वागर्थयोः शब्दब्रह्मणश्च प्रतिपत्तिं कर्त्तुं तपोमयसाधनां कृतवन्तः । वैदिकसाहित्यमृषिभी रचितम् । तेषामृषीणां परम्परया विद्यार्थिभ्यो मंत्ररचनाकौशलं शिक्षितम् । वेदाङ्गानि शिक्षाकल्पनिरुक्तच्छन्दोज्योतिषव्याकरणानि विद्यार्थिनः शिक्षन्ते स्म नित्यमाचार्याणां निर्देशने मन्त्ररचनाभ्यासं कुर्वाणा विद्यार्थिनः स्वयमेव ऋषयो बभूवुः । सामान्यत एव काव्यरचनाकौशलाय पूर्वसूरीणां काव्यानां कण्ठाग्रकरणमपेक्षितमासीत् । आचार्यपरम्पराभिः कथामुखेन विद्यार्थिषु धर्म-दर्शन-काव्य-पुराणेतिहासानां सूक्तरचनोपयोगिनां विपयाणां ज्ञानं न्यासीकृतम् । ऋग्वेदकालेऽपि कतिपयविद्वद्भिर्भूगोलज्योतिषविद्या-वायुविज्ञानादिकमधीतमित्यधोलिखितेन मन्त्रेण प्रतीयते—

वेदा यो वीनां पदमन्तरिक्षेण पतताम् ।
वेदा नावः समुद्रियः ॥१·२५·७॥

शनैः शनैः वैदिकसाहित्यं समवर्धत । तस्मिन्युगेऽन्ये विषयाः—अनुशासन-विद्या-वाकोवाक्येतिहास-पुराण-गाथा-नाराशंस्यादयो विशालतरा बभूवुः ।[२] तेपामध्ययनमध्यापनं चावश्यमेवाभवताम् ।

ब्राह्मणयुगे यज्ञविद्याया अध्यापनं महत्त्वपूर्णमासीत् । तत्र पुराणेतिहासाख्यान-सृष्टिविज्ञानादीनां विपयाणां व्याख्यानं सहायीभूतम् ।[३]

उपनिपद्युगे वैदिकसंहितानां वेदाङ्गानां यज्ञविद्यानां चाध्यापने प्रचलिते सत्यपि ब्रह्मविद्यायाः सर्वोच्चं महत्त्वमासीत् । वेदवेदाङ्गादिषु निष्णाता विद्यार्थिनः परां विद्यां (ब्रह्मविद्याम्) शिक्षितुमागताः । परा विद्या तु कदापि सर्वसामान्या नासीत् । तस्मिन् युगेऽपि

---

१. खीष्टस्याष्टमे शतके श्वेताम्बराणां दिगम्बराणाञ्च चैत्यवासः सम्प्रवर्तितो दृश्यते । परम्परावादिनो मुनयश्चैत्यवासस्य विरोधका आसन् तत्र शिथिलाचरस्य सम्भावनायाः कारणात् ।

२. अथर्ववेद १५.६.११-१२; ११.७.२८; शतपथे ११.५.६.८ ।

३. शतपथानुसारं देवजनविद्या, मायावेदः, इतिहासः, पुराणानि च विद्याः सन्ति । शत० १३.४.३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वसाधारणविषयाः--चत्वारो वेदा इतिहासपुराणं वेदानां वेदः (व्याकरणं), पित्र्यं; राशिः, दैवं, निधिः, वाकोवाक्यम्, एकायनं, देवविद्या, ब्रह्मविद्या, क्षत्रविद्या, नक्षत्रविद्या, सर्पविद्या, देवजनविद्या अध्याप्या आसन् ।

खीष्टतः प्राक् पञ्चमशतके कस्मिंश्चिद्विषये विशेषज्ञानार्जनस्य रीतिरासीत्, यथा याज्ञिका वैयाकरणा अग्निष्टोमिका वाजपेयिकादयः क्रमशः यज्ञशास्त्रे व्याकरणे अग्निष्टोमे वाजपेये च निष्णाता बभूवुः । सूत्रसाहित्यस्याभिनवमध्ययनं प्रारब्धम् । पाणिनिः कल्प-भिक्षुनटसूत्राणामुल्लेखं करोति । परवर्तियुगे रामायणभारतादयोऽध्यापनविषया बभूवुः ।

पौराणिकयुगे चतुर्दशविद्यानामध्यापनं प्रचलितम् । षडङ्गवत्पुराणादीनामपि वेदार्थ-ज्ञानोपयोगं विद्यास्थानत्वं याज्ञवल्क्येन स्मर्यते--

पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।।इति,
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । इति च ।

एभिः चतुर्दशविद्यास्थानैः सह चतुर्णामुपवेदानां संग्रहेण विद्यानां संख्याष्टादशा-भवत् ।[1]

बौद्धाध्ययनविषयाः

बौद्धाध्ययनविषयास्तु सर्वप्रथमं गौतमस्योपदेशा बभूवुः । प्रारम्भावस्थायां गौतमो लोकेभ्य आचरपथस्य शिक्षां दत्तवान् । तेषां जीवनदर्शनस्य परिशोधनमुद्दिश्य स यथार्थ-सुखस्य पर्यालोचनं कृतवान् ।

गौतमस्य जीवनकालेऽध्ययनविषयाः--अट्ठकवग्गिकानि, सुत्तन्तपाठा, विनयो, धम्मो च बभूवुः । इमानि सर्वाणि गौतमस्योपदेशानां सङ्कलनानि सन्ति । शनैः शनैः त्रिपिटकानां समाहारोऽजायत । कतिपयविद्यार्थिनस्तु त्रिपिटकधारिणो बभूवु : ।[2] समा-धियोगयोः शिक्षा सदैव प्रचलितासीत् ।

गौतमस्य पश्चादपि त्रिपिटकानामध्ययनमध्यायनं च महत्त्वपूर्णं बभूवतुः । परवर्तियुगे त्रिपिटकं समाश्रित्याभिनवग्रन्था विरचिताः । तेषामध्यापनं त्रिपिटकैः सह प्रारभ्यत ।

खीष्टतः पश्चात् सप्तमशतकस्याध्यापनविषया ह्वेनसांगस्य लेखेभ्यो ज्ञाता भवन्ति । तदनुसारं तु विहारेषु वैदिकसंस्कृतेः प्रामाणिकग्रन्थाः पाठिताः । पाणिनेर्व्याकरणे महती रुचिरासीदाचार्याणाम् । नालन्दाया विश्वविद्यालये वेदवेदान्तसांख्यादीनां शिक्षा दीयते स्म ।

ह्वेनसांगः तोषासनविहारेऽभिधम्मं नगरधनविहारे सौत्रान्तिकानां विभाषां नालन्दायां

---

१. उपवेदाः—आयुर्वेदः, धनुर्वेदः, गन्धर्ववेदः, अर्थशास्त्रं च ।
२. त्रिपिटकेन 'अभिधम्मविनयसुत्तानां' बोधो भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योगशास्त्रं चापठत् । अनेन प्रकरणेन सुनिश्चितं प्रतिभाति यदनुसन्धानपरायणा विद्यार्थिनो ज्ञानस्य विशिष्टक्षेत्रेषु शिक्षां लभन्ते स्म ।

जैनाध्ययनविषयाः

जैनानामध्ययनविषयाणां नियतं स्वरूपं महावीरस्य पश्चादेव प्राप्यते । महावीरस्योपदेशाः तस्य जीवनकाले वाचा विद्यार्थिभ्यः शिक्षिताः । तस्य पश्चात् तेषां संग्रहोऽङ्ग-ग्रन्थेषु कृतः । अङ्गसाहित्यमाश्रित्य परवर्तियुगे विपुलसाहित्यं तत्सम्बन्धिधर्मदर्शनादीन् विषयानधिकृत्य विरचितम् । तेषां ग्रन्थानामध्यापनं जैनविद्यालयेषु कृतम् । तत्र समाधि-योगयोः शिक्षा सुगृहीतासीत् ।

ज्योतिषायुर्वेद-व्याकरण-कोशच्छन्दोऽलङ्कार-गणितराजनीत्यादिविषयाणां ग्रन्थानां शिक्षणं जैनविद्यालयेष्वभवत् । काव्य-पुराणेतिहासादीनां शिक्षा गृहस्थाश्रमवासिभ्यो मुख्यतोऽभवत् ।

शिल्पकलानामध्यापनम्

भारते प्राचीनतमशिल्पकलानामादर्शाः सिन्धुसभ्यताया अवशेषेषु प्राप्यन्ते ।[1] तत्राचार्यपरम्परया नृत्य-संगीत-वाद्यादीनां ललितकलानां चित्रमूर्तिवास्त्वादीनां शिल्पानां च विकासः सहस्रवर्षं यावदभूत् । एषां शिल्पकलानामध्यापनाय विद्यालया अभवन्न वेति सन्दिग्धो निष्कर्षः । भारते सदैव शिल्पाचार्यैः सह निवसतां नवच्छात्राणां शिल्पेषु प्रावीण्य-प्राप्तेः रीतिः प्रावर्तत । सा रीतिर्वैदिककाले सिन्धुसभ्यताया युगे चासीत् ।

शिल्पानां शिक्षणाय प्रथमः सुप्रसिद्धविद्यालयः तक्षशिलायामभवत् । तत्राष्टादशशिल्पाः शिक्षिताः । एषु शिल्पेषु गीतवाद्यनृत्यचित्रादिकैः सह व्यावसायिकविद्या अपि अन्तर्गणिताः ।[2] जातकयुगे राजकुमाराः संगीतवीणावादनमूर्तिरचनाव्यजनकर्ममालाग्रन्थनादिकौशलेषु शिक्षिताः । महाभारतानुसारं गान्धर्वविद्यालयेषु नृत्यगीतवाद्यादीनां शिक्षा दीयते स्म । अर्थशास्त्रानुसारं राजभिः गीतवाद्यपाठ्यनृत्तनाट्याक्षरचित्रवीणावेणुमृदङ्गपरचित्तज्ञान-गन्धमाल्यसंयूहनसंपादनसंवाहनवैशिककलादीनां शिक्षणाय व्यवस्था कृता ।[3] नाट्य-शास्त्रेऽपि नाट्याचार्यैर्नाट्यसम्बन्धिकलानां शिक्षणस्योल्लेखो विहितः । भरतमुनिः स्वयमेव ईदृश्याः संस्थाया आचार्योऽभवत् । राज्ञ आश्रित्य शिल्पकलानां संवर्धनस्य बहुश उल्लेखाः

१. मुक्तिविद्यां विहायान्यत्सर्वं शिल्पमिति केचिदाचार्या मन्यन्ते । तद्यथा विष्णुपुराणे १.१६.४१ । तदेवोपविद्येति पुरुषपरीक्षायां-विद्याश्चतुर्दशैवोक्ता वेदाद्यास्तत्त्वदर्शिभिः। चित्रेन्द्रजालनृत्याद्या उपविद्याः प्रकीर्तिताः॥ १६.१ कलानां संख्या चतुःषष्टीति प्रसिद्धमेव वात्स्यायनानुसारं चतुःषष्टिकलासु स्त्रियः पुरुषाश्च कुशला बभूवुः । कामशास्त्रे १.३.२०–२५ ।

२. लाभगरहजातके २८७; असातमन्तजातके ६१; चुल्लधनुग्गहजातके ३७४ ।

३. गणिकाध्यक्षप्रकरणात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काव्यग्रन्थेषु विद्यन्ते। कामसूत्रानुसारं तु नागरिकाणां सुरुचिः प्रधानत्वेन कलात्मिकासीत्। कलानां शिक्षा च उच्चसंस्थासु दीयते स्म। यः कवित्वकामः काव्यविद्योपविद्याग्रहणाय गुरुकुलान्युपास्ते, स विद्यास्नातकोऽभवत्।[१]

न केवलं साधारणजनाः कलाप्रावीण्यं प्राप्नुवन्, अपितु ब्राह्मणकुमारा अपि वेदवेदाङ्गैः सह कलानामध्ययनं कृतवन्तः। बाणस्य पूर्वजा नृत्यगीतवादित्रेष्ववाह्या बभूवुः। हर्षस्य भगिनी राज्यश्रीर्नृत्यगीतादिषु विदग्धासीत्। मन्दिरेषु देवार्चनाय नृत्य-गीत-वाद्याभिनयादीनां प्रतिष्ठासीत्। अतएव तासां ललितकलानामुच्चवर्गेषु समादरोऽजायत। एकादशशतके 'एन्नारियम्' मन्दिरे रूपावतारस्य (चित्रमूर्तिवास्तूनाम्) शिक्षणमभवत्।

बौद्धविहाराणां रचनाविधानस्य पर्यवेक्षणाय कतिपयभिक्षवः वास्तुकलायाः शिक्षां नवकर्मिका भूत्वा गृहीतवन्तः। विहारेषु चित्रमूर्त्यादीनां रचना कतिपयैर्भिक्षुभिः कृता। विदेशेषु गत्वा तत्रापि भारतीयशिल्पानां शिक्षा बौद्धभिक्षुभिः दत्ता।

जैनसंस्कृतावपि कतिपयशिल्पादीनां शिक्षणं महत्त्वपूर्णमभिमतम्। हस्तलिखितजैनग्रन्थानां प्रान्तभागेषु बहुविधानि चित्राणि लेखकानां पाठकानां च कलापूर्णरुचिं निदर्शयन्ति।

नृत्यगीतवाद्यादीनां शिक्षणं वैदिकेतरसंस्कृतिषु नात्यधिकं सम्भावितमिति तासां वैराग्यपरायणत्वेन निःसन्दिग्धमेव। तथापि सुरुचिपरायणा जैनगृहस्था नृत्यादीनां सर्वतोभावेन समुन्नतिं विदधुरित्यपि निःसन्दिग्धमेव।

रणशिक्षा

सैन्यशिक्षणं राज्यसंस्थया सह प्रादुर्भवति।[२] उपनिषत्सु क्षत्रविद्याया उल्लेखो विद्यते। महाभारतानुसारं तु महर्षीणामाश्रमेषु वेदैः सह धनुर्वेदस्य शिक्षा ब्राह्मणचार्यैर्दत्ता। भरद्वाजद्रोणपरशुरामादयः प्रमुखा ईदृशा आचार्या बभूवुः। धनुर्वेदः, अश्वपृष्ठं, गदायुद्धम्, असिचर्म, गजशिक्षा, नीतिशास्त्रं च पुरा पाठितानि।[३] द्रोणाचार्यस्तु तदानीन्तनराज्येभ्य आगतेभ्यो राजकुमारशिष्येभ्यो बहुविधां युद्धविद्यामशिक्षयत्। विद्यार्थिनो हस्त्यश्वरथधनुर्वेदयन्त्रनागरात्मकानि सूत्राणि विपयोगं चाशिक्षन्त। तक्षशिलाविश्वविद्यालये ब्राह्मणकुमारा अपि वेदानामध्ययनेन सह धनुर्वेदं पठितवन्तः।

धनुर्वेदानुसारं शूद्राणां कृतेऽपि सैन्यशिक्षणं प्रावर्तत। तथा हि—
'ब्राह्मणाय धनुर्देयं खड्गं वै क्षत्रियाय च। वैश्याय दापयेत् कुन्तं गदां शूद्राय दापयेत्।'

---

१. काव्यमीमांसायाः पंचमाध्यायतः।
२. रणशिक्षाया रथेन, गजेनाश्वेन भूमौ वा योद्धुं शिक्षा समायोजिता। आदिप० १२३.७।
३. एतेषां बहुविस्तार आसीत्। तथा हि चतुष्पादं दशविधं धनुर्वेदमभिमन्युरधीतवान्। पृ० २१३ ६५-६६।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परवर्तियुगस्य सैन्यशिक्षणमविकृत्य बाणेन कादम्बर्यां सिप्रानद्याः तटे स्थितस्य राजकीयविद्यामन्दिरस्य तुरङ्गवाह्यालीविभागस्य वर्णनं कृतम् । तस्यां संस्थायां राजनीति-व्यायामशस्त्रविद्या-रथचर्यागजपृष्ठ-तुरंगम-हस्तिशिक्षा-यन्त्रप्रयोग-विषापहरण-सुरुङ्गोपभेद-तरण-लंघन-प्लुत्यारोहण-सर्वभाषादीनां शिक्षा प्रदत्ता ।[१]

राजनीतिशिक्षणम्

राजनीतेरध्ययनं सदैव धर्मशास्त्रान्तर्गतमेवाभूत् । धर्मसूत्रग्रन्थेषु वर्णाश्रमधर्मस्य निरूपणं कुर्वाणाः सूत्रकाराः प्रजां प्रति राज्ञां कर्तव्यं धुरं च प्रतिपादयन्ति स्म । सूत्र-स्मृति-पुराणेतिहासादयः प्रायः सदैव पाठ्यक्रमे समाविष्टा बभूवुः । अर्थशास्त्रं तु प्रधानत्वेन राजनीतिग्रन्थः । अर्थशास्त्रानुसारं राजकुमारैर्दण्डनीतिरवश्यमेवाध्येतव्या । दण्डनीतिस्तु 'अलब्धलाभार्था लब्धपरिरक्षिणी रक्षितविवर्धनी च' भवति । अर्थशास्त्रे प्रायशो राजनीतेः प्रमुखाचार्याणां मतानि विवृतानि । तेषां सर्वेषामध्यापनं देशकालानुरूपं कृतम् । महाभारतानुसारं संसर्गविद्या समाजशास्त्रमेवासीत्[२] ।

व्यावसायिकविषयाः

व्यावसायिकशिक्षां विद्यार्थिन आचार्येभ्यस्तेषां नवकर्मिका भूत्वा प्राप्तवन्तः । विद्यालयेष्वपि व्यावसायिकशिक्षणस्य व्यवस्थाऽवर्तत । तक्षशिलायां व्यावसायिकशिल्पानि—तक्षण-कृषि-पशुपालन-व्यापार-मृगयेन्द्रजालादीनि बभूवुः । महाभारतानुसारं तु पाण्डवाः द्यूत-प्रसाधनकर्म-पाकविद्याश्वविद्या-गोपालनादिषु प्रवीणा बभूवुः । अर्थशास्त्रानुसारं राजकुमारैः वार्ताध्येतव्या । वार्ता खलु कृषिः पशुपालनं वाणिज्यञ्च । कलिङ्गदेशीया राजकुमारा नौसंचालने शिक्षिता आसन् ।[3] सुदूरपूर्वकाले नौशास्त्रं नियामकशिल्पमिति प्रथितमासीत् । तत्र समुद्रविज्ञानं सविशेषमासीत् ।

आयुर्वेदः

आयुर्वेदस्य विज्ञानं भारतेऽतीव प्राचीनमस्ति । अथर्ववेदस्योपवेदोऽयं महर्षिपरम्परानुसन्धानेन सततं समवर्धत । बौद्धयुगे तक्षशिक्षाविद्यालये सर्वप्रथममायुर्वेदस्य वैज्ञानिकशिक्षणप्रणाली विकसिता । विद्यालयेऽस्मिन् जीवकः सप्तवर्षपर्यन्तमायुर्वेदं पठितवान् । छान्दोग्योपनिषद्युल्लिखिता सर्पविद्या वस्तुत आयुर्वेदस्य शाखा प्रतिभाति ।[५] आयुर्वेदसंहितासु सुदीर्घाचार्यावली वर्तते । सा तु शिष्यपरम्परयैव निर्मिता ।

---

१. कादम्बर्या पूर्वभागे पृ० ७४-७ ।

२. आदिपर्व १०८.१६ ।

३. Hunter : Orissa Vol. I P 197.

४. सुप्पारकजातक ।

५. महाभारते (आदि० १८.११) विषहणी विद्या चर्चिता । तत्र सर्पविषापहारोऽपि समाविष्टः स्यात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परवर्तियुगे बौद्धविद्यालयेषु चिकित्साशास्त्रस्याध्यापनं सविशेषं बभूव। नालन्दा-विश्वविद्यालये शल्यचिकित्सा औषधिचिकित्सा च शिक्षिते। इत्सिंगानुसारमष्टाङ्गि-कमायुर्वेदशिक्षणमभवत् सप्तमशताब्द्याम्। आयुर्वेदस्याध्ययनमनिवार्यमासीत्।

विविधविषयाः

उपर्युक्ताध्ययनक्षेत्राद्बहिरपि बहवो विषयाः शिक्षिताः। बाणानुसारं पुरुषलक्षणं, पुस्तकव्यापारो, लेखकर्म, द्यूतकला, शकुनिरुतज्ञानं, रत्नपरीक्षा, दन्तव्यापारो, यन्त्रप्रयोगो, विषापहरणं, रतितन्त्रं च शिक्षितानि। यन्त्रप्रयोगस्तु महाभारतस्य यन्त्रसूत्रैः सम्बद्धः प्रतिभाति। ह्वेनसांगेनोल्लिखितेषु विषयेषु विज्ञानविद्या वर्तते। विज्ञानमधिकृत्य यन्त्र-सिद्धान्तो ज्योतिषं च शिक्षिते। अन्येऽपि बहवो विषया विज्ञानाध्याये समुपस्थिता अध्ययनाध्यापनपरिधावन्तर्भूताः। भूगोल-विज्ञानस्याध्ययनं सम्यक्कृतमासीत्।[2]

किं न पठनीयमित्यपि निर्धारितमासीत्। वसिष्ठेन तत्समुदाहृतम्—न म्लेच्छभाषां शिक्षेत। [वसिष्ठस्मृतौ २०१]

शिक्षणविधिः

वैदिकसंस्कृतौ यज्ञादिसमारम्भेषु प्रयुक्तानां मन्त्राणां पाठाः शुद्धाः स्युरित्यत्यावश्यक-मासीत्। अशुद्धपाठेनानिष्टस्य सम्भावना आसीत्। अतो वेदाध्यापने गुरुभिः स्वयमेव शुद्धपाठः प्रस्तुतः, शिष्यैः स पाठोऽनुकृत इति सनातनपद्धतिरासीत्। अनुब्रुवाणोऽध्येति न स्वपन्निति आर्षपद्धतिरासीत्। वैदिकयुगे नित्यमेव नवीनस्तुतिभिर्देवाः प्रीणिताः। अस्मै प्रयोजनाय विद्यार्थिनस्तु काव्यरचनाभ्यासमकुर्वन्। शिक्षकास्तेषां रचनां परिशोध-यन्ति स्म।

भारतदेशे संस्कृताध्ययनाध्यापने प्रायः सदैव कण्ठाग्रविद्याया माहात्म्यं सम्मतम्। विशुद्धपाठस्य कण्ठाग्रकरणाय बहुविधाः पाठाः प्रस्ताविताः। तद्यथा—संहितापाठः, पदपाठः, क्रमपाठः, जटापाठः, घनपाठश्च। एतेषु पाठेषु पदानि परस्परं स्थानं विपरिवर्तयन्ति, पुनः पुनः त्रयोदशवारमपि समापतन्ति।

कण्ठाग्रकरणमेव समीहमाना बहवो विद्यार्थिनः सूक्तानामर्थं न विदुः। ईदृशं पाण्डित्यं हास्यास्पदमेव सम्मतम्।

पितुः पुत्रं प्रति शिक्षणविधिरेवादर्शपद्धतिरभिमत इति ऋग्वेदात् प्रतीयते। तथाहि इयं वामह्वे शृणुतं मे अश्विनो पुत्रायेव पितरा मह्यं शिक्षतम्। ऋ० १०. ३९.६

१. महाभारते (आदि० १८.११) विषहणी विद्या चर्चिता। तत्र सर्पविषापहारोऽपि समाविष्टः स्यात्।
२. काव्यमीमांसासप्तदशाध्यायानुसारं राजशेखरेण भुवनकोशो लिखितः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देर्शनविषयकज्ञानाय परिषत्सु विद्यार्थिनां पृच्छा प्रोत्साहितासीत् । तस्या उदाहरण-मृग्वेदे वर्तते—

पाकः पृच्छामि मनसा विजानन्देवानामेना निहिता पदानि ।
वत्से वष्कयेऽधि सप्त तन्तून्वि तत्निरे कवय ओतवा उ ॥

शतपथब्राह्मणानुसारं गुरुशिष्ययोः प्रश्नोत्तरस्य रूपमीदृशं वर्तते—

प्रश्नः—किं स्विद्विद्वान्प्रवसत्यग्निहोत्री गृहेभ्यः । कथं स्विदस्य काव्यम् । कथं सन्तोऽग्नि-भिरिति । कथं स्विदस्यानपप्रोषितम्भवति ।

उत्तरम्—यो जविष्ठो भुवनेषु । स विद्वान्प्रवसन्विदे तथा तदस्य काव्यं तथा सन्ततोऽग्नि-भिरिति मन एवैतदाह मनसैवास्यानपप्रोषितम्भवतीति ।[1]

यज्ञविद्यासम्बन्धिव्याख्यानानि ब्राह्मणग्रन्थेषु प्रायशो वर्त्तन्ते । तेषु व्याख्यानेषु प्रक्रियात्मकस्पष्टीकरणं रहस्यानि च विद्यन्ते ।

उपनिषत्सु महर्षीणामाचार्याणां च विद्यार्थिभ्यः प्रदत्तानि व्याख्यानानि वर्तन्ते । व्याख्यानमाध्यमस्योल्लेख ईशोपनिषदि विद्यते—

अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे

प्रश्नोत्तरमुखेनोपनिषद्युगेऽपि शिक्षणं प्रायोऽभवत् । यथा केनोपनिषदि शिष्यः पृच्छति—

केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥

अतः परमाचार्यो ब्रह्मविद्यां व्याख्याति ।

कश्चिद्विद्यार्थी याचत आचार्यम्––उपनिषदं भो ब्रूहीति ।
व्याख्यान्ते प्रोवाचाचार्यः––उक्ता त उपनिषद् । ब्राह्मीं वाव ते उपनिषदमब्रूमेति ।

तस्मिन्युगे व्याख्यानविषयस्य गरिमापि निर्दशितः । केनोपनिषदि भाषणान्ते ब्रह्मज्ञान-माहात्म्यमधिकृत्य प्रोक्तम्—यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठिति ।

कठोपनिषदि यमाचार्यः 'ओ३म्' पदस्य व्याख्यां कृत्वाह—

एतद्ध्येवाक्षरं ब्रह्म एतदेवाक्षरं परम् ।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत् ॥
एतदालम्बनं श्रेष्ठमेतदालम्बनं परम् ।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ॥

ईदृशैर्वचनैः विद्यार्थिनामुत्साहः संवर्धितः ।

---

१. शतपथे ११.३.१.५-६ । पारस्कर गृह्यसूत्रेऽपि समर्थितम्—
विधिर्विधेयस्तर्कश्च वेदः इति । २.६.५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्रह्मज्ञानस्य रहस्यानि बोधगम्यानि कृतान्युपमाद्वारेण । बुद्धिशरीरात्मनां परस्परं सम्बन्धं विवेचयता प्रोक्तमाचार्येण—

आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥

यदा कदाचार्याः चाक्षुषकल्पनायाः प्रयोगं कुर्वन्ति स्म । यथा—आचार्यशिष्ययोः संवादः—

न्यग्रोधफलमत आहरेति । इदं भगव इति । भिन्द्धीति । भिन्नं भगव इति । किमत्र पश्यसीति । अण्व्य इवेमा धाना भगव इति । आसामङ्गैकां भिन्द्धीति । भिन्ना भगव इति । किमत्र पश्यसीति । न किंचन भगव इति ।

यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्येति ।

विविधोदाहरणैराचार्य इमं विषयं दशकृत्वोऽबोधयत् ।

उपर्युक्तेन व्याख्यानेन स्पष्टं प्रतीयते यदाचार्याणां वाणी मधुरासीत् ।[१] शिष्यस्य सम्बोधने ते सोम्यपदस्य प्रयोगं कृतवन्तः । शिष्यस्तु भगवपदेनाचार्यं समबोधयत् ।

शिष्यस्योत्साहसंवर्धनायाचार्यस्य सन्देश आसीत्—उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत । प्रवचनस्यारम्भे स शिष्यं प्रत्याह—सह नौ यशः । सह नौ ब्रह्मवर्चसम् । सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु । मा विद्विषावहै ।

शिक्षणक्रमे तपसो नियोजनमासीत् । भृगुर्वारं वारं तपः कृत्वैव ब्रह्मणः स्वरूपमजानात् ।

आचार्याः प्रश्नं पृष्ट्वा विद्यार्थिनां दुर्बोधपदमशुद्धं मतं च ज्ञात्वा विषयप्रतिपादनमकुर्वन् । आचार्याणां व्याख्यानेभ्यो बोधं प्राप्य विद्यार्थिनो मनननिदिध्यासनाभ्यां तस्य परिपोषणं कृतवन्तः ।[२]

ज्ञानस्य स्थिरीकरणाय शिष्या अनेकाचार्येभ्योऽशिक्षन्त । भागवते सत्यमेव प्रतिपादितम्—

न ह्येकस्माद् गुरोर्ज्ञानं सुस्थिरं स्यात् सुपुष्कलम् ।

सूत्रस्मृतियुगस्य शिक्षणविधिर्मनुकृतैरेभिः श्लोकैः परिचीयते—

अध्येष्यमाणस्त्वाचान्तो यथाशास्त्रमुदङ्मुखः ।
ब्रह्माञ्जलिकृतोऽध्याप्यो लघुवासा जितेन्द्रियः ॥

---

१. महाभारतेऽपि प्रमाणीकृतम्—
मधुरं कथ्यते सौम्य श्लक्ष्णाक्षरपदं त्वया ।
प्रीयामहे भृशं तात पितेवेदं प्रभाषते ॥ आदि १४·२ ॥

२. श्रुतेः शतगुणं विद्यान्मननं मननादपि । निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम्—विवेकचूडामणौ–३६५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः ॥
व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥
अध्येष्यमाणं तु गुरुर्नित्यकालमतन्द्रितः ।
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत् ॥
ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा ।
स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यति ॥
प्राक्कूलान्पर्युपासीनः पवित्रैरेष पावितः ।
प्राणायामैस्त्रिभिः पूतस्तत ॐ कारमर्हति ॥ २.७०–७५

अध्ययनारम्भे ओङ्कारविधिरनुपेक्षणीय इति प्रतिपादयन्नापस्तम्बो लिखति—ओङ्कारः स्वर्गद्वारं तस्माद् ब्रह्माध्येष्यमाण एतदादि प्रतिपद्येत । विकथां चान्यां कृत्वैवं लौकिक्या वाचा व्यावर्तते ब्रह्म ।[1]

गुरुणा मधुरा वाणी प्रयोज्येति मनुना निर्दिष्टम्—

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम् ।
वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ॥ २.१५९

यस्यां स्थितावाचार्यः, तस्यां स्थितौ भूत्वैव शिष्यस्तं प्रश्नान् पृच्छेदिति नियम आसीत् । आचार्ये उत्तिष्ठति, उपविशति, चलति, शयानेवा स्वयमेवोत्तिष्ठन्, उपविशन्, चलन्, शयान एव शिष्यः पृच्छति स्म ।[2] उपर्युक्तशिक्षणविधौ विद्यार्थिनां संख्या नाधिका प्रकल्पनीया । महाभारतानुसारमायोदधौम्यस्य त्रयः शिष्या आसन् आरुणिः, वेदः, उपमन्युश्च । वेदस्यापि त्रय एव शिष्या बभूवुः ।

सूर्यसिद्धान्तानुसारं तु ज्योतिषविषयस्याध्यपनार्थं परिलेखाः, चित्राणि यन्त्राणि च यथायोगमुपायुज्यन्त । ग्रहकक्षाणामवबोधाय सिद्धान्त शिरोमणेर्गोलबन्धाधिकारे यन्त्रयोग उपकल्पितः । प्रायोगिकशिक्षणे भरतस्तु ग्रहणं, धारणं, ज्ञातं प्रयोगश्चेति चत्वारि अङ्गानि निर्दिशति ।[3]

अध्यापनसत्रम्

वैदिकसंस्कृतौ श्रावणमासस्य पूर्णिमातिथावुपाकर्मविधिनाध्यापनारम्भोऽभवत् । तदाप्रभृति पञ्चमासानध्ययनमक्रियत। पौषपूर्णिमायामुत्सर्जनविधिनाध्यापनं समाप्यते स्म ।

---

१. आपस्तम्बे १.१३.६—८ ।
२. दीघनिकाये अम्बट्ठसुत्ते ।
३. नाधशास्त्रे १.२२।
४. अविमारके चतुर्थाङ्के ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अवकाशे सति छात्राः क्वचित् स्वगृहं गतवन्तः ।[४] अनध्यायदिवसानां संख्या नासीत् स्वल्पा । साधारणेऽपि विक्षोभे, अशौचे, वियोगे, संयोगे, धार्मिकप्रयोजने सति अनध्यायः प्रवर्तितः । तथा हि भूकम्पे, उल्कापाते, सहचारिणां विप्रवासे च सति यज्ञभोजनादिषु, अमावस्यायां पौर्णमास्यां वानध्यायो घोषितः ।[१]

बौद्धशिक्षणविधिः

बौद्धशिक्षणविधिर्गौतमेन प्रवर्तित : । स तु प्रायशो व्याख्यानपरः । गौतमस्तु सर्वजनबोधसुबोधवाक्यप्रयोगेण सुग्राह्यविचाराणां परम्पराया निगूढमपि तत्त्वमनायासेनैव बोध्यं कर्तुं समर्थतम आचार्योऽभवत् । तस्य व्याख्यानानि प्रभावोत्पादकानि बभूवुः । स्वकीयां शिक्षणपद्धतिं पर्यालोचयन् स प्राह--यथा सागरस्य गाम्भीर्यं शनैः शनैः वर्धते, तथैव धर्मशिक्षापि शनैः शनैरवगन्तव्या । पदं पदमेव गच्छन्नर्हन् भवितुं योग्यः । शिक्षा मातृभाषया ग्रहणीयेति गौतमस्य घोषः ।

पारस्परिकविमर्शेन विहारेषु भिक्षूणां ज्ञानं वर्धितम् । शिष्यास्तु परस्परं शिक्षका बभूवुः । कथं व्याख्यानं दातव्यमिति उद्दिश्य भिक्षवो शिक्षिताः । यथाकालं व्याख्यातारो बभूवुः ।

अध्ययनकर्मणि तर्कबुद्धिः सर्वत्र प्रयोज्येति गौतमादेशः । तेनोपदिष्टम्—पुस्तकेषु प्राप्यते, आचार्यः कथयति, लोके प्रतिष्ठितेयं परम्परा—ईदृशैर्मनोभावैः कस्यापि वचनस्य ग्राह्यत्वं न विद्यते । कुशलमिदमनवद्यमिदं सुखमिदं हितमिदं वा, एतद्विज्ञाय किमपि वस्तु सत्यं जानीहि ।

मौखिकशिक्षाया : प्रचलनमासीत् । विद्यार्थिनस्तु प्रश्नोत्तरेणात्मनः शङ्कानां परिहारं कुर्वन्ति स्म । आचार्यस्य ब्रह्मस्वरः प्रशंसितः । ब्रह्मस्वरस्तु स्पष्टो, विज्ञेयो, मञ्जुः, श्रवणीयो, विन्दुः, क्रमानुकूलो, गम्भीरो, निनादश्चेत्यष्टविधो भवति ।[२]

'शिक्षां सम्प्राप्य शिष्या उपदेशने, आख्याने, प्रज्ञापने, प्रतिष्ठापने, विवरणे, सरलीकरणे, आक्षेप-निराकरणे च समर्था भवेयुः इति आचार्याणां प्रयासोऽभवत् ।

जैनशिक्षणपद्धतिः

जैनशिक्षणपद्धतिः प्रथमं विरक्तानां कृतेऽभवत् । इयं प्रायशो बौद्ध-शिक्षणपद्धतिसमाना वर्तते । महावीरस्वामी जैनसंस्कृतेः सुप्रसिद्धः प्रथमाचार्यो बभूव । तस्मादेव जैनशिक्षणपद्धतेः प्रवर्तनमभूत् । महावीरानुसारं तु शिष्येभ्यस्तथैव शिक्षा दातव्या, यथा पक्षिणः शावकेभ्योऽन्नं ददति । व्याख्यां कृत्वैव स्वप्रवचनस्य ग्राह्यता संवर्धनीयेति महावीरस्य मतम् ।

---

१. गौतमधर्मसूत्रानुसारम् ।

२. दीघनिकाय २.५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परवर्तियुगे शास्त्राणां पाठस्य प्रचलनं प्रवर्तितम् । सूत्राणां वृत्तिः पुनः पुनः पृष्ट्वा बोधनीयेति विधानमासीत् । कण्ठाग्रकरणस्य विधिः सर्वसाधारण आसीत् । पठितस्य मननं चिन्तनं करणीयमासीत् । जैनशिक्षणस्य पञ्चाङ्गानि सन्ति—वाचना पृच्छना, अनुप्रेक्षा (मननम्), आम्नायः (कण्ठाग्रकरणम्) तथा धर्मोपदेश इति ।

सर्वासु शिक्षणपद्धतिषु शिष्याणामचार्याणाञ्च समाजेन सम्पर्कः प्रसाध्यते स्म । महाभारतानुसारं व्यास एतदर्थं शिष्यैः सहितो जनमेजयस्य यज्ञे विवेश । बौद्धा जैनाश्च भिक्षव आचार्याश्च समाजस्य हितं पुरस्कुर्वाणा उपादिशन् ।

ब्रह्मचारिनियमाः

पुरा सदैव विद्यार्थिजीवनं तपोमयमासीत् । तपसा त्यागेन च विद्यार्थिनां चित्तवृत्तयोऽध्ययनमुख्यो भवन्तीति भारतीयानां शाश्वतधारणा । सांसारिकबन्धनानि खलु भोग-विलासमनोरञ्जनादीनि नाम विद्याप्राप्तिमार्गे बाधाः । ब्रह्मचर्यशब्दः तस्यैव तपोमय-जीवनस्य प्रतीकोऽस्ति । ब्रह्मचर्यं तु ब्रह्मणः (पराविद्यारूपस्य वेदस्य) प्राप्तये चर्यं (जीवनविधिः) कथ्यते ।[२] तपसा ब्रह्म विजिज्ञासस्वेति सिद्धान्तः । तपो ब्रह्मेति ।[३] विष्णुपुराणानुसारं तु—

स्वाध्यायसंयमाभ्यां स दृश्यते पुरुषोत्तमः ।
तत्प्राप्तिकरणं ब्रह्म तदेतदिति पठचते ।। ६.६.१

वैदिकयुगस्यादिकालतः विद्यार्थिजीवने तपस आवश्यकत्वं निर्धारितम् । तदा ब्रह्मचारी धरातले शेते स्म, न तूच्चासने । स संगीतनृत्यपरिभ्रमणादिभ्यो दूरोऽभवत् । स्यातिनिद्राक्रोधात्मप्रशंसासौन्दर्यसुगन्धादिभिः स कदापि न वशीकृतः ।[४]

उपनिषद्युगे ब्रह्मचर्यं तु तपसः मौनस्यानाशकायनस्यारण्यायनस्य स्वरूपमेव सम्मतम् ।[५] भृगुस्तु ब्रह्मज्ञानाय वारं वारमतप्यत ।[६] कतिपयविद्यार्थिनो गुरोर्गवां चारणं कृतवन्तः ।[७]

वैदिकयुगस्य पश्चात् ब्रह्मचारिजीवनस्य विस्तृतनियमाः सूत्रस्मृतिषु दृश्यन्ते । ते नियमा ब्रह्मचारिणो भोजनमावासं वस्त्रं शयनं तपः शौचं स्वभावं चाधिकृत्य निर्मिताः ।

---

१. दीघनिकाय महा० २.३
२. ब्रह्म वेदः, तदध्ययनार्थं व्रतमप्युपचाराद् ब्रह्म । ब्रह्म चरितुं शीलमस्य यद्वा ब्रह्म तपो ज्ञानं वा चरति अर्जयत्यवश्यम् इति ब्रह्मचारिशब्दस्य व्याख्याः ।
३. तैत्तिरीयोपनिषदि भृगुवल्ल्यां २
४. गोपथब्राह्मणे २.५—७; २.१ ९
५. प्रश्नोपनिषदि १.२, छान्दोग्ये ८.५
६. तैत्तिरीयोपनिषदि भृगुवल्ल्याम्
७. छान्दोग्ये ४.४.५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाभारतानुसारं तु

आहूताध्यायी गुरुकर्मस्वचोद्यः पूर्वोत्थायी चरमं चोपशायी ।
मृदुर्दान्तो धृतिमानप्रमत्तः स्वाध्यायशीलः सिध्यति ब्रह्मचारी ॥ आदि प० ८६.२

भोजनम्

ब्रह्मचारी भिक्षान्नं भुक्तवान् । स भिक्षान्नादार्यनिर्दिष्टानि वस्तून्येवाखादत् भोजनपात्रे स किंचिदपि नात्यजद् भुक्त्वा च पात्रममार्जयत् । स क्षारलवणमधुमांसभोजनं न कृतवान् । भोजनकाले मौनं निर्लोभत्वं चावश्यकविधानमासीत् । बोधायनस्तु विद्यार्थिभ्यो यथेष्टभोजनमात्राया व्यवस्थां कृतवान् ।

आवासः

विद्यार्थी आचार्यगृहे वसति स्म । अन्यत्र निवासस्य व्यवस्था नासीत् । रात्रौ ब्राह्ममूहूर्त्ते उत्थाय स आचार्यपादान् प्रणमति स्म । दिवा स नाशेत । रात्रौ शयनात् प्रागेव गुरोः चरणौ स धावति स्म । तेनाज्ञप्तः स शयनाय गतवान् । तस्याधःशय्या भवति स्म ।

वस्त्रम्

विद्यार्थिनो द्वे परिधाने—उत्तरीयं वासश्च गृह्णन्ति स्म । प्रारम्भिकयुगे विविधवर्णानां विद्यार्थिनामुत्तरीयं विभिन्नपशूनां चर्मणा निर्मितम् । उत्तरीयं यज्ञोपवीतवद् धृतम् । वाससा कटिप्रदेशादधोभाग आच्छादितः । ब्रह्मचारिणां वस्त्राणि शरीरालङ्करणाय नाभवन्निति स्पष्टमेव ।[1] शरीरसंस्काराय स नित्यमेवास्नात् । राजकुमारा अपि महाभारतानुसारं धनुर्वेदशिक्षणकाले कौरवाजिनवाससो बभूवुः ।[2]

तपः

ब्रह्मचारिणस्तपोविषये मनुना निर्दिष्टम्—

तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ।
वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥ २. १६४
मुण्डो वा जटिलो वा स्यादथवा स्याच्छिखाजटः ॥ २. २१९

हारीतानुसारं तु विद्यार्थी जटी दीर्घनखरोमा भवतु ।

स्वभावः

ब्रह्मचारी क्षमाशीलो जितेन्द्रियो विनयी परिश्रमशीलः कर्तव्यपरायणो कर्मण्य आत्मविजयी स्फूर्तिशीलो क्रोधरहित ईर्ष्यारहितश्च भवेत् । कदापि तेनात्मप्रशंसा परनिन्दा

---

१. कथं स्यात् शरीरालङ्करणं यतो यमेन निर्दिष्टम्—
दण्डं कमण्डलुं चैव मौञ्जीं च रशनां तथा ।
धारयेद् ब्रह्मचर्यं च भैक्षान्नाशी गुरौ वसन् ॥

२. सभापर्वणि ४. २८ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कटुभाषणं वा न कर्तव्यम् ।[1]

ब्रह्मचारिजीवनविधिमनुशासतापस्तम्बेन निर्दिष्टम्—न प्रेक्षेत नग्नां स्त्रियम् । ओषधिवनस्पतीनामाच्छिद्य नोपजिघ्रेत । उपानहौ छत्रयानमिति च वर्जयेत् । न स्मयेत । नोपजिघ्रेत् स्त्रियं मुखेन । न हृदयेन प्रार्थयेत । नाकारणादुपस्पृशेत् ।[2]

महाभारते विद्यार्थिनस्तपोमयं जीवनं निर्दिष्टम् । यथा—

सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखम् ।
सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत् सुखम् ॥

विनय आचार्यसेवा च

परवर्तियुगे महाभारते आरुणि-वेदोपमन्यूनामादर्शचरितगाथा वर्णिताः । आरुणिर्गुरोः कृषिकर्मणि सहायतामकरोत् । वेदो विविधकष्टान्यनुभूयापि गुरुसेवां प्रसन्नमना अकरोत् । उपमन्युस्तु गुरुपरीक्षापीडितोऽन्धः सञ्जातः कूपे पतितश्च । कचस्तु शुक्रस्य गा अचारयत ।[3] गुरूणां सेवार्चनं तु महाव्रतमासीत् शिष्याणामिति महाभारतीयं मतम् । तथा हि—

ऋतस्य दातारमनुत्तमस्य निधिं निधीनां चतुरन्वयानाम् ।
ये नाद्रियन्ते गुरुमर्चनीयं पापाँल्लोकाँस्ते व्रजन्त्यप्रतिष्ठाम् ।

आदिप० ७१.५१

अपराधी विद्यार्थी दण्डनीय आसीत्, किन्तु दण्डविधानं कठोरं नाभवत् । गौतमस्तु कठोरदण्डदायिनमाचार्यमेव दण्डनीयं मन्यते ।

बौद्धानुशासनम्

गौतमबुद्धो विद्यार्थिजीवने कष्टत्वविधानं मध्यमप्रतिपदा परिहार्यमिति घोषितवान् । तदनुसारं जीवनविधिर्नातिसुखमयो न दुःखमयश्च । तेन निर्णीतानि दश शिक्षापदानि संक्षेपेणैव भिक्षूणामनुशासनपूर्णजीवनविधिं निदर्शयन्ति । यद्यथा—

(१) पाणातिपाता वेरमणी (२) अदिन्नादाना वेरमणी (३) अब्रह्मचरिया वेरमणी (४) मुसावादा वेरमणी (५) सुरामेरयमज्जपमादट्ठाना वेरमणी (६) विकालभोजना वेरमणी (७) नच्चगीतवादितविसूकदस्सना वेरमणी (८) मालागन्धविलेपनधारणमण्डनविभूसनट्ठाना वेरमणी (९) उच्चासयनमहासयना वेरमणी (१०) जातरूपरजतपटिग्गहणा वेरमणी ।

---

१. तद्यथा महाभारते—
अधीयानः पण्डितं मन्यमानो यो विद्यया हन्ति यशः परेषाम् ।
तस्यान्तवन्तश्च भवन्ति लोका न चास्य तद् ब्रह्मफलं ददाति ॥ आदिप० ८५·२३

२. आपस्तम्बे १. ७. ३—११ ।

३. एतत्परिलक्ष्य पञ्चतन्त्रे निर्दिष्टम्—
विद्या गुरुविनयवृत्त्यातिविषमा ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बौद्धसंस्कृतौ भिक्षुविद्यार्थिनः समाजे विचरन्ति स्म। तेषां जीवनविधिर्गौतमेन प्रकाशमय उदात्तश्च व्यवस्थापितः। स्वकीयैः प्रशंसनीयैराचरणैः समाजे प्रतिष्ठां प्राप्य तस्य समाजस्य मार्गप्रदर्शनं भिक्षूणामपि कर्तव्यं निर्धारितम्।

विहारे भिक्षूणां जीवनं सांघिकमासीत्। ईदृशे जीवनविधौ परस्परमादान-प्रदानवृत्तिः; सहिष्णुता सहानुभूतिः सहायभावना गुरूणां सेवा नितान्तमपेक्षिता भवन्ति। विहारजीवन-स्यादर्शव्यवस्था गौतमेन सर्वाः स्थितीः पर्यालोच्य कृता। येन विहारेषु भोजनवस्त्रावा-सस्नानादिकानां समुचितः प्रबन्धः कृतः। भिक्षसंघेषु जलाशयवन्नैर्मल्यं प्रशान्तिश्च विरराजतुः।[1]

फाह्यान-ह्वे नसांगादीनां लेखैर्ज्ञायते यत् परवर्तियुगेऽपि विहारेषु भिक्षूणामनुशासनं जीवनविन्यासश्चानुकरणीये अभवताम्।

जैनानुशासनम्

जैनशिक्षणविधौ तपसोऽतिमहत्त्वमासीत्। तत्र तपस्तु प्रायः कष्टकरमस्ति। दिगम्बरा अनागारा कष्टसहासीत् प्रथमाचार्यस्य महावीरस्य जीवनवृत्तिः। शरीरस्य शुद्धिरपि नापेक्षिता। उपर्युक्तावस्था तु प्रारम्भिकयुग आसीत्।

परिवर्तियुगे माणवकानां शिक्षणाय तेषां साधारणतः सुखप्रदसंस्थाः प्रादुर्भूताः। माण-वकास्तु भिक्षावृत्त्या प्राप्तं वस्त्रं घृतवन्तः। भिक्षुणीभ्यः चत्वारि वस्त्राणि निर्धारितानि। भोजनाय विद्यार्थिनो भिक्षवो वा याचनां कुर्वन्ति स्म।

आचार्याणां व्यक्तित्वम्

वैदिकशिक्षणविधौ देवानां व्यक्तित्वानुरूपमाचार्यस्य व्यक्तित्वं व्यवस्थापितम्। इन्द्रा-ग्निसवितारो देवा आचार्या एव। एषां देवानां सर्वज्ञत्वं चेतनाप्रदानत्वं तमसोऽपाकरणं बुद्धिवर्धनं व्रतस्थापनं च वैदिकसाहित्ये प्रायशो वर्णितानि। आत्मगुणैः तेषां देवानां समाना एवाचार्या अभवन्। आचार्यास्तु मन्त्रद्रष्टारः कवयो बभूवुः। ते पुरुप्रिया आसन्। ऋग्वेदानुसारमेव—

तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देनयन्तः॥ ३.८.४

प्रथमाचार्यः पितैवाभवत्। ऋषयस्तु गृहस्थाः स्वयमेव स्वपुत्रानपाठयन्। पुत्रैः सह बहवो ग्रामीणबालका अपि तत्रागत्य पठन्ति स्म। स ऋषिर्न केवलं स्वपुत्राणामपितु सर्वेषां बालकानां पिता बभूव। इदमेव परिलक्ष्य धारणा समभवत्—

---

१. अजातशत्रुः संघस्व प्रशान्तिं दृष्ट्वैव स्वपुत्रं तत्र प्रवेशयामास। दीघनिकाये सीलखन्धवग्गतः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्त्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ।।[१]

अनेन प्रकारेण मातृत्वमपि सिद्धमाचार्यस्य । तदनुसृत्य पुत्रवदेवाचार्यनाम्ना शिष्यो विख्यापितः । तद्यथा सौन्दरनन्दे—

एक पित्रोर्यथा भ्रात्रोः पृथग्गुरुपरिग्रहात् ।
राम एवाभवत् गार्ग्यो वासुभद्रोऽपि गौतमः ।। १.२३

आचार्यः स्वयमेव ब्रह्मचारी बभूव । बहूनामाचार्याणां जीवनं तपोमयमभवत् ।[२]

आचार्यस्तु वेदाध्यापनं धनप्राप्तये नामन्यत । सूर्यो यथा प्रकाशं ददाति, नदी जलं ददाति तथैवाचार्यो विद्यार्थिभ्यो ज्ञानं ददाति । कथितं च शतपथे—प्रिये स्वाध्यायप्रवचने भवतो युक्तमना भवत्यपराधीनोहरहरर्थान् साधयते सुखं स्वपिति ।[३]

उपनिषत्सु बहूनामाचार्याणां व्यक्तित्वं निर्दशितम् । पिप्पलादस्तु नाम्नैव तपस्वी । तस्य जीवनविधौ वैभवानां स्थानं नासीत् । सत्यनिष्ठ आसीत्स आचार्यो यः शिष्यमशिक्षयत्—

सत्यं वद, धर्मं चर । स्वाध्यायान्मा प्रमदः । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि ।

शिक्षा इमास्तेनाचार्येण निजव्यक्तित्वे प्रतिष्ठापिता इति निश्चतमेव । कश्चिदाचार्यो निजव्यक्तित्वस्य विश्लेषणमेव कुर्वन्नाह—

'आ मा यन्तु ब्रह्मचारिणः । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देवधारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । श्रुतं मे गोपाय । आवहन्ती । वितन्वाना । कुर्वाणाऽचीरमात्मनः। वासांसि मम गावश्च । अन्नपाने च सर्वदा ।'

यथापः प्रवता यान्ति । यथा मासा अहर्जरम् ।
एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतः ।।
प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व । तै० उप० शिक्षावल्ली ४

शिष्याचार्ययोर्दृढैकत्वं प्रकटीकृतमनेन वाक्येन—

सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु ।

छात्रशब्दस्य यथायोगं व्युत्पत्तिरपि वैयाकरणैर्निर्दिष्टा । तद्यथा—गुरुश्छत्रम् । गुरुणा

---

१. अथर्ववेदे ११.५.३

२. अथर्ववेदे ११.५.१६; शतपथे १४.१.१.२८

३. शतपथे ११.५.७.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिष्यश्छत्रवच्छाद्यः । शिष्येण च गुरुश्छत्रवत् परिपाल्यः ।[1]

रामायणमहाभारतानुसारं प्रख्याताचार्याणां—भरद्वाजागस्त्य-वसिष्ठ-वाल्मीकि-व्यास-द्रोण-परशुरामादीनां व्यक्तित्वं तु विदितं खलु सर्वेषाम् । अगस्त्यमधिकृत्य रामायणे निगदितम्—

अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा ।
दक्षिणा दिक् कृता येन शरण्या पुण्यकर्मणा ॥
ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् ।
औदार्येणावगच्छामि निधानं तपसामिमम् ॥

रामोऽपि महर्षीणां दर्शनेनात्मानं बहु मन्यते स्म ।

अर्जुनो द्रोणो भीष्मो विश्वामित्रः परशुरामश्च रणविद्याया महाभारतीया श्रेष्ठा आचार्या अभवन् । आचार्याः शिष्याश्च सहचारिणो बभूवुरिति संलक्ष्य महाभारते प्रोक्तम्—

अनुगम्यमानः शुशुभे शिष्यैरिव गुरुः प्रियैः ।

सूत्रस्मृतिपरम्परानुसारमाचार्यस्य व्यक्तित्वं पूर्ववदुच्चतरं प्रतिभाति । आचार्यस्तु शिष्याणामध्यापनायात्यधिकं श्रमं करोति स्म । तस्य जीवन-विधिर्ब्रह्मचर्यनिष्ठः सन् विद्यार्थिभ्य आदर्श आसीत् । स स्वशरीरमलङ्कृतं भूषितं वा न कृतवान् । स्वयमप्यर्घ-रात्रत उत्थाय स्वाध्यायमकरोत् । ब्राह्ममुहूर्त्ते सोऽध्यापनं कृतवान् । पश्चादपि नाशेत । सोऽधमपुरुषैः सह सम्बन्धं नाकरोत् । व्यर्थकार्याणि तृणभञ्जनादीनि नाकरोत् ।[2]

परवर्तिप्राचार्याणां वर्णनं रघुवंशे कादम्बर्यां च वर्तते । जाबालिवसिष्ठादीनामादर्शाः सदैवाचार्याणां समक्षमविद्यत ।

खीष्टस्य पश्चादष्टमे शतके शङ्कराचार्यः प्रादुरभवत् । शङ्करस्य प्रतिभाऽप्रतिमा-सीत् । अष्टमे वर्षे एव स वेदादिषु परमप्रावीण्यं प्राप्तवान् । बाल्य एव स प्रव्रजितः । ततः परं जीवनपर्यन्तं स कर्मयोगी बभूव । अद्वैतवेदान्तस्य प्रकाशस्तम्भरूपा महामठा भारतस्य चतसृषु दिक्षु तेन प्रतिष्ठापिताः । तस्य दिग्विजयः सुविदित एव । तस्य शास्त्रविवादा दर्शनग्रन्थानां भाष्याणि च प्रख्यातानि सन्ति ।

बौद्धाचार्याणां व्यक्तित्वं बुद्धस्य व्यक्तित्वानुरूपमेवासीत् । गौतमेऽदम्य उत्साहः, कल्पनातीता कर्मण्यता, आर्जवम्, प्रत्युत्पन्नबुद्धिः, शङ्कासमाधानस्यातिशयक्षमता चाव-र्तन्त । राजकुमार आसीत् बुद्धः । तस्य सान्निध्येन सर्वे प्रभाविताः सन्तो विचारयितुमार-ब्धवन्तः—कीदृशमिदं ज्ञानं येन गौतमेनेदृश्युच्चता भव्यता चात्मसात्कृता ।

---

१. अष्टाध्यायी ४.४.६२

२. गौतमबुद्धानुसारं प्राच्यानामृषीणमेतद्व्रतलक्षणं कालान्तरे क्वचिदलुप्यत । दीघनिकाये अम्बट्ठसुत्ते १,३ । महाभाष्यानुसारं कति पयाचार्या वेतनग्राहिणो बभूवुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मानवतां प्रति गौतमस्यापरिमेया सहानुभूतिरासीत् । स सर्वंजनीनहितायाऽसंख्यान् शिष्यान् देशेषु विदेशेषु च प्रेषितवान् तानादिशच्च––'विश्वस्य सर्वेभ्यः प्राणिभ्यो दयाभावं धारयत । सर्वेषां कल्याणाय, लाभाय, मङ्गलाय च चेष्टध्वम् । तदेव जीवन-दर्शनं विज्ञापयत यदादौ मध्येऽवसाने च कल्याणमयं वर्तते ।'

संन्यासिनामपि बौद्धाचार्याणां भिक्षुशिष्यान् प्रति पितृभावो बभूव । अथ किम्, विहारेषु नियम आसीत्––सचे अन्तेवासिको गिलानो होति, यावजीवं उपट्ठातब्बो वुट्ठानमस्स आगमतेब्बं ति ।'[1]

गौतमस्य वाणी मधुरासीत् । धीर एष विकारहेतौ सति चित्तविक्रियां नान्वभवत् । शत्रवोऽपि स्निग्धाःसन्तस्तस्य शरणं ययुः । इत्थं भूतेऽपि तस्यानुशासनमतिसफलमासीत् । स तु भिक्षूणां सर्वोच्चविकासात् प्राङ्मरणमपि नैच्छत् ।[2]

परवर्तियुगेऽपि बहवो बौद्धाचार्याः चरित्रज्ञानयशोबलेन च सर्वत्र प्रतिष्ठिता बभूवुः । तेषां व्यक्तित्वप्रभयैवाकृष्टा विद्वांसो ज्ञानपिपासवो विदेशेभ्योऽपि समागताः ।

जैनाचार्याणां व्यक्तित्वं महावीरस्य व्यक्तित्वानुरूपं विकसितम् । सर्वेषां हिताय ते प्रयत्नशीला बभूवुः । सरलजीवनं तैः स्वीकृतम् । उपाध्यायाः सम्यग्ज्ञान-दर्शन-चरित्रैः प्रख्याता बभूवुः । आचार्याः समाजं दर्शनज्ञानवीर्यचरित्रतपोभिश्च सन्धारयितुं नियुक्ता आसन् ।

इमे आचार्या न केवलं शिक्षका आसन्, अपितु तेषु बहवो महाग्रन्थकारा बभूवुः । भारतीयराष्ट्रस्य चरित्र-निर्माणं कथं स्यादिति चिन्तयोदग्रोत्साहा इमे आचार्या अहर्निशं प्रायतन्त । एतेषां शङ्कराचार्यः प्रामुख्यं भजते ।

गृहास्थाश्रमः

विवाहसंस्कारस्य पश्चात् स्नातका गृहपतयो गृहस्था बभूवुः । वैदिककालत एव गृहस्थानां जीवनविधिर्विविधप्रकारैर्भरैः पूर्णो विद्यते । प्रथमं तावत्पंचमहायज्ञानां परिपालनमस्ति । एषां द्वारेण गृहस्थाः देवतां मानवतां च प्रति कर्तव्यं सम्पादितवन्तः ।[1] तथा हि महाभारतानुसारं

पञ्च यज्ञांस्तु यो मोहान्न करोति गृहाश्रमी ।
तस्य नायं न च परो लोको भवति धर्मतः ।। शा० १३४.२६

महायज्ञाः

यज्ञस्तु त्यागवाचकः शब्दः । महायज्ञेषु सर्वेषां पोषणाय विविधप्रकाराणां त्यागादीनां

१. महावग्ग १-६-३
२. महापरिनिब्बाणे २-३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विधानमस्ति । अस्मै प्रयोजनाय ब्रह्मचर्याश्रमे गृहीतानि विद्या आचारः स्वास्थ्यबलं च सोपयोगानि बभूवुः । एभिरेव गृहस्थोऽधिकाधिकं धनं प्राप्नोत्, तेन च यज्ञादिकं कर्म कृतवान् ।

महायज्ञानां संक्षिप्तस्वरूपं वर्णितम्—

पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः ।
एते पंच महायज्ञा ब्रह्मयज्ञादिनामकाः ॥

मनुना प्रोक्तम्—

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥

ब्रह्मयज्ञः

ब्रह्मयज्ञेन स्वाध्यायप्रवचनयोर्निर्देशः । ब्रह्मचर्याश्रमप्रकरणेन स्पष्टं प्रतिभाति यत् सदैवाचार्या निःशुल्कमेव वेदवेदाङ्गानां शिक्षां ददुः । तेषां ब्रह्मयज्ञस्याध्यापनपरं स्वरूपं वर्णितम् । स्वाध्यायपरा एवाचार्या आसन् । अनेन प्रकारेण तदा दीनहीनानामपि विद्यार्थिनां शिक्षा सुगमभवत् । ब्रह्मयज्ञसम्पादनायैवाचार्या विद्यार्थिसमूहं समीहन्ते स्म । शतपथानुसारं ब्रह्मयज्ञेन स्वर्गप्राप्तिर्भवति । सर्वोच्चोऽयं यज्ञः । देवा ब्रह्मयज्ञेन प्रीणिताः स्वाध्यायिभ्यो विविधानभ्युदयान् ददति । स्वाध्यायविषयास्तु वेदवेदाङ्गेतिहासपुराणादय आसन् । ब्रह्मयज्ञे व्यक्तिगताभ्युदयः समष्टिकल्याणं चान्तर्भूते ।

न केवलमार्याः, अपि त्वार्येतरा अपि स्वाध्यायं कुर्वन्ति स्म । रामायणानुसारं यातुधानानां स्वाध्यायः प्रसिद्धः । ब्रह्मयज्ञस्य प्रतीकोऽधुना सन्ध्याविधौ गायत्रीमन्त्रपाठ एव वर्तते ।

दैवयज्ञः

दैवयज्ञे देवप्रीत्यर्थं स्तुतिः हवनादिको यज्ञस्य सम्पाद्येते । वैदिका आर्या देवानामनुग्रहेणैवात्माभ्युदयं मन्यन्ते स्म । यज्ञमुखेन ते देवानां सान्निध्यमनुभूतवन्तः । देवसान्निध्येन मानवानां व्यक्तित्वविकासस्य सम्भावनासीत् । वैदिकधारणानुसारं देवास्तु कर्मण्याः सत्यपरायणा उदाराः पराक्रमसम्पन्नाः सहायशीलाश्च सन्ति । मानवा अपि देवसान्निध्येनैषां गुणानामात्मनि प्रतिष्ठां कृतवन्तः ।[1]

वैदिकगृहेषु सायं प्रातः हवनमग्निहोत्रविधानेनाकारि । हवने प्रायशोऽग्नेः स्तुतिः कृता । मध्याह्ने सोमयज्ञः सम्पादितः । अन्येभ्यो देवभ्यो विविधा यज्ञा विहिताः ।

---

१. कश्चिदपि मानवश्चतुर्भिः ऋणैः सह जायते । महाभारतानुसारमानृण्यार्थं तु—
'यज्ञैश्च देवान् प्रीणाति स्वाध्यायतपसा मुनीन् ।
पुत्रैः श्राद्धैः पितॄँश्चापि आनृशंस्येन मानवान् ॥ आदि १११·१४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पितृयज्ञः

पितरस्तु देवा एव परमोदाराः। तेभ्यस्तर्पणस्य विधानं वर्तते। शतपथब्राह्मणानुसारं पितॄणां परितृप्तये स्वधया सह सोमहविर्जलादिकं समर्पणीयम्। पितृयज्ञेन स्वर्गलाभस्य सम्भावनाभिमता।[२] पुरा पितृभ्यो वंशजानां रक्षासहायतादेराशासीत्।

पुराणेषु प्रतिदिनमन्नजलदुग्धफलमूलादिभिः श्रद्धया श्राद्धकरणं विहितम्।[३] अयं नित्यश्राद्धविधिः। पितृयज्ञमुखेन पितॄणामुच्चादर्शः प्रोत्साहनायैव भवतीत्यसन्दिग्धमेव। पितृकल्पनया मरणाद्भयं दूरमभवत्।

पितृयज्ञस्यौचित्यप्रशंसां च वन्दीभूतो मुगलसम्राट् शाहजहाँ प्रामाणयत्।[४]

भूतयज्ञः

'सर्वे सुखिनः सन्तु' इति हिन्दूनां धारणा सनातनी विद्यते। भूतयज्ञेन सर्वेषां प्राणिनां परितृप्तये नित्यमेव बलिरदीयत।[५] उपनिषत्स्वग्निहोत्रमुखेन सर्वेषां प्राणिनां भरणपोषणयोः योजना सम्पादिता।

मनुर्वलिवैश्वदेवद्वारा सर्वेषां परितृप्तये बलिविधानं निर्दिशति। भूतयज्ञस्य माहात्म्यं निष्कर्षयता मनुना प्रोक्तम्—

शुनां च पतितानां च श्वपचां पापरोगिणाम्।
वायसानां कृमीणां च शनकैर्निर्वपेद् भुवि॥
एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति।
स गच्छति परं स्थानं तेजोमूर्तिपथर्जुना॥ ३.९२-९३

भूतयज्ञस्य दार्शनिकः पक्षो यजमानमुखेन निर्दिष्टः—

भूतानि सर्वाणि तथान्नमेतदहं च विष्णुर्न ततोऽन्यदस्ति।
तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषाम्॥
चतुर्दशो भूतगणो य एष तत्र स्थिता येऽखिलभूतसंघाः।
तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते मुदिता भवन्तु॥

भागवतपुराणे भगवतो मुखेन प्रोक्तम्—

सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम्।
भूरात्मा सर्वभूतानि भद्रपूजापदानि मे॥ ११. ११. ४२।

---

१. तद्यथा शतपथे—यद्देवा अकुर्वं स्तत्करवाणि। ६.३.२६। एतदेव समर्थयति जीमूतवाहनो नागानन्दे—
सूर्यस्तु भवति पूज्यः, यतो हि नाम तस्य किरणाः प्राणदानं कुर्वन्ति।

२. पितृयज्ञेन सुवर्गं गमयति। तै० ब्रा० १.६.८

३. स्वल्पतमेनापि देवपित्रादीनां तृप्तिर्भवेदिति महाभारते—
देवान् वाग्भिः पितॄनद्भिस्तर्पयित्वा जगाम ह॥ आदि० ४.६

४. आफरीं वाद हिन्दु औं बरबाव मुर्दारा मी दिहन्द दामम् आब।
ए पिसर तू अजब मुसल्मानी, जिन्दईरा ब आब तरसानी॥

५. पुरुष इति नाम्नः सार्थकता सर्वेषां पोषकत्वेन जायते। पूरयति सर्वमिति पुरुषः। पॄ णिच् कुषन्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अतिथियज्ञः

वैदिककालादेव सदैवातिथियज्ञो लोकप्रियोऽभवत्।[1] ऋग्वेदानुसारं 'केवलाघो भवति केवलादी।' पुरुषास्तु सहस्रपोष्या भवितुमिच्छन्ति स्म। अतिथिपूजनस्योत्कृष्टत्वमथर्ववेदस्येभिर्वाक्यैरवगम्यते—

यो विद्याद् ब्रह्म प्रत्यक्षम्। यद्वातिथिपतिरतिथीन्प्रतिपश्यति देवयजनं प्रेक्षते। स य एवं विद्वान् न द्विषन्नश्नीयान्न द्विषितोऽन्नमश्नीयान्न मीमांसितस्य न मीमांसमानस्य। इष्टं च वा एष पूर्तं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति—पयः, रसं, ऊर्जां, स्फातिं, प्रजां, पशुं, कीर्तिं, यशः, श्रियं, संविदं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति। एष वा अतिथिर्यच्छ्रोत्रियस्तस्मात् पूर्वो नाश्नीयात्। प्रियः प्रजानां भवति। ज्योतिष्मतो लोकान् जयति य एवं वेद।[2]

उपनिषत्सु पूर्ववदतिथिसत्कारो बहुमतः। कठोपनिषदनुसारं तु—

आशाप्रतीक्षे सङ्गतं सूनृतां चेष्टापूर्ते पुत्रपशूंश्च सर्वान्।
एतद् वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे॥

महाभारतानुसारमतिथियज्ञस्य पञ्चाङ्गिनी दक्षिणा—

चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम्।
अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः॥

महाभारतानुसारं श्वश्र्वा नववध्वा आशीर्वाद आसीत्

अतिथीनागतान् साधून् बालान् वृद्धान् गुरूंस्तथा।
पूजयन्त्या यथान्यायं शश्वद् गच्छन्तु ते समाः॥ १९१.८

शिलोञ्छवृत्तिकोऽपि ब्राह्मणोऽतिथियज्ञं करोत्विति मनुना निर्दिष्टम्। अतिथिः कालेऽकाले वागच्छेत् तस्मै भोजनं दातव्यमेव। यतः—धन्यं यशस्यमायुष्यं स्वर्ग्यं चातिथिपूजनम्। मनुस्तु सर्ववर्णानामतिथीनर्चितुमादिदेश—

आसनाशनशय्याभिरद्भिर्मूलफलेन वा।
नास्य कश्चिद्वसेद् गेहे शक्तितोऽनर्चितोऽतिथिः॥ ४.२९

मनुनातिथ्यस्वरूपं विधिवत् निर्धारितम्। तद्यथा—

आसनावसथौ शय्यामनुव्रज्यामुपासनाम्।
उत्तमेषूत्तमं कार्यं हीने हीनं समे समम्॥ ३.१०७

समृद्धिशालिनस्तु अतिथीनां मनोरञ्जनमप्यायोजयन्। महाभारतानुसारं कृष्णोऽर्जुनमतिथिं सम्प्राप्य तं रैवतकं पर्वतवन-विहारार्थमनयत्। तत्र नटनर्तकादयोऽभिनयं

---

१. ऐतरेयब्राह्मणानुसारं शिरो वा एतद् यज्ञस्य यदातिथ्यम्। १.२५। श्रीहर्षानुसारं तु यावदर्हंकरणं किल साधोः प्रत्यवायधुतये न गुणाय। नैषध. ५.९।

२. अथर्ववेद ९।६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चक्रुः । राजभिरवारितातिथयो मठा निर्मिताः परवर्तिकाले ।[1]

सर्वेषां कृते महावाक्यं विद्यते—

अदत्त्वा विषमश्नुते वि० पुराण ३.११.७२

बौद्धसंस्कृतावपि सविशेषं महत्त्वमतिथिसत्कारस्य विहितम् । विहारेषु नित्यमेवातिथयो भिक्षवः समागताः । तेषां सत्कारार्थं विधानानि गौतमेन स्वयमेव रचितानि । बौद्धधर्मानुयायिनो गृहस्थाः पुण्यलाभायापि भिक्षूणामातिथ्यं कुर्वन्ति स्म । जैनसंस्कृतावपि सामान्यतोऽतिथिसत्कारस्य विधानं पूर्ववत् प्राप्यते ।

अतिथियज्ञेन सांस्कृतिकमभ्युत्थानं प्रतिपालितम् । असंख्या विद्वांसो महर्षयश्च भोजनवस्त्रावासादीनां चिन्ताभ्यो विनिर्मुक्ता ज्ञानविज्ञानदर्शनयोगादिप्रवृत्तिषु सर्वथा संलग्ना बभूवुः । गृहस्थानामतिथयो भूत्वा ते सर्वाणि वस्तूनि सादरं प्राप्नुवन् । गृहस्था अपि स्वल्पदिनानां श्रमेणार्जितानि वस्तूनि प्रदाय तेभ्यो महर्षिभ्यश्चिरकालतपोभिरर्जितज्ञानदर्शननिधिं प्राप्तवन्तः । आश्रमव्यवस्थाया मूलस्तम्भोऽयमतिथियज्ञ एव ।

एतत्सर्वं विष्णुपुराणे समासितम्—

वेदाहरणकार्याय तीर्थस्नानाय च प्रभो
अटन्ति वसुधां विप्राः पृथ्वीदर्शनाय च ।
अनिकेता ह्यनाहारा यत्र सायंगृहाश्च ये
तेषां गृहस्थः सर्वेषां प्रतिष्ठा योनिरेव च ।। ३.९.१२

ब्रह्मयज्ञेन ज्ञानस्य धारा प्रवर्तिता, देवयज्ञेन देवानां पराक्रम-परोपकारौ स्वायत्ती कृतौ, पितृयज्ञेन तपसां संचयनं कृतम्, भूतयज्ञेन सर्वभूतात्मैक्यं सम्प्रतिष्ठापितम्, तथा चातिथियज्ञेन सर्वजनसम्पृक्तिश्च प्रसाधितेति महायज्ञानां गुणगरिमा धन्य एव । एतदेव पर्यालोच्य संन्यासिनां कृतेऽपि पञ्चमहायज्ञविधानं प्रावर्तत—

विचारमननध्यानज्ञानरूपसमाधिकान् ।
कुर्यात् पञ्च महायज्ञान् नित्यं ब्राह्मण्यसिद्धये ।।

गृहस्थस्य सदाचारः

गृहस्थस्तु रात्रेरन्तिमप्रहरे ब्राह्ममुहूर्ते वा जागरांश्चकार । ततः प्रभृति तस्य दिनस्यारम्भोऽभवत् । ब्राह्ममुहूर्ते स पवित्रविचारैर्मानसशुद्धिमकरोत् । तस्य पश्चात् शौचदन्तधावनस्नानसन्ध्यातर्पणपंचमहायज्ञाग्निहोत्राणि कृतवान् । मध्याह्ने भोजनमकरोत् । पश्चात् जीविकोपार्जनाध्ययनानि सम्पादितवान् । सन्ध्यासमयः सन्ध्यादानशयनेभ्य आसीत् । इदमेवाह्निकमधिकृत्य देशकालानुसारं नियमा विहिताः ।

प्रातः सच्चिन्तनेनाभिनवोत्साहस्य संवर्धनं भवति । गृहस्थस्तु धर्मार्थौ चिन्तितवान् । आध्यात्मिकप्रवृत्तिषु चित्तस्याभिनिवेशाय जगतो जन्ममरणात्मकानि कष्टानि प्रतिदिनं

---

१. राजतरंगिणी ८.३३२०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रातःकाले चिन्तनीयान्येव निर्णीतानि ।[1]

शौचम्

मुखशुद्धये दन्तधावनं निर्धारितम् । सूर्योदयात्प्रागेव दन्तधावनं विधेयमिति व्यवस्था वर्तते । भोजनस्य पश्चादपि दन्तधावनेन मुखशुद्धेर्वैज्ञानिकं विधानं वर्तते ।

दन्तधावनस्य पश्चात् स्नानं करणीयम् । स्नानं विना न किमपि धार्मिकं कृत्यं सम्पादनीयमिति व्यवस्थासीत् । स्नानकाले वैदिकमन्त्राणां पाठः कृतः । एवमेव जले तिष्ठता देवर्षिपितृभ्यः तर्पणं विधेयमासीत् । स्नानेनापः स्नातस्य दुरितानि प्रवाहयन्तीति वैदिकधारणा । तद्यथा ऋग्वेदे—

इदमापः प्रवहत् यत्किं च दुरितं मयि ।
यद् वाहमभिदुद्रोह यद् वा शेप उतानृतम् ॥ १.२३ २२

पर्यटनाद् गृहागमनकाले प्रथमं पादप्रक्षालनं करणीयम् ।

सन्ध्यादिकम्

स्नानस्य पश्चात् सन्ध्याकर्म सम्पादितम् । ततः परं सायंप्रातः हवनविधानमासीत् । पश्चात् स्वाध्यायः प्रारब्धः । स्वाध्यायं यावत् कार्यं दिवसस्य प्रथमप्रहरे समापनीयमासीत् । पश्चात् मध्याह्नपर्यन्तं जीविकोपार्जिता । अपराह्णे महायज्ञाः समारब्धाः । अतिथिभ्य आश्रितजनेभ्यश्च भोजनं प्रदाय गृहस्थः स्वयमेव भुक्तवान् । भोजनेऽल्पे सति च स्वयमेव पत्न्यपत्यैश्च सह निराहारो वर्तताम्, किन्तु दासेभ्यो भोजनं दद्यात्वेवेति नियम आसीत् ।

भोजनविधिः

प्रसन्नमनाः प्रक्षालितहस्तपादमुखादिरप आचम्य गृहीतशोभनासनः पवित्रे रमणीये च वातावरणे भोजनं कुर्यादिति विधानम् । भोजनविधिमधिकृत्य धर्मशास्त्रेषु बहुला व्याख्या वर्तते तद्दिङ्मात्रनिर्देशो यथा—

पात्रेष्वर्थानुरूपेषु पुत्रभृत्यात्मजैः सह ।
भूमौ पात्रं प्रतिष्ठाप्य मौनेनान्नं तु भोजयेत् ॥
दृष्ट्वा हृष्येत् प्रसीदेच्चाप्यभिनन्देच्च सर्वशः ॥ मनु २.५४

अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसम् ।
लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्तथा ॥
प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये तु कठिनाशनः ।
अन्ते पुनर्द्रवाशी च बलारोग्ये न मुञ्चति ॥
विष्णुपुराणे ३.११.८५-८६

१. मनुस्मृतौ ४.९२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न भुञ्जीताघृतं नित्यं गृहस्थो भोजनं स्वयम् ।
पवित्रमथ हृद्यं च सर्पिराहुरघापहम् ॥
एकवस्त्रो न भुञ्जीत कपाटमपिधाय च ।
भूमौ चानन्तरीकृत्य भिन्नपात्रे न चाशनम् ॥
राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
आयुः सुवर्णकारान्नं यशश्चर्मविकर्तिनः ॥ मनु० ४.२१८

लशुनं गृञ्जनं चैव पलाण्डुं कवकानि च ।
अभक्ष्याणि द्विजातीनाममेध्यप्रभवाणि च ॥ मनु ४.५
न पापान्नं खादेत्, यतो हि नाम
सत्यमन्नजनितो जनदेहः ॥ नैषध० ५.९४

विज्ञानबलेन शुद्धान्नस्य महत्त्वं निश्चप्रचम् ।[१]

रात्रिकृत्यम्

शयनसम्बन्धिनो वैज्ञानिकनियमा विष्णुपुराणे निर्दिष्टाः—

कृतपादादिशौचस्तु भुक्त्वा सायं ततो गृही ।
गच्छेदस्फुटितां शय्यामपि दारुमयीं नृप ॥
नाविशालां न वा भग्नां नासमां मलिनां न च ।
न च जन्तुमयीं शय्यामधितिष्ठेदनास्तृताम् ॥
प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप ॥ ३.११.१०८-११०

कर्मण्यता तपस्विता च

वैदिकसंस्कृतिपरायणा जनाः श्रमस्य सर्वसाधनत्वं विज्ञाय तं प्राशंसन् । तद्यथा—

न ऋते श्रान्तस्य सख्याय देवाः ।
कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
नानाश्रान्ताय श्रीरस्ति ।
कलिः शयानो भवति संजिहानस्तु द्वापरः ।
उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरन् ॥

उपनिषद्युगे गृहस्थानां जीवनं ऋषित्वसमन्वितमासीत् । तद्यथा—कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्याहिंसन्सर्वभूतानि, अन्यत्र तीर्थेभ्यः ।[२] तदा गृहस्थस्य कामनाऽऽसीत्—स मेन्द्रो मेधया स्पृणोतु । अमृतस्य

१. अन्नानुरूपां तनुरूपऋद्धिं कार्यं निदानाद्धि गुणानधीते । नैषध० ३.१७
स्वादयन् रसमनेकसंस्कृतप्राकृतैरकृतपात्रसङ्करैः ।
भावशुद्धिसहितैर्मुदं जनो नाटकैरिव बभार भोजनैः ॥ शिशु० १४.५०
२. छान्दोग्ये ८.१५.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । कुर्वाणाऽचीरमात्मनः । वासांसि मम गावश्च । अन्नपाने च सर्वदा ।[१] ईशोपनिषदि च 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' निर्दिष्टम् ।

महाभारते गृहस्थजीवनस्य समृद्धिशालिता प्रशस्ता ।[२] गीतायां कर्मयोगस्यादर्शः मानवतां कर्मपरायणां निर्मातुमेवोपदिष्टः । तदनुसारं 'कर्म ज्यायो ह्यकर्मणः' ।

मनुना चतुर्विधा गृहस्था निर्दिष्टाः—ज्ञाननिष्ठाः, तपोनिष्ठाः, स्वाध्यायनिष्ठाः, कर्मनिष्ठाश्च । तेषु ज्ञाननिष्ठा एव मनुना सर्वोच्चं प्रतिष्ठापिताः । मनुस्तु ब्राह्मणानां जीविकोपार्जनार्थं कञ्चिदपि श्रमं व्यवसायं वा समीचीनं न मन्यते । पौरोहित्यं विगर्हितमेव । कृषिपशुपालनादिकं न स्वीकरणीयम् । अयाचितदानमेव गृहस्थैर्ग्राह्यम् । यदि ते दानं न प्राप्नुयुः तर्हि शिलोञ्छवृत्त्या जीविकोपार्जनं कुर्युः । मनुना ब्राह्मणेभ्यः ऋतामृतादीनां वृत्तीनां निर्देशः कृतः । तथाहि—

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः ।
अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् ॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥
ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥[3]

मनुस्मृतौ ३. २-५

ब्राह्मणगृहस्थस्तु स एव सर्वश्रेष्ठो योऽश्वस्तनिकः ।[४] अनेन प्रकारेण मनुर्गृहस्थाश्रममपि तपोमयमेव कर्त्तुमियेष ।[५]

उपर्युक्तनिदर्शनेन प्रतिभाति यत् मनुना प्रणीतोऽयं गृहस्थजीवनविन्यासो नास्ति स्पृहणीयः । अस्मिन् जीवने सन्तोष एव परमं धनं विद्यते । अयं मनुमार्गो वैदिकसंस्कृतिपथात् दूर एव वर्तते । मनुमार्गः परवर्तियुगेऽपि सिद्धान्ततः सर्वदा प्रतिष्ठितः, किन्तु वैदिकजीवनविधिर्धनधान्यसम्पन्नः सन् कदापि न परित्यक्तः । पौराणिकमतानुसारमिह भारते गृहस्थानां तपस्विजीवनविधिः समृद्धजीवनविधिर्द्वावपि सदा प्रचलितौ । अस्यां दशायां

---

१. तैत्तिरीये शिक्षावल्ल्याम् ४.१

२. शान्तिपर्वणि ८.२४ । आदिपर्वणि कस्यचिद् जनपदस्य श्रेष्ठत्वं विवेचयन् कविः प्राह—
दीयतां भुज्यतां चेति वाचोऽश्रूयन्त सर्वशः ॥ १०२.१४

३. सत्यानृतं तु वाणिज्यम् । सेवा श्ववृत्तिः ॥ मनुस्मृतौ ३. ६

४. मनुस्मृतौ ३. ७, भागवते ७. ११. १९

५. तदधिकृत्य पञ्चतन्त्रे गौणरूपेण प्रोक्तम्—मृतं मैथुनमग्रजम् । २.१०१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुराणेषु स्थाने स्थाने धनसमृद्धेर्निन्दा वर्तते । अन्यत्र च धनस्य धर्मसम्पादकत्वमधिकृत्य प्रशंसा कृता । भागवतानुसारम्—

यदृच्छयोपपन्नेन शुक्लेनोपार्जितेन वा ।
धनेनापीडयन् भृत्यान् न्यायेनैवाहरेत् क्रतून् ॥ ७. १७. ५१

यदि शिलोञ्छवृत्त्या जीविका न भवेत्तर्हि यज्ञाध्यापनैः धनार्जनं योग्यम् ।

शाश्वतोऽयं विचारो महर्षिभिः कृतः—

अनर्थो ब्राह्मणस्यैष यद्वित्तनिचयो महान् ।[1]

जीवनस्य किमुद्देश्यमिति भागवतकारो निर्दिशति—

योऽनित्येन शरीरेण सतां गेयं यशो ध्रुवम् ।
नाचिनोति स्वयं कल्पः स वाच्यः शोच्य एव सः ॥

गृहस्थाश्रमस्य श्रेष्ठत्वम्

आदर्शगृहस्थजीवनं पुरस्कुर्वाणो गौतमबुद्धः प्राह—

पतिरूपकारी धुरवा उट्ठाता विन्दते धनं ।
सच्चेन किंत्ति पप्पोति ददं मित्तानि गन्थति ॥

सुत्तनिपातस्य आडवकसुत्ते ७

तथापि गौतमानुसारं—'सद्धोध वित्तं पुरिसस्स सेट्ठं' इति पारम्परिकसत्यमवधारणीयम्।

भारते सुदूरप्राचीनकालत एव गृहस्थाश्रमस्य वैदिकसंस्कृतौ श्रेष्ठत्वं सम्मतम् । मनुः गृहस्थस्य शेषाश्रमाणां भरणपोषकत्वं परिलक्ष्य प्राह—

यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम् ।
गृहस्थेनैव धार्यन्ते तस्माद् ज्येष्ठाश्रमो गृही ॥

वसिष्ठोऽपि मनुं समर्थयन्नेव प्रोक्तवान्—

यथा नदीनदाः सर्वे समुद्रे यान्ति संस्थितिम् ।
एवमाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥
यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ।
एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षवः ॥

कालिदासः गृहस्थाश्रमस्य प्रशस्तौ रघुवंशे प्रस्तुतवान् यत् 'सर्वोपकारक्षम आश्रमोऽयम्' इति ।

भागवतानुसारं गृहस्थोऽपि निष्कामकर्मयोगेन परमपदं तथैव प्राप्तुं शक्नोति यथा

१. महाभारतेऽनुशासनपर्वणि ६१. १९.।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संन्यासी । इदं सर्वश्रेष्ठत्वं सिद्धमस्ति केवलं तादृशां गृहस्थानां येषां गृहस्थधर्मः संन्यासादपि कठिनतरः । अन्यथा भागवते प्रोक्तम्—

'यन्मैथुनादि गृहमेधिसुखं हि तुच्छं कण्डूयनेन करयोरिव दुःखदुःखम् ।
तृप्यन्ति नेह कृपणा बहुदुःखभाजः कण्डूतिवन्मनसिजं विषहेत धीरः ॥'

गृहमेधिनामीदृशीं स्थितिं विचार्य बहवो जनाः ब्रह्मचर्याश्रमं न त्यक्तुकामा नैष्ठिकब्रह्मचर्यं स्वीकृतवन्तः । गृहस्था भूत्वाऽपि यथाशीघ्रं गृहस्थाश्रमं परित्यज्य पुरासंख्या विद्वांसो वानप्रस्था एवाभवन् ।

वानप्रस्थाश्रमः

गृहस्था वार्धक्ये समुपस्थिते सर्वस्वं ब्राह्मणसात्कृत्वा वानप्रस्था बभूवुः । इदं तु जीवनस्य परं सार्थक्यमिति प्रमाणयता केनचित् कविना प्रोक्तम्—

पूरयित्वार्थिनामाशां प्रियं कृत्वा द्विषामपि ।
पारं गत्वा श्रुतौघस्य धन्या वनमुपासते ॥

गृहस्थाश्रमस्य श्रेष्ठत्वे सत्यपि कथं तस्य त्यागो विधेय इति साम्प्रतिकोऽयं प्रश्नः । मानवजीवनस्योद्देश्यं मोक्ष एव । तस्य सिद्धये गृहस्थाश्रमस्य साधकत्वं सन्देहास्पदं मतं मनीषिभिः ।[1] यथा पूर्वमेव कथितं गृहस्थाश्रमोऽन्येषां भरणाय श्रेष्ठ; किन्तु तस्मिन्नाश्रमे गृहस्थस्यात्मविकासायावसरोऽपूर्ण एवासीत् ।

बुद्धमतानुसारं तु गृहस्थेषु स्वभावत एवामगन्धाः क्रोधः, मिथ्याभाषणं, वञ्चना, मित्रद्रोहः, कृपणता, अभिमानः, ईर्ष्या, तृष्णा, विचिकित्सा, परपीडा, लोभः, दोषः, मदः, मोहश्च सन्ति । तेषां परित्यागेन अर्थात् गृहं परित्यज्यैवाभ्युदयं कामयेदिति ।

गृहस्थाश्रमस्य त्यागः

गृहस्थजीवने वैदिकमहर्षिभिः कोऽपि दोषोऽभावो वा दृष्टो यतस्ते यज्ञदर्शनस्यारण्यकभागं नगरे ग्रामे वा न पठन्ति स्म । गृहस्था अपि तेषां स्वाध्यायान्निवारिताः । केवलमरण्यवासिन एवारण्यकाध्ययनस्याधिकारिणोऽभिमताः। अनेन प्रकरणेन स्पष्टं प्रतिभाति यत् कस्यापि विशिष्टविषयस्यावगमाय वनवासस्य महत्वं स्वीकृतम्, ग्राम्यजीवनस्य हीनत्वं च प्रतिपादितम् ।

---

१. पुरुषस्य वयः सुखानि भुक्त्वा
रमणीयो हि तपोवनप्रवेशः ॥ बुद्धचरिते ५.३३

२. मुण्डकोपनिषदि १.२.१२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कालान्तरे स्वर्गादपि गरीयान् मोक्षः प्रमाणीकृतः। वैदिकसंस्कृतेः प्राच्यकाले स्वर्ग कामा जना यज्ञैः स्वाभीप्सितं स्वर्गादिकं प्राप्नुवन्ति स्म। मोक्षप्राप्तये यज्ञानां साधकत्वं नास्तीति विदितं सर्वेषाम्। मोक्षाय केवलं ब्रह्मज्ञानमनुत्तमं साधनमिति प्रसिद्धम्। मोक्ष-कामा जनाः शीघ्रमेव गृहस्थाश्रमं परित्यज्य गुरुशरणं गच्छन्ति स्म। यद्यथा—

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्॥

याज्ञवल्क्यस्य वैराग्यकथा सुविदिता। स सर्वं गृहार्थं परित्यज्य मोक्षार्थी सन् भैक्ष-चर्यां स्वीकृतवान्।

गृहस्थजीवनस्य कष्टानि प्रायशोऽतिरंजितान्येव। तद्यथा—विना परिश्रमं कदापि गार्हस्थ्यं न सम्भवति। असत्यं विना कुतो गार्हस्थ्यम्? दण्डेनापकारेण विनाऽपि गृहस्था-श्रमो न भवति। ईदृशं छिद्रैः पूर्णं कठिनं गार्हस्थ्यं कः स्वीकुर्यात्?[1]

प्राचीनयुगे बहवस्तत्रासन् महाविद्यालया येषु केवलं प्रव्रजिता एव प्रवेशमर्हन्ति स्म। तेषु विद्यालयेषूच्चशिक्षालाभाय बहवो गृहस्थाः प्रव्रजिता बभूवुः।[2]

वृद्धावस्थायामैन्द्रियकशैथिल्ये सति सर्वेषां हृदि विरागभावना स्वभावतो जागर्त्येव। प्राच्ये मानसिके सन्निवेशे किमप्यद्भुतं जीवनदर्शनमेवासीत् येन केशे पलिते प्रव्रज्याकाल आयात इति वनवासाय चित्तमुदग्रं संजातम्।[3] राजाऽपि प्रव्रज्याग्रहणमेव कर्तव्यं मन्यते स्म। प्रव्रज्यापद्धतिस्तावत् प्रकाशमयी बभूव। पर्वतप्रदेशे इमे प्रव्रजिता विद्यार्थिसममेवात्म-विकासे नियुक्ता बभूवुः।

महाभारते तु गृहस्थजीवनस्य दुर्दशा वर्णिता। तथाहि—मानवस्तु गृहस्थाश्रमे वसन् व्याधिभिर्वृद्धावस्थया, कालेन, कामनाभिश्च विवशीकृतः सुखमनुभवन् तिष्ठति।[4] एतद् व्यर्थमेव। तथा हि—

इदं तु दुष्करं कर्म कुटुम्बमभिसंश्रितम्।
दानमध्ययनं यज्ञः प्रज्ञासन्तानमार्जवम्॥
यद्येतदेव कृत्वापि न विमोक्षोऽस्ति कस्यचित्।
धिक् कर्त्तारं च कार्यं च श्रमश्चायं निरर्थकः॥

शान्ति० २६९.६५-६६

भागवतानुसारं तु शूद्रा अपि गृहं परित्यज्य वानप्रस्था एव ब्रह्मात्मैक्यमापुः।[5] गृहासक्तिस्तु पतनस्य कारणमिति प्रतिपादितं—

१. वच्छनखजातके २३५; भिसजातके ४८८
२. महाछत्तजातके ३३६; सेतकेतुजातके ३७७
३. मखादेवजातके ९
४. स्त्रीपर्वणि ५, ६, ७ अध्यायतः
५. भागवत० ९.२.९-१४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतम् ।
गृहेषु खगवत् सक्तस्तमारूढच्युतं विदुः ।। ११.७.७४

गृहस्थाश्रमस्तु 'अङ्गनाश्रमः' । अतः शिशवोऽपि विरक्ताः सन्तो मोक्षपथगामिनो भवेयुः ।[1]

नगरपरिभवान् विमोक्तुमपि मनस्विनो वानप्रस्था बभूवुरिति शाश्वतविचारणं भासेन निर्दिष्टम्—

नगरपरिभवान् विमोक्तुमेते वनमधिगम्य मनस्विनो वसन्ति ।। स्वप्न० १.५

वानप्रस्थानामैतिहासिकोदाहरणानि विशेषतः प्रतिपत्तिकारणानि सन्ति । कश्मीराणां राजा कुवलयापीडो वानप्रस्थसमारम्भकाले सिंहासने लेखयामास—

गच्छ भद्र वनायैव तपस्याधीयतां मनः ।
सापायाः क्षणभंगिन्य एवंप्राया विभूतयः ।। राजत० ४.३८८

वन्यवृत्तिः

बहुविधास्तत्रासन् वानप्रस्थाः । जीवनविधिरपि विविधप्रकाराणां तापसानां वैविध्यपूर्ण एवासीत् । तेषु प्रमुखाः सन्ति ते वानप्रस्था ये महर्षीणामाश्रमेषु तपसे तत्त्वज्ञानाय च वसन्ति स्म । ईदृशानां तापसानां गणा बभूवुः । प्रत्येकस्य गणस्य शास्तासीत् ।[2] भोजनं तेषां वनस्य पत्रपुष्पफलमूलादिभ्यः प्राप्तम् । वनवृक्षेषु मध्ये तेषामाश्रमा अवास्थताः । यत्र तत्र पर्णशाला आसन् । कतिपयतपस्विनः सङ्घं निर्माय ग्रामसमीपं निवसन्ति स्म, ग्रामेषु भिक्षितवन्तश्च ।[3] मुनीनामजिनवस्त्रं परिधानीयमासीत् । कतिपयमुनयो वल्कलधारिणो बभूवुः ।[4]

दक्षिणभारतीयानां मुनीनां जीवनविधिर्वाल्मीकिरामायणे निर्दशितः । तत्रासंख्या मुनय आसन् । अगस्त्यस्तु मुनिसम्राडासीत् । स तत्र राक्षसानां विनाशमपि कृतवान् । वानप्रस्थास्तु तत्रागतानां महापुरुषाणां स्वागतं कृतवन्तः, तेभ्यः फलमूलादिकं च भोजनं दत्तवन्तः । केचिन्मुनयो यज्ञार्थं गा अपालयन् ।[5]

रामायणानुसारं मुनीनां गणाः—वैखानस-वालखिल्य-सम्प्रक्षाल-मरीचिप-अश्मकुट्ट-शीर्णपर्णाशिन-पत्राहार-तापस - दन्तोलूखलि-उन्मज्जक-गात्रशय्य-अशय्य-अनवकाशिक-मुनि-

१. भागवते ४. २६. ५२—५५; ६.५.२१, ३३ ।
२. अम्बट्ठजातके १२४, केसवजातके ३४६, उदञ्चनिजातके १०६ ।
३. संकप्पजातके २५१ ।
४. सेतकेतुजातके ३७७; संकप्पजातके २५१ ।
५. बालकाण्डे ५२. ५३. ५५ सर्गेषु ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सलिलाहार-वायुभक्ष-आकाशनिलय-स्थण्डिलशायि-ऊर्ध्ववास-दान्त-आर्द्रपटवास-सजप-तपोनिष्ठ-पञ्चतपोन्वितादयः स्युः ।[१] नाम्नैव तेषां गुणाः जीवनवृत्तयश्च प्रतीता भवन्ति । कतिपयमुनिगणानां कुलपतय आसन् । प्रायः सर्वे ते ऐन्द्रियकसुखेष्वनासक्ता आसन् ।

कतिपयमुनयः सकुटुम्बा आसन् । एषु वसिष्ठः सुप्रसिद्धः । व्रीहिद्रोणो मुनिर्वने शिलोञ्छकापोतवृत्त्या जीविकोपार्जनमकरोत्, पक्षे सकृद् भोजनं कृतवान् । स कापोतवृत्त्या संगृहीतेनान्नेन यज्ञमतिथिसत्कारं चाकरोत् ।[२] रामायणानुसारमृचीकविश्वामित्रौ सकुटुम्बौ बभूवतुः ।[३]

तृतीयमायुषो भागं वानप्रस्थाश्रमे वसेत् ।
तानेवाग्नीन्परिचरेद्यजमानो दिवौकसः ॥
नियतो नियताहारः षष्ठभक्तोऽप्रमत्तवान् ।
तदग्निहोत्रं वा गावो यज्ञाङ्गानि च सर्वशः ॥
अफालकृष्टं व्रीहियवं नीवारं विघसानि च ।
हवींषि संप्रयच्छेत मखेष्वत्रापि पञ्चसु ॥
वानप्रस्थाश्रमेप्येताश्चतस्रो वृत्तयः स्मृताः ।
सद्यःप्रक्षालकाः केचित्केचिन्मासिकसंचयाः ॥
वार्षिकं संचयं केचित् केचित् द्वादशवार्षिकम् ।
कुर्वन्त्यतिथिपूजार्थं यज्ञतन्त्रार्थमेव वा ॥ शान्ति० २३६'६–९

साधारणतो वानप्रस्था दीर्घश्मश्रुकेशा आसन् ।[४] स्त्रियोऽपि वानप्रस्था वल्कलाजिनधारिण्यो बभूवुः ।[५]

महाराजा अपि महाभारतयुगे गृहस्थाश्रमस्य पश्चात् वानप्रस्था बभूवुः । वानप्रस्थस्य धृतराष्ट्रस्याश्रमे होमाग्निमृगसमूहमयूरकोकिलादयो विराजन्ते स्म । तत्र फलमूलराशिरासीत् । धृतराष्ट्रस्याश्रमे युधिष्ठिरो मुनिभ्यः कलशाजिनप्रवेणीस्रुकस्रुवाकमण्डलुस्थाली-

---

१. ईदृशानां तपस्विनां जीवनं कथं सम्भवमासीदित्यस्मिन् विषये वर्त्तमानयुगस्याधोलिखितं प्रामाण्यं वर्तते—Dr. Barbara Moore 56, Russian-born dietician had been living on vegetable and fruit-juice for six or seven years. She says eventually I hope I will leave off fruit-juice and live on air alone. I can do that now for two or three months at a time, if I live on the mountains.

२. वनपर्वणि २४६ अध्यायतः ।

३. वालकाण्डे ६१,६२ सर्गतः ।

४. आश्वमेधिकपर्वणि ४६ अध्यायतः ।

५. आश्रमवासिकपर्वणि २५, २६, ३३ ..., ..

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लौहपात्राणि दत्तवान् । धृतराष्ट्रोऽपि युधिष्ठिरस्य स्वागतमकरोत् ।[1]

मुनीनां पर्णशाला कीदृशी बभूवेति रामलक्ष्मणस्य रामायणे वर्णितायाः शालाया दर्शनेनानुमातुं शक्यते—

पर्णशालां सुविपुलां तत्र संघातमृत्तिकाम् ।
सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनाम् ॥
शमीशाखाभिरास्तीर्णां दृढपाशावपाशिताम् ।
कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा ॥
समीकृततलां रम्यां चकार लघुविक्रमः ।

अरण्य० १५. २१–२३

शनैः शनैः वानप्रस्थानां जीवन-विधानं कठोरतरमभवत् । तेषां भिक्षावृत्तिर्दानग्रहणं च मनुर्न्यषेधीत् । यदि वानप्रस्था गृहस्थेभ्यो भिक्षन्ते स्म तर्हि केवलमष्टग्रासमात्र-भोजनायैवासीत् सा भिक्षा । भिक्षान्नमपि वने नीत्वैव खादनीयमासीत् । मनुना निर्दिष्टा कठोरा वानप्रस्थवृत्तिः सुग्राह्या न प्रतिभाति । तद्यथा—

अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।
शरणेष्वममश्चैव वृक्षमूलनिकेतनः ॥ ६.२६
चान्द्रायणविधानैर्वा शुक्लकृष्णे च वर्तयेत् ।
पक्षान्तयोर्वाप्यश्नीयाद्यवागूं क्वथितां सकृत् ॥ ६.२०
भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम् ।
स्थानासनाभ्यां विहरेत् सवनेषूपयन्नपः ॥ ६.२२
ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः ।
आर्द्रवासास्तु हेमन्ते क्रमशो वर्धयंस्तपः ॥ ६.२३

अर्थशास्त्रानुसारं राजभिर्मुनिभ्यो वनानि निर्धारितानि । तेषां वनानां सुरक्षा राज्ञा कृता ।

पुराणानुसारं वानप्रस्थाश्रमे शरीरं प्रत्युपेक्षाभावः समवर्धत । विधानानां कठोरत्वे सति वानप्रस्थे रुचिरपि नाभूत् साधारणजनानाम् । फलतो वानप्रस्थावधिः स्वल्पीकृतः । तद्यथा—

चरेद्वने द्वादशाब्दानष्टौ वा चतुरो मुनिः ।
द्वावेकं वा यथा बुद्धिर्न विपद्येत कृच्छ्रतः ॥ भागवते ७.१२.२२

उपर्युक्तहेतुना नातिस्वल्पा वानप्रस्थाः वनं परित्यज्य गृहमाजग्मुः । एतादृशाः कतिपय-राजानः शाल्वाधिपः, अम्बरीषः, सांकृतिः अन्तिदेवाश्चासन्, ये जटाः कर्तयित्वा पुनः

---

१. आश्रमवासिकपर्वणि ३१–३४ अध्यायतः ।

 CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुकुटधारिणो बभूवुः ।[1]

आधुनिकयुगे तु वानप्रस्थस्य प्रतीक ऋषिपञ्चमी वर्तते ।

बौद्धसंस्कृतौ जैनसंस्कृतौ चात्मविकासाय वनस्य महत्त्वमासीत् । बौद्धेषु तेऽरण्यसंज्ञिनो बभूवुः, येषां चित्तानि वनशोभासौरभादिभिः समाकृष्यन्त । अङ्गुलिमालस्य चित्तं पर्वतानां वनानां च प्रशान्तावरमत । वनानां पुष्परञ्जितभूमावुपविश्य मुक्तिं बन्धनविहीनत्वं च भिक्षवो ध्यायन्ति स्म । स्थविर उसभस्तु शरदो वनश्रीसौरभाभ्यामात्मविकासस्य सन्देश-मलभत । गौतमबुद्धेन घोषितम्—भिक्षवो यावद्वनेषु शयनासनानामुपभोगं कुर्वन्ति ताव-देव तेषां वृद्धिर्भविष्यति ।[2] गौतमस्य भ्राता स्वयमेव योगाभ्यासं कर्त्तुं वनमगमत् । स्वयमेव बुद्धो बहूनि दिनानि वनेषु न्यवसत् । परवर्तियुगे बौद्धभिक्षूणामावासाय विहारा वनपर्वतभूमिषु निर्मिताः ।

जैनसाधूनां निवासः श्मशाने शून्यागारे गुहायां शिल्पशालायां वाभवत् । ऐन्द्रिय-सुखानां सर्वथाभावस्तेषां जीवनविधौ बभूव। कष्टसहनमपि आत्मविकासाय साधनं स्वीकृ-तम्। परवर्तियुगे श्वेताम्बरजैनमुनीनां जीवनं वस्त्रभोजनावासादिविषये नातिविषमोऽभूत् ।

तपस्तत्त्वज्ञानं च

तपसः सर्वप्रथमोल्लेख ऋग्वेदे वर्तते—

तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम् ।
तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिनाजायतैकम् ॥ १०.१२९.३

श्लोकेऽस्मिन्तपःसंवर्धनस्य साधनमस्ति । इदमेव विकासस्य मूलकारणम् । मानवस्य विकासे तपसो महत्त्वं तादृशमेवास्ति । तपसो माहात्म्यमथर्ववेदे वर्णितम्—ब्रह्मचारी तपसोदतिष्ठत् । ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति । ब्रह्मचर्येण तपसा देवा मृत्यु-मुपाघ्नत इति ।[3] वैदिकसाहित्येऽन्यत्रापि—'तपोभिरेव देवानां देवत्वं सिद्धम् ।[4] प्रजापतिस्तु सहस्रवर्षं तपस्तप्त्वाऽऽत्मशुद्धिं विधाय मृत्युपाशाद्विमुक्तः[5] । तपसा यज्ञेन इव सिद्धिर्लभ्या ।[6] तस्य तपस्तेपानस्य एभ्यो लोमगर्तेभ्य ऊर्ध्वानि ज्योतीं-ष्यायन् । तद्यानि तानि ज्योतींष्येतानि तानि नक्षत्राणि । तपसा वै लोकं जयन्ति ।

---

१. सौन्दरनन्दे ७.५१
२. महापरिनिब्बान सुत्तन्त १.६
३. अथर्ववेदे ११.५ ।
४. तैत्तिरीयब्राह्मणे ३.१२ १३.१ ।
५. शतपथब्राह्मणे १०.४.४.१—३ ।
६. अथर्ववेदे १२.१.२२ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदस्यैतत्परंपरऽएव वरीयस्तपो भवति । परंपरं श्रेयांसं लोकं जयति' इति तपसो महामहिमशालित्वं समुद्दिष्टम् ।[१]

उपनिषत्सु तपसो रहस्यात्मकं प्रभावमृषयो वर्णयन्ति—तपस्तु ब्रह्मैव[२], यज्ञेष्टसत्रायणमौनानशकायनारण्यायनानि इत्येते तपसोऽपररूपाणि । तपस्तु ज्ञानमयमिति च ते वदन्ति ।

रामायणानुसारं तपस्विनः प्रभा द्योतिता । तपसा मुनयो देदीप्यमाना बभूवुः । मुनयः प्रायो जपहोमादिषु संलग्ना अभवन् । यज्ञवत्तपसोऽवधिर्नियतः । तस्मिन् समाप्ते तपस्वी ब्रह्मचर्याश्रमान्ते स्नातका इव स्नान्ति स्म ।[३] कर्हिचित्तपोऽत्यन्तघोरमभवत् ।

ऊर्ध्ववाहुर्निरालम्बो वायुभक्षस्तपश्चरन् ।
घर्मे पञ्चतपा भूत्वा वर्षास्वाकाशसंश्रयः ।
शिशिरे सलिले शायी रात्र्यहानि तपोधनः ।।

बा० का० ६३.२३,२४

केचित्तपस्विनो मौनमाचरन् । तेषां घोरतपसा जगत्सर्वमतप्यत ।[४]

तपसः प्रभावाद् ज्ञानस्यालौकिकशक्तिः प्रादुरभवत् । तपस्विनस्तु तपोबलेनाप्रत्यक्षमपि ज्ञातुं समर्थाः । अपरेषां हृदिगतं वृत्तं तपसा ज्ञायते येषां तपसात्मज्ञानसिद्धिरभवत् । ते भावितात्मानस्तपस्विनः । तपसैव ब्रह्मसाक्षात्कारः सुलभः । तापसानां कामाः साधनं विनापि पूर्णा बभूवुः इति मनुः ।[५]

केचित्तपस्विनः योगनिरता आसन् ।[६] मनुर्वानप्रस्थेभ्यः श्रुतीनामुपनिषदां चाध्ययनं निर्धारयति स्म ।[७] मुनीनामाश्रमेषु नवतपस्विनो दीक्षिता बभूवुः । कुलपतयो दीक्षिततपस्विभ्यः प्रवचनं दत्तवन्तः । 'आश्रमेषु अध्ययनेन मुनीनां विकासो जायते' इति व्यासवचनम् ।[८]

महाभारते त्रिविधानि तपांसि विनिश्चितानि—शारीरकाणि वाचिकानि मानसिकानि च । ब्राह्मणगुरुप्राज्ञानां पूजा ब्रह्मचर्यार्जवाहिंसादीनि च शारीरकं तपः । सुखदं, सत्यं,

१. शतपथे १०.४.४.२; ३.४.४.२७ ।
२. तैत्तिरीयोपनिषदि भृगुवल्ल्याम् २.५; छान्दोग्य० ८.५; मुण्डक १.१.९ ।
३. बालकाण्डे ५१, ६३ सर्गत ।
४. अरण्यकाण्डे ६५.१३-१७ ।
५. मनुस्मृतौ ११.२३६; ५.२९; रामायणे अरण्यकाण्डे १४.१५-१६;५.४,४२ ।
६. रामायणे अरण्यकाण्डे ६.६ ।
७. मनुस्मृतौ ६.२९ ।
८. महाभारते शान्तिपर्वणि ... अध्यायतः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रियं, लाभप्रदं च वचनं स्वाध्यायो नियतकर्मणामभ्यासश्च वाचिकं तपः। मनसः प्रसन्नता, सौम्यता, मौनं, शुद्धभावना च मानसिकं तपः। निष्कामभावेन कृतं तपः सात्त्विकम्, आत्मप्रतिष्ठायै दम्भाय वा कृतं राजसम्, आत्मानं पीडयित्वा परान्वा पीडयितुं तपस्तामसिकं भवति।[१] शरीरस्य पीडनं हीनतप इति तत्त्याज्यमेव। मनोभावस्य निर्मलत्वं तपसः प्रथमं लक्षणं कथ्यते।[२]

तपसः साधारणस्वरूपमपि सुनिश्चितमेव। तदनुसारं ब्राह्मणस्य ज्ञानार्जनम्, क्षत्रियस्य प्रजापालनम्, वैश्यस्य पशुपालनादिव्यापारः, शूद्रस्य समाजसेवा एव तपः।[३] 'कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः' इति योगसूत्रेण तपः परिभाषितम्।

किं तपोबलमिति विवेचयता प्रोक्तम्—

यद्दुष्करं यद्दुरापं यद् दुर्गं यच्च दुस्तरम्।
तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम्॥

गौतमस्तु कष्टदायकं तप आवश्यकं नानुमनुते। तदनुसारं तपस्तु शीलसम्पत्तिः चित्तसम्पत्तिः प्रज्ञा-सम्पत्तिश्चास्ति। बौद्धसंस्कृतौ गीतानुरूपं शारीरिकमानसिकवाचिकतपसां विधानं वर्तते। गौतमानुसारं तु सदसतोर्विवेकवान् पुरुषो मुनिः स लोकस्य परलोकस्य च मननं करोति। अनासक्तो जनो मुनिः।[४] मुनिः शरीरस्य वेदनायाश्चित्तस्य मनोवृत्तीनां च पर्यालोचनं करोति। शरीरस्याशोभनां गतिं दृष्ट्वा सोऽनासक्तो भवति। स एव कायानुपश्यी योगी स्यात्।[५]

जैनसंस्कृतौ तपसी बाह्याभ्यन्तरे संज्ञिते। बाह्येन—अनशनावमोदर्यवृत्तिपरिसंख्यानरसपरित्यागादयः कायक्लेशा भवन्ति। आभ्यन्तरतपसः प्रायश्चित्तं विनयो वैयावृत्त्यं स्वाध्यायो व्युत्सर्गो ध्यानं चाङ्गानि भवन्ति।[६]

परवर्तियुगे तपस्यार्थं वनस्यावश्यकता नास्तीति केचित्तपस्विनो मठादिषु वसन्ति स्म। ते मठास्तु क्वचित् राजप्रासादैस्तुल्या बभूवुः। कल्हणानुसारं काश्मीराणां राज्ञोऽवन्तिवर्मणो मन्त्री शूरः तपस्विनां कृते स्वप्रासादसमानं मठं निर्मितवान्।[७]

समाजसेवा

भारतीयसंस्कृतेः प्रवर्तने, विकासने, प्रसारणे च वानप्रस्थानामवदानं सविशेषं वर्तते। समाजाय जीवनस्योदात्ततमं पक्षं ते दर्शयन्ति स्म। तेषामाचार-विचारैः समाजोऽनुवा-

---

१. गीतायाम् १७.१४ १९

२. महाभारते वनपर्वणि २००.८०-१०७।

३. मनुस्मृतौ ११.२३५।

४. धम्मपदे धम्मट्ठवग्गो १३-१४; सुत्तनिपाते पारायणवग्गो सभियसुत्तं च।

५. मज्झिमनिकाये सतिपट्ठानसुत्तन्ते।

६. तत्त्वार्थसूत्रम् ९. १९-२०।

७. राजत० ५, ३८। CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सितोऽभवत् । लोकानां जीवन-वैषम्यं ते निवारयन्ति स्म । राजानोऽपि रङ्काश्च शरणं गतास्तेषां पथप्रदर्शनेन सान्त्वेन चानन्दितात्मानः संजाताः । एतेषां वानप्रस्थानां परम्परा वसिष्ठ-व्यास-जाबालिमैत्रेयादिभिः पावनीभूता । एतदेव परिलक्ष्य भासेनालोचितम्-तपोवनानि नामातिथिजनस्य स्वगेहम् ।

संन्यासाश्रमः

संन्यासाश्रमे मानवः सर्वतन्त्रस्वतन्त्रो भूत्वा महान् विचारको भवितुमर्हति ! यावत्कालं मानवः स्थान-कुटुम्ब-ग्राम-देश-कुल-धर्म-व्यवसाय-पदविशेषैः सम्बद्धो भवति तावदेव तस्य बौद्धिकविकासो विचारपरिधिश्च सीमितौ भवतः । संन्यासस्य विधानेनास्याः संकुचितसीमायाः परे भवितुं मानवोऽवसरं प्राप्नोति । संन्यासी स्वकीयं निःसीमत्वं पर्यालोच्य स्वशक्तीनामधिकतममुपयोगं कर्तुं समर्थो भवति ।

संन्यासारम्भः

वानप्रस्थे मनन-चिन्तन-स्वाध्याय-तपोभिरेव ब्रह्मज्ञानं प्राप्यते । अतः परं तपस आवश्यकता न विद्यते । मुनिर्ब्रह्मसंस्थो भवति । स ब्रह्ममयो भूत्वा ब्रह्मवदाचरति । ईदृशो मुनेर्वनवासो नापेक्षितः । स तु वनान्निष्क्रम्य संन्यासी भूत्वा गृहस्थसमाजेऽपि विचरन्नेव समाजस्याध्यात्मिकनेता बभूव । दत्तात्रेयपथमनुसरन् क्वचित्संन्यासी पृथिवी-पशुपक्षिकीटादिषु गुरुन् प्राप्नोत् ।[1]

वानप्रस्थस्यानिवार्यत्वं नासीत् वैदिकयुगे । तदा ब्रह्मचर्याश्रमाद् गृहस्थाश्रमाद्वा पुरुषाः संन्यासाश्रमं प्रविविशुः । यदा विरजेत् तदा प्रव्रजेदिति विधानमासीत् ।

संन्यासिनो जीवन-विधिः

संन्यासी गृहमग्निं सुखं सुरक्षां च परित्यज्य मौनमवलम्ब्य निवसति स्म । भोजनार्थमेव ग्रामे आगत्य भिक्षते स्म । नासीत् तस्य लोकपरलोकस्य काचिच्चिन्ता । स तु नित्यमेव पर्यटत् । स जीर्णशीर्णानि वस्त्राण्यात्मार्थं कुतोऽपि प्राप्नोत् दिगम्बरो वाऽभवत् । स नित्यमध्यात्मपर आसीत् ।[2]

गौतमानुसारं तु संन्यासी वर्षाकाले पर्यटनाद्विरतो बभूव । केवलं भिक्षार्थमेव ग्रामं प्रविवेश । भिक्षार्थमपि स विलम्बेन निरगच्छत् केवलं नग्नत्वस्य निगूहनाय स परिधानं धारयति स्म । सर्वान् प्राणिनः प्रति तस्योपेक्षाभाव आसीत् । स किमपि कार्यं नाकरोत् ।[3]

---

१. भागवते ११. ७. ३२-११. ९. २३ ।

२. आपस्तम्बधर्मसूत्रे २.९ ।

३. गौतमे ३. ११-२३ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्वनुसारं तु संन्यासी नित्यमेवैकाकी विचरेत् ।[१] सकृदेव दिने भिक्षेत । भिक्षां लभेत, न वा, तस्य हर्षविषादौ न भवेताम् । भिक्षा तस्य प्राणयात्रिका भवेत् । स्वल्पभोजनमेकान्तवासश्च तस्यैन्द्रियकविषयेभ्यः पराङ्मुखत्वमद्योतयताम् ।

मनुर्वर्णितं संन्यासिरूपं विलक्षणमेव । तद्यथा—

कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ।। ६.४४

इह लोके मुक्तः परलोकेऽपि मुक्तो भवेदिति सम्भाव्यते । 'प्रसिद्धं चैतदस्ति लोके यः खलु यस्मिन् विषये समासक्तः स्वकलेवरं जहाति, अन्यस्मिन्नपि जन्मनि तत्रैवासक्तो भवतीति'।[२]

संन्यासिना केशनखश्मश्रूणि न वर्द्धितानि । स तेषां कर्तनं कारितवान् । तस्य सामग्री—भिक्षापात्रं दण्डः कमण्डलुश्चासीत् । तस्य पात्रं छिद्ररहितमभवत् । जलमात्रेण शुद्धयर्हेणालाबुफलेन काष्ठेन वा निर्मितानि पात्राणि स स्वीकृतवान् । अपरं च संन्यासी—

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ।।

संन्यासिनो मानसिकवृत्तयः क्षमापूर्णा अभवन् । तेन मैत्रीभावना संवर्धिता । सहिष्णुता तस्य परमो गुणः । स कस्याप्यनादरं नाकरोत् । कस्यापि प्राणिनस्तस्माद् भयं नाभवत् । यदि कश्चित् पुरुषः तस्मै क्रुद्धवान् स तं प्रति भद्रवाणीं प्रयुक्तवान् । सांसरिरिकविषयेषु वार्त्तामपि स नाकरोत् । अध्यात्मचिन्तकः सोऽन्यवस्तुविषयेभ्यः सर्वथा निरपेक्षोऽभवत् । मन्वनुसारं देहमधिकृत्य सोऽशोचत्—

अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ।।
जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यं च भूतवासमिमं त्यजेत् ।।
नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा ।
तथा त्यजन्निमं देहं कृच्छ्राद् ग्राहाद्विमुच्यते ।। ६.७६-७८

संन्यासिनो योगपथं मनुर्निर्देशयति । स योगमार्गेण परमात्मनः सूक्ष्मतत्त्वानुशीलनं करोति । अज्ञानेन कृतां हिंसां परिमार्जितुमेव स नित्यमेव स्नानस्य पश्चात् षट् प्राणायामान् करोति, ध्यानयोगेन ब्रह्म प्राप्नोति च ।

महाभारतानुसारं संन्यासिनो जीवनविधिर्मोक्षधर्म एव । संन्यासिन आश्रयस्तु वृक्षः,

---

१. तदनुसृत्य भागवते प्रोक्तम्—
वासे बहूनां कलहो भवेद् वार्ता द्वयोरपि ।
एक एव चरेत्तस्मात् कुमार्या इव कङ्कणः ।। ११.९.१०

४. मित्रगोष्ठ्या पृष्ठ सं०-२७, १९०७ संवत्सरस्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नदीतटः, शून्यगृहं वा भवेत् । स कुत्रापि नित्यं न वसति, संन्यासी शरीरस्य परिमार्जनाय सचेष्टो न भवति, सर्वेषां प्राणिनां हिते रमते च । तस्य क्षमानन्ता ।[1]

महाभारतानुसारं कतिपय संन्यासिनो तत्त्वज्ञाः सन्तोऽपि बालका इव निर्व्याजा बभूवुः । नित्यपरितृप्तास्ते प्रकृतेः क्रीडामात्रमेव जगदिति तस्य वैषम्येण न प्रभाविताः । संसारस्य वैषम्यमेव हि तेषां मतेन स्वाभाविकम् । ते संसारमविकृत्य नान्वशोचन् । चिन्ताभिर्विहीना एव सुप्रसन्नास्ते सर्वत्र सर्वथा च प्रशस्याप्रशस्यैर्भोजनवस्त्रादिभिः सन्तुष्टाः बभूवुः । अनियतासीत् तेषां जीवनवृत्तिः ।[2] सेयमाजगरवृत्तिस्तेषाम् ।

पद्मपुराणे संन्यासिनस्त्रिविधाः मताः—ज्ञानसंन्यासिनः वेदसंन्यासिनः कर्मसंन्यासिनश्च। ज्ञानसंन्यासिनस्तु सर्वथा मुक्ता निर्द्वन्द्वा निर्भयाश्चात्मन्येव स्थिताः । वेदसंन्यासिनः कालपरिग्रहांश्च विहाय नित्यमेव वेदाभ्यासे रमन्ते स्म । ते मोक्षेच्छवो विजितेन्द्रियाश्च सन्तः कर्मसंन्यासिनस्तु स्वयमेव ब्रह्मणि लीना महायज्ञपरायणा बभूवुः । एषु त्रयेषु ज्ञानसंन्यासिनः श्रेष्ठा आसन् । तेषां ज्ञानमेव भोजनं परिधानं वाभवत् । ते जीवनमरणमधिकृत्यापि नाचिन्तयन् । अध्ययनश्रवणप्रवचनादिषु नासीत् तेषां प्रवृत्तिः । पद्मपुराणानुसारं संन्यासी कस्यचिदेकस्य पुरुषस्यान्नेन नावलम्बितः । वर्षर्तुं विहाय स कुत्रापि नित्यवासं नाकरोत् । स्नानशौचादिभिरात्मानं स पुनाति स्म । सदैव स ब्रह्मदर्शने लीनोऽभवत् ।[3]

केषांचित् संन्यासिनां जीवनविधेर्वैचित्र्येण कुतूहलमापन्ना अधमाः तेषां दुर्गतिमकुर्वन् । संन्यासिनो न कदापीदृशैर्व्यवहारैरकुप्यन् ।

संन्यासी बाह्यलक्षणैर्विमुक्तो भवत्विति भागवते प्रतिपादितम् । तद्यथा—

अव्यक्तलिङ्गो व्यक्तार्थो मनीष्युन्मत्तबालवत् ।
कविर्मूकवदात्मानं स दृष्ट्या दर्शयेन्नृणाम् ।। ७. १३. १०

भागवतानुसारं संन्यासिनः सम्यक्प्रकारेणाध्यात्मिकज्ञानप्रपन्ना भवेयुः । यदि ज्ञानप्रपन्नत्वं न भवेत्तर्हि स गुरोर्ब्रह्मज्ञानं शिक्षेत । ज्ञानं विना संन्यासिवेषो वञ्चनमेव । तद्यथा—

यस्त्वसंयतषड्वर्गः प्रचण्डेन्द्रियसारथिः ।
ज्ञानवैराग्यरहितस्त्रिदण्डमुपजीवति ।।
सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा ।
अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ।।११.१८.४०-४१

भागवते संन्यासिभ्यो योगस्य माहात्म्यं सविशेषमेव । योगाधिकारी तु भागवतानुसारं तदा भवति—

---

१. वास्यैकं तक्षतो बाहुं चन्दनेनैकमुक्षतः ।
नाकल्याणं न कल्याणं चिन्तयन्नुभयोस्तयोः ।। आदिपर्वणि ११०. १४ ।
२. भागवते ५. ५, ३२–३३, ११. ७ २८–३० । शान्तिपर्वणि १७२. १०–३६
३. स्वर्गखण्डे ५९ अध्यायतः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदारम्भेषु निर्विण्णो विरक्तः संयतेन्द्रियः ।
अभ्यासेनात्मनो योगी धारयेच्चञ्चलं मनः ॥ ११. २०. १८

भागवते त्रिविधः संन्यासो निर्दशितः—ज्ञानयोगात्मकः, कर्मयोगात्मकः, भक्तियोगात्मकश्च । कर्मसु तेषां फलेषु च विरक्ता भवन्ति ज्ञानयोगिनः । कर्म प्रति येषामासक्तिस्ते कर्मयोगिनः सन्ति । येषां मनःस्थितिर्ज्ञानकर्मणोर्मध्ये विपरिवर्तते, ये तु भगवतः कथार्चादिषु श्रद्धापरास्ते भक्तियोगिनो भवन्ति ।

आत्मविकासस्य सर्वोच्चसोपानमिव योगो भारते प्राच्यतमः प्रतिभाति । आर्येतराणां सिन्धुसभ्यतायां योगप्रणाली प्रचलितासीदिति तत्र प्राप्तया योगिनो मूर्त्या प्रमाणितमेव । योगस्य प्रथमः कल्पः सुस्पष्टमथर्ववेदे वर्तते । तद्यथा—

मूर्धानमस्य संसीव्याथर्वा हृदयं च यत् ।
मस्तिष्कादूर्ध्वः प्रैरयत् पवमानोऽधि शीर्षतः ॥ १०. २. २६.

प्राणायामस्येयं प्रक्रिया समाधिप्रवणा वर्तते ।

इन्द्रियाणां स्थिरधारणा तु योगः । इन्द्रियाणि वशीकृत्य योगिनोऽप्रमत्ता भवन्तीति कठोपनिषदि निर्दशितम् ।[1] चित्तवृत्तयोऽसंख्यासु दिशासु विपरिवर्तमाना न तावन्मात्रं फलदायिन्यो यावत्तु केवलमेकस्यां दिशि नियुज्यमानाः सत्यो भवन्ति ।[2] चित्तं तु ध्यानावलम्बिनां महत्साधनम् । यावन्मात्रं चित्तं शुद्धं सात्त्विकमेकपरायणं च भवति तावन्मात्रं तस्योपयोगिता वर्धते । यदा योगेनाभीष्टं प्राप्यते तदा चित्तस्य काप्यावश्यकता न वर्तते । चित्तं निष्प्रयोजनं भवति । अयमेव चित्तवृत्तिनिरोधो योगः ।

योगस्याष्टाङ्गानि—यम-नियमासन-प्राणायाम - प्रत्याहार-धारणा- ध्यान - समाधयः सन्ति । यमेनाहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहाणां सिद्धिर्भवति । नियमस्तु शौच-सन्तोष-तप-स्वाध्यायेश्वरप्रणिधानानि । आसनं तु साधकस्य स्थिरसंस्थितिः । सा सुखप्रदा भवति । श्वासगतिरोधः प्राणायामः । प्राणायामेन धारणाशक्तिरुत्पद्यते । धारणा चित्तस्य स्थिरता भवति । प्रत्याहारेणेन्द्रियाणि विषयेभ्यो विनिवर्तन्ते । तानि तदा चित्तस्वरूपमनुसरन्ति ।

धारणाध्यानसमाधयः संयम एव । धारणया चित्तमेकस्मिन् स्थाने—नाभिचक्रे, हृदयकमले, मूर्ध्नि, नासिकाग्रभागे, सूर्ये, चन्द्रे वा बध्यते । तस्मिन्नेव प्रदेशे चित्तस्य स्थिरीकरणं ध्यानम् । ध्यानस्य सा सर्वोच्चावस्था समाधिर्यस्यां जातायां साधकाय ध्येयं विहाय न किंचिदपि वर्तते । समाधौ यदा चित्तवृत्तिनिरोधो भवति तदा ध्येयेन सह तादात्म्यं जायते । तादात्म्यमेव योगः ।

योगपथस्य बाधा अपि वर्तन्ते, सम्मानः, नारी प्रत्यासक्तिर्वा ।

---

१. कठोपनिषदि ६. ११

२. एतदधिकृत्य काव्यमीमांसायां वर्णितम्—'मनस एकाग्रता समाधिः । समाहितं चित्तमर्थं पश्यति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योगेन स्त्रियः शूद्रो वा परमां गतिं लभन्ते ।[1]

योगस्य प्रतिष्ठा बौद्धजैनसंस्कृत्योरपि वर्तते । गौतमस्याष्टाङ्गिके मार्गे धारणाध्यान-समाधीनामन्तर्भावो दृश्यते । यमनियमादीनां सिद्धिः गौतमस्य दशशिक्षापदेषु चतुर्षु स्मृत्युपस्थानेषु च भवति । समाधयेऽरण्यवृक्षमूलपर्वतगुहाश्मशानवनदेशादयः समीचीना मताः । जैनमते महावीरस्वामिना स्वयमेव चित्तस्य समाधानं समाधिपथेन कृतम् !

यावत्कालं मानवः स्वसुखाय शरीराद् वहिर्वर्त्तमानान् पदार्थानपेक्षते तावदेव स निराशो भविष्यति । शरीरस्याङ्गानि जराजीर्णानि जायन्ते । न तैरपि शाश्वतसुखं लभ्यम् । यथा प्रथमपादे बाह्यवस्तूनि परित्यज्य शरीरमेवानन्दसाधनं कर्तव्यं तथैवोत्तरकाले शरीरमपि संन्यस्यात्मैवानन्दसाधनत्वेन ग्रहणीयः । शरीरमेवानन्दसाधनं कुर्वाणः मरणोत्तरकाले शरीरवान् भवति । योगेन यदात्मैवानन्दसाधनं क्रियते तदा मरणोत्तरकाले मुक्तिर्लभ्यते, शरीरं न प्राप्यते । आत्मन आत्मन्येवानन्दग्रहणं सर्वोच्चानुभूतिः । एवं कुर्वाणः पुरुषो ब्रह्मसंस्थः कथ्यते । स तु आत्मक्रीडः, आत्मरतिर्वा भवति । यथा लोकपरेभ्यः शरीरं संसारश्चानन्दनिष्यन्दस्तथैव योगिभ्य आत्मा ब्रह्म चानन्दनिष्यन्दः । इन्द्रियाणां चरणं हि व्याकुलताकारणम् ।

यदा कश्चित् पुरुषः शेते, स इन्द्रियाणामकरणात् सकलपरिग्रहभारेभ्यो मुक्त एव सानन्दो भवति । तथैव समाधौ पुरुषोऽधिकतरमानन्दं लभते तत्रेन्द्रियाणां परमार्थतो विषयेभ्यो विरमणादिति मे मतिः । समाधिस्थस्तु परिग्रहेभ्यः सम्यक् मुक्त एवात्मसुखं लभते ।

कर्मयोगः

संन्यासिनस्तु कर्माणि परित्यज्य योगेनाध्यात्मिकमानन्दं प्राप्तुं प्रयतेरन् । इयमेव संन्यासस्य सर्वोच्चप्रगतिः । अस्यां स्थितौ संन्यासिनां सामाजिकजीवनस्य कर्मक्षेत्रे न भवेत् कोऽपि सम्बन्धः । कर्म कस्मात् कारणात् त्याज्यम् ? कर्मणः फलानि भोक्तुं संसारे जन्मग्रहणमवश्यम्भावीति कर्मणो बन्धनस्वभवो विज्ञातः, अतएव कर्माणि परिहर्तव्यानि । कर्मणोऽकरणे मुक्तिर्भवति सुनिश्चितम् । कर्मणः परित्यागेन मुक्तिलाभस्य योजना जैनबौद्धैरपि स्वीकृता ।

उपर्युक्तकर्मसंन्यासस्यायोजनेन सह कर्मयोगस्य सिद्धान्तोऽपि पुरातन एव । कर्मफलाशां परित्यज्य यत् कर्म क्रियते न तद् बन्धनं भवति, मोक्षस्य साधनमेव तद् भवति । जनककृष्णवसिष्ठव्यासादयः कर्मयोगिनः सन्ति । स्वयं संन्यासी भूत्वाऽपि शङ्करो यावज्जीवनमनवरतश्रमेण भारतस्याभ्युदयाय यतते स्म ।

---

१. महाभारते शान्तिपर्वणि २४०. ३४ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्मयोगस्य सिद्धान्तः प्रथममेव गीतायां सुविविक्तं वर्तते । गीतानुसार तु—

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ।। ५.२

यथा संन्यासिने जीवनपर्यन्तं कर्मव्यापारस्यावश्यकता न वर्तते, तथैव कर्मयोगिनेऽपि जीवनपर्यन्तं कर्मणो विरमणं नापेक्षितम् ।

कर्मयोगाधिकारिणः

साधारणपुरुषाः कर्मयोगाधिकारिणो न सन्ति । ते एव कर्मयोगिनो भवितुं समर्था ये योगयुक्ता विशुद्धातमानो विजितातमानो जितेन्द्रियाः सर्वभूतातमभूतातमानश्च सन्ति । ईदृशानां पुरुषाणां कर्मकरणमपि नैष्कर्म्यमेव । न ते किंचिदपि कुर्वन्ति । यथा गीतायां प्रतिपादितम्—

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित् करोति सः ।। ४.२०
नैव किंचित् करोमीति युक्तो मन्येत तत्त्ववित् ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ।। ५.९
असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः ।
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ।। १८.४९

कर्मयोगिनो बुद्धिर्गीतायां विविक्ता—

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मानमकर्तारं स पश्यति ।। १३.२९
मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते ।। १८.२६

भगवद्भक्तोऽपि भवति कर्मयोगी । तद्यथा—

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ।। १८.५६

कर्मयोगिनः कर्तव्यानि

कर्मयोगी तानि सर्वाणि कर्माणि न करोति यानि कश्चित् साधारणपुरुषोऽपि करोति । निस्सन्देहं तस्य शाश्वतकर्माणि—यज्ञदानतपांसि भवन्ति । एभिस्तस्य चित्तशुद्धिर्भवति । वर्णधर्मानुरूपं तस्य कार्याणि भवन्ति । कर्मयोगिने कर्म भगवदर्चनस्य सामग्री भवति । स एव महादेवोऽर्चनीयो यस्मात् सर्वेषां प्राणिनां प्रवृत्तिर्जायते, येन सर्वमिदं ततम् । इदमेव कर्मणो याज्ञिकस्वरूपम् । इदमेव मानवस्य सफलताया वास्तविकं रहस्यम् ।

गीतानुसारं मानवलोकोऽयं कर्मभूमिः । नात्र कर्मणः पूर्णरूपेण त्यागः सम्भाव्यः । कर्मसंन्यासिनोऽपि कर्मणः सर्वथा न मुक्ताः । कर्मसंन्यासिकर्मयोगिनोरन्तरमियन्मात्रमेव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भवति यत् संन्यासी स्वल्पतमं कर्म करोति; कर्मयोगी चाधिकाधिकं कर्म कुर्वन् लोककल्याणं विदधाति । कृष्णस्तु स्वकीयां कर्मयोगप्रवृत्तिं निदर्शयन्नाह—

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।। ३.२४

लोकसंग्रहणाय कर्मप्रवृत्तिरतिशयमपेक्षिता । लोकस्य रक्षणाय कर्मयोगी तादृशमेव प्रवर्तते यथेश्वरो लोकरक्षणाय कार्यपरः । ईश्वरादर्शानुरूपं हि समाजे सुव्यवस्थास्थापनं शान्तिविधानं चरित्रनिर्माणं च कर्मयोगिनां कर्तव्यानि । कर्मयोगी समाजस्यादर्शनेता भवति । आत्मज्ञानेन यो जीवनपथः कर्मयोगिना प्रकाश्यते तस्यानुसरणं समाजः करोति ।

गीतायां कर्मयोगः संन्यासयोगो भक्तियोगश्च प्रतिष्ठिताः । एषु कर्मयोगः श्रेष्ठः । भक्तियोगेन संन्यासयोगेन च व्यक्तित्वस्य विकासं कृत्वापि निष्कामभावेन कर्मकरणमेवादर्शपथः । भारतीयसंस्कृतौ पदे पदे देवानां चरितमादर्शरूपेण प्रतिष्ठितम् । देवानामादर्शानुकूलो वर्तते कर्मयोगः । देवाः सदैव कर्माभिरताः स्वकीयं मानवीयं च कल्याणं कृतवन्तः ।

कृष्णेन कर्मयोगस्य वैशिष्ट्यं परिलक्ष्य गीतायां प्रतिपादितम्—

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ।। ६.४६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सामाजिकसंस्थानम्

भारते पुरा आर्या आर्येतराश्चासन् । आर्या एव ब्रह्माणः । तेषां प्राथमिकी संस्कृतिर्ब्राह्मी आसीत् । तेषामावासभूमिरार्यावर्तो ब्रह्मावर्तो वासीत् ।[1] कालान्तरे ब्रह्मणां समाजो यथाकर्म यथारुचि या त्रिधा विभक्तः । तद्यथा ब्रह्माणः, देवा मानवाश्च । एतेषां सांस्कृतिकं वैशिष्टचं सुस्पष्टं बभूव । ब्रह्माणस्तु देवानां मानवानां चादर्शभूताः ।

आर्याणामादिमं संघटनम्

ब्रह्माणः

ब्रह्माणस्तु मूलब्रह्मसंस्कृतेरनुयायिनो बभूवुः । केवलं विद्यया तपसा च तेषामुत्कर्षः समजायत । लोकपराङ्मुखाः श्रेयस्कामाश्च ते ब्रह्माणो यावज्जीवमविवाहिता एव तपोमयजीवनं प्रायशो भिक्षावृत्त्या यापयन्ति स्म ब्रह्मविद्याया अध्ययनाध्यापनं च कुर्वन्ति स्म । परवर्तियुगेऽपि तेषां समकक्षा नैष्ठिकब्रह्मचारिणो बभूवुः । ज्ञानोपासकास्ते गार्हस्थ्यधर्ममुपेक्षन्ते स्म । तेभ्यो ब्रह्मभ्योऽद्यावधि ब्रह्मचर्यसंस्था प्रतनुते । ईदृशां गार्हस्थ्योपेक्षकाणां ब्रह्मणां वांशिकपरम्परा तु दुष्क्रमा बभूव । अतएव देवासुरमानवेषु ये केचित् ब्रह्मचर्यमाजीवनं धारयन्ति स्म ते ब्रह्माणो बभूवुः । एतेषां ब्रह्मणां नेता ब्रह्मासीत् ।[2] तस्य प्रजा तु ब्रह्माण : (परवर्तियुगस्य ब्राह्मणाः) बभूवुः ।

देवाः

प्रायशो देवाः (न सर्वे) ब्रह्मवंशीया आसन्, किन्तु ते प्रधानतः प्रेयस्कामा बभूवुः । तेषां तपो वा ब्रह्मचर्यं वा नैमित्तिकमभवत् । ते प्रायो रणविद्या-विशारदा लोकैश्वर्य-समलङ्कृता नीतिविदश्चासन् । अपरा विद्यैव तेषामभीष्टसाधिका बभूव । एक एवाभावो देवानामपि बभूव । तेषां गार्हस्थ्यधर्मो व्यवस्थितो नासीत् । फलतस्तेषां दाम्पत्यजीवनं कौटुम्बिक-व्यवस्था वा दृढा नासीत् । आवश्यकतानुसारमप्सरस इति ख्याताभी रमणीभिर्देवानां साहचर्यमभवत् प्रायशो भोगकामाय न तु सन्तानाय । अस्यां स्थितौ तस्यां

---

१. ब्रह्मणामादिपुरुषो ब्रह्मा एव वर्तते । स एव ब्रह्मसंस्कृतेः प्रवर्तकः । शतपथ० ११-१-६ तैत्तिरीयब्राह्मणे ८. १.३ एतदेव समर्थितमृग्वेदे—ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् ९. ९६.६ ।

२. सुत्तनिपाते ब्राह्मणानां परमपुरुषो ब्रह्मा वर्णितः । तद्यथा

यो नेसं परमो आसि ब्रह्मा दढपरक्कमो ।
स वापि मेथुनं धम्मं सुपिनन्तेन नागमा ॥ ब्राह्मण—धम्मिकसुत्ते १० ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संख्या नाधिकं वर्धते स्म। देवानां यथाकर्म वर्णविभाजनमभवत्—क्षत्राणि, वैश्याः, शूद्रा इति। एतेषां राजा इन्द्रो बभूव। तस्य प्रथमं युद्धं स्वकीयैर्दायादैरसुरैः सह बभूव। असुरा अपि मूलतो देववंशीया आसन्। देवास्तु मानवानामृषीणां च सहाया आसन्। इन्द्रो युद्धे भरतानां सहायतामकरोत्। अश्विनौ वन्दन-ऋज्राश्व-गौतम-च्यवनादीनामृषीणां भुज्यु-त्रिमदादिमानवानां च सहायतां चक्रतुः।

कतिपयदेवा ऋषयो बभूवुः, ऋषयो मानवा वा देवा बभूवुरिति वैदिकोल्लेखेषु सन्दृब्धम्। देवानां प्रजा तु दैवी विश इति संज्ञिता।

मानवाः

मानवानां संस्कृतिर्ब्रह्मवंशोद्भवेन मनुना प्रवर्तिता। मनुस्तु मानवानां राजा बभूव। मनोः प्रजासु ऋषयः प्रामुख्यं भजन्ते।[1] मानव-संस्कृतौ गार्हस्थ्य-धर्मस्य महामहिमा वर्तते। गृहमेधिन एव भवन्ति मानवाः। गार्हस्थ्य-विधानात् मानवानां कौटुम्बिकं सामाजिकं च जीवनं सुव्यवहितमासीत्। अस्मात् कारणात् मानवानां संख्या क्षिप्रतरं ववृधे। अपरं च जीवनविन्यासे सौख्यविधानेन तेषां सौष्ठवं स्पृहणीयमासीत्। शनैः शनैर्ब्रह्माणो देवाश्चापि गार्हस्थ्यपरायणीं मानवीयसंस्कृतिं स्वीकृतवन्तः। मानवेषु सन्निविष्टाः सन्तो ब्रह्माणस्तु ऋषिभिः सह ब्राह्मणा बभूवुः। देवाः पुनः यथाकर्म राजन्या वैश्याः शूद्राश्च संजाताः। मानवसंस्कृतेरियं समन्वयात्मिका वृत्तिर्भारतस्यैकीकरणाय सातिशयं महत्त्वं भजते।

न केवलमार्या अपितु बहव आर्येतरा अपि मानवीं संस्कृतिं स्वीकृत्य यथाकर्म यथारुचि वा ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च बभूवः।[2] परवर्तियुगे विदेशेभ्यः समागता जनसमुदाया नाचिरं मनोर्योजनानुसारं चातुर्वर्ण्यव्यवस्थया सुनिबद्धा बभूवुः। भारते देशे पुरा ये केचित् दासा गन्धर्वा राक्षसा यक्षाः किन्नराः पिशाचा वा आसन्, सर्वे ते कालान्तरेण चातुर्वर्ण्ये स्थापिताः सन्तो मानवा बभूवुः। विविधसांस्कृतिकवर्गाणां संघर्षस्योन्मूलनं मनोर्वर्णव्यवस्थया समन्वयविधिना चाभूत्।

मनुस्तु ब्रह्मवंशीय आसीत्। स यज्ञविद्यायाः परमाचार्यो बभूव। सर्वप्रथमं स यज्ञविद्यां देवान् शिक्षयामास। मनोः पुत्रा ऋषयो यज्ञविद्यायां निष्णाताः सन्तः देवानामसुराणां मानवानां च पुरोहिता गुरवश्च बभूवुः।

मानवसमाजे प्रायः सामञ्जस्यगतिका असंख्यजना वसन्ति। बृहत्तमसमाजस्य कल्पना भारतीयैः ऋषिभिरुदारभावेन कृता। सा 'वसुधैव कुटुम्बकम्' इति वाक्येन प्रसिद्धा। 'सर्वेषां जनानां कल्याणं विधातुमेवास्माकं प्रवृत्तयो भवन्तु' इति भारतीयमनीषिणां

---

१. मनुस्तु ऋषीणां पिता एव। तद्यथा ऋग्वेदे—यानि मनुरवृणीता पिता नः। २.३३.१३
अन्यत्र ऋग्वेदे १.८०.१६; १.११४.२; ८.६३.१ अथर्ववेदे च १४.२.४१ तै० सं० २.१.५.६।

२. बृहदारण्यकोपनिषदि १.४.१२-१३।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचारणा अनेन वाक्येन विस्पष्टा भवति । अस्या विचारणाया व्यावहारिकस्वरूपं वैदेशिकानां भारतीयसमाजे प्रशान्तविधिना संस्थापनं निदर्शयति । व्यावहारिकदृष्ट्या साधारणजनानां प्रवृत्तयः सीमितक्षेत्रे एव प्रभावपरा दृश्यन्ते । तेन क्षेत्रेण तेषां सीमितसमाजस्योपकल्पनं भवति । तथा हि—जनाः प्रथमं स्वकीयस्य वर्णस्य जातेर्वा परिधौ परस्परकल्याणं विहितवन्तः । बहूनां जातीनां वर्णानां वा पारस्परिकव्यवहारः सम्बन्धो वा समाजस्य सर्वजनीनाभ्युदयाय भवेदिति सर्वेषां समीहा । ततः परं कौटुम्बिकसदस्यानां पारस्परिकसम्बन्धो महत्त्वपूर्णो वर्तते । ग्रामेषु नगरेषु च प्रतिवेशिनां परस्परं सौहार्दसम्बन्धः तत्र सर्वेषां शान्तये समृद्धये च भवतीति सुविदितमेव ।

पुरा भारतीयसमाजे समष्टिरूपेण वा जनाः पारस्परिकाभ्युदयाय कियन्मात्रमुदाराः सहानुभूतिपरा वा बभूवुरित्यस्मिन् प्रकरणे प्ररोचनीयम् ।

वर्णव्यवस्था

वर्णव्यवस्था विविधरूपा सती प्रायशः सर्वेषु देशेषु कालेषु च प्रचरन्तीव प्रतिभाति । प्रथमं तावत् नृतत्त्वविज्ञानानुसारं पुरा विश्वस्य विविधभागेषु विविधवर्गीया मानवा बभूवुः, येषां पारस्परिकमन्तरं नेत्रगोचरमेवासीत् । यथाधुनापि 'अफ्रीकावासी' कृष्णः नीग्रो आङ्गलदेशवासिश्वेतपुरुषाद्भिन्न एव दृश्यते । अपरं च गुणयोग्यताविभागानुसारमन्तरं स्पष्टम् । तदधुनाऽपि 'आचार्योपाधिधारी' शास्त्रिणः सविशेषो मन्यते। व्यवसायानुरूपं वैभिन्न्यं संस्कृतौ ईषद्विकसितायां प्रारभ्यते वर्धते च संस्कृतेः प्रगतिमनुसृत्य नित्यमेव ।

वर्णव्यवस्था खलु मानवानां विविधवर्गेषूपयुक्तलक्षणानुसारं विभाजनमेव । अस्मिन् प्रकरणे वर्णशब्दस्यार्थः कालान्तरे मूलार्थाद्भिन्नः संजातः । मूलतो वर्णस्यार्थो रङ्ग एव । विभाजनस्येयं प्रक्रिया वर्णव्यवस्थेति प्रथितम् । कालान्तरे व्यवसायानुरूपं गुणयोग्यतानुरूपं च यद्विभाजनमक्रियत तदपि वर्णव्यवस्थेति व्यक्तम् ।[1]

वर्णारम्भः

कस्मिंश्चिद्देशे प्रारम्भिकयुगे सर्वेऽपि मानवा एकवर्णा (रंगाः) भवन्तीति निःसन्दिग्धमेव । आदियुगे सर्वेषां जनानां रूपाकारयोग्यतादयश्च प्रायशः समाना दृश्यन्ते । कालान्तरे यदि जनसमूहः कश्चिदन्यवर्ण-(रंग) विशिष्टस्तस्मिन्देशे आगच्छति तर्हि वर्णं (रङ्गं) परिलक्ष्य तयोर्द्वयोः प्राचीननवीनयोरन्तरं निर्धारितं भवति । अपरं च यदि कस्मिंश्चिद्देशे एकवर्णा जनाः सन्ति तर्हि तत्रापि कालान्तरे विविधा वर्णाः 'कर्मक्रियाविशेषेण' संजायन्ते । तद्यथा महाभारते निगदितम्—

---

१. भाषाविज्ञाने शब्दानामर्थविकासस्येयं सुविदितैव प्रक्रिया ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकवर्णमिदं पूर्वं विश्वमासीद्युधिष्ठिर।
कर्मक्रियाविशेषेण चतुर्वर्णं प्रतिष्ठितम् ।।

गौरवर्णानामार्याणां बहुवर्गेषु विभाजनं प्राचीनकालतोऽभवत्। तेषां विभाजनं कर्मक्रियाविशेषेण व्यवसायविशेषेणासीत्। ब्रह्माणो देवा ऋषयो मानवाश्च सर्वे आर्या बभूवुः। भारतवर्षे गौरवर्णानामार्याणां कृष्णवर्णानामार्येतराणां च परस्परं सम्मेलनमभवत्। तस्मात् कालादारभ्य वर्णस्य (रङ्गस्य) अनुसारं वर्णव्यवस्था समारम्यत। आर्य आर्येतरश्च द्वौ वर्णौ गौरकृष्णौ बभूवतुः।

परवर्तियुगे द्वयोर्वर्णयोः—आर्यानार्ययोः परस्परं सम्मिश्रणमभवत्। तस्यां दशायां तयोः पारस्परिककर्मक्रियावैशिष्ट्यं वर्ण (रङ्ग)-वैशिष्ट्यं च विलुप्तमेव। आर्येतराः कतिपयजनवर्गा अनार्याणां संस्कृतिं यथारुचि स्वीकृतवन्तः। आर्याणामार्येतराणां च परस्परं वैवाहिकसम्बन्धा अपि बभूवुः। अनेन प्रकारेण रंगानुसारिणी वर्णव्यवस्थोन्मूलिताभवत्। इत्थमार्यवर्गस्य विविधसंस्कृतिसमूहानां—देवर्षिमानवादीनाम्, आर्येतरवर्गस्य च—राक्षसगन्धर्वपिशाचयक्षादीनां—संस्कृतिसमूहानां पारस्परिकवैभिन्न्यं विलुप्तम्। ते सर्वे मानवा बभूवुः। अतः परं वर्णशब्दो रङ्गद्योतको नाभवत्।

सम्मिलितेषु सम्मिश्रितेषु च सर्वेषु गुणकर्मविभागशः पुनरपि वर्णव्यवस्था दृढीभूता[१]। स्वाभाविकः शाश्वतिकश्चायं विभागविधिः।

आर्यवर्गो महासागरवद् बभूव। आर्येतरा नदरूपा नामरूपे विहाय तस्मिन्निमग्ना बभूवुः। कतिपयार्येतरवर्गा आर्यवर्गेरसंस्पृष्टा एव दासा म्लेच्छा निषादा वा बभूवुः। आर्याणामार्येतरेभ्यो दानग्रहणं वैदिककालेऽपि बभूव।[२] दानग्रहणसम्बन्धेन पारस्परिकसहयोगो लक्ष्यते। बहव आर्येतरा ऋषयो भूत्वा वेदसूक्तानि रचितवन्तः। नागवर्गीयोऽर्बुद आर्येतरोऽपि सन् मन्त्ररचयिता बभूव।[३] शतपथब्राह्मणानुसारं गंधर्वा वेदपाठमकुर्वन।[४]

अर्बुदस्तु यज्ञविधानस्य पण्डितप्रकाण्डमभवत्। स देवेभ्यो यज्ञसम्पादनविधिमशिक्षयत्।[५] एभिरुदाहरणैः स्पष्टं प्रतिभाति यत् कतिपयानार्या वैदिकयुगेऽप्यार्यभाषायां धार्मिकविधिषु च परं प्रावीण्यमवापुः। धार्मिकक्षेत्रे आर्याणामार्यैतराणां च सहयोगः समारम्यत। देवर्षय आर्येतराणामार्यीकरणाय समुत्सुका बभूवुः।[६]

आर्येतराः कन्या आर्यगृहेषु गृहीतास्तत्रार्येतरसंस्कृतिबीजं वपन्ति स्म। ईदृशीषु स्त्रीषु जाता बालका आर्या बभूवुः। त्वष्टासुरकुलोद्भवां रचनां परिणीतवान्। तस्याः

१. चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
२, विप्रऋषिर्वल्बूथतरक्षुदासयोर्दानं गृहीतवान् ऋग्वेदे ८.४६.३२।
महाभारतानुसारमगस्त्य इल्वलादैत्यराजाद् दानमगृह्णात्। वन० ९९ अध्यायतः।
३. ऋग्वेदे १०.९४ सूक्तस्य। नागो जरत्कर्णं ऋग्वेदस्य १०.७६ सूक्तस्य ऋषिः।
४. शतपथब्राह्मणे ३.२.४.६
५. ऐतरेयब्राह्मणे ६.१.१
६. ऋग्वेदे १०.३५.११

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुत्रो विश्वरूपो देवपुरोहितो बभूव।[1] महिदास ऐतरेयब्राह्मणस्य रचयिता दासीपुत्र आसीत्।

रामायणमहाभारतयोरार्याणामार्येतराणां च वैवाहिकसम्बन्धा वर्णिताः सन्ति। तेषु जरत्कारोर्नागकन्यया सह, भीमस्य राक्षसकन्यया सह, रावणपितुर्विश्रवसो राक्षसकन्यया सह विवाहाः प्रसिद्धाः।

आर्या आर्येतराणां मध्ये सन्निविष्टाः सन्तः तेषामार्यीकरणं सम्पादितवन्तः। शुक्राचार्यस्तु सुप्रसिद्ध एवासुराचार्यः। आचार्या अगस्त्यादयो विन्ध्यस्य पारं गत्वा दक्षिणभारतीयानामार्यीकरणं सम्पादितवन्तः।

महाभारतानुसारं यवनकिरातगान्धारचीनशबरबर्बरशकतुषारकङ्कपह्लवान्ध्रमद्रकपौण्ड्रपुलिन्दरमठकाम्बोजादय आर्येतरा आसन्। तेषामार्यीकरणाय राजधर्मो निर्धारितः—

मातापित्रोर्हि शुश्रूषा कर्तव्या सर्वदस्युभिः।
आचार्यगुरुशुश्रूषा तथैवाश्रमवासिनाम्॥
वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते।
पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च॥
दानानि च यथाकालं द्विजेभ्यो विसृजेत्सदा॥
अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनम्।
भरणं पुत्रदाराणां शौचमद्रोह एव च॥
दक्षिणा सर्वयज्ञानां दातव्या भूतिमिच्छता।
पाकयज्ञा महार्हाश्च दातव्या सर्वदस्युभिः॥

उपर्युक्तार्यीकरणस्य परिणामस्तत्रोल्लिखितः—

दृश्यन्ते मानुषे लोके सर्ववर्णेषु दस्यवः।
लिङ्गान्तरे वर्त्तमाना आश्रमेषु चतुर्ष्वपि॥

आर्याणां धार्मिककार्येष्वनार्या अपि समाहूताः। रामस्य राज्याभिषेकावसरे न केवलमार्या अपि तु म्लेच्छा अपि निमन्त्रिता बभूवुः।[3] विश्वजिद्यज्ञे यजमानस्यास्थायिरूपेण निषादगृहे प्रवासो निर्धारितः।[4]

बह्व आर्येतरा आर्याणां सहाया भूत्वाऽयुध्यन्त। वानरादीनां सहायतया रामो विजयं लब्धवान्। देवगन्धर्वयक्षादयः सम्मिलिता एव गरुडेन सहायुध्यन्त।[5] समुद्रमन्थनपराक्रमे देवासुरनागादीनां साहचर्यं विदितचरम्। अस्मिन् साहचर्यस्य स्थितौ क्वचित् नागप्रमुखः शेषः तपः कुर्वन् दृश्यते। प्रह्लादः पित्रा निषिद्धोऽपि विष्णुभक्तो भवति।[6] पौराणिकसाहित्ये इयं साहचर्यगाथा प्रायशो वर्णिता।

१. तैत्तिरीयसंहितायाम् २.५.१.१
२. महाभारते शान्तिपर्वणि ३५ अध्यायतः।
३. रामायणेऽयोध्याकाण्डे ३.२५
४. कौषीतकिब्राह्मणे २५.१५
५. महाभारते आदिपर्वणि ३३.१६—१९
६. आदिपर्वणि ३६.२.५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आर्यीकरणेन क्वचिद्राक्षसा वेदाध्ययनरतास्तपस्विनो बभूवुः। दानवा अपि ब्रह्मणः प्रसादं प्राप्तुं तपः कुर्वन्ति स्म। तथापि विशाले भारतदेशे अरण्यवासिनो बहव आर्यसंस्कृत्याऽसंस्पृष्टा जनसमूहाः सदैवासन् येऽधुनापि प्रायः पूर्ववत् जीवनयापनं कुर्वन्ति। त एव सम्भवतो यक्षपिशाचादीनां वंशोद्भवाः सन्ति।

न केवलं भारतीया आर्येतरा, अपितु वैदेशिका अपि भारत आगता आर्यसंस्कृतौ दीक्षिता बभूवुः। अधुनापि ग्रीकराजदूतस्य हेलिओदोरमहाभागस्य विदिशासमीपं गरुडस्तम्भस्तस्योत्कीर्णलेखश्च विद्येते। तस्य राजदूतस्योपाधिना भागवतपदेन स्पष्टं भवति यत् वैष्णवसम्प्रदायस्य द्वारं विदेशिजनेभ्योऽप्यनावृतमासीत्। परवर्तियुगे ये केचित् मगशकाभीरकुशनहूणादयो जना विदेशतो भारतमागत्य निवसन्ति स्म ते सर्वेऽपि शनैः शनैरार्यसंस्कृतौ दीक्षिता आसन्।

खीष्टस्य पश्चाच्चतुर्थशतके बहवो वैदेशिकजातयः—गूर्जर-चाहमानमैत्रकादय आगताः। ताः सर्वाः शनैः शनैः भारतीयार्यसमाजे समीकृताः।

वर्णपरिवर्तनम्

सिद्धान्तपक्षः

भारतीयसमाजो वैदिकयुगे चातुर्वर्ण्यव्यवस्थाभिः संघटितः। सा व्यवस्था गुणकर्मविभागश आसीत्। कस्यचिदपि पुरुषस्य जातिः तस्य गुणकर्मणोर्विपरिवर्तनेन तस्मिन्युगे परिवर्तते स्म। तद्यथा यजुर्वेदे—

किं ब्राह्मणस्य पितरं किमु पृच्छसि मातरम्।
श्रुतं चेदस्मिन् वेद्यं स पिता स पितामहः॥ कृष्णयजुर्वेद का० सं० ३०.१

तस्मिन्युगे सुरा यद्यसुरभाषायाः प्रयोगं कुर्वन्ति स्म तर्हि ते असुरा बभूवुः।[१] यजमानस्तु निःसन्देहं ब्राह्मण एवाभवत्।[२] अश्वमेधविद्यामजानन्तो ब्राह्मणकुलोत्पन्ना अपि ब्राह्मणत्वाच्च्याविताः।[३] छान्दोग्योपनिषदि मरणान्तरे जातिपरिवर्तनस्य सिद्धान्तः प्रतिपादितः—तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा। अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा।[४]

---

१. वायुपुराणे ७०.५३-५५; मत्स्यपुराणे १२९.७-११

२. Any Aryan could become a priest—Radhakrishnan : Indian Philosophy, Vol. I, p. 133
शतपथानुसारं जनको ब्राह्मणोऽभवत् ११.६.२.१०

३. शतपथे ३.२.१.२४

४. शतपथे ३.४.१.३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूत्रयुगे संस्कारविहीना जनाः पतितसावित्रीका व्रात्या वा कथिताः । ते बहिष्कृता बभूवुः । उपनयनादिसंस्कारा यज्ञसम्पादनं वा तेषां न विहितम् ।[१] आपस्तम्बानुसारं 'धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ । अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवृत्तौ ।' राजा पतितसावित्रीकं ब्राह्मणं शूद्रकर्मणि नियोजयेदिति बौधायनः ।[२]

महाभारतयुगादारभ्य प्रायो वृत्याचारानुसारं वर्णपरिवर्तनं सम्प्रकल्पितम् ।[३] तद्यथा—

न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत् ।
ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम् ।। शान्तिपर्वणि १८१.१०
सर्वभक्षरतिर्नित्यं सर्वकर्मकरोऽशुचिः ।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः ॥
शूद्रे चैतद् भवेल्लक्ष्यं द्विजे तच्च न विद्यते ।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ।। शान्ति० १८२.८
सर्वोऽयं ब्राह्मणो लोके वृत्तेन तु विधीयते ।
वृत्ते स्थितस्तु शूद्रोऽपि ब्राह्मणत्वं नियच्छति ।। अनु० १४३.५१

उपर्युक्तसिद्धान्तं प्रतिपादयता महाभारते निर्दिष्टम्—शोभनाचारेण शूद्रो ब्राह्मणो भवति ।[४] हीनजातावुत्पन्नः शूद्र आगमसम्पन्नो भूत्वा संस्कृतो द्विजो भवति ।[५] नीचवृत्त्या ब्राह्मणोऽपि पूर्णरूपेण शूद्रो भवति ।[६] 'जात्या ब्राह्मणादिवर्णा न भवन्ति । केवलं गुणचरित्राचारेण ब्राह्मणत्वसिद्धिर्भवति' ।[७] महाभारतानुसारं शूद्रा अपि ब्राह्मणत्वं प्राप्तुं शक्नुवन्ति । तद्यथा—

शूद्रयोनौ हि जातस्य सद्गुणानुपतिष्ठतः ।
वैश्यत्वं लभते ब्रह्मन् क्षत्रियत्वं तथैव च ।।
आर्जवे वर्तमानस्य ब्राह्मण्यमभिजायते ।। वन० २०६.१०

---

१. शतपथे ३.४.२.१७
२. छान्दोग्ये ५.१०.७
३. आश्वलायनगृह्यसूत्रे १.१९.५–७
४. बौधायनधर्मसूत्रे २.४.२०; १.५.९५ ।
५. महाभारतानुसारं जन्मना जातिर्बभूव । तद्यथा—
दुर्वेदा वा सुवेदा वा प्राकृताः संस्कृतास्तथा ।
ब्राह्मणा नावमन्तव्या भस्मच्छन्ना इवाग्नयः ।। वनपर्वणि २००.८८ ।
६. अनुशासनपर्वणि १४४. २६
७. अनु० १४४. ४६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्यां दशायां कस्यचित्पुरुषस्य स्वजीवनकाले हि वारं वारं जातिपरिवर्तनं सम्भवति स्म । तथाहि

तत्र वै ब्राह्मणो भूत्वा ततो भवति क्षत्रियः ।
वैश्यः शूद्रश्च वाहीकस्ततो भवति नापितः ॥
नापितश्च ततो भूत्वा पुनर्भवति ब्राह्मणः ।
द्विजो भूत्वा च तत्रैव पुनर्दासोऽभिजायते ॥

कर्णपर्वणि ४५. ६-७

बहवः स्मृतिकारा जातिपरिवर्तनं शक्यं मन्यन्ते । तद्यथा

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥
तपोबीजप्रभावैस्तु ते गच्छन्ति युगे युगे ।
उत्कर्षं चापकर्षं च मनुष्येष्विह जन्मतः ॥
शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥

मनुस्मृतौ २. १६८; १०.४२-४२

ब्राह्मणाः कर्मानुसारं दशकोटिकाः—देवमुनिद्विजराजवैश्यशूद्रनिषादपशुम्लेच्छचाण्डाला भवन्ति इतिमतमत्रिमुनेः ।[1] पराशरोऽपि तदेव समर्थयति—

अग्निकार्यात्परिभ्रष्टाः सन्ध्योपासनवर्जिताः ।
वेदं चैवानधीयानाः सर्वे ते वृषलाः स्मृताः ॥ ११. २९

पौराणिकयुगेऽपि वर्णपरिवर्तनमासीदेव । भागवतानुसारं—

यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यंजकम् ।
यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत् ॥ ७. ११. ३५

ब्राह्मणत्वस्य कर्मणा सिद्धिः कठिनासीत् । बहवो ब्राह्मणा जातीयकर्मणो विमुखाः सन्तः क्षत्रिया वैश्या वा बभूवुः । ब्राह्मणस्य जीवनविन्यासः सुखकरो नासीत् । केचिदेव क्षत्रिया वैश्या वा ब्रह्मणा भवितुमैच्छन् । प्राचीनयुगे निःसन्दिग्धमेव वैश्यानां शिल्पकारिणां शूद्राणां चाधिभौतिकप्रतिष्ठा ब्राह्मणेभ्य उच्चतरासीत् । अस्यां स्थितौ उच्चवर्णान्निम्नवर्णत्वप्राप्तिः सामान्यप्रवृत्तिरासीत् । बहवस्तत्रासन् जातिब्राह्मणा अपि येषां विषये पतञ्जलिना प्रोक्तम्—

तपः श्रुतं च योनिश्चैतद् ब्राह्मणकारकम् ।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः ॥[2]

---

१. अनु० १४४. ४७

२. शान्तिपर्वणि १८९–१८९ अध्याये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यवहारपक्षः

वैदिकयुगे सर्वेषामार्येतराणां वात्मनो व्यवसायवरणस्य स्वातन्त्र्यमासीत् । व्यवसायमात्रेण केवलं कस्यापि पुरुषस्योच्चत्वं हीनत्वं वा न प्रमाणितम् ।[१] एकस्मिन्नेव कुटुम्बे बहुविधव्यवसायेषु लग्ना जना निवसन्ति स्म । नवव्यवसायं प्रति तस्यकालस्य प्रवृत्तिरनेन श्लोकेन परिचीयते—

कुविन्मा गोपां करसे जनस्य कुविद्राजानं मघवनृजीषन् ।
कुविन्मा ऋषिं पपिवांसं सुतस्य कुविन्मे वस्वो अमृतस्य शिक्षाः ।।

ऋग्वेद ३. ४५. ५

जनकस्य ब्राह्मणत्वप्राप्तिः प्रागेव निर्दिष्टा । स याज्ञवल्क्यमशिक्षयत् । ततः परं ब्राह्मणोऽभवत् ।[२] महाराजस्य शन्तनोर्भ्राता देवापिरासीत् । तस्य पौरोहित्ये राजा यज्ञमकारयत् ।[३]

महाभारतानुसारं न केवलं विश्वामित्रो ब्राह्मणोऽभवत्, अपितु तस्य वंश एव सर्वथा ब्राह्मणः संजातः । तद्यथा—

ततो ब्राह्मणतां यातो विश्वामित्रो महातपाः ।
क्षत्रियः सोऽप्यथ तथा ब्रह्मवंशस्य कारकः ।।
तस्य पुत्रा महात्मानो ब्रह्मवंशविवर्धनाः ।
तपस्विनो ब्रह्मविदो गोत्रकर्तार एव च ।।

अनु० पर्वणि ४. ४८—४९

मनुनहुषादीनां राजर्षीणां वंशजेषु बहवो ब्राह्मणा बभूवुः ।[४] तद्यथा—

ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः ।
ततोऽभवन्महाराज ब्रह्म क्षत्रेण संगतम् ।। आदिपर्वणि ७५. १४

इन्द्रः स्वयमेव ब्राह्मणस्य कश्यपस्य पुत्र आसीत् । स स्वकर्मणा क्षत्रियोऽभवत् ।[५] ब्राह्मणानां वचनमात्रेणापि क्षत्रियस्य ब्राह्मणत्वसिद्धिः संजाता । भृगोर्वचनमात्रेण राजा

१. अत्रिस्मृतौ ३७२-३८७
२. अष्टाध्यायीं २. २. ६ अधिकृत्य ।
३. The priestly class was not necessarily superior to the warrior or the trading class—Radhakrishnan: Indian Philosoply, Vol.I, p. 133
४. शतपथब्राह्मणे ११. ६. २. १० ।
५. ऋग्वेदे १०. ९८. ५; बृहद्देवतायाम् ७. १५५; निरुक्ते २. १०
६. शल्यपर्वणि ३९. ५०—५९ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वीतहव्यो ब्रह्मर्षितां गतः। तस्य वंशजेषु गृत्समत्सुतेजोवागिन्द्रादयो बहवो ब्रह्मर्षयो बभूवुः।[1]

विष्णुपुराणानुसारमाङ्गिरस-शौनक-काण्वायन-मौद्गल्या इति ब्राह्मणवंशाः क्षत्रियोद्भूताः।[2] पृषध्रो गोवधाच्छूद्रोऽजायत।[3] भागवतानुसारं महाराजस्य ऋषभस्य शतपुत्रेषु ज्येष्ठो भरतो राजा बभूव। अन्येषां एकाशीतिपुत्रा याज्ञिका ब्राह्मणा बभूवुः।[4] गार्ग्यब्राह्मणानामुद्भवः राजवंशाद्भरताद्बभूव।[5]

ऐतिहासिकयुगेऽपि जातिपरिवर्तनस्य कतिपयमहत्त्वपूर्णवृत्तानि सन्ति। तद्यथा कदम्बवंशोद्भवो ब्राह्मणराजो मयूरशर्मा बभूव। तस्य वंशजास्तु वर्माणो बभूवुः। तेनोपाधिना ते क्षत्रियत्वं प्रकटितवन्तः। तस्य वंशस्य राजा काकुत्स्थवर्मा स्वदुहितॄः क्षत्रियेभ्यो दत्तवान्।[6]

जातिपरिवर्तनमधुनाऽपि यत्र तत्र दृश्यत एव। अस्मिन् शतके बहवो वैश्यशूद्रजातयः क्षत्रिया ब्राह्मणा वा बभूवुर्भवन्ति च।

आदर्शपरिपालम्

सर्वे वर्णा यथोचितकर्माचारव्यहारादिपालनेनैव स्वकीयां विशुद्धां स्थितिमक्षुण्णां विधातुं शक्नुवन्ति, नान्यथा। तथाहि यदि कश्चिद् ब्राह्मणो वेदविद्यां नापठत्, स ब्रह्मबन्धुरिति घोषितः। तपःश्रुताभ्यां हीना ब्राह्मणास्तु जातिब्राह्मणा इति पतञ्जलिमतम्। ते शूद्रा एवेति गर्हिताः।[7] एतत् परिलक्ष्य मनुना सन्धारितम्—

सर्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः।
यथा तथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता॥ ४. १७

स्वकर्तव्यपरिपालनं तु अपरेषां वर्णानां कृतेऽपि आवश्यकमासीत्। कर्तव्यच्युतस्तु चाण्डालो भवति अथवा यस्य वर्णस्य कार्यं करोति तस्य वर्णस्य स्वयमेव भवतीति विधानमासीत्।

तथापि ब्रह्मबन्धूनामथवा तथाकथितब्राह्मणानां संख्या समाजे सदा नातिस्वल्पासीत्। तद्यथा कल्हणो निर्दिशति—

---

१. शान्तिपर्वणि २२. ११—इन्द्रो वै ब्राह्मणः पुत्रः क्षत्रियः कर्मणाऽभवत्।
२ अनुशासनपर्वणि ३१. ५४।
३. विष्णुपुराणे ४: १९. १४।
४. विष्णुपुराणे ४. १. १४।
५. भागवते ५. ४. १३।
६. भागवते ९. २१: १९-२०।
७. Epigraphia Indica V page 24

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रायोपवेशकुशलाः शक्तास्त्वन्ते न कुत्रचित् ।
मिथ्यासम्भावनाभूमिर्भूपानां ब्रह्मबन्धवः ॥ राजत० ७.१६.११

कतिपयब्राह्मणा राजनीतिक्षेत्रे निर्घृणकर्मपरायणा अवमाननास्पदं संजाताः ।[१]

वर्णानां पारस्परिकसम्बन्धः

वर्णानां पारस्परिकसौहार्देन समाजस्य सर्वाङ्गीणसमुन्नतिः सम्भवति सर्वत्र शान्तिश्च प्रायशो विराजते । प्राचीनकाले यदि समुन्नतजातीनां चारित्र्यबलेन सर्वत्र प्रतिष्ठासीत्तर्हि वैश्यशूद्राणामाधिभौतिकतसमृद्ध्या समाजे समादरणीयं पदमविद्यत । अस्यां स्थितौ नासीत् कोऽप्यवसरो वर्णानां पारस्परिकस्पर्धाया ईर्ष्याद्वेषयोर्वा ।[२]

प्रथमं तावदनुलोमविवाहरीत्यैव पारस्परिकसम्बन्धो दृढतरो बभूव । इमेऽनुलोमविवाहाः केवलमपवादरूपा एव नासन्; अपितु समृद्धिशालिभिर्महापुरुषैः प्रायशो विविधवर्णोत्पन्नाः कन्यका अनुलोमरीत्या परिगृहीताः । इदं परिलक्ष्य महाभारते स्पष्टमेव निर्दिष्टम्

जातिरत्र महासर्प मनुष्यत्वे महामते ।
संकरात्सर्ववर्णानां दुष्परीक्ष्येति मे मतिः ॥
सर्वे सर्वास्वपत्यानि जनयन्ति सदा नराः ॥ वन १८०-३१-३२

वैदिककालादारभ्य खीष्टस्य पश्चाद् दशशतकपर्यन्तमनुलोमविवाहस्य प्रचलनं प्रर्याप्तमासीत् यद्यपि शास्त्रकारा असवर्णविवाहस्य पूर्णानुमोदनं न कृतवन्तः ।

चतुर्वर्णानां परस्परं साहचर्यं सङ्गतिः समागमश्च प्राचीनयुगे प्रशस्त एवासीत् । एकस्मादेव ब्रह्मणः पुरुषाद् वा सर्वेषां वर्णानामुत्पत्तिरिति सिद्धान्तेन क्रमशः मुखबाहूरुपदप्रदेशेभ्य उत्पत्तिरिति सिद्धान्तेन च तेषां परस्परं संगतिसंहननेन समाजशरीरस्य रचनाविधानमादर्शरूपेण सर्वानुकूलमेव स्वभावतः प्रसिद्धम् । बृहदारण्यके प्रोक्तम्—तदेतद् ब्रह्मक्षत्रविट्शूद्रः । तदग्निनैव देवेषु ब्रह्माभवद् ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रः ।[३]

ब्राह्मणस्तु ज्ञानचरित्रतपोबलेन सर्वेषां गुरुरभवत् । तस्योच्चत्वमाध्यात्मिकवृत्त्या सिद्धम् । प्रत्यक्षतः स आत्मविकासमकरोत्, किन्तु गौणरूपेण समग्रसमाजस्तेनोपकृत

---

१. पतंजलिमहाभाष्ये ४.१.६३

२. इदमेवोद्दिश्याशोकेन लेखापितम्—'धंमानुसस्टिया नातीनं संपटिपती ।' गिरिनगरस्य शिलालेखात् ।

३. राजत० ६.२२४ इत्यनुसारं ललितादित्यपुरस्य ब्राह्मणा विपुलस्वर्णराशिमुत्कोचं गृहीत्वा शत्रुसंघे भेदबीजं वपन्ति स्म ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आसीत् । प्रजायै सत्पथप्रदर्शनं तस्यैवोत्तरदायित्वमासीत् । अस्य परिपालने स निरन्तरं प्रयत्नशीलोऽभवत् ।[1] शतपथब्राह्मणे परिलक्ष्येदं कथितम्—लोकः पच्यमानश्चतुर्भिर्धर्मैः भुनक्ति अर्चया च दानेन चाज्येयतया चावध्यतया च ।[2] मनुना ब्राह्मणस्योत्तरदायित्वं निरूपितम्—

उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद् ब्रह्मणश्चैव धारणात् ।
सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ॥ १.९३
ब्राह्मणो जायमानो हि पृथिव्यामधिजायते ।
ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ॥ १.९९

मनुना व्यवस्थापितम्—

ब्राह्मणं दशवर्षं तु शतवर्षं तु भूमिपम् ।
पितापुत्रौ विजानीयाद् ब्राह्मणस्तु तयोः पिता ॥ २.१३५

मनुर्ब्राह्मणानां श्रेष्ठत्वं विधातुं नैवं कृतवान् । विचारणीयैवास्मिन् प्रसङ्गे मनुना कृतापरा व्यवस्था—

वित्तं बन्धुर्वयः कर्म विद्या भवति पंचमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥
पंचानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च ।
यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥

राजनीतिकक्षेत्रे ब्राह्मणानां माहात्म्यमैतिहासिकयुगेऽपि अविस्मरणीयमेव विद्यते । चतुर्थशताब्दे ई० पू० काले सिकन्दरस्याक्रमणे सति ब्राह्मणा लोकरक्षणार्थं संघटनं कृत्वा तेनाक्रमणकारिणा सहायुध्यन्त । असंख्यांस्ते ब्राह्मणाः सिकन्दरेण शूलमारोपिताः । तत्र कश्चिद् ब्राह्मणः किमर्थं त्वं जनान् योद्धुं प्रोत्साहयसीति पृष्टः सन्नुवाच—ते लोकाः ससम्मानं जीवन्तु प्राणानुत्सृजन्तु वेति विचार्याहमेवं करोमीति ।

क्षत्रियः तु सर्वेषां वर्णानां रक्षको बभूव । स सर्वेषां हिताय युद्धं कर्तुं सदैवोद्यतोऽभवत् । अस्मात्कारणात् धनुः तस्य लक्षणं विनिश्चितम् ।[5]

---

१. बृहदारण्यके १.४.१५

२. ब्राह्मणो वै प्रजानामुपद्रष्टा । तैत्तिरीयब्राह्मणे २.२,१

३. शतपथे ११.५.७.१ । अन्यत्र ब्राह्मणानधिकृत्य कथितम्—सर्वाभ्युदयकृद्धि सः । कात्यायनस्मृतौ १२.४ । स विश्वं बिभर्ति—पराशरस्मृतौ १२.५ । महाभारतानुसारं तु यो ब्राह्मणो राष्ट्रस्याभ्युदयाय किंचिदुदात्तं कर्माकरोत् स तु ब्रह्ममहोत्सवायोजनेन चातुर्वर्ण्यस्याभिनन्दनीयोऽभवत् । आदि० १५२. १८

५. अथर्ववेद १८. २. ६०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाभारतानुसारं तु—

आत्मत्यागः सर्वभूतानुकम्पा लोकज्ञानं पालनं मोक्षणं च।
विषण्णानां मोक्षणं पीडितानां क्षात्रे धर्मे विद्यते पार्थिवानाम् ॥[1]

चतुराश्रम्यधर्माश्च यतिधर्माश्च पाण्डव।
लोकवेदोत्तराश्चैव क्षात्रधर्मे समाहिताः॥
प्रत्यक्षं सुखभूयिष्ठमात्मसाक्षिकमचञ्चलम्।
सर्वलोकहितं धर्मं क्षत्रियेषु प्रतिष्ठितम्॥
क्षात्राद्धर्माद्विपुलादप्रमेयाल्लोकाः प्राप्ताः स्थपितं स्वं यशश्च।[2]
चातुर्वर्ण्यं स्थापनात्पालनाच्च तैस्तैर्योगैर्नियमैरौरसैश्च।
सर्वोद्योगैराश्रमं धर्ममाहुः क्षात्रं श्रेष्ठं सर्वधर्मोपपन्नम्।
स्वं स्वं धर्मं ये न चरन्ति वर्णास्तांस्तान्धर्मानन्यथार्थान्विदन्ति॥[3]

क्षत्रियाणां सहायता तु सर्वेभ्य आसीत्। शरणार्थिनां ब्राह्मणादीनां वर्णानां रक्षणेन मरणोत्तरकाले क्षत्रियस्य सुगतिरिति महाभारतवचनम्।[4] ह्वेनसांगः क्षत्रियाणां सहायशीलत्वं स्वरचितग्रन्थे प्रमाणितवान्।[5]

क्षत्रियाणां लोकोत्थानं तु सदैव सुप्रथितमभवत्। रामकृष्णार्जुनादीनां चरितगाथा सर्वान् क्षत्रियान् लोकोपकारसरणिमेव स्वीकर्तुं सदैव प्रोत्साहयति स्म।

भारते वैश्यानां संख्या वैदिककाले सर्वाधिकाऽभवत्।[6] ते वैश्याः समाजे सर्वेषामुपभोगाय धनधान्यान्युत्पादयन्ति स्म। तेषामुत्पादितधनस्य सर्वभोग्यत्वमपि प्रतिपादितम्।[7] मनुना तु निर्दिष्टम्—वैश्यः सर्वभूतेभ्योऽन्नं यत्नतो दद्यात्। निःसन्देहं वैश्यानां कर्मविधिरत्यन्तं कठिन एव। तेषां सत्प्रयत्नेन हि वैदिकजैनबौद्धसंस्कृतीनां प्रवर्तका उन्नायकाश्च जीवन-विन्यासस्यावश्यकवस्तूनि सम्प्राप्य सर्वेषामभ्युदयायाध्यात्मकर्मणि प्रयुक्ता अभवन्।

वैदिककालत एव शूद्राणां सामञ्जस्यपूर्णा गतिरभवत्। तत्र शूद्रकृतेऽपि यशःप्राप्तये

१. शान्तिपर्वणि ६४. २७
२. शान्तिपर्वणि ६४ अध्यायतः।
३. शान्तिपर्वणि ६५ अध्यायतः।
४. शूद्रं तु मोचयेद्राजा शरणार्थिनमागतम्।
प्राप्नोतीह कुले जन्म सद्द्रव्ये राजपूजिते॥ आदिपर्वणि १६१.२५
५. The second order is that of Kshatriyas, the race of kings. This order has held sovereignty for many generations, and its aims are benevolence and mercy. Watters Vol. I p. 158
६. तैत्तिरीयसंहितायां ५. १. १०. ३
७. तैत्तिरीयसं० ७. १. १.५.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्रह्मर्षिभी रचिता मन्त्रा : सन्ति ।[१] शूद्राणामपि प्रियो भवितुं मन्त्रा विद्यन्ते ।[२] बृहदारण्यकानुसारं शूद्राः पोषकाः एव सर्वेषाम् । तद्यथा—स शौद्रं वर्णमसृजत् । पूषणमियं वै पूषेयें हीदं सर्वं पुष्यति यदिदं किंच ।[३] 'शूद्रास्तु सेवका इति धर्मशास्त्रेषु प्रमाणितम् । अस्मिन् प्रकरणे सेवया तानि शिल्पकर्माण्यपि व्यक्तानि, यैरन्ते वर्णा आवश्यकवस्तूनि प्राप्नुवन्ति । तद्यथा मनुः—

यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः ।
तानि कारुककर्माणि शिल्पानि विविधानि च । १०.१००

सेवाधर्मस्तु पुरा क्षत्रियवैश्यशूद्रेभ्यः सर्वेभ्यो निर्धारित आसीत् । तद्यथा क्षत्रियो ब्राह्मणानां वैश्याः क्षत्रियब्राह्मणानां शूद्राश्च वैश्यक्षत्रियब्राह्मणानां सेवां कुर्वन्तु इति धर्मशास्त्रकाराः ।[४] शूद्राणां सामञ्जस्यमधिकृत्य महाभारते प्रोक्तम्—यदि स्वामी वृद्धो दुर्बलो वा भवेत्तर्हि स शूद्रेण सेवकेन भर्तव्यः । यदि सोऽनशत्यस्तर्हि शूद्रेण तस्मै पिण्डो देय इति । स तु स्वयमेव विपत्सु स्वामिनो भर्त्ता भवेदिति ।[५]

महाभारतानुसारं तु धर्मकामाः सर्वे लोकाः शूद्रं वैश्यं राजपुत्रं च संश्रिताः ।[६] राजनीतिकक्षेत्रेऽपि चतुर्णां वर्णानां साहचर्यं सुप्रतिष्ठितमासीत् । वैदिककालस्य रत्निपरिषदि ब्राह्मणाः क्षत्रियाः वैश्याः शूद्राश्च सर्वे सदस्या भवन्ति स्म ।[७] महाभारतानुसारममात्यपरिषदि चत्वारो ब्राह्मणाः, अष्ट क्षत्रियाः, एकविंशतिः वैश्यास्त्रयः शूद्राश्च सदस्या बभूवुः । यज्ञावसरेऽपि सर्वेषां वर्णानां प्रतिनिधय आमन्त्रिताः । सर्वे च ते सहस्रसंख्यकाः सत्कृताः पूजिताश्च ।[८] यज्ञेषु प्रार्थनाऽभूत्—

रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि ।
रुचं विश्येषु शूद्रेषु मयि धेहि रुचारुचम् ॥[९]

न केवलं ब्राह्मणादय उच्चवर्णिका जना अपितु हीनजातिकाः शूद्राश्चाण्डाला अपि लोकरक्षणार्थं महापराक्रमं कुर्वन्ति स्म । कश्मीरस्येतिहासे ग्रामवासिनां प्रतिनिधीभूताः

---

१. तैत्तिरीयसंहितायां ५. ७. ६. ४. काठकसंहितायां ४०. १३
मैत्रायणीसंहितायां ३. ४. ८. वाज. सं. १८४८

२. अथर्ववेदे १९. ३२. ८, १९. ६२. १ वाज. सं० २६. २.

३. बृहदारण्यके १.४.१३

४. विष्णुस्मृतौ ११२

५. शान्तिपर्वणि ६०.३५ ।

६. शान्तिपर्वणि ६३.९ ।

७. शतपथे ५ ३.१.१ काठकसं० १५.४ ।

८. बालकाण्डे १३. १८; १३.५ महाभारते सभापर्वणि ३३.४२ ।

९. शुक्लयजुर्वेदे १८.४८ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चाण्डाला विपत्तिकारिणो राज्ञो हतवन्तः।[१] कतिपयराजवंशाः शूद्राणामेव प्रसिद्धाः सन्ति। राजान एव ते शूद्राः स्वदेशस्य समुन्नतिं विदधुः।[२]

उपजातयः

चतुर्भ्यो वर्णेभ्यः कालान्तरे शतसंख्यका उपजातयः प्रादुर्भूताः। येन सिद्धान्तेन चतुर्वर्णा व्यवस्थितास्तेनैवोपजातीनामपि व्यवस्थाभवत्। आदौ व्यवसायानुरूपं पित्रोर्जात्यनुरूपं च वर्णानां संघटनमक्रियत। प्राचीनयुगे व्यवसायानां संख्याऽगणितैव। तथा हि यज्ञविधौ षोडश पुरोहिताः षोडशविधकार्येषु संलग्नाः। तेषां सर्वेषां पदप्रतिष्ठाः समाना नासन्। तेषां षोडशनामानि बभूवुः। वैश्यानां सामान्यतस्त्रय एव व्यवसाया निर्धारिताः— कृषिः पशुपालनं वाणिज्यं च। तेषां प्रथमं द्वयं सर्वैः समानरूपेण स्वीकृतम्। वाणिज्यार्थमसंख्यातवस्तूनि वर्तन्ते। तेषामेकैकस्य विक्रेतुः पदमपरविक्रेतृभ्य उच्चावचमभूत्। शूद्राणामसंख्यानि शिल्पानि वर्तन्ते। प्रतिशिल्पमेका जातिरिति सुनिश्चितमेव। तथाहि कांस्यकाराः, कैवर्ताः, कुम्भकाराः, चर्मकाराः, तैलिकाः, नटाः, नापिताः, रजकाः, सुवर्णकाराः—इमे सर्वे शूद्रवर्गेऽपि स्वस्वोपवर्गकं निर्मितवन्तः। बौद्धसाहित्ये शूद्राणां व्यवसायानुरूपाणि जातीनां नामानि प्राप्यन्ते। तथा हि नलकारः, मणिकारः, गन्धिकः, तुन्नवायः, रजकारः, काष्ठहारः, उदहारः, सूपकारः, दौवारिकः, रूपदक्षः, हस्त्यारोहः, हस्तिपालः, पेशस्कारः, दौशिकः, प्रैषकारः, सन्धिकादयः। बहवो जातिभेदा निवासिनां देशनामान्यधिकृत्योद्भूताः, तद्यथा—अम्बदेशस्याम्बष्ठाः, मगधस्य मागधाः, विदेहस्य वैदेहकाश्च। वैदेशिकानां नामानि शक-यवन-खश-कम्बोज-द्रविड-पारद-पह्लव-दरद-शबर-किरातादीनि प्राप्यन्ते।

अनुलोमप्रतिलोमविवाहैर्वर्णसंकराणामुत्पत्तिः कालान्तरे जाता। तेषां वर्णसङ्कराणां नवानि नामानि प्राप्यन्ते अथवा पुरातनोपजातिष्वन्तर्भावो दृश्यते। वर्णसंकरजातीनामीषद्विज्ञानमधोलिखितया तालिकया भवति—

पितुर्जातिः	मातुर्जातिः	सन्ततेर्जातिः
ब्राह्मणः	क्षत्रियः	मूर्धावसिक्तः
क्षत्रियः	वैश्यः	माहिष्यः
वैश्यः	शूद्रः	पारशवः
ब्राह्मणः	वैश्यः	अम्बष्ठः

---

१. राजत० ४. ४७७; ५. २२१।

२. षोडशसप्तदशशताब्दे गणवंशीया राजानो यवनान् पुनः पुनः पराजितवन्तः। ह्वैनसांगः शूद्रराजानां वर्णनं कृतवान्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ब्राह्मणः	शूद्रः	निषादः
वैश्यः	क्षत्रियः	मागधः
शूद्रः	ब्राह्मणः	चाण्डालः
ब्राह्मणः	अम्बष्ठः	आभीरः

मन्वादिधर्मशास्त्रकारैः वर्णसंकराणां प्रत्येकशो व्यवसायादयो निर्दिष्टाः ।

जीविकासाधनानि

प्रारम्भिकवैदिकयुगे व्यवसायनिबन्धिनी वर्णव्यवस्थार्धविकसितासीत् । तस्मिन्युगेऽर्थोपार्जनाय सामान्यतः त्रयः श्रेष्ठव्यवसायाः प्रचलन्ति स्म-कृषिः पशुपालनं याजनं च । प्रायशो जना एषु त्रिषु व्यवसायेषु व्यापृता बभूवुः । सर्वे आर्याः स्वरुच्यनुकूलं व्यवसायमचिन्वन् । अपरमपि कार्यं तेषामार्याणां समक्षमासीत्—आत्मरक्षणं युद्धं च । अनेन विना तस्मिन्युगे समाजे शान्तिरसम्भवासीत् । युद्धे यदा कदा शत्रूणां सम्पत्तिः प्राप्ता ।

उपर्युक्तव्यवसायेषु कालान्तरे यज्ञात्मकानि कार्याणि श्रेष्ठानि सन्तीति लोकधारणा बभूव । यज्ञार्थं मन्त्राणां रचनापेक्षितासीत् । ते मन्त्रद्रष्टार ऋषयः सर्वोच्चं प्रतिष्ठापिताः । यज्ञैर्युद्धे विजयोऽपि प्राप्तव्य आसीत् यतो देवा यज्ञैः परितुष्टा यजमानस्य सर्वान्कामान् परिपूरयन्तु । आर्याणां यज्ञेषु, तेषां सम्पादकेषु, विनियोज्यमन्त्रेषु, मन्त्रद्रष्टृषु चातिशयश्रद्धावर्तत । समाजे यज्ञसम्पादकानां समादर आसीत् ।[1] तेभ्यः प्रायः समकक्षाः शस्त्रधारिणो राष्ट्ररक्षका योद्धार आसन् । कृषिः पशुपालनं च समाजस्य पोषणाय महत्त्वपूर्णं वर्तते, किन्तु प्राकृता अवराश्च जना तयोः कर्मणोः समर्था आसन् । उदरभरणं तयोः प्रधानप्रयोजनं वर्तते । अत एव कृषकाः पशुपालका वा समाजे तृतीयस्थाने प्रतिष्ठापिताः ।

व्यवसायानुरूपं वर्णसंघटनं यदाभवत्, तदा कस्यापि पुरुषस्य जातिस्तस्य प्रधानकर्मानुरूपा नियता बभूव । मन्त्रद्रष्टार ऋषयः याजकाः पुरोहिताश्च ब्राह्मणाः, शस्त्रधारिणः राजानश्च क्षत्रियाः, पशुपालकाः कृषकाश्च वैश्या अभिहिताः । ब्राह्मणक्षत्रियवैश्यानां सहायकाः सोपयोगानां ललितानां च कलाशिल्पानां कर्तारः शूद्रा अभिहिताः ।

वैदिककाले कृषिपशुपालनयोर्विशेषमहत्त्वं स्वीकृतम् । प्रायः सर्वे ब्राह्मणाः क्षत्रियाश्च कृषिपशुपालने कुर्वन्ति स्म । ऋषीणामाश्रमेषु राज्ञां संस्थानेषु च गवां सहस्राणि वर्तन्ते स्म ।

---

१. परवर्तियुगे पुरोहितानां हीनत्वं प्रतिपादितम् । यज्ञस्य सम्पादनमनुचितकार्येषु सिद्ध्यर्थमपि बभूवेति कारणात् पुरोहिता प्रायशो विनिन्दिताः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परवर्तियुगेऽनयोर्द्वयोर्व्यवसाययोर्हीनत्वमेव निर्दशितम् । ब्राह्मणेभ्यः कृषिः निषिद्धा । तद्यथा बौधायनः—

वेदः कृषिविनाशाय कृषिर्वेदविनाशिनी ।
शक्तिमानुभयं कुर्यादशक्तस्तु कृषिं त्यजेत् ॥ धर्मसूत्रे १.५.१०१

ज्ञानभाण्डारस्य तस्मिन्युगे वैपुल्यमासीत् । स्वाध्यायपरायणा ब्राह्मणाः कृषिं त्यक्त्वा शिलोञ्छवृत्त्या जीवनयापनं कुर्वन्ति स्म, किन्तु बहवस्तत्रासन् तादृशाः ब्राह्मणा येषां विषये बौधायनो लिखति—

प्राक् प्रातराशात्कर्षी स्यात् ।[1]

मनुस्तु ब्राह्मणेभ्यः कृषिवृत्तिं परित्याज्यां मन्यते । तद्यथा—

ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥ ४.५

मनुस्तु ब्राह्मणेभ्यो धनार्जनं गौणमेव मन्यते । तदनुसारम्—

यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः ।
अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् ॥ ४.३

मनोर्विधानं लोकैः स्वीकृतम् ।

तद्यथा—प्रशीर्णं च पुष्पफलं देवकार्यार्थं व्रीहियवमाग्रयणार्थं श्रोत्रियास्तपस्विनश्चाहरेयुः ।[2]

ब्राह्मणास्तु परमुखापेक्षिणो भोजनार्थं न भवेयुरिति बहूनां मनीषिणां परिदर्शनमासीत् । तद्यथा महाभारते—

अपि शाकं पचानस्य सुखं वै मघवन् गृहे ।
अर्जितं स्वेन वीर्येण नाप्यपाश्रित्य कञ्चन ॥
फलशाकमपि श्रेयो भोक्तुं ह्यकृपणं गृहे ।
परस्य तु गृहे भोक्तुः परिभूतस्य नित्यशः ॥
सुमृष्टमपि न श्रेयो विकल्पोऽयमतः सताम् ।
श्ववत् कीलालपो यस्तु परान्नं भोक्तुमिच्छति ॥ वन० १९३. २७-२९

महाभारतानुसारं कतिपयमहाब्राह्मणा आयुधाजीविनः कृषकाः पशुपालका बभूवुः । द्रोणाचार्यस्तु धनुर्वेदशिक्षक आसीत् । आयोदधौम्यः कृषकः पशुपालकश्चासीत् । ब्राह्मणेभ्यो बलीवर्दा दानरूपेण दीयन्ते स्म । अवश्यमेव तेषां कृषिकर्मणे एव बलीवर्दा-

१. धर्मसूत्रे २.२८२। रामायणानुसारं तु ब्राह्मणाः फालकुद्दाललांगलिनोऽप्यासन् । अयोध्याकाण्डे ३२३० ।अन्यत्रापि द्रष्टव्यम्-वसिष्ठधर्मसूत्रे २. ३२-३४; पराशरस्मृतौ २.२-१६ ।

२. अर्थशास्त्रे सीताध्यक्षप्रकरणे ४१ सूत्रम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नामुपयोग आसीत् ।[१] अर्थशास्त्रानुसारमपि राजा 'ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यो ब्रह्मदेयानि यच्छेत्' ।[२] ब्रह्मदेयभूमिः कृषिकर्मण आसीत् ।

केषुचित्पुराणेषु ब्राह्मणान् स्वावलम्बिनः कर्त्तुं योजना वर्तन्ते । न ते परमुखापेक्षिणो जीविकार्यं भवेयुरिति उद्दिश्य पद्मपुराणे स्पष्टं निर्दिष्टम्—ब्राह्मणाः शस्त्रेण जीविकोपार्जनं कुर्वन्तु व्यापारं कृषिं वा कुर्वन्तु, किन्तु ब्राह्मणोचितां धार्मिकसंस्कृतिं मा त्यजन्तु'[३] इति ।

प्राचीनयुगे वहवस्तत्रासन् ब्राह्मणा नामधारिण एव—ये चिकित्सकाः, परिचारकाः, निग्राहकाः, भिक्षवः, व्यापारिणः, पुरोहिताः, कृषकाः, शिल्पिनः, योधाजीविनः, याजका वा बभूवु ।[४]

आरम्भिकयुगेऽध्यापनवृत्त्या धनं नार्जनीयमिति रीतिरासीत् । राजानो यदा कदाऽध्यापकेभ्यो वृत्त्यै धनमन्नं वा दत्तवन्तः । परवर्तियुगेऽध्यापनार्थं शुल्करूपेणेषद्धनग्रहणं कतिपयधर्मशास्त्रकाराः समीचीनं मन्यन्ते ।

पौरोहित्यं वैदिकयुगे ब्राह्मणेभ्यः श्रेष्ठा वृत्तिर्निर्धारिता । प्रायः सर्वेषां राज्ञां समृद्धिशालिनां गृहस्थानां च यज्ञादिधर्मकार्यसम्पादनाय धार्मिकक्रिया कुशला वेदविद्यापरायणा ब्राह्मणाः पुरोहितपदे नियुक्ता बभूवुः । राष्ट्रस्याभ्युदयकरणे पुरोहितानामुत्तरदायित्वं सविशेषमेवासीत् ।[५]

मनुस्तु पौरोहित्यं निन्दनीयमेव मन्यते । पूगयाजकाः, गणयाजकाश्च श्राद्धे त्याज्या इति मनुमतम् ।

प्रतिग्रहाद्याजनाद्वा तथैवाध्यापनादपि ।
प्रतिग्रहः प्रत्यवरः प्रेत्य विप्रस्य गर्हितः ।। १०. १०९

भागवतपुराणेऽपि मनुमतस्य प्रतिपादनं दृश्यते । तद्यथा—

अकिंचनानां हि धनं शिलोञ्छनं तेनेह निर्वर्तितसाधुसत्क्रियः ।
कथं विगर्ह्यं नु करोम्यधीश्वराः पौरोधसं हृष्यति येन दुर्मतिः ।। ६. ७. ३६

भिक्षावृत्तिर्दानग्रहणं च ब्राह्मणानां शाश्वतवृत्तिरभवत् ।[६] दानेन स्वर्गः सुलभ इति

---

१. सभापर्वणि ४९.२० ।

२. अर्थशास्त्रे अध्यक्षप्रचारे १.८।

३. पद्मपुराणे सृष्टिखण्डे ४० अध्यायतः। स्कन्दपुराणे काशीखण्डे पूर्वार्धे ४० अध्यायानुसारं वैश्यशूद्रयोर्वृत्त्या ये ब्राह्मणा जीविकोपार्जनं कुर्वन्ति ते शूद्रसदृशाः सन्ति ।

४. सुत्तनिपाते वासेट्ठसुत्ते । ब्राह्मणवृत्तिरहितानामुत्तरभारतीयब्राह्मणानां परिचयः कुमारिलेन वार्त्तिके दत्तः–पृ० २०४ पशुव्यापारिणस्ते सन्तीति ।

५. ऐतरेयब्राह्मणे ८. २४-२५ ऋग्वेदे १०.९८।

६. महाभारतानुसारं [illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मत्वा ब्राह्मणेभ्यो दानाय सर्वे समुत्सुका बभूवुः। 'ब्राह्मणः पात्रमस्ति नास्ति वा' अस्य विचारं कर्त्तुं नासीदवसरः साधारणजनस्य। शास्त्रकारास्तु भिक्षावृत्तिं सदैव निन्दन्ति स्म। भिक्षायै केवलं ब्रह्मचारिणः संन्यासिनो वा योग्या मताः। तद्यथा महाभारते—

नाब्रह्मचारी भिक्षावान् भिक्षुर्वाऽब्रह्मचर्यवान्। शान्ति० ७७. २२

पराशरस्तु योग्यब्राह्मणेभ्यो दानं समर्थयति—

ब्राह्मणस्य मुखं क्षेत्रं निरूपमकंटकम्।
वापयेत् सर्वबीजानि सा कृषिः सर्वकामिका॥

किन्तु व्रतहीनेभ्योऽनधीयानेभ्यो वा ब्राह्मणेभ्यो यदि कस्मिंश्चिदपि ग्रामे भिक्षा दीयते तर्हि सर्वेऽपि निवासिनस्तत्र दण्डार्हा भवन्ति। स ग्रामस्तु चोरमेव भोजयति।[1]

आपस्तम्बधर्मसूत्रानुसारं स्नातक आचार्यार्थं विवाहार्थं यज्ञाय पित्रोर्भरणपोषणाय वा भिक्षताम्। यदि कोऽपि नरोऽलसः सन्नेवात्मतृप्त्यर्थं याचते तर्हि तस्मै भिक्षादानं पापमेव। किन्तु भिक्षाद्वारा प्राप्तं धनं दीनहीनेभ्यो यदि दीयते तर्हि समीचीनं तद् भिक्षाकर्म।[2] अन्येऽपि धर्मशास्त्रकारा विपत्तिकाले भिक्षा कर्तव्या—इति मन्यन्ते स्म।[3] मनुर्यज्ञसम्पादनाय भिक्षां समीचीनां मन्यते।

वेदानुसारं दानमतिशयमहत्त्वं भजते। उपनिषदनुसारं—त्रयो धर्मस्कन्धाः यज्ञोऽध्ययनं दानमिति प्रथमः। आत्मज्ञानाय दानस्य महत्त्वं स्वीकर्तव्यम्—तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा।[4] ईदृशैः प्रकरणैः स्पष्टं प्रतिभाति यद् ब्राह्मणा दानं दद्युः। मनुर्ब्राह्मणेभ्यो दानग्रहणमनुचितमिति प्रमाणयति।

प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत्।
प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति॥ ४. १८६

पराशरो दानविधिं विवेचयन्नाह—

अभिगम्योत्तमं दानमाहूयैव तु मध्यम्।
अधमं याचमानाय सेवादानं तु मध्यमम्॥

भागवतेऽपि प्रतिपादितम्—

प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदम्।
अन्याभ्यामेव जीवेत् शिलैर्वा दोषदृक् तयोः॥ ११. १७. ४१

अयोग्यपुरुषेभ्यो गृहीतं दानं तु भृशतरं पापमिति लोकमतं कल्हणेन प्रमाणितम्।

१, पराशरस्मृतौ १.६६।
२. आपस्तम्बधर्मसूत्रे २.५, १०।
३. वसिष्ठधर्मसूत्रे १२, २-३।
४. बृहदारण्यके ४.४.२२।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदनुसारं पापेभ्यो राजभ्योऽग्रहारो न ग्रहणीयः। पापमतिः राजा चक्रवर्मासीत्। तस्माद-ग्रहारग्राहिणो ब्राह्मणान् प्रति कल्हणः कथयति—

ततोऽपि पापिनोऽभूवन् केऽपि तस्मिन् क्षणे द्विजाः।
तस्मादप्यग्रहारान् ये जगृहुर्गृहभोजिनः॥ राजत० ५. ४०२

क्षत्रियाणां जीविका सामान्यतो राजकर्मभिरभवत्। तेषामपि जीविकानुषङ्गिकरूपेण कृषिपशुपालनव्यापारादिरासीत्।[1] प्रायः क्षत्रियाः सैनिका बभूवुः। आयुधजीविनस्ते राजवेतनभोगिन आसन्।

वैश्यशूद्राणां जीविका कृषिपशुपालनव्यापारादिभिरेव प्रायोऽभवत्। शूद्राणां शिल्पकर्म प्राचीनयुगे सुप्रतिष्ठितमासीत्।[2] सेवाकर्मणोऽपि शूद्राणां जीविका समभवत्।

उपर्युक्तचातुर्वर्ण्यव्यवसायविधानं धर्मशास्त्रानुसारं सदैव प्रतिष्ठितमासीत्। अस्य प्रतिबन्धनं कठोरं नाभवत्। तद्यथा—बहवो वैश्याः शूद्राश्च राजानो बभूवुः। वैश्यशूद्राणां सेनाऽपि युध्यते स्म। ते स्वव्यवसायानां शिक्षका बभूवुः। तेषां विद्यार्थिनो दूरतोऽपि समागताः।

बहवो वैश्याः शूद्राश्च राजसभायां योग्यतानुसारं सर्वोच्चपदाधिष्ठिता बभूवुः। कश्मीरे क्षेम इति ख्यातो नापितोऽनन्तदेवस्य राजमन्त्री बभूव। हलधर इति कश्चित् वैश्यः तत्र सर्वाधिकारी बभूव। कालान्तरे स सेनापतिः प्रधानमन्त्रिपदाधिष्ठितश्चासीत्।[3]

आपत्तिकाले जीविकापि सर्वेभ्यो वर्णेभ्यो निर्धारिता वर्तते धर्मशास्त्रेषु। तदनुसारं ब्राह्मणः क्षत्रियवैश्ययोः, क्षत्रियः ब्राह्मणवैश्यशूद्राणाम्, वैश्यः शूद्रस्य च जीविकासाधनैर्जीवनयापनं विपत्तिकालपर्यन्तं कुर्वन्तु।[1]

वर्णव्यवस्थाया विरोधः

जन्मना जातिनिर्धारणं केवलं परम्परावादिभ्य एव रोचते। बहवस्तत्राभवन् धर्मशास्त्रकारा येषां मतेन जन्मना जातिस्तु तावदेव वृथा यावत्कर्मणाऽपि तस्या अभिव्यक्तिर्न भवेत्। उच्चवर्णेषु न सर्वेषां पुरुषाणां वर्णो जन्मना कर्मणा चोभयविधिभ्यां साधारण्येन प्रतिष्ठापनीयोऽभवत्। यदा जन्मनान्या जातिर्भवति कर्मणा च तस्या व्यतिरिक्ता जातिः प्रतिभाति तदा वर्णव्यवस्था मूलतो निरस्ता भवति।

---

१. कम्बोजसुराष्ट्रक्षत्रियश्रेण्यादयो वार्ताशस्त्रोपजीविनः अर्थशास्त्रे भेदपादतः।
२. वैश्यः शूद्रस्तथा कुर्यात् कृषिवाणिज्यशिल्पकम्॥ पराशरस्मृतौ २. १९। एतत्समर्थितं महाभारते आदिप० १९९, ३८ इति श्लोकेन।
३. राजत० ७. २०२, २१०, २२१।
४. भागवते ११७.१.४७-४९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरा वैदिककर्माश्रित्य जातिर्वर्णो वा निबद्धः । तदधुना वैदिककर्मणामदर्शनं जातम् । अतएव वेदेषु प्रतिपादिता जातिरधुनानावश्यिकीति राष्ट्रिया नीतिः । सर्वप्रथमः प्रसिद्धो महापुरुषो गौतम एव जन्मना जातेर्विरोधं कृतवान् । तद्यथा—

न जच्चा वसलो होदि न जच्चा होदि बह्मणो ।
कम्मुना वसलो होदि कम्मुना होदि बह्मणो ।।

गौतमस्य संघे नासीत् जन्मना जातेरस्तित्वमपि । संघे जन्मना केवलं मानवजातिरासीत् । नापितोऽपि संघे प्रथमं प्रव्रजितः पश्चात्प्रव्रजितानां क्षत्रियाणामपि वन्द्योऽभवत् । शाक्याः संघे समाविष्टाः सन्तः शाक्यत्वविहीना बभूवुः । गौतमानुसारं जाति-कुल-गोत्रादीनि संघे तथैव विलीनानि यथा नदीनदाः समुद्रे विलयं यान्ति ।[१]

अपरेऽपि भारतीयसंस्कृतेरुन्नायका अनुयायिनां जातिविहीनत्वमेव व्यवस्थितवन्तः । शङ्कराचार्य-रामानुज-रामानन्द-चैतन्यादयो जन्मना जातेर्निःसारत्वं प्रदर्शितवन्तः । तेषामनुयायिनः सर्वेभ्यो वर्णेभ्यः समागता दीक्षिताः सन्तः समाना बभूवुः ।[२]

भारतस्यैक्यसम्पादने राजनीतिकसंघटने वा जातिव्यापि उच्चावचत्वं स्पृश्यास्पृश्यत्वं च बाधकं बभूव । भारतीयराजानां परस्परिको भेदभाव : पृथक्त्वं च प्रायशो जातिवर्णाधारितमासीत् ।[3]

---

१. चुल्लवग्गे ७.१.४; ९.१.४

२. राधाकृष्णन् महोदय इमां प्रवृत्तिं परिलक्ष्य लिखति—The distinctions of caste do not touch the nature of the soul. At least they belong to the bodies and determine the duties which different individuals owe to society but caste has nothing to do with the qualities of soul. Some of the Alwars worshipped by the Brahmins were Sudras. Ramanuja allows that no distinctions should be made among the lovers of God...........Ramanuja preaches equality in worship and proclaims that Bhakta transcends all caste distinctions. He admitted the pariahs to the temple at Melkote. Indian Philosophy Vol II p. 708.
Śankara ignored caste distinctions in the monistic order, he founded. Ibid. p, 438.

२. तद्यथायोलिखितेन वृतेन प्रमाणितम्—Jaya singh of Jaipur wrote to Aurangzeb in later days that his family would be polluted even by inter-dining with the Bhonslas, as they were far below him in social rank and status and belonged to an inferior caste. N. K. Behre The Background of Maratha Renaissance in the Seventeenth Century, Page 150.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्णव्यवस्थायाः समीचीनत्वम्

यावत्कालं वर्णव्यवस्थाया मूलाधारः कर्माभवत् तावन्मात्रं सा समाजायावश्यमेव लाभप्रदा बभूव । वैदिककाले जन्मना शूद्रोऽपि ब्राह्मणोचितानि कर्माणि कुर्वन् ब्राह्मण एव बभूव । वैदिककालस्य पश्चात् जन्मना जातिः प्रचलति स्म । अपवादरूपेणैवोच्चतर-कर्मभिरुच्चतरजातिरिह जन्मनि प्राप्ता ।

जन्मना जात्यनुसारं 'दुःशीलोऽपि द्विजः पूज्यो न शूद्रो विजितेन्द्रियः' एव लोक-धारणा स्यात् । इयं स्थितिः ब्राह्मणानां पतनाय बभूव । वैश्यशूद्रयोश्चाभ्युत्थाने धारणेयं बाधैवासीत् । हीनतरवर्णानामभ्युत्थानाय नासीत् किंचिदपि प्रोत्साहनम् ।

विविधवर्णेषु विभिन्नजातिषु च पारस्परिकसाम्यभावस्याभावोऽपि वर्णव्यवस्थायाः सदोषत्वं निर्दिशति । शूद्रात् घृणा कथं तस्य महर्षेर्हृदये व्याप्नुयात् येन दृष्टम्-तदेतद् ब्रह्म ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रः । राष्ट्रस्यैकमुखत्वमपि जातिव्यवस्थया किञ्चिद्विनष्टमेव दृश्यते । व्यावसायिकवैशिष्ट्यमेव वर्णव्यवस्थायाः शाश्वतगुणः प्रतिभाति ।

कुटुम्बम्

न कदापि ब्राह्मणादीनामुच्चवर्णानां विशेषाधिकारा सर्वथा अस्थाने नियोजिता इति मत्वा जातिप्रथा विरोधनीया । प्रथमं तावदिमे विशेषाधिकारा वस्तुतः तेषां वर्णानां महतोद्योगेन तपसा त्यागेन समाज-सेवया वा सम्प्राप्ताः । अपरं च विशेषाधिकारैः सह क्वचित् तेभ्योऽत्युच्चादर्शस्य सम्भावना नियोजिता बभूव । तत्कथं सम्भाव्यमिति मनुर्नि-र्दिशति—

अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्विषम् ।
षोडशैव तु वैश्यस्य द्वात्रिंशत् क्षत्रियस्य च ॥ ८. ३३७
ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत् ।
द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः ॥ ८. ३३८

समाजस्य द्वितीयं संस्थानं कुटुम्बमेव । कुटुम्बस्यादर्शप्रतिष्ठां कामयमानेन ऋषिणा-थर्ववेदे प्रोक्तम्—

सहृदयं सांमनस्यमविद्वेषं कृणोमि वः ।
अन्यो अन्यमभिहर्यत वत्सं जातमिवाघ्न्या ॥
अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मा भ्राता भ्रातरं द्विक्षन्मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ।। ३. ३०. १-३

वसुधैव कुटुम्बकमिति सिद्धान्तेन स्पष्टमेव प्रतिभाति यत् कुटुम्बमेव स्पृहणीयसंस्थारूपेण सम्प्रतिष्ठितम्, यस्य सदस्याः परस्परं सौहार्दं सहानुभूतिं विश्वासं च तावन्मात्रमनुभवन्ति यावदन्यत्र दुर्लभमेव भवति । अन्यथा वसुधायाः कुटुम्बकत्वं कथमिच्छेत् ? प्राचीनकाले कौटुम्बिकसदस्यतामात्रेण व्यक्तित्वस्य विकासाय प्रचुरावसरोऽविद्यत ।

प्राचीनयुगे प्रारम्भत एव बृहत्कुटुम्बस्यायोजनं प्रमीयते । कुटुम्बस्य शाश्वतरूपेण सदस्याः—माता, पिता, पुत्रः, कन्या, भ्राता, स्वसा, पतिः, पत्नी चासन् । कुटुम्बेन सम्बद्धाः सुहृदो भृत्याश्च भवन्ति । अपरेऽपि सत्पुरुषाणां कुटुम्बे वसन्ति स्म । तथा हि महाभारते—

चत्वारि ते तात गृहे वसन्तु श्रियाभिजुष्टस्य गृहस्थधर्मे ।
वृद्धो ज्ञातिरवसन्नः कुलीनः सदा दरिद्रो भगिनी चानपत्या ।।

उद्योग ३३. ७०

एतेषु प्रत्येकस्य कुटुम्बे का प्रतिष्ठा, किमुत्तरदायित्वं चासीदिति विवेचनीयम् ।

मातापितरौ

भारते 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति प्रसिद्धमेव मातृ-गौरवप्रतिष्ठात्मकं वाक्यम् । पिता पुत्रस्य न केवलं जन्मदाता अपितु तस्य व्यक्तित्वस्य विकासकर्त्ताऽपि भवति । पितुः शासने पुत्रस्य सर्वोच्चकल्याणं विहितम् ।[1] वैदिककुटुम्बे पितुर्निरङ्कुशाधिकारोऽभवत् तद्यथा—ऋज्राश्वः स्वपित्रान्धीकृतो यतः स प्रजानां पशून् हिंसितवानिति श्रूयते । विश्वामित्रः स्वपञ्चाशत्पुत्रान् बहिष्कृतवान् । शुनःशेपस्य पिता तं विक्रीतवान् ।

शतपथब्राह्मणानुसारं यदा पिता प्रवासाद् गृहे समागच्छत् तदा पुत्राः तं शिवमुपस्पृशन्ति स्म, तस्मै सर्वाणि वस्तूनि प्रस्तुतानि कुर्वन्ति स्म च ।[2] पितरौ देवौ मतौ । तद्यथा—मातृदेवो भव, पितृदेवो भव इति महाभारते पितृकर्तव्यं निर्दिष्टम्—

पित्रा पुत्रो वयस्थोऽपि सततं वाच्य एव तु ।
यथा स्याद् गुणसंयुक्तः प्राप्नुयाच्च महद् यशः ।। आदि ४२. ४

महाभारतानुसारं पित्रोः पूजनं सर्वधर्माणां गरीयः कार्यम्, तद्यथा—

माता पित्रोर्गुरूणां च पूजा बहुमता मम ।
इह युक्तो नरो लोकान्यशश्च महदश्नुते ।।

---

१. पितेव कितवं शशास इति ऋग्वेदे २. ३३. १२ ।
२. शतपथे १२. ५. २. ७ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यच्च तेऽभ्यनुजानीयुः कर्म तात सुपूजिताः ।
धर्माधर्मविरुद्धं वा तत्कर्तव्यं युधिष्ठिर ॥
एत एव त्रयो लोका एत एवाश्रमास्त्रयः ।
एत एव त्रयो वेदा एत एव त्रयोऽग्नयः ॥

मात्रा समं तीर्थं गतिस्त्राणं प्रपा वा नास्ति । स्कन्दपुराणानुसारम्—

कुक्षौ संधारणाद्धात्री जननाज्जननी तथा ।
अङ्गानां वर्धनादम्बा वीरसूत्वेन वीरसूः ॥
शिशोः शुश्रूषणाच्छक्तिर्माता स्यान्माननाच्च सा ॥
पिता स्वर्गः पिता धर्मः पिता हि परमं तपः ।
पितरि प्रीतिमापन्ने सर्वाः प्रीणन्ति देवताः ॥

माहेश्वरखण्डे कुमारिकाखण्डे ४.८९-१०० श्लोकतः :

आदर्शजनपदस्येदमपि लक्षणमासीद्यत् तत्र—

न च पित्रा विभज्यन्ते पुत्रा गुरुहिते रताः । आदि० ६३.१२

रामायणे रामस्य चरितगाथा पित्रोराज्ञापालने सर्वोच्चं सम्प्रतिष्ठिता । तस्मिन्नेव युगे महाराजेनाशोकेन पित्रोः परिपालनमनुवर्तनं च प्रजासु प्रतिष्ठापयितुकामेन शिलालेखेषूत्कारितम्—साधु मातरि च पितरि च सुसूसा ।[1]

ये तु पित्रोः परित्यागं कुर्वन्ति स्म तेषां समाजे बहिष्कारोऽभवत् । तथा हि—

मातापित्रोरुज्झकः श्राद्धे नार्हति केतनम् । विष्णु० ३.१५.७-८

न केवलमिह जीवनकाले पित्रोः सन्तोषाय प्रयतितव्यम्, अपितु तयोर्मरणानन्तरेऽपि प्रतिदिनं तर्पणं कर्तव्यमेव ।

कृत्रिममातृत्वमपि क्वचित् स्निग्धतमं वर्तते । कश्मीरेषु 'सूय्या' इति काचिच्चाण्डालो महापथ-सम्मार्जनकाले मृत्तिकापात्रे निधापितं शिशुमेकं दृष्ट्वा सुतक्षोराभवत् । सा तु स्वस्पर्शेन शिशुं दूषितं नाकरोत्, किन्तु तं कस्यचित् शूद्रस्य गृहे निधाय तस्य सम्पोषणं कारयामास । स तु शिशुः कालान्तरे कश्मीराणां श्रेष्ठतमो यन्त्रविद् सुय्य इति विख्यातो बभूव ।[2]

---

१. गिरिनगरस्य तृतीये शिलालेखे ।
२. भागवते १०. ४५. २२ एतत्व सम्यक् समर्थितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुत्रः

भारतीयसंस्कृतौ पुत्रस्य वहुविधं महत्त्वं विद्यते । तथाहि—

पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः ।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ।। मनुस्मृतौ ९. १३९

'आत्मा वै जायते पुत्रः' इति सिद्धान्तेन सर्वश्रेष्ठमिदं साधनं पुत्रनाम येन पितुरमरत्वं सिध्येत् । पुत्राद्विना पितॄणामृणादपि मुक्तिर्न सम्भवति ।
यथा महाभारते प्रोक्तम्—

यतस्व यत्नवांस्तात सन्तानाय कुलस्य नः ।
आत्मनोऽर्थेऽस्मदर्थे च धर्म इत्येव वा विभो ।। आदिपर्वणि १३.२४

ऋषयस्तु वैदिकयुगे वहुसंख्यकपुत्रान् वीरान् वा प्राप्तुमकामयन्त[1] ।

सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ।। ऋग्वेदे १.९१.२०

परस्परमाश्रयणमपि पितापुत्रयो र्वैदिककालत एव विदितचरम् । तथा हि
'तस्मात् पूर्ववयसे पुत्राः पितरमुपजीवन्ति । उत्तरंवयसे पुत्रान् पितोपजीवति ।'[2] तस्मिन्युगे पुत्रं प्रति पितुः प्रेमप्रदर्शनस्य विधिरासीत् 'प्रियं पुत्रमुरसि धत्ते ।' मनुष्यलोकस्य विजयः पुत्रेणैवाशंसनीयोऽभवत् । नान्येन कर्मणा ।

महाभारते पुत्रस्य सार्थकत्वं प्रमाणितम् । स इह लोके परलोके च तारयति ।[3] तपसापि निरयपतनाद्रक्षा न भवति ।

महाभारते पुत्रस्यात्मवत्त्वं स्पष्टं प्रदर्शितम्—

त्वदङ्गेभ्यः प्रसूतोऽयं पुरुषात् पुरुषोऽपरः ।
सरसीवामलेऽऽत्मानं द्वितीयं पश्य वै सुतम् ।।
यथा ह्याह्वनीयोऽग्निर्गार्हपत्यात् प्रणीयते ।
तथा त्वत्तः प्रसूतोऽयं त्वमेकः सन् द्विधा कृतः।। आदि ७४.६५-६६

महाभारतयुगस्य पुत्रस्नेहस्य मनोहारि निदर्शनमित्थं प्राप्यते—

न वाससां न रामाणां नापां स्पर्शस्तथाविधः ।
शिशोरालिङ्ग्यमानस्य स्पर्शः सूनोर्यथा सुखः ।।

---

१. ऋग्वेदे ७.१.११, १२, १९, २४; ३.१६. ५—६
२. शतपथे १२. २. ३. ४
३. इह वा तारयेद् दुर्गादुत वा प्रेत्य भारत ।
सर्वथा तारयेत्पुत्रः पुत्र इत्युच्यते बुधैः ।। आदिपर्वणि १५८.५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्पृशतु त्वां समाश्लिष्य पुत्रोऽयं प्रियदर्शनः ।
पुत्रस्पर्शात् सुखतरः स्पर्शो लोके न विद्यते ॥

पुण्यार्जनदिशायामपि पुत्रोत्पत्तेर्महत्त्वं सुप्रतिष्ठितमेव । तथाहि—

वरं कूपशताद् वापी वरं वापीशतात् क्रतुः ।
वरं क्रतुशतात्पुत्रः सत्यं पुत्रशताद्वरम् ॥ आदिपर्वणि ७४.१०२

परवर्तियुगे कालिदासः पुत्रसंगमसुखं वर्णयतिस्म—

आलक्ष्यदन्तमुकुलाननिमित्तहासै—
र्व्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान्वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥

कन्या

कुटुम्बे कन्यायाः समादर आसीत्। वैदिकाले भ्रातुर्भगिनीं प्रति सहायशीलत्वं स्मरणार्हमेवाभवत् ।[१] तदा कन्याया विवाहः पितृभ्यां गम्भीरसमस्या नासीत् । ब्रह्मचर्येण कन्या युवानं विन्दते पतिमिति प्रसिद्धम् । इदमेव परिलक्ष्य कुटुम्बेऽपि कन्याया व्यक्तित्वविकासाय प्रयत्नोऽक्रियत । तत्र बहवः कन्या नैष्ठिकब्रह्मचारिण्यो विदुष्यश्चाभवन् ।

विवाहस्य पश्चात्कन्या पितुर्गृहात् पतिगृहं गच्छति । अनेन कारणेन कन्यायाः स्थानं कदापि कस्मिंश्चिद्देशेऽपि पुत्रसमं नाभिमतम् । पुत्रस्तु पितुर्वृद्धावस्थायां सहायो भवति । तथापि कन्यायाः व्यक्तित्वे कोऽपि विशेषो वर्तते येन सा पितुः स्नेहास्पदं भवति ।[२] अथ किम्—केचित् पितरः पण्डिता दुहिता जायेत' इतीच्छन्ति स्म ।[३]

परवर्तियुगे धार्मिकदृष्टया कन्याया महिमा समवर्धत । तथाहि महाभारते काचित्कन्या भाषते—

आकांक्षन्ते च दौहित्रान् मयि नित्यं पितामहाः । आदिपर्वणि १५८.६

तस्याः पिता स्वमतं प्रदर्शयति—

मन्यते केचिदधिकं स्नेहं पुत्रे पितुर्नराः ।
कन्यायां केचिदपरे मम तुल्यावुभौ स्मृतौ ॥[४]

---

१. ऋग्वेदे १.६५.४

२. नित्यं निवसते लक्ष्मीः कन्यकासु प्रतिष्ठिता ।

३. बृहदारण्यकोपनिषदि ६.४.१७

४. राज्यश्रीविषये तस्य माता यशोवती कथयति—केवलं कृपाकृत विशेषः सुदूरेण तनयस्नेहादतिरिच्यते दुहितृस्नेहः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यस्यां लोकाः प्रसूतिश्च स्थिता नित्यमथो सुखम् ।
अपापां तामहं बालां कथमुत्स्रष्टुमुत्सहे ।। आदिपर्वणि १५६.३७,८३

महाभारतकाले राज्यभागिनी कन्यापि विभाविता ।

विवाहकाल एव कन्यायाः स्थितिश्चिन्तनीयासीत् । तद्यथा सीता रामायणे निवेदितवती—

पतिसंयोगसुलभं वयो दृष्ट्वा तु मे पिता ।
चिन्तामभ्यगमद्दीनो वित्तनाशादिवाधनः ।। अयोध्या ११९.३५

कालिदासोऽपि समर्थयति—

अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ।।

पञ्चतन्त्रेऽपि तन्त्रीयं श्रूयते—

पुत्रीति जाता महतीह चिन्ता कस्मै प्रदेयेति महान्वितर्कः ।
दत्त्वा सुखं प्राप्स्यति वा न वेति कन्यापितृत्वं खलु नाम कष्टम् ।।

प्रतिपादितं तत् सोमदेवेन—

स्थानप्राप्तिविहीना हि गीतिवत्कुलकन्यका ।
उद्वेजिनी परस्यापि श्रूयमाणैव कर्णयोः ।।
विद्येव कन्यका मोहादपात्रे प्रतिपातिता ।
यशसे न न धर्माय जायेतानुशयाय तु ।। कथासरित्सागरे ५.१.२५–२६

तथापि क्वचित् पुरापि कन्यका विवाहादि-विषये स्वतन्त्रा बभूवुः । सा तु स्वयमेव मातापितृसमक्षं वरणीयं जनं प्रस्तावितवती ।[1]

कन्यकाभ्यः कुलगृहे ललितकलाभिः क्रीडाभिः कौतुकविनोदविलासादिभिश्च मनोरञ्जनं वैदिककालादेव दृश्यते । पार्वत्या आदर्शेन भारते कन्यात्वं शाश्वतरूपेण प्रतिष्ठितम् ।

भ्राता

भ्रातुर्ज्येष्ठाधिकारो वैदिककालादेव दृश्यते । तद्यथा—कनीयसो भ्रातुर्विवाहो ज्येष्ठस्य विवाहात्प्राङ् न कर्तव्य इति ।[2] सम्भवतो ब्राह्मणानां कुटुम्बेषु धर्माभ्युदयार्थमेव भ्रातॄणां समवेतवसनं न साधु सम्मतम् । गौतमानुसारं विभागे धर्मवृद्धिः ।[3] अस्यां दिशायां मनुमतमुचितं प्रतिभाति—

---

१. महाभारते आदिपर्वणि ७६.२९ ।
२. अथर्ववेदे ६.११२ ।
३. गौतमे २८.४ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया ।
पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया ॥ ९.१११

समर्थयति वृहस्पतिः—

एकपाकेन वसतां पितृदेवद्विजार्चनम् ।
एकं भवेद् विभक्तानां तदेव स्याद् गृहे गृहे ॥

महाभारते व्यावहारिकदृष्ट्या भ्रातॄणां विभागोऽवाञ्छनीय एव ।

तद्यथा—

विभागं बहवो मोहात् कर्तुमिच्छन्ति नित्यशः ।
ततो विभक्तास्त्वन्योन्यं विक्रुध्यन्तेऽर्थमोहिताः ॥
ततः स्वार्थपरान् मूढान् पृथग्भूतान् स्वकैर्धनैः ।
विदित्वा भेदयन्त्येतानमित्रा मित्ररूपिणः ॥
विदित्वा चापरे भिन्नानन्तरेषु पतन्त्यथ ।
भिन्नानामतुलो नाशः क्षिप्रमेव प्रवर्तते ॥[1]

भ्रातॄणां पारस्परिकव्यवहारमादर्शयता व्यासेन प्रोक्तम्—ज्येष्ठो भ्राता कनीयसः प्रति तथा व्यवहरेद्यथाचार्यः शिष्यं प्रति व्यवहरति । कनीयांसो गुरुमेवानुवर्तन्ते । ज्येष्ठो दीर्घदर्शी भवेत्तर्हि कनीयांसोऽपि तादृशा भवन्ति । ज्येष्ठो यथाकालमन्धो जडो विद्वान्वा भवेत् । कनीयसामपराधं दृष्ट्वापि न जानामीति दर्शयेत्, तथापि तेषामपराधप्रवृत्ति निरोद्धुं यतेत । यदि ज्येष्ठभ्रातुर्विचारोऽशुद्धो भवति तर्हि समस्तं कुलं विनश्यति । स तु सुनीतिपथेन कुलमुन्नतपदं नयति । यदि ज्येष्ठोऽपि सन् कौटिल्यमाचरेत्तर्हि स स्वपदार्हो न भवति, न च ज्येष्ठांशभाग्भवति । राजा तं दण्डयेत् । यदि कनीयान् भ्रातापि पापकर्मणि रतस्तर्हि सोऽपि पैतृकसम्पत्तौ स्वभागस्याधिकारी न भवति ।[2] महाभारते पाण्डवानाम्, रामायणे रामादीनां भ्रातृत्वं स्मरणार्हमेव ।

पितेव पालयेत् पुत्राञ्ज्येष्ठो भ्रातॄन्यवीयसः ।
पुत्रवच्चापि वर्तेरञ्ज्येष्ठे भ्रातरि धर्मतः ॥
ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः ।
ज्येष्ठः पूज्यतमो लोके ज्येष्ठः सद्भिरगर्हितः ॥
यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः ।
अज्येष्ठवृत्तिर्यस्तु स्यात्स संपूज्यस्तु बन्धुवत् ॥ ९.१०८-१११

ज्येष्ठयवीयसोर्भार्ययोर्विषये भ्रातॄणां मान्यतां निदर्शयता मनुना प्रोक्तम्—

---

१. आदिपर्वणि २९.१८—२० । अस्मिन् प्रसंगे सुप्रतीकविभावस्वोः कथा तत्रैव द्रष्टव्या ।
२. महाभारतेऽनुशासनपर्वणि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भ्रातुर्ज्येष्ठस्य भार्या या गुरुपत्न्यनुजस्य सा ।
यवीयसस्तु या भार्या स्नुषा ज्येष्ठस्य सा स्मृता ।। ९.५७

रामायणे सीतालक्ष्मणयोः परस्परव्यवहार आदर्श एव ।

श्रेष्ठभ्रातॄणां कतिपयकथा इतिहासप्रसिद्धाः सन्ति । कश्मीरेषु अवन्तिवर्मा इति विख्यातो वैष्णवो राजा स्वभ्रातरं शूरं प्रसादयितुमेवात्मानं शैवमुपादर्शयत् । तद्यथा राजतरङ्गिण्याम्—

छन्दानुवर्ती भूपालो दैवतस्यैव मन्त्रिणः ।
आबाल्याद्वैष्णवोऽप्यासीच्छैवतामुपदर्शयन् ।। ५.४३

लघुभ्राता ज्येष्ठभ्रातुः समक्षं स्वपुत्रादीन् प्रति प्रेमव्यवहारं न प्रादर्शयत् ।[M]

गृहपतिः पत्नी च

गृहपतिः कुटुम्बस्य स्वामी बभूव । कुटुम्बस्य सर्वेषां भरणं पोषणमतिथीनां पूजनं धर्मक्रियाकलापानां सम्पादनं तथा कुलसदस्यानां व्यक्तित्वविकासनं च प्रधानतस्तस्यैवोत्तरदायित्वमभूत् । तस्य पत्नी तेषु सर्वेषु कार्येषु सहायाभूत् । तदेव पर्यालोच्य मनुना निर्दिष्टम्—

देवातिथिभृत्यानां पितॄणामात्मनश्च यः ।
न निर्वपति पञ्चानामुच्छ्वसन्न स जीवति ।।

गृहपतये एकपत्नीव्रतमेवादर्श आसीत् ।[1] दम्पतीशब्देन तदेवाभिव्यक्तं भवति ।[2] सपत्नीसंकुलं गृहं कलहस्थानमेव निर्दिष्टम् ।[3] तदधिकृत्य कूपे पतितस्त्रित आत्मगतं निवेदयति—तामां तपन्त्यभितः सपत्नीरिव पर्शवः ।[4] बहुपत्नीत्वं सुश्रीकत्वं द्योतयतीति वैदिकी धारणा ।[5] हरिश्चन्द्रः शतभार्यो बभूव ।[6] महर्षेर्याज्ञवल्क्यस्य कात्यायनी मैत्रेयी च द्वे भार्ये बभूवतुः ।

M. भासस्य पाञ्चरात्रे युधिष्ठिरस्य समक्षमर्जुनस्याभिमन्युं प्रति व्यावृत्तिः परिकल्पिता ।

१. बहुपत्नीत्वमपि वैदिककालतो दृश्यते । यथा ऋग्वेदे १०.१४५

२. ऋग्वेदे ५ ३.२,८ ३१.५; १०.६८.२

३. ऋग्वेदे १०.१५९

४. ऋग्वेदे १.१०५.८

५. श्रिया या एतद्रूपं यत्पत्नयः तैत्तिरीयब्राह्मणे ३.८ ४

६. ऐतरेयब्राह्मणे ३३.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परवर्तियुगे सपत्नीनां समाहारः परिहर्तव्य इति विधानं वर्तते सूत्र-स्मृतिषु। 'धर्म-प्रजासम्पन्ने दारे नान्यां कुर्वीत'।[१] पत्नी चेत् कटुवादिनो सदोषा वा भवेत्तर्हि त्याज्या सा।[२] ईदृशेषु विधानेषु भूतेष्वपि समृद्धिशालिनः राजानश्च शतं सहस्रं वा पत्नीः विलासार्थं स्वीकुर्वन्ति स्म।

पत्न्याः पातिव्रत्यं श्रेष्ठधर्म इति वैदिकसाहित्ये प्रादर्शि। तद्यथा वृद्धच्यवनस्य युवती पत्नी निवेदयति—यस्मै मां पिताऽदान्नैवाहं तं जीवन्तं हास्यामीति।[३] मनुनापि पातिव्रत्यमधिकृत्य प्रोक्तम्—

विशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः।
उपचर्यः स्त्रिया साध्व्या सततं देववत्पतिः॥ ५.१५४

रामायणानुसारं पतिः पत्न्याः जीवनकाले देवः स्वामी चास्ति। सा पतिसेवया सुगतिं प्राप्नोति।[४] कालिदासोऽपि समर्थयति—

तदेषा भवतः कन्या त्यज वैनां गृहाण वा।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी॥

दम्पत्योः पारस्परिकसद्भावनां प्रतिष्ठापयन् मनुः प्राह—

अन्योन्यस्याव्यभीचारो भवेदामरणान्तिकः।
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः॥
तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ।
यथा नाभिचरेतां तौ वियुक्तावितरेतरम्॥९.१०१-१०२

महाभारतमादर्शभार्यां परिभाषते

सा भार्या या गृहे दक्षा सा भार्या या प्रजावती।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता।
अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा।
भार्या मूलं त्रिवर्गस्य भार्या मित्रं मरिष्यतः॥आदि० ६८.३९-४१

महाभारते दाम्पत्यजीवनस्यानुपमं निदर्शनं द्रौपदीसत्यभामयोः संवादे विद्यते। द्रौपदी स्वजीवनविन्यासं वर्णयति—

---

१. आपस्तम्बगृह्यसूत्रे २.५, ११.१२-१३। कामसूत्रेऽपि समर्थितमेतत्। ४.२.१; ४.१.१।

२. मनुस्मृतौ ५.८०-८१।

३. शतपथे ४.१.५.९।

४. रामायणे अयोध्याकाण्डे २४.२६-२७। तदेव महाभारते।
पतिर्हि देवो नारीणां पतिर्बन्धुः पतिर्गतिः। अनुशासने १४६.५५।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाभुक्तवति नाऽस्नाते नासंविष्टे च भर्तरि ।
न संविशामि नाश्नामि सदा कर्मकरेष्वपि ॥
क्षेत्राद्वनाद्वा ग्रामाद् वा भर्तारं गृहमागतम् ।
अभ्युत्थायाभिनन्दामि आसनेनोदकेन च ॥
प्रमृष्टभाण्डा मृष्टान्ना काले भोजनदायिनो ।
संयता गुप्तधान्या च सुसम्मृष्टनिवेशना ॥
यच्च भर्ता न पिबति यच्च भर्ता न सेवते ।
यच्च नाश्नाति मे भर्ता सर्वं तद् वर्जयाम्यहम् ॥
नित्यमार्यामहं कुन्तीं वीरसूं सत्यवादिनीम् ।
स्वयं परिचराम्येतां पानाच्छादनभोजनः ॥
नैतामतिशये जातु वस्त्रभूषणभोजनैः ।
नापि परिवदे चाहं तां पृथां पृथिवीसमाम् ॥
अधृष्यं वरुणस्येव निधिपूर्णमिवोदधिम् ।
एकाहं वेद्मि कोशं वै पतीनां धर्मचारिणाम् ॥
प्रथमं प्रतिबुध्यामि चरमं संविशामि च ।
नित्यकालमहं सत्ये एतत् संवननं मम ॥ वन०

यत्तु कथ्यते—यत्र नार्यस्तु पूज्यन्ते-तद्धि सत्यमेव । महाभारतानुसारं तु दुष्यन्तः 'वासोभिरन्नपानैश्च पूजयामास भारत' इति शकुन्तलाविषये तथ्यम् । सन्तोषजननमेव पूजा स्त्रीणाम् । मनुस्मृतावपि महाभारतीयादर्शाः समर्थिता विद्यन्ते।[1]

पत्नीनां गृहस्यार्थिकविनियोजनेऽधिकारोऽविद्यतेति कामसूत्रेऽपि प्रतिपादितम्—सांवत्सरिकमायं संख्याय तदनुरूपं व्ययं कुर्यात् । अपरं च साधारणगृहेषु पत्नीनां कर्तव्यं किमासीदिति कामसूत्रे निर्दशितम् । तद्यथा—भोजनावशिष्टाद् गोरसात् सारग्रहणं तथा तैलगुडयोः कर्पासस्य च सूत्रकर्तनम्, सूत्रस्य वानम्, शिक्यरज्जुपाशबल्कल-संग्रहणम्, कुट्टनकण्डनावेक्षणम्, आचाममण्डतुषकणकुटचङ्गाराणामुपयोजनम्, भृत्यवेतनभरणज्ञानम्, कृषिपशुपालनचिन्तावाहनविधानयोगाः, मेषकुक्कुटलावकशारिकापरभृतमयूरवानरमृगाणामवेक्षणम्, दैवसिकायव्ययसपिण्डीकरणमिति विद्यात् ।[2] वात्स्यायनानुसारं तु पत्नीकापि मूर्तिमती देवी बभूव ।[3]

ईदृशी पत्नी तु त्रिवर्गसाधनमासीत्, न केवलं कामभोगसाधनम् ।

---

१. महाभारते आदिपर्वणि ६९.४३; मनुस्मृतौ ५.१५०; ९. ११,१३ ।
२. कामसूत्रे ४. १. ३२; ४.१.३३ ।
३. कुटुम्बचिन्तामात्मनि सन्निवेशयेत्''''''वृक्षवाटिकायां च स्थण्डिलानि मनोज्ञानि कारयेत् । कामसूत्रे ४.१.६-७ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भागवते दाम्पत्यजीवनस्य दिव्यत्वं प्रतिष्ठितम् । तथाहि—

या पतिं हरिभावेन भजेच्छ्रीरिव तत्परा ।
हर्यात्मना हरेर्लोके पत्या श्रीरिव मोदते ।। ७.११.२९

प्रियया सह नर्ममनोविनोदोऽपि सम्भवतीति भागवते निदर्शितम् । तद्यथा—

अयं हि परमो लाभो गृहेषु गृहमेधिनाम् ।
यन्नर्मैर्नीयते यामः प्रियया भीरु भामिनि ।। १०.६०.३१

भारतीयकौटुम्बिकजीवने द्राम्पत्यस्योच्चादर्शः पार्वतीशिवयोः, सावित्रीसत्यवतोः, दमयन्तीनलयोः, सीतारामयोश्चरितगाथासु प्रतिष्ठितः । काव्येषु दाम्पत्यस्य ललितभावः प्रायशः प्राप्यते । तथाहि कालिदासस्योक्तिः—

'गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ' इति ।

प्रतिवेशिनः सुहृदश्च

कौटुम्बिकसंस्थाने प्रतिवेशिनां सुहृदां च महत्त्वपूर्णं पदं विद्यते । कौटुम्बिकविकासे तेषां सहायत्वं वांछितम् । वैदिककालत एव मैत्रीभावस्य दिव्यादर्शः समाजस्य समक्षमभूत् । द्यावापृथिव्यौ इन्द्राविष्णू मित्रावरुणौ च मित्रोचितसाहचर्यं प्रतिष्ठापयन्ति तदनुसृत्य ऋग्वेदे निगदितम्—

यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।। १०.७१.६

महाभारते सन्मित्रस्य प्रशंसा कृता—

यौनात्सम्बन्धाल्लोके विशिष्टं संगतं सताम् ।
सद्भिः सह नरश्रेष्ठ प्रवदन्ति मनीषिणः ।। द्रोणपर्वणि ४.१३

रामायणेऽपि मित्रस्यौदात्त्यं प्रदर्शितम्—

आढ्यो वापि दरिद्रो वा दुःखितः सुखितोऽपि वा ।
निर्दोषो वा सदोषो वा वयस्यः परमा गतिः ।।
धनत्यागः सुखत्यागः देहत्यागोऽपि वा पुनः ।
वयस्यार्थे प्रवर्तन्ते स्नेहं दृष्ट्वा तथाविधम् ।। किष्कि०'८.८-९

मैत्रीभावस्य समारम्भः सोत्सवं सोल्लासं च धार्मिकविधिना सम्पादितः । रामसुग्रीवयोरग्निसाक्षिको मैत्रीसमारम्भो रामायणे वर्णितः—

रोचते यदि वा सख्यं बाहुरेष प्रसारितः ।
गृह्यतां पाणिना पाणिर्मर्यादा बध्यतां ध्रुवा[1] ।।

---

१. मित्राणां संगमने पाणिपीडनरीतिरासीदिति पद्मपुराणे ।
हस्तैर्हस्तान् स्पृशन्तीव सुहृदश्चिरसंगताः ।। सृष्टिखण्डे १५.३९ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एतत्तु वचनं श्रुत्वा सुग्रीवेण सुभाषितम् ।
स प्रहृष्टमना हस्तं पीडयामास पाणिना ।।
हृद्यं सौहृद्यमालम्ब्य पर्यष्वजत पीडितम् ।
ततो हनूमान् संत्यज्य भिक्षुरूपमरिन्दमः ।।
काष्ठयोः स्वेन रूपेण जनयामास पावकम् ।
दीप्यमानं ततो वह्निं पुष्पैरभ्यर्च्य सत्कृतम् ।।
तयोर्मध्येऽथ सुप्रीतो निदधे सुसमाहितः ।
ततोऽग्निं दीप्यमानं तौ चक्रतुश्च प्रदक्षिणम् ।।
सुग्रीवो राघवश्चैव वयस्यत्वमुपागतौ ।
त्वं वयस्योऽसि मे हृद्यो ह्येकं दुःखं सुखं च नौ ।
सुग्रीवं राघवो वाक्यमित्युवाच प्रहृष्टवत् ।।

किष्किन्धाकाण्डे ५. १२-१९

तस्मिन् रामायणयुगे मैत्रीभावः पूज्य आसीत्, तदनुकूला धारणासीत्—उपकार-फलं मित्रम् ।[१]

एतत्सर्वं पुनः पुनः प्रपञ्चितं पञ्चतन्त्रे । तथा हि

किं चन्दनैः सकर्पूरैस्तुहिनैः किं च शीतलैः ।
सर्वे ते मित्रगात्रस्य कलां नार्हन्ति षोडशीम् ।। २.६१
केनामृतमिदं सृष्टं मित्र मित्यक्षरद्वयम् ।
आपदां च परित्राणं शोकसन्तापभेषजम् ।। २.६२

सर्वेषूत्सवेषु प्रतिवेशिनां सहभोगोऽपेक्षितोऽभिमतः । तद्यथा मनुः—

प्रतिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे ।
अर्हावभोजयन्विप्रो दण्डमर्हति माषकम् ।। ८.३९२

मत्स्यपुराणेऽपि तदेव प्रतिपादितम् । ब्राह्मणान् भोजयन् यः प्रतिवेश्यान्नामन्त्रयति स पापभाग्भवति पुण्यं नार्हति च । स तु राज्ञा दण्डनीयः ।[२]

भृत्याः

भृत्यस्य कौटुम्बिकविन्यासे महत्त्वमासीत् । यथा रामायणे निगदितम्—

---

१. किष्किन्धाकाण्डे ७.१४,८.२१ ।
२. मत्स्यपुराणे २२७ अध्याये ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न ह्यर्थास्तत्र तिष्ठन्ति न दारा न च बान्धवाः ।
सुप्रीतो भृत्यवर्गश्च यत्र तिष्ठति राघव ॥ उत्तरकाण्डे ८४.६

भृत्यास्तु गृहे सुखं निवसन्ति स्म । तद्यथा मनुर्विहितवान्—

भुक्तवत्स्वथ विप्रेषु स्वेषु भृत्येषु चैव हि
भुञ्जीयातां ततः पश्चादवशिष्टं तु दम्पती ॥ ३.११६

पञ्चतन्त्रानुसारं तु कस्यचिद् राज्ञोऽपि अभ्युदयार्थं भृत्यैः सह सद्व्यवहार आवश्यकः तद्यथा—

कारुण्यं संविभागश्च यस्य भृत्येषु सर्वदा ।
सम्भवेत् स महीपालस्त्रैलोक्यस्य रक्षणे ॥

कौटुम्बिकं सौरभ्यम्

न केवलमिह जीवनेऽपितु परस्मिन्नपि जीवने कौटुम्बिकजनैः सह सम्मिलनं स्यादिति प्रमाणितमथर्ववेदे—

स्वर्गं लोकमभि नो नयासि सं जायया सह पुत्रैः स्याम ।
गृह्णामि हस्तमनु मैत्वत्र मा नस्तारीन्निर्ऋतिर्मो अरातिः १२.३.१७

यद्यपि बहुसन्तानैः कष्टत्वं नैसर्गिकमेवानुबुद्धम्[1], तथापि कुटुम्बस्य वैपुल्यं वांछनीयमेव । तथाहि महाभारते—

येषां च बहवः शूरा ज्ञातयो धर्ममाश्रिताः ।
ते जीवन्ति सुखं लोके भवन्ति च निरामयाः ।
बलवन्तः समृद्धार्था मित्रबान्धवनन्दनाः ।
जीवन्त्यन्योन्यमाश्रित्य द्रुमाः काननजा इव ॥

आदि १५०.३४-३५

धार्मिकक्रियाकलापेषु कुटुम्बस्य प्रायः सर्वे सदस्याः सहकारिणो बभूवुः ।[2] अनेन

१. ऋग्वेदे १.१६४.३२ ।

2. The sacrificer's near relatives who always share the same roof form a family. The Yajamana touches the Adhvaryu, the wife touches the sacrificer, the sons and brothers of the sacrificer touch the wife. They are all covered with a fresh piece of cloth. History of Dharmasastra Vol II, pt II, p. 1158,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकारेण सह पुण्यार्जनमभवत्। पापनिवारणमपि सर्वेषां सह भवत्विति योजनाथर्ववेदे वर्तते—

यन्मे माता यन्मे पिता भ्रातरो यच्च मे स्वा यदेनश्चकृमा वयम्।
ततो नो वारयिष्यतेऽयं देवो वनस्पतिः ॥ १०.३.८

यदि कोऽपि जनः स्वकुटुम्बस्य सदस्यानधिक्षिपति स्म तर्हि सामाजिकाः तं धिक्कुर्वन्ति स्म। राजापि कौटुम्बिकशालीनतायाः प्रतिष्ठायै प्रायतत। तत्र विधानमासीत् मनुस्मृतौ—

मातरं पितरं जायां भ्रातरं तनयं गुरुम्।
आक्षारयञ्छतं दाप्यः पन्थानं चाददद् गुरोः ॥ ८.२७५

कौटुम्बिकविन्यासो न केवलमात्मसम्बन्धिनामुपकारायाभ्युदयाय वा भवति, अपितु तेनात्महितं सिध्यतीति पुराविदां धारणासीत्। तथा हि बृहदारण्यके आत्मार्थस्य व्याख्या कृता—

न वारे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति। इत्थं जाया, पुत्रः, वित्तम्, देवाः, सर्वाण्यप्यात्मनः कामाय प्रियाणि भवन्ति।[1]

सम्पत्त्यधिकारः

कुटुम्बस्य कतिपयसदस्यानां कुटुम्बसम्पत्तौ स्वामित्वमासीत्। यदि तेषु सदस्येषु कोऽपि स्वभागं पृथक्कर्तुमियेष स तत्कालीनधर्मव्यवस्थया तं भागं प्राप्तवान्। धर्मपदावलीषु—विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनम्।

वैदिकयुगे पितुर्जीवनकालेऽपि पुत्रः स्वभागं प्राप्तुमशक्नोत्।[2] ईदृशः पुत्रः सामान्यतः नासीत्। गौतमानुसारं—न भोजयेत्....पित्रा वाकामेन विभक्तान्।[3] पितरि मृते प्रव्रजिते वा पुत्राणामिच्छानुसारं विभागो निर्णीतः। प्रायो वयस्कानामेव विभागोऽभवत्। बालकानां भागा मातृबन्धुषु ग्रामवृद्धेषु वा स्थापिताः।[4] मनुस्मृतावविभाज्यानि निर्दशितानि—

वस्त्रं पत्रमलङ्कारं कृतान्नमुदकं स्त्रियः।
योगक्षेमं प्रचारं च न विभाज्यं प्रचक्षते ॥ ९.२१९

---

१. बृहदारण्यके ४.५.६।
२. ऋग्वेदे १.७०.५; तैत्तिरीयसंहितायाम्। ३.१.९.४।
३. गौतमे १५.१५, १९।
४. अर्थशास्त्रे ३.५।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्पत्तौ स्त्रीणामधिकारोऽभवत् । सामान्यतो विभागार्थं तासां गणना पुत्रसमं कृता ।

अस्पृश्यता

वैदिकयुगेऽस्पृश्यतायाः प्रादुर्भावो नासीत् । शनैः शनैः आहारशुद्धेः विवेकः समवर्धत । ब्राह्मणा अपि साधारणतः सहभोजनं नाकुर्वन् ।[१] अस्यां दिशायां सम्बन्धमात्रेणाशुद्धेः कल्पना कृता । समाजे ये जनाः सात्त्विकवृत्तेः परावर्तितास्तेषां वस्तूनि न ग्राह्याणीति स्पष्टविचारः प्रतीयते ।

अपरं च संसर्गदोषेण दूषणमिति विचार आसीत् । संस्कृतिविहीना जना एवास्पृश्याः । स्पर्शने तेषां दुर्वृत्तीनां सम्प्रतिपत्तिः स्यादिति । तथापि प्रारम्भिकयुगेऽस्पृश्यताया वैषम्यं नातिकठोरमिति प्रतिभाति स्मृतिवचनेन—

देवयात्राविवाहेषु यज्ञप्रकरणेषु च ।
उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टं न विद्यते ॥ अत्रिस्मृतौ २४७

धार्मिककार्येषु यज्ञादिषु शूद्रा म्लेच्छाश्चामन्त्रिताः सम्मानिताश्चेति निःसन्दिग्धमेव ।[२]

एकलव्यस्तु निषाद आसीत् । स तु द्रोणाचार्यस्य पादयोः शिरो निधाय तं प्रणनाम ।[३] पद्मपुराणानुसारं चाण्डालरूपधरमपि विष्णुं प्रति विष्णुदासः स्वागतं व्याजहार । न खलु तत्रासीत् महतां समक्षमस्पृश्यतायाः समस्या । तेषां मतेन तु सर्वं जगत् एकमूलमेव वर्तते । ब्रह्मणो जगत् सर्वम् । अथवा मन्वनुसारं तु—

ऋषिभ्यः पितरो जाताः पितृभ्यो देवमानवाः ।
देवेभ्यस्तु जगत्सर्वं चरं स्थाण्वनुपूर्वशः ॥ ३.२०१

अतो जातिवैषम्याधारिता अस्पृश्यता नामाविवेकिनां दुराग्रहमात्रम् ।

दासः

वैदिककालत एव भारते दासानामुल्लेखाः प्राप्यन्ते । दासानां स्थितिः प्रायशः कुटुम्बस्य सदस्यवदासीत् । तानधिकृत्यैकमेवासीद्वैषम्यं यत्तेषां दानं विक्रयो वा सम्भव आसीत् । दासं प्रति सप्रेम व्यवहर्तव्यमिति शिलालेखेऽशोकेन प्रचारितम् ।[४]

---

१. नैषधीयचरिते १७-१९८ ।

२. रामायणे बालकाण्डे १३. १३, १८ ।

३. महा० आदि० १२३.१२

४. राजाज्ञानुसारं जनानां विक्रयोऽभवत् । राजत० ४.३९७ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजकीयकुटुम्बेष्वसंख्यदासा आसन् । तेषां जीवनविन्यासः प्रायः विलासपूर्णः सुखमयश्चाभूत् ।[१] युधिष्ठिरस्य दासानां वर्णनं महाभारते लभ्यते । तदनुसारम्—

शतं दासीसहस्राणि तरुण्यो हेमभद्रिकाः ।
कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलंकृताः ॥
महार्हमाल्याभरणः सुवस्त्राश्चन्दनोक्षिताः ।
मणीन् हेम च बिभ्रत्यश्चतुःषष्टिविशारदाः ।
अनुसेवां चरन्तीमाः कुशला नृत्यसामसु ॥ सभा० ६१·८.१०

दासा अपि—

प्रदक्षिणानुलोमाश्च प्रावारवसनाः सदा ।
प्राज्ञा मेधाविनो दान्ता युवानो मृष्टकुण्डलाः ।
पात्रीहस्ता दिवारात्रमतिथीन् भोजयन्त्युत ॥ ६१·१२-१३

मनुः सप्तविधदासानामुल्लेखं कृतवान् । तथा हि—

ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्त्रिमौ ।
पैतृको दण्डदासश्च सप्तैते दासयोनयः ॥ ८.४१५

महाभारतयुगेऽपि दासत्वस्य वैषम्यं घृणास्पदमभिमतम् । तद्यथा—

मानुषा मानुषानेव दासभावेन भुञ्जते ॥ शान्ति० २६२.३८

अर्थशास्त्रे दासानां स्वातन्त्र्यस्य विधानमौदार्यपूर्णमेव विहितं दृश्यते ।

समाजं प्रति व्यक्तिः

प्राचीनभारते मानवस्य वैयक्तिकपरिधिरसीम आसीत् । पुरा हि 'केवलादी भवति केवलाघः' इति सिद्धान्तेन स्वार्थवृत्तेर्हेयत्वं निर्दर्शितमेव ।[२] सूर्यवद् भवितुं पुरातनः कविः प्रार्थयते—दिशामेकपुण्डरीकोऽसि । अहं मनुष्याणामेकपुण्डरीकं भूयासम् । तदेवानुसृत्य छान्दोग्ये प्रोक्तम्—यो वै भूमा तत्सुखं नाल्पे सुखमस्ति ।

महाभारतानुसारं तु—

सर्वेषां यः सुहृन्नित्यं सर्वेषां च हिते रतः ।
कर्मणा मनसा वाचा स धर्मं वेद जाजले ॥

---

१. महाभारतानुसारं स्वयमर्जुनो विराटनगरे राजदासीभ्यो ललितकलानां शिक्षामदात् । अर्थशास्त्रेऽपि राजदासीना शिक्षणस्य राजकीयव्यवस्थाया वर्णनं विद्यते ।

२. वैदिकास्तु सहस्रपोष्या भवितुमैच्छन् । ऋग्वेदे ६.३५.१ ।
अपरं च—पुमान् पुमांसं परिपातु विश्वतः । ऋग्वेदे ६.७५.१४
शतहस्तसमाहर सहस्रहस्त संकिर । अथर्ववेदे ३.२४.५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न तत्परस्य संदध्यात् प्रतिकूलं यदात्मनः।

कुन्ती भीममशिक्षयत्—कृतज्ञतैव जीवनम्। उपकारिणोऽधिकतरमुपकारं कुरु। गीतायां 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि' इति धारणायाः श्रेष्ठत्वं प्रसाधितम्। लोकसंग्रह एव गीतायां सर्वोच्चप्रवृत्तिरूपेण प्रतिष्ठितः।

महाभारते पुनः पुनः प्रतिपादितं यदवमन्ता विनश्यति। न हि कश्चित् ज्येष्ठः श्रेष्ठो वा अवमन्तव्यः। अमन्तुः सर्वं पुण्यं क्षीणं भवति। परिणामतः स स्वर्गादपि च्युतो भवति।[1]

गौतमेनापि समर्थितम्—

यथाहं तथा एते यथा एते तथा अहं।
अत्तानं उपमं कत्वा न हनेय्यं न घातये॥
यथा मम परेषां च भयं दुःखं च न प्रियम्।
तदात्मनः को विशेषो यत्तं रक्षामि नेतरम्॥

तदनुसृत्याशोकेनोत्कारितम्—कतटवमते हि मे सर्वलोकहितं नास्ति हि कमंतरं सर्वलोक हितत्या य च किंचि पराक्रमामि अहं किंति भूतानं आननं गछेयं (कर्तव्यमतो हि मे सर्वलोकहितम्। नास्ति हि कर्मान्तरं सर्वलोकहितात्। यत् च किंचित् पराक्रमे अहं किमिति भूतानां आनृण्यं इयाम्।[2]) सर्वलोकहितं परमपुण्यमेवेति महाभारते प्रोक्तम्—

यदा न कुरुते पापं सर्वभूतेषु कर्हिचित्।
कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा॥

आदिपर्वणि ७६.५२

सर्वान् प्राणिनः प्रति मैत्रीभावना प्रतिपाद्येति गौतमेनोक्तम्—

सब्बे सत्ता सब्बे पाणा सब्बे भूता च केवला।
सब्बे भद्रानि पस्सन्तु मा कंचि पापमागवा॥

खन्धवत्तजातके ३१९

तत् सर्वं भागवते परिणमितम्—

तप्यन्ते लोकतापेन साधवः प्रायशो जनाः।
परमाराधनं तद्धि पुरुषस्याखिलात्मनः॥

भागवते ८.७.४४

असंख्यास्ते सत्पुरुषा येषामुपकारपरायणोः चरितगाथाः कवयो गायन्ति स्म। ते

---

१. महा० आदि० ८६.५।

२. षष्ठे शिलालेखे।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समाजस्य संकटं दूरीकर्त्तुं सर्वस्वमात्मनो व्ययन्ति स्म। तथा हि पट्टचप्पकौ कल्हणेन वर्णितौ स्तो राजानौ—

क्षुधितव्याधितानाथदीनाद्यार्तिनिवारणम्।
सुस्पष्टं प्राप पट्टस्य राज्यलक्ष्मीः कृतार्थताम्॥ राजत० ७.९५३
नन्दीक्षेत्रे व्ययीकृत्य प्रत्यब्दं सप्तवासरान्।
चप्पकः सफलां चक्रे सर्वकालार्जितां श्रियम्॥ राजत० ७.९५४

प्रजाकष्टनिवारणार्थं दूषितमनोवृत्तीनामपि जनानामौदार्यं प्रस्फुरति। तद्यथा राजतरंगिण्याम्—

नानादिगन्तरायातो दुर्भिक्षपतितो जनः।
येनाविच्छिन्नसत्रेण शान्तव्यापद्व्यधीयत॥ ८.५७१

नारीणां सामाजिकप्रतिष्ठा

कौटुम्बिकप्रतिष्ठा तु कुलस्त्रीणां प्राग् वर्णिता वर्तते। कुटुम्बे ताः कन्यकाः पत्न्यः मातरः स्वसारः पुत्रवध्वः वा भवन्ति। एभिः सम्बन्धैः विरहितानामपि नारीणां पदं पर्यालोच्यं वर्तते।[1]

प्राकृता नार्यः

याः स्त्रिय उपर्युक्तसम्बन्धविहीना बभूवुः सामान्यतस्तासां समाजे विगर्हणैव स्वाभाविकी बभूव। कारणमपि तत्रासीत्। राष्ट्रस्याभ्युदयपथे ताभिः प्रस्तुता विघ्नाः प्रत्यक्षा एवासन्। व्यक्तीनामपि तपःसाधनापथे स्त्रीकृतानि बहुविधानि पर्यवस्थानानि विदितान्येव। अस्यां स्थितौ साधारणस्त्रीणां निन्दा वैदिककालतो भारतीयसाहित्ये संगृहीता वर्तते।[2]

स्त्रीणां मनोऽनियन्त्रणीयमभिमतम्।[3] स्त्रीभिः सह मैत्री न वर्तते। निर्घृणहृदयास्ता वर्तन्ते।[4] महाभारतानुसारं सर्वेभ्यः स्पृहणीया नार्यः प्राकृताः सन्ति।[5] तादृशीनां नारीणां विषये रामायणे प्रोक्तम्—

---

१. बुद्धचरिते ४.७२-८१; विष्णुपु० १.१५.३८।
२. पक्वान्नमिव राजेन्द्र सर्वसाधारणाः स्त्रियः।
तस्मात्तासु न रज्येत नाश्वसेन्न च विश्वसेत्॥
३. ऋग्वेदे ८.३३.१७।
४. न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणा हृदयान्येतेः। ऋग्वेदे १०.९५.१५।
५. विराटपर्वणि ९.३३।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन ।
समस्थमनुरज्यन्ति विषमस्थं त्यजन्ति च ।।
शतह्लदानां लोलत्वं शस्त्राणां तीक्ष्णता यथा ।
गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ।।

कौटिल्यस्तु स्त्रियं व्यसनमेव मन्यते । तथाहि—स्त्रीषु हि बालिश्यमनेकविधं निशान्तप्रणिधौ व्याख्यातम् ।[1] पौराणिकयुगेऽपि स्त्रीणां दोषदर्शनं भृशं कृतम् । तद्यथा भागवते—

शरत्पद्मोत्सवं वक्त्रं वचश्च श्रवणामृतम् ।
हृदयं क्षुरधाराभं स्त्रीणां को वेद चेष्टितम् ।।
न हि कश्चित्प्रियः स्त्रीणामञ्जसा स्वाशिषात्मनाम् ।
पतिं पुत्रं भ्रातरं वा घ्नन्त्यर्थे घातयन्ति च ।। ६.१८.४१–४२

बौद्धसाहित्ये स्त्रीणां दोषवर्णनमतिशयितमेव । तद्यथा धम्मपदे—

याव हि वनथो न छिज्जति अनुमत्तोपि नरस्स नारिसु ।
पटिबद्धमनो न ताव सो वच्छो खीरपको व मातरि ।। मग्गवग्गे १२

गौतमबुद्धेन स्पष्टमेव निर्दिष्टम्—नार्यस्तु संघे प्रविष्टाः । अतः धर्मोऽयं पंचशतवर्षपर्यन्तमेव स्थायित्वमर्हति—अन्यथा सहस्रवर्षावधिर्मवेदस्य धर्मस्य ।[2] जैनसंस्कृतावपि स्त्रीणां नैर्घृण्यं व्याख्यातम् । तथा हि महापुराणे—

आभिजात्यं वयो रूपं विद्या वृत्तं यशः श्रियम् ।
विभुत्वं विक्रमं कान्तिमैहिकं पारलौकिकम् ।।
प्रीतिमप्रीतिमादेयमनादेयं कृपां त्रपाम् ।
हानिं वृद्धिं गुणान् दोषान् गणयन्ति न योषितः ।।
वृश्चिकस्य विषं पश्चात् पन्नगस्य विषं पुरः ।
योषितां दूषितेच्छानां विश्वतो विषमं विषम् ।।
जालकैरिन्द्रजालेन वञ्च्या ग्राम्या हि मायया ।
ताभिः सेन्द्रो गुरुर्वञ्च्यस्तन्मायामातरः स्त्रियः ।।
लक्ष्मीः सरस्वती कीर्तिर्मुक्तिस्त्वमिति विश्रुताः ।
दुर्लभास्तासु वल्लीषु कल्पवल्ल्य इव प्रिये ।। ४३.१०१-११२

बहवो नार्यो विषकन्यका इव प्रयुक्ताः श्रूयन्ते । तासां कृते आसृष्टेर्युद्धे समारम्भा अपि बभूवुः । छलनारूपेण विष्णोरप्यसुरप्रतारणं सुप्रसिद्धमेव । नाटकादिषु स्त्रीकृतप्रपञ्चैः सता-

---

१. अर्थशास्त्रे ३.८ ।

२. चुल्लवग्गे १०.१.६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मपि दुःस्थितिं को न जानाति । भारतदेशोऽयं मोक्षापवर्गपरायणो नारीणामीदृशं बाधकत्वं विचार्य साधुपथगामिनिर्देशनार्थं यदि विलासोन्मुखीनां ललनानां प्रवृत्तिं निन्दितवान् तर्हि किमाश्चर्यम् ।

'नार्यस्तु निन्दनीयाः सन्ति' इति शास्त्रेषु काव्येषु च पुनः पुनः प्रतिपादितं प्रमाणितं च । तथापि तासामधिकसंख्यासंवर्धनेन कतिपयराजान आत्मानं बहु मन्यन्ते स्म । प्रायः पञ्चशताब्दं प्रागेव तत्रासीत् विजयनगरस्य महाराजो हरिहरो द्वितीय : । तस्य १२००० स्त्रिय आसन्, तथापि मुडकुलनगरस्य काञ्चित् सुन्दरीं स्वीकर्तुं स स्वान् प्राणान् राज्यं च तत्याज । बहूनि युद्धानि रमणीनां प्राप्त्यर्थं संवृत्तानीति इतिहास : प्रमाणम् ।

तथापि नारीषु कश्चिदेकोऽपि दोषो नास्ति, यस्य पुरुषवर्गेऽविद्यमानता स्यात् । सर्वे ते कवयः शास्त्रकारा वा नारीणां निन्दया केवलं स्वकीयां स्वार्थपरतामेवोदाहरन्ति । पुरुषैर्वशीकृता अथवा कामभोगतृप्त्यर्थं निगडीकृता इव नार्यो यदि क्वचिद्विषमं समाचरन्ति तर्हि तत्र पुरुषा एव सदोषा न तु नार्य इत्यपि बहूनां मनीषिणां सम्मतम् ।

नारीणां हीनत्वम्

नारीवर्गस्य पुरुषैः सह साम्यं नासीत् । 'तासां दानमेव प्रहीणत्वं द्योतयति[1] । राज्ञां समृद्धिशालिनां च पुरुषाणामन्तःपुरे भोग्यवस्तूनामिव कन्यकानां रमणीनां च समाहारः कृतः ।[2] धनिका ऋषयो वा बहुपत्नीत्वेनात्मानं बहु मन्यन्ते स्म । गणिकापदादपि नारीणां मनोरंजनसाधनत्वं तासां विगर्हणाय भवति ।

नारीणामवगुण्ठनं तासां सुरक्षायै बभूव । तासां कृतेऽवगुण्ठनवन्तो रथा निर्मिताः ।[3]

कन्यकानां व्यक्तित्वस्य विकासाय तादृशः प्रयत्नो नाक्रियत यादृशो बालकेभ्यः कृतः । तासां विवाहोऽपि स्वल्पे वयसि करणीय इति परवर्तिस्मृतिकाराणां स्पष्टं मतं दृश्यते ।

प्राचीनभारते शास्त्रानुसारं नारीणां स्वातन्त्र्यं सर्वथा निषिद्धमासीत्, तथापि तासां स्वतन्त्रजीविकावश्यकतानुसारमर्थशास्त्रे कामसूत्रे च निर्दिष्टं वर्तते । तथा कामसूत्रे—

तथा पतिवियोगे च व्यसनं दारुणं गता ।
देशान्तरेऽपि विद्याभिः सा सुखेनैव जीवति ।। १.३.२३

---

१. यज्ञानां दक्षिणारूपेण वहवः कन्यका वैदिकयुगेऽपि प्रदत्ताः । महाभारतानुसारं युधिष्ठिरः लक्षकन्याः ब्राह्मणेभ्यो दत्तवान् । सभापर्वणि ३३. ५२; वनपर्वणि ३१०.२; शान्तिपर्वणि २९.६५ । दानशालासु स्त्रियो देया आसन् । दीघनिकाये महासुदस्सनसुत्तानुसारम् ।

२. महाराजदशरथस्य प्रमुखराज्ञीः विहाय पंचाशदधिकत्रिशतं नार्यो बभूवुः । रामायणेऽयोध्याकाण्डे ३९.३७ ।

३. चुल्लकालिंगे जातके ३०१; [illegible] ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नारीणां सम्मानः

'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' इति सामान्योक्तिः। नारीणां सामाजिकप्रतिष्ठाया विचारणे प्रथमं दिव्यनारीणां पदमवलोकनीयम्। सरस्वती, दुर्गा, उषाः, लक्ष्मीश्च नारीसम्मानस्य मूलप्रतिष्ठापिका विभाविताः। अपरं च प्रातःस्मरणीयानां नारीणां समाहारस्तत्र वर्तते यासां यशोगाथा अधुनापि न केवलं नारीभ्यः, अपितु पुरुषेभ्योऽपि प्रगतिप्रेरणाप्रदानाय वर्तते। तद्यथा—महमूदस्याक्रमणेभ्यो भारतं रक्षयितुमपेक्षितं धनं संग्राहयितुं भारतीया महिलाः स्वशरीरेभ्योऽलङ्कारानपनीय प्रददुः—इत्यैतिह्यम्[१]।

नारीणां व्यक्तित्वस्य विकासाय समीचीना योजना वैदिकबौद्धजैनादिषु संस्कृतिषु प्रस्तुताः। तासां कृते ब्रह्मचर्यवानप्रस्थप्रव्रज्यादीनां व्यवस्थासीत्। संकटकालेऽपि नारीणां माहात्म्यं निर्दशितं महाभारते—

वैषम्यमपि सम्प्राप्ता गोपायन्ति कुलस्त्रियः।
आत्मानमात्मना सत्यो जितः स्वर्गो न संशयः॥ वनपर्वणि ७४.२५

नारीणां सम्मानार्हत्वं कथासरित्सागरे प्रमाणितम्। तद्यथा—

तास्तु काश्चन सद्वंशजाता मुक्ता इवाङ्गनाः।
याः सुवृत्ताच्छहृदया यान्ति भूषणतां भुवि॥ ४.१.९८

कल्हणस्तु राजतरंगिण्यां सूर्यमती-रट्टा-सुगन्धा-रड्डादीनां राज्ञीनां शासन-वैदग्ध्यं कार्यकौशलं च वर्णयति। तद्यथा सूर्यमतीविषये—

भर्तुर्नारीविधेयत्वं तस्या भर्तृजयस्तथा।
निष्कलङ्केन शीलेन नान्योन्यं गर्ह्यतामगात्॥ ७.२००

रट्टा तु दुर्गावत् वीराङ्गना बभूव।[२]

भारतीयसंस्कृतेरुपर्युक्तवैशिष्टयेन वैदेशिका अपि प्रभाविताः। तद्यथा विल्सनमहोदयोऽलिखत्—And it may be confidently asserted that in no nation of antiquity were women held in so much esteem as amongst the Hindus.[3]

अतएव स्त्रीणां विषये मध्यमा प्रतिपत्प्रतिपादनीया। तद्यथा—

योषितो नावमन्येत न चासां विश्वसेद् बुधः।
न चैवेर्ष्यां भवेत्तासु न धिक्कुर्यात् कदाचन॥
विष्णुपुराणे ३.१२.३०

---

१. Majumdar: Ancient India P. 326

२. विन्ध्याद्रिमार्गाः पर्याप्ता निष्पर्यन्तप्रभावया।
दुर्गयेव तया देव्या कृता निहतकण्टकाः॥

३. Mill's History of India Vol II P. 51.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सतीप्रथा

वैदिकयुगे स्त्रीणां जीवनकाले यदि पत्युर्मरणमभवत्तर्हि तासां स्वेच्छया पुनर्विवाहः सम्बभूव। ईदृशो विवाहः प्रायशो देव्रा सहायोजितः। निःसन्दिग्धमेव सर्वेषु युगेषु कतिपयस्त्रियः पत्युर्वियोगमसहमानाः प्राणान् त्यजन्ति स्म, किन्तु नासीत् किमपि बलान्नियोजनं स्त्रीभ्यः पत्युश्चितायां मरणाय। महाभारतयुगे स्त्रीणां पतिभिः सह मरणेन परलोकेऽपि सहगमनस्य स्पष्टं विवरणं दृश्यते। तद्यथा—

यापि चैवंविधा नारी भर्तारमनुवर्तते।
विराजते हि सा क्षिप्रं कपोतीव दिवि स्थिता॥ शान्तिपर्वणि १४५.१५

अनेनोद्धरणेनापि स्त्रीणां सहमरणं वैकल्पिकमेव प्रतिभाति। दशरथस्य स्त्रीणां सहमरणं नासीत्। न केवलं भारते, विदेशेष्वपि यत्र तत्र सहमरणस्य प्रथासीत्। स्कैण्डिनेवियादेशे युद्धवीरेषु मृतेषु तेषां पत्न्यश्चितासु प्रदग्धा बभूवुः।

परवर्तियुगे शनैः शनैः सहमरणस्य विधानमधिकतरं प्राचलत्। समृद्धिशालिवर्गेषु उच्चतमपरलोकगतिपरायणेषु समाजेषु च सतीप्रथाया विशेषप्रचारोऽभवत्। सतीप्रथया नारीणामुच्चादर्शस्य प्रतिष्ठाभूत्, किन्तु निःसंशयमेवास्याः प्रथाया निर्मूलनमभिनन्दनीयमेव।

बहुपत्नीत्वम्

धर्मशास्त्रेषु पुरुषाणां कृते बहुपत्नीनां कदापि सर्वथा निषेधो नाभवत्, किन्तु स्त्रीणां कृते बहुपतित्वं तु निषिद्धमेव।[1] बहुपत्नीत्वाद् गृहपतेर्महत् कष्टमसकृदुल्लेखितं वैदिकसाहित्ये।[2] एकपत्नीव्रतस्य शोभनत्वमपि प्रायशस्तत्रैव वर्णितम्। तथापि कामिनां श्रीपरिचायकानां च बहूनां पत्नीनां संग्रहो नासीदसामान्यम्।[3]

पत्युः प्रेम यथा मयि स्यात् मम पुत्रे वा स्यात्, न तथा सपत्न्यां वा तस्याः पुत्रे वा स्यादिति सपत्नीकुलस्य मनोवृत्तिरभवत्। सपत्नीभिः परस्परं सौहार्देन समाचरेयुरिति धर्मशास्त्रकाराणां शिक्षा क्वचिदेव परिपालिताभवदस्वाभाविकत्वात्। सपत्नीनां स्वपतिं वशीकर्तुमभिचारादयः प्राचरन्।[4]

१. तद्यथा महाभारते—
न चाप्यधर्मः कल्याण बहुपत्नीकता नृणाम्।
स्त्रीणामधर्मः सुमहान् भर्तुः पूर्वस्य लङ्घने॥ आदि १६०.३६।
ऐतरेयब्राह्मणे च—
तस्मादेकस्य बह्व्यो जाया भवन्ति। नैकस्यै बहवः सहपतयः। १२.११।

२. ऋग्वेदे १.१०५.८।

३. अग्निर्दशकुमारीणां पतिरासीदिति कल्पना तदेव परिचाययति श्रिया वा एतद्रूपं यत्पत्न्यः। तै० ब्रा० ३.८.४।

४. ऋग्वेदे १०.१४५।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रामायणानुसारं तु महाराजस्यासितस्य द्वे पत्न्यौ बभूवतुः। तयोरेका गर्भवती जाता। अपरा तु

एका गर्भविनाशार्थं सपत्न्यै सगरं ददौ ।। बाल० ७०.३१

अस्मादेव गर्भात् सगरकुमारो जातः।

वैदिकयुगेऽपि कतिपयराजानां बहुपत्न्यो बभूवः। हरिश्चन्द्रस्य शतपत्न्योऽवर्तन्त। तस्मात् कालात् प्रभृति आधुनिकयुगं यावत् बहूनां राज्ञां बहुपत्नीत्वमितिहासप्रमाणितमपि वर्तते। स्त्रीणां शतं वा सहस्रं वा तेषामवरोधस्यालङ्करणाय नाधिकमभवत्। तेषामन्तःपुरे राज्ञीनां पदं तु भोगसामग्रीवद् बभूव। तासां नित्यमभिनवतरं सङ्ग्रहणं स्यादिति मन्त्रिविदूषकादीनां प्रयासोऽभवत्। न केवलं सजातीया अपितु विजातीया वैदेशिक्योऽपि नार्यो राज्ञां कामलिप्सायाः परितर्पणाय येन केनोपायेन संगृहीताः। तत्र तथाकथितराज्ञीनां दुर्दशाभवदिति साहित्यवृत्तेषु प्रायशः श्रूयते। तथा हि अभिज्ञानशाकुन्तले दुष्यन्तस्य पत्नी हंसपदिका गायति—

अहिणवमहुलोलुवो भगं तह परिचुम्बिअ चूअमंजरि।
कमलवसइमेत्तणिब्बुदो महुअर विम्हरिओसि णं कहं।

एतच्छ्रुत्वा दुष्यन्तेन पूर्वप्रेम स्मरता प्रोक्तम्—

'सकृत् कृतप्रणयोऽयं जनः। तदस्या देवीवसुमतीमंतरेण मदुपालम्भमवगतोऽस्मि। सखे माढव्य मद्वचनादुच्यतां हंसपदिका—निपुणमुपालब्धोऽस्मीति।'

कतिपयधर्मशास्त्रकाराः पत्नीबहुत्वस्य नृशंस्यं पर्यालोचयन्। ते साधारणस्थितौ बहुपत्नीत्वं निन्दितवन्तः। तद्यथा आपस्तम्बधर्मसूत्रे—

धर्मप्रजासम्पन्ने दारे नान्यां कुर्वीत। अन्यतराभावे कार्या प्रागग्न्याधेयात्।

२.५.११.१२-१३

कात्यायनस्मृतौ

द्वितीयां चैव यः पत्नीं वहेद्वैतानिकाग्निभिः।
जीवत्यां प्रथमायां तु ब्रह्मघ्नेन समं हि तत् ।। २०७

यदि प्रथमपत्न्याः पुत्रा न भवेयुस्तर्हि द्वितीयो विवाहः कार्य इति बहूनां शास्त्रकाराणां मतम्। तथापि कौटिल्यमतानुसारं विवाहस्य पश्चादष्टवर्षं यावत् पुत्रोत्पत्तये प्रतीक्ष्यैव द्वितीया पत्नी परिणेया।[1]

●

---

१. वर्षाण्यष्टावप्रजायमानामपुत्रां वन्ध्यां वा कांक्षेत। दश निन्दुं द्वादश कन्यां प्रसविनीम्। ततः पुत्रार्थी द्वितीयां विन्देत। तस्यातिक्रमे शुल्कं स्त्रीधनमर्धं चाधिवेदनिकं दद्यात्। चतुर्विंशतिपणपरं च दण्डम्। पुत्रार्था हि स्त्रियः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपभोग्यानि

विश्वस्याधिकाधिकवस्तूनि स्वोपभोगयोग्यानि कर्तुं मानव आसृष्टेः प्रयत्नशीलः प्रवर्तते । सामान्यतो जीवनधारणाय भोजनपानवस्त्रादीनि अलङ्करणाय स्नानप्रसाधनादीनि, विश्रमाय गृहवास्तुशयनादीनि, पर्यटनाय यानसरकादीनि चोपभोग्यानि भवन्ति । उपभोग्यवस्तूनि बहुलीकर्तुं तेषामधिकतमोपभोगक्षमं स्वरूपमाधातुं च मानवः प्रयतते ।

आहारः

भोज्यपदार्थास्तु प्रायेण त्रिविधाः—

(१) वनस्पतिभ्यः प्राप्तव्याः—अन्न-फल-मूल-फुल्ल-नाल-शाक-तैल-गुड-शर्करादयः ।

(२) प्राणिभ्यः प्राप्तव्याः—मांस-दुग्ध-दधिघृत-वसा-मध्वण्डकादयः ।

(३) भूगर्भेभ्यः प्राप्तव्याः—लवणादयः ।

आहारेषु मांसवसाण्डकानि सामिषाणि शेषास्तु निरामिषाः ।[1]

मांसत्यागः

मांसभोजनं सुदूरप्राचीनकालतः प्रायशः सर्वेषु देशेषु कालेषु च लोकप्रियमभूत् । आयुर्वेदानुसारं 'मांसभोजनं स्वास्थ्यकरं स्वादिष्टं च भवति । ततः प्रशंसनीयमेव' ।[2] वैदिकयज्ञेषु देवेभ्यो मांसभोजनसमर्पणस्य रीतिरासीत् । पश्चात्तदेव भोजनं खादितव्यमभवत् ।[3]

---

१. चतुर्विध आहार :—भोज्यं, भक्ष्यं, लेह्यं पेयञ्च । तत्र भोज्यं भक्तव्यञ्जनादि । व्यञ्जनाग्र्यस्य शाकस्य दशभेदा :—

मूलपत्रकरीराग्रफलकाण्डप्ररूढकम् ।
त्वक्पुष्पं कण्टकं चेति शाकं दशविधं स्मृतम् ।।

भक्ष्यं खण्डखाद्यादि । पेयं द्विविधम्-अग्निनिष्पाद्यम्, इतरच्च । तत्र पूर्वं यूषाख्यम् । तच्च द्विविधम्—मुद्गादिनिर्व्यूहकृतम्, मांसनिर्व्यूहकृतं च । यदग्निनिष्पादनं पेयं तद्विविधम्—सन्धानकृतमितरच्च । तत्राद्यं द्रावितमद्रावितं च । तत्र यद्गुडविन्तिडिकादिजलेन संयोज्य क्रियते, तद् द्रावितं पानकाख्यम् । यद् द्रावकौषधेन तालमोचाफलानि संयोज्य निष्पाद्यते, तद्द्रावितं रसाख्यम् । लेह्यं त्रिविधम्—रागः, चूर्णः, द्रव इति । तस्य स्वादः लवणाम्लकटुः । कामशास्त्रे १.३.१६ टीका ।

२. चरके सूत्रस्थाने २७. ३०७—३१० ।

३. ऋग्वेदे १.१६२; ८.४३.११; १०.२७.२; १०.८६; १०.९१ अथर्ववेदे १२.४; ५.१८; ३.२१.६ । शतपथब्राह्मणे ३.१.२.२१ ऐतरेयब्राह्मणे ६.८ । परवर्तियुगे नैषधचरिते गवालभनमुल्लिखितमतिथियज्ञप्रकरणे—

अधावत् कापि गां वीक्ष्य हन्यमानाममुं मुदा ।
अतिथिभ्यस्तथा बुद्ध्वा मन्दो मन्दं न्यवर्तत ।। १७.२००

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

किन्तु वैदिकयुगेऽपि मांसे दोषो विदितमेवासीत्, यतो नामास्य येनास्य भोजनं नियमितम्। तद्यथा—यज्ञकर्मणे दीक्षिता मांसं न खादन्तु। तपस्विभिर्मांसं न खादितव्यम्।[1] यज्ञायज्ञीयसामसूक्तवेत्तारो यावज्जीवनं मांसभोजनं न कुर्वन्तु।[2] मांसशब्दस्य व्युत्पत्तिरपि मांसत्यागमुद्दिश्य निरूपिता।[3] आचार्याः 'उपाकर्मण आरम्भ्योत्सर्जनपर्यन्तं मांसं न खादन्तु' इति विधानमासीत्।[4] मधुपर्कविधौ मांसभोजनं सम्मतमासीत्। तत्रापि अमांसो मधुपर्कस्य रीतिः प्रावर्तत। तत्रार्घ्यो महापुरुषोऽवदत् माकुरु अरिष्टिं तनूनाम्। शरीरिणामहिंसकं कुरु' इति।[5]

एभिरुल्लेखैः स्पष्टं प्रतिभाति यद्वैदिकयुगेऽपि कश्चित् प्रतिष्ठितः ऋषिवर्गस्तत्रासीद्येन मांसभोजनमाध्यात्मिकाभ्युदयपथे प्रतिकूलमपावनं च मतम्।

उपनिषद्युगे तपसा तत्त्वज्ञानेन च मुक्तिः साधनीयासीत्। तदानीं यज्ञस्य महिमा हीनोऽभवत्। तपसा जीवनविशुद्धिः सम्भाविता। अस्मात्कारणादपि मांसभोजनस्य तपस्विवर्गाय नेष्टत्वं प्रतिपादितम्। अयमेव मांसभोजनपरित्यागादर्शो मुनिवर्गतः सकलसमाजेन गृहीतः। 'मुनीनां जीवनविधिर्गृहस्थैरपि यथाशक्यं ग्राह्यः' इति भारते सनातनविधिरभवत्।

बौद्धजैनसंस्कृतिषु हिंसाया विरोधो भृशं बभूव।[6] मांसं तु हिंसया विना न लभ्यम्। शनैः शनैरनुयायिनस्तु द्वयोः संस्कृत्योर्मांसविरताः सामान्यतो बभूवुः। तेषां संख्या पुरात्यधिकासीत्। तेषामादर्शेन समाजः प्रभावितः। जैनसंस्कृतौ मांसपरित्यागाय विशिष्टं साहित्यं विरचितम्। तदनुसारं यस्य पशोर्मांसं खाद्यते स्म स पूर्वजन्मनि भोक्तुर्माता, पिता, भ्राता, भगिनी, स्त्री वासीत्।[7] महाराजाशोकः स्वकीयपाकशालायै पशुवधं निषेधितवान् लेखितवांश्च—प्राणिनामहिंसा साधुपथः।[8]

महाभारते यद्यपि स्वास्थ्यास्वाददृष्ट्या मांसभोजनस्य सर्वोत्कृष्टत्वं प्रतिपादितम्,

---

१. शतपथे १४. १.१,२९

२. छान्दोग्योपनिषदि २.१९.२

३. शतपथे १२.९.१.१। स यद्ध वा अस्मिन् लोके पुरुषोऽन्नमत्ति तदेनममुष्मिन् लोके प्रत्यत्ति। शतपथे अपरं च ११.६.१.३ 'ते होचुरित्थ वा इमे अस्मानमुष्मिन् लोके असचन्त तान् वयमिदमिह प्रतिचाभहे। कौशीतकिब्राह्मणे ११. १३ अमुष्मिन् लोके पशवो मनुष्यानश्नन्ति।
मांसभक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम्।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः॥ मनुस्मृतौ ५.५५

४. आपस्तम्बधर्मसूत्रे २.२.५.१५

५. पारस्करगृह्यसूत्रे १.३.१५

६. तथा हि बौद्धगमार्थसंग्रहे २८७ पृष्ठे। चुल्लवग्गे ७.३.१५

७. जसहरचरिउ द्रष्टव्यः।

८. तृतीयशिलालेखे प्रथमशिलालेखेऽपि अशोकेनायमभिप्रायः प्रकटितः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तथापि सात्त्विकतासंवर्धनदृष्ट्या मांसभक्षणाद्विरतिः प्रबोधिता । अहिंसकस्तु सर्वेषां प्राणिनां माता च पिता चेत्युपदेशः ।[१] भागवतेऽपि प्रोक्तम्—

मृगोष्ट्रखरमर्काखुसरीसृप्खगमक्षिकाः ।
आत्मनः पुत्रवत्पश्येत् तैरेषामन्तरं कियत् ।।७.१४.९

वैदिकी हिंसा हिंसा न भवतीति सिद्धान्तेन भारते यज्ञकर्मणि श्राद्धकर्मणि च मांसं सदा प्रोक्षितं भक्षितं च ।[२] यज्ञेभ्योऽन्यत्र मनुर्मांसभोजनं निनिन्द ।[३]

भागवते समांसयज्ञानां घोरविरोधो वर्तते । पुराणेऽस्मिन् यज्ञार्थं मुनिजनोचितम श्रेष्ठं मतम् ।[४] स्कन्दपुराणे आयुर्वेदप्रसिद्धानां मांसभोजनगुणानां निराकरणं भृशं प्रकटितम् ।[५]

महाकविबाणेन मांसविरतिप्रसङ्गे प्रोक्तम्—'आहाराः साधुजननिन्दितो मधुमांसादिः ।[६] तथापि रसास्वादान्वेषिणो नागरिका मांसतेमनरसाद्विरताः कदापि न बभूवुः ।

आहारविवेको महतां मनसि सदावर्तत । तद्यथा विवेकानन्दो समर्थयति—'My body and mind have nothing essentially different from the food I ate. ....It naturally follows that both this thought and the instrument will be modified by the food we take.'[७]

भोज्यानि

सिन्धुसभ्यताया युगे यवगोधूमशालितिलादीन्यन्नान्युत्पादितानि । तत्रत्यनिवासिनां भोज्यानि तैरन्नैः निर्मितानि । सिन्धुप्रदेशे तदा दुग्धदायिनां पशूनां संख्याऽत्यधिकासीत् । सामान्यतो दुग्धनिर्मितखाद्यानि प्रियतराणि बभूवुः ।

वैदिकयुगे भोज्यान्नस्य विशिष्टगुणा विभाविताः । तथा हि—'यस्मिन् विश्वानि पौंस्या' आदिवाक्यैर्भोज्यविषयकं तेषां ज्ञानमुत्कृष्टमेव प्रतिभाति ।[८] अपरं च मधु, घृतं, सोमश्च दिव्यं भोजनमभिमतानि । तद्यथा ऋग्वेदे—-

---

१. अनुशासनपर्वणि ११४,११५,११६ अध्यायतः
२. मनुस्मृतौ ५.२७,४२,५२. महाभारते वनपर्वणि २०७.५—१५
३. मनुस्मृतौ ५.४८-५१
४. भागवते ७.१५.७--११; ११.५.११
५. नागरखण्डे २६,२२५--२३७
मांसभोजनेनाधित्रिंशद्वर्षीयाणां नारीणां च विशेषतोऽस्थिक्षयो भवतीति हारवर्डविश्वविद्यालयस्य डा० ए० वाचमैनस्य तथा डा० डी. एस. वर्न्सटौनस्य मतं लैसेटपत्रिकायां प्रकाशितं दृश्यते ।
६. कादम्बर्यां ३२ पृष्ठे ।
७. Complete Works of Vivekanand Vol IV p. 2
८. ऋग्वेदे १.५.६;१.४३.७;१.४६.६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सोम एकेभ्यः पवते घृतमेके उपासते ।
येभ्यो मधु प्रधावति ताँश्चिदेवापि गच्छात् ।। १०.१५४.१

ओदनो वैदिकानां स्वादिष्ठं भोजनं बभूव । ओदनो नानाविधं पाच्यते स्म । तद्यथा नामभिरेव परिचीयते—क्षीरपाकौदनः, दध्योदनः, मुग्दौदनः, तिलौदनः, मांसौदनः, घृतौदनश्च । सर्वश्रेष्ठ आसीत् पंचौदनः । स तु पंचानां स्वादुद्रव्याणां समाहारैः सङ्कलितः ।[1] दुग्धैर्निर्मितानि भोज्यानि नवनीतमस्त्वामिक्षादीनि बभूवुः ।[2] आर्याणां पक्वान्नानि पक्तिकरम्भापूपपुरोडाशधानादीनि बभूवुः ।[3] सक्तुभोजनं वैदिककालतः प्रायः सदैव लोकप्रियमभूत् ।[4] कृसरः तण्डुलतिलाभ्यामपच्यत ।[5] तण्डुलं भृष्ट्वा परिवाप इति ख्यातं खाद्यान्नं कृतम् ।[6] वाजिनस्तूष्णदुग्धदधिसम्मिश्रणेनाक्रियत ।[7] पयस्या वाजिनवदभूत् ।[8]

विविधपशूनां मांसानि पाचितानि । मांसस्य यूषः कृतः ।[9] भोजनेन सह दुग्धम्, दधि, मधु, घृतं च खादितानि ।[10] लवणस्य मिश्रणेन धनिकानां भोजनं स्वादिष्ठं कृतम् ।[11]

भोज्यपदार्थानां वैविध्यं वैदिककाले सुपरिचितमेवासीत् । तद्यथा—शतपथब्राह्मणे सप्तदशविधानां भोज्यानामेकवारमेवोपभोगः सूचितः ।[12] दुग्धेनैव दशविधानि भोज्यानि संस्कृतानि ।[13]

फलमूलशाकानां भोजनं वैदिककाले नातिलोकप्रियमासीत् । कमलमूलं शालूकमुदुम्बरफलं शफकमाण्डिकं चेदृशानि भोज्यानि प्रतिभान्ति ।[14]

---

१. वैदिकइण्डेक्सग्रन्थे तथा बृहदारण्यके ६.४ ।
२. शतपथे १.८.१.७; ३.१.३ ७
३. ऋग्वेदे ३·५२.१—८; ४. २४.५—७; वाजसनेयिसंहितायां १९.२२ अथर्ववेदे ४.७. ३; तैत्तिरीयब्राह्मणे ३.७.५ ।
४. शतपथे १२.९.१.५. पंचतंत्रे स्वभावकृपणकथायाम्; नैषधीयचरिते २.८५ ।
५. षड्विंशब्राह्मणे ५ २ ।
६. तैत्तिरीयसंहितायां ३.१.१०.१ ।
७. तत्रैव १.६.३.१०; शतपथे २.४.४.२१ ।
८. तैत्तिरीयसंहितायां २.३.१३.२ ।
९. ऋग्वेदे १.१६२ १३ तै० सं० ६.३.११.१
१०. अथर्ववेदे ९.६.३९—४४
११. तत्रैव ७.७६.१; छान्दोग्ये ४.१७.७
१२. शतपथे ५.२.२.३; ८.४.४.७
१३. शतपथे ३.३.३.२
१४. अथर्ववेदे ४.३.४.५; ४.३४. ५; ५, १७. १६ ऐतरेयब्राह्मणे ७.१५; पंचविंशब्राह्मणे १६ ६.४.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जातकेषु यवागोर्भक्तस्य च साधारणं निरामिषं भोजनं वर्णितम् । तस्मिन्युगे मांसभोजनमतिशयलोकप्रियमभूत् । गोधामांसं घृतदधिव्यंजनैः सह पाचितम् । भोज्यस्यास्वादवर्धनाय तस्मिन् तैललवणपिप्पलीनां मिश्रणमक्रियत ।[१] शालिभक्तं मांसं च श्रेष्ठभोज्यमेवागण्येताम् । मत्स्यस्य मांसेन हंसमयूरक्रौञ्चादीनां पक्षिणां मांसेन च सुरुचिपूर्णभोज्यमभूत् ।[२] राज्ञां भोज्यानि सप्तविधानि बभूवुः ।[३]

बौद्धसाहित्ये क्षीरौदनः प्रशंसितो वर्तते । अनेनायुर्वर्धते, सौन्दर्यं प्रस्फुरति, बुद्धिवैशद्यं जायते च । तदानीं निरामिषं भोज्यं तिलमुद्गतण्डुलानां चाभवत् । भोज्ये घृतमधुनोः प्राचुर्यमासीत् ।[४]

महाभारते निरामिषभोज्येषु विविधानां शाकानामपूपस्य च मिष्टान्नेषु खाण्डवस्य रसयोगस्य च गणना कृता । भोज्यस्योपकरणानि मूलं, फलं शूकरहरिणयोर्मांसं घृतपक्वं मधुमिश्रितं च क्षीरौदनं, कृसरो जीवन्तोशाकश्चाभवन् । भक्ष्यं हविष्यं चोष्यं खाद्यं पेयं वा भोज्यमासीत् ।[५]

यज्ञावसरे सार्वजनिकभोजोऽभवत् । तस्मै प्रयोजनाय खाद्यान्नानां पर्वताः पेयानां नदाश्च क्रियन्ते स्म । भोज्यसामग्रीषु मोदकपूरिकापूप-शष्कुलीकरम्ममृद्वीकारागखाण्डवघृतमधुदधिरसफलमूलादीनि बभूवुः ।[६]

रामायणेऽपि भोज्यानां स्वरूपं प्रायशः पूर्ववत् वर्तते । भोज्यसामग्रीणां वर्णगन्धयोर्मनोहारित्वं प्रशंसितमासीत् ।[७] रामायणयुगे आर्येतरा जातयो मधुमांसादीनि वन्यानि च खादन्ति स्म ।[८]

अर्थशास्त्रे भोज्यसामग्रीणां विशदविवेचनं वर्तते । तथा हि स्नेहकोटौ घृततैलवसामज्जाः, क्षारकोटौ फाणितगुडमत्स्यण्डिकाखण्डशर्कराः, लवणकोटौ सैन्धवसौवर्चलयवक्षाराः, मधुकोटौ च क्षौद्रद्राक्षारसाः समन्विता आसन् । विविधफलमूलैः रसैश्च क्वाथाः क्रियन्ते स्म । शुष्कमत्स्यमांसकन्दमूलफलैश्च कटुलेह्यानि निर्मीयन्ते स्म । धान्यानां खाद्यरूपे परिणमनाय बहवः प्रक्रियाः प्रचलिता बभूवुः ।[९]

---

१. गोधजातके ३२५
२. केसवजातके ३४६; मच्छजातके; पुण्णनदीजातके २१४
३. दूतजातके २६०
४. महावग्गे ६ २४. ससजातके २१६; मातंगजातके ४९१
५. सभापर्वणि ४.२—३
६. द्रोणपर्वणि ६४.७—६
७. अयोध्याकाण्डे ९१.६७—७३
८. अयोध्याकाण्डे ८४ सर्गतः
९. अर्थशास्त्रे कोष्ठागाराध्यक्षप्रकरणे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आयुर्वेदग्रन्थेषु भोज्यविन्यासेन शतवार्षिकजीवनं सम्भावितम् ।[१] आयुर्वेदानुसारं खाद्यान्नानामसंख्या भेदाः पाचनविधीनां भोज्यसामग्रीणां चासंख्यत्वात् सम्भवन्ति;[२] प्रत्येकविधस्य भोज्यस्य गुणदोषविवेचनं वर्तते च तेषु ग्रन्थेषु । 'किंप्रकृतिकः पुरुषः कीदृशं भोजनं कस्मिन्नृतौ कस्यां वेलायां च करोतु' इति विषयाणां सम्यग्विवेचनं पुरा विवृतम् ।[३] भोजनविज्ञानानुसारमाहारस्य वर्णगन्धरसस्पर्शानां दृष्टया लाभालाभौ श्रेयस्करत्वं च निर्धारितानि ।[४]

भोज्यानां पाचनविधिः शनैः शनैः सुसंस्कृतोऽभवत् । तथाहि—एकाकी तण्डुलो धावित्वाऽधावित्वा वा पाचितोऽथवा मांसशाकवसातैलघृतमज्जफलादिभिः सह पच्यते स्म । तिलदुग्धमुद्गादयस्तण्डुलेन सह मिश्रिताः । विविधानि धान्यचूर्णानि प्रथममुत्क्वाथ्य रोटिका निर्मिताः । बहुविधानां वस्तूनां यूषसूपादिकरणायाष्टादशगुणं चतुर्दशगुणं वा जलं मिश्रयित्वा क्वाथः कृतः । शष्कुली वर्त्तमानयुगस्य 'कचौरी' इवासीत् । मधुक्रोडा मधुरवस्तूनि पूरयित्वा पिण्डाकृतौ परिणता । तण्डुलपिष्टेन पूपा पूपलिका च कृते । मांसस्य क्वथनं कृत्वा शिलायां पिष्ट्वा च पिप्पलीशर्करागुडघृतादीनां तस्मिन् मिश्रणं कृत्वा वेशवार इति ख्यातं मिष्टान्नं कृतम् । फलमांसवसाशाकपललमधुमिश्रितं भोज्यं स्वास्थ्यप्रदं बलकारकं च प्रमाणितम् ।[५]

रोटिकापाचनाय कुकूल-खर्पर-भ्राष्ट्रकन्दुदग्धकाष्ठानां तापः समायोजितः । घृतमिश्रितं गोधूमपिष्टं घृते पाचितम् । बहुविधानां धान्यानां मिश्रणं कृत्वा पाचयित्वा च विमर्दकं कृतम् । रागपाडवो हरिताम्रफलं भर्जयित्वा शर्करातैलशुण्ठीयोगेन कृतः । आम्रफलस्यामलकस्य वा बहुविधानि लेह्यानि विविधद्रव्याणां मिश्रणेन कृतानि । व्यंजनानि भोज्यस्यास्वादवर्धनाय सर्वत्र प्रयुक्तानि ।[६] पाकशालाया वैशद्यमावश्यकमासीत् । महानसं सुगुप्तं स्याद्दर्शनीयं कामसूत्रे निर्दशितम् । तत्र सूपकाराः पाकविद्यानिष्णाता नियुक्ताः ।[७]

सर्वेषां खाद्यान्नानां मांसानां फलानां शाकानां जलानां च स्वास्थ्यसंवर्धनदृष्टया पर्या-

---

१. चरकसूत्रस्थाने २७.३४३

२. चरकसूत्रस्थाने २५.३५ अपरिसंख्येयविकल्पः द्रव्यसंयोगकरणबाहुल्यात् ।

३. तथाहि काव्यमीमांसायां शरदमधिकृत्य लिखितं सप्तदशाध्याये—
वराहत्रभ्राणि नवोदनानि दधीनि सन्नद्धशराणि चात्र ।
सुकोमला सर्षपकन्दलीश्च भुक्त्वा जनो निन्दति वैद्यविद्याम् ॥

४. चरकसूत्रस्थाने २७.२ । कणादसूत्रेऽपि 'यदिष्टरूपरसगन्धस्पर्शंप्रोक्षितमभ्युक्षितं च तच्छुचि' ६.२.५। तदेव महाभारते सभापर्वणि ३३.३२ ।

५. चरकसूत्रस्थाने २७.२५२-२६४

६. चरकसूत्रस्थाने २७.२६५-२८०. २९५-३०२

७. मृच्छकटिके गणिकागृहवर्णने ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लोचनमायुर्वेदग्रन्थेषु विद्यते ।[1] सामान्यतः प्रतिदिनं जनास्त्रिभोजनमकुर्वन्—दिनस्य प्रथमभागे प्रातराशो लघुभोजनमासीत्, मध्याह्ने रात्रौ प्रथमप्रहरे च पूर्णभोजनं बभूव । जैनसंस्कृतौ रात्रिभोजनस्य परित्यागो विहितः ।

समृद्धिशालिनामुच्चवर्गीयाणां नागरिकाणां भोजनसौष्ठवं सदैव सविलासमभूत् । अस्मिन् प्रसङ्गे महार्घाणि भोजनपात्राणि, रत्नमण्डितभोजनमण्डपा मनोरंजनाय समाहारीभूतानि कन्यारत्नानि चोल्लेखनीयानि ।[2] राजकीयभोजनविधेः रसिकत्वं श्रीहर्षस्यानेन श्लोकेने निर्दशितम्—

न षड्विधः षिङ्गजनस्य भोजने तथा यथा यौवतविभ्रमोद्भवः ।
अपारशृङ्गारमयः समुन्मिषन् भृशं रसस्तोषमधत्त सप्तमः ॥

भोजनस्य पचनार्थं स्थाली-कटाहोखादयः सम्प्रयुक्ताः ।[3] कुण्डिकाकपालामत्र-शरावादयः भोजनार्थं पानार्थं वा पात्राणि बभूवुः । तितउसूर्पादयोऽन्नस्य शोधनार्थं प्रयुक्ताः ।

धूम्रपानं ताम्बूलं च

भोजनानन्तरं धूम्रपानस्य प्रचलनमासीत् । तदर्थं धूम्रवर्तिका निर्मिता । प्रायोगिकवर्तिकायां पंचत्रिंशद्द्रव्याणां मिश्रणमभवत् । स्नैहिकवर्तिकायां वसाघृतजीवकादीनां मिश्रणमासीत् । शिरोविरेचनवर्तिका ज्योतिष्मतीहरितालमनःशिलागुरुणां योगेन रचिता । धूम्रपानाय वर्तिका हस्तद्वयदीर्घायां नालिकायां संयोजिता । धूम्रपानस्यातिमात्रा वर्जिताऽसीत् ।[4]

धूम्रपानानन्तरं ताम्बूलग्रहणमभूत । ताम्बूलपत्रे बहुविधानां मुखशोधकानां पाचनशक्तिसंवर्धकानां स्वास्थ्यप्रविधायकानां च द्रव्याणां निधानं कृतम् ।[5] ताम्बूलस्य सर्वाधिकं महत्त्वं राजसभासु बभूव । राजकुमारीभ्यः ताम्बूलार्पणाय ताम्बूलकरङ्कवाहिन्यो नियुक्ताः ताम्बूलकोषः करङ्क इति ख्यातः स्वर्णरजताभ्यां निर्मितो मणिजटितोऽभवत् । पतद्ग्रहोऽपि मणिजटितोऽभवत् । ताम्बूले भयोत्पादकानि वृश्चिकादीनां रूपाणि निधाय

---

१. सुश्रुतसंहितायां शाकफलादिवर्गेषु ।
२. भोजाजानीयजातके दूतजातके च ।
३. महाभाष्ये २.१.३६; ४.२.१७
४. विशेषविवरणपरिचयाय चरकसंहिता ५.१७.५२ द्रष्टव्या ।
५. चरकसूत्रस्थाने ५. ७३—७४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भोगिनां विस्मयाधानेन परिहासः कारितः ।[1] कामभावस्योद्दीपकत्वात् ताम्बूलभोगस्य निषेधोऽपि समर्थितः क्वापि ।[2]

कवीनां मुखेषु ताम्बूलवीटी काव्यं फलतीति गङ्गावतरणे निदर्शयति नीलकण्ठ :—

कवितामफलद्वीटी कालिदासमुखेऽर्पिता ।
पत्युर्मुखे तु सा गौर्याः परुषं निगमाक्षरम् ॥

पेयम्

पेयेषु शीर्षस्थानीयं जलमेवास्ति । पश्चात् दुग्धमधुनोः, फलपुष्पकाण्डमूलादीनां रसाः लोकप्रियाणि पेयानि सन्ति । पुरा सोमो मद्यं चासाधारणे पेये बभूवतुः । नागरिकेभ्यः स्वास्थ्यप्रदं शुद्धं च कूपजलं प्रदातुमेव सिन्धुसभ्यतायुगे सुव्यवस्थासीत् ।[3]

वैदिकैर्जलस्य दिव्यस्वरूपमदर्शि । जलं शुचितायाः प्रतीकमेव कल्पितम् । तस्मात् देवा अपि शक्तिसंचयं कुर्वन्तीति वैदिकधारणा ।[4] परवर्तियुगे विविधप्रकाराणां जलानां स्वास्थ्यदृष्ट्या पर्यालोचनमायुर्वेदग्रन्थेषु कृतम् । अशुद्धजलस्य परिशोधनायानुसन्धानानि क्लृप्तानि । क्वाथीकरणेन, रवितापेन, कतकबिसग्रन्थिमुक्तादीनां परिस्पर्शनेन वस्त्रक्षरणेन जलस्य शोधनं विहितम् । जलस्य सुगन्धीकरणस्य शीतलीकरणस्य च रीतिरासीत् ।

भारते सदैव दुग्धं लोकप्रियमभूत् । सिन्धुसभ्यतायुगे दुग्धदायिनां पशूनामाधिक्यमभवत् । वैदिककाले धनिका निर्धनाः प्रायः सर्वेऽपि वर्णाश्रमिणोऽधिकाधिकसंख्यका गाः परिपालयन्ति स्म । राज्ञां गवां संख्योपलक्षा बभूव । दुग्धस्य प्रचुरप्रशंसा विद्यते साहित्यग्रन्थेषु । तद्यथा—प्रियं दुग्धं न काम्यम् । दुग्धं वै जीवनं प्राणाः वा ।[5] धारोष्णं दुग्धं पीतमीषदुष्णं वा मधुशर्करामिश्रितमास्वादितम् । घृतमिश्रितं दुग्धं पोषणमासीत् ।[6] आयुर्वेदशास्त्रेषु विविधपशूनां दुग्धानि स्वास्थ्यदृष्ट्या विविक्तानि सन्ति ।[7]

---

१. नैषधीयचरिते १६.२७,१०९
२. स्कन्दपुराणे नागरखण्डे । ताम्बूलमुपभुज्य जनाः कामासक्ताः भवन्ति ।
३, Piggott .. Prehistoric India p. 171
४. ऋग्वेदे ७.४९
M. महाभाष्ये ८.५.८४
५. शतपथे २.५.१.१५;९.२.३, ३१ ।अमृतं क्षीरभोजनमिति पंचतन्त्रे १.१३९
६. अथर्ववेदे ७:७३.१; तित्यजातके
७, चरकसूत्रस्थाने २७.२१४—२२१; सुश्रुतसंहितायां दुग्धवर्गे ४५.१–५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सोमरसः

सोमस्तु आर्याणां प्राचीनतमः पेयः । सोमयज्ञे देवेभ्यः सोमस्य समर्पणं क्रियते स्म । सोमाय सोमवल्ली प्रथममुपयुक्ताऽभूत् । सोमवल्ली मुञ्जवत्पर्वते संवर्धिता । तस्मात्प्रदेशाद्विक्रयार्थं वल्लीयं भारते आनीता ।

सोमवल्ली उलूखले मुसलेन कुट्टिता शिलापट्टके वा ग्राव्णा पिष्टासीत् । पश्चादूर्णस्य पवित्रेण शोधिता । तस्मिन् रसे दुग्धं दधि घृतं यवश्च मिश्रितानि । सोमस्य गन्धो रमणीय आसीत् । वैदिकैः कविभिरस्य श्रीः प्रयो नभश्च प्रशंसितानि । स्वादः सोमस्य मधुरः आसीत् ।

सोमपानेन बहवो लाभा आसन् । तथा हि वक्तृताशक्तिसंवर्धनं दीर्घजीवनं प्रतिभाविकसनमाध्यात्मिकं सौष्ठवं च सोमपानेन सम्भावितानि । सोमपायी यशस्वी भवति । सोमस्तु मानवतायाः कल्याणम् । सोमेन धर्मप्रवृत्तिर्वर्धतेऽभिनवचेतनायाः स्फुरणं भवतीति वैदिकधारणा ।[1] सोमो मनसः पापानि दूरं कृत्वा सत्यं संवर्धयति नाशयति चासत्यम् ।[2]

सोम ईषन्मादक आसीदिति सत्यम् । किन्तु सोमो नासीत् सुरेति स्पष्टमेव । शतपथानुसारं सोमः सत्यस्याभ्युदयस्य प्रकाशस्य च कर्ता भवति, सुरा चासत्यं पतनमन्धकारमेव ।[3] अपरं च

सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ।
तयोर्यत्सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत् ।। ऋग्वेदे ७.१०.४.१२
आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः ।
शं ते सन्तु प्रचेतसे ।। ऋग्वेदे १.५.७

परवर्तियुगे भारते सोमो दुर्लभप्रायोऽभवत् । तदा सोमपर्यायाः चतुर्विंशतिलताः प्रमिताः ।[4]

सुरा

वैदिकयुगे सुरायाः गुणाः अवगुणाश्च सुपरिचिता आसन् । वैदिकसाहित्ये क्वचिदस्याः प्रशंसा विद्यतेऽन्यत्र भूरिनिन्दा चास्ति ।[5] यज्ञेष्वपि सुरासमर्पणमक्रियत । मनोरंजनस-

---

१. ऋग्वेदे ८.४८
२. Macdonell . Vedic Mythology p. 109 ऋग्वेदे ७.१०४-१२
३. शतपथे ५.१.५ २८
४. सुश्रुतसंहितायां चिकित्सितस्थाने सोमप्रकरणे विशेषविवरणं द्रष्टव्यम् ।
५. प्रशंसात्मकं निदर्शनं ऋग्वेदे १.११६.७., १०.१३१.४-५ अथर्ववेदे ४.३४.६ निन्दात्मकं निदर्शनं ऋग्वेदे ७.८६.६; ८.२.१२ मैत्रायिणीसं० १.११.६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भासु सुरापानान्वितानां कलहानां प्राचुर्यमासीत् ।[१] सुरापानं तु पापप्रवृत्तीनां प्रवर्धनायेति प्रायः समर्थितम् ।[२]

अर्थशास्त्रे चरकसुश्रुतयोः संहितयोश्च बहुविधानां सुराणामुपकल्पनविषयो वर्णिता वर्तन्ते । असंख्यकानि तत्रोपकरणानि विद्यन्ते येषां योगेन सुरा निर्मिता । तद्यथा मूलफलपुष्पधान्यव्यंजनपत्रवीजगुडशर्करावल्कलगन्धादीनां सुराः परिद्रष्टव्याः । चरकसंहितायां चतुरशीतिविधीनां सुराणमुल्लेखो वर्तते । तदनुसारं सुरासवेन मनसः शरीरस्य च बलं वर्धते, निद्रा नश्यते, शोकारुच्योर्विनाशो जायते, मनश्च प्रसन्नं भवति ।[३] सुरापाने संयमः कर्तव्यः, अन्यथाधिकपानेन बुद्धिः धैर्यं स्मरणशक्तिश्च विनश्येयुः ।[३]

रामायणानुसारं पानभूमिरापानकं वा सुरापायिनां मनोरंजनार्थमभवत् । पानभूमौ स्वर्णमयान्यासनानि, पानाय स्फटिकरचितानि महार्घपात्राणि स्वर्णघटाश्चाभवन् । राजकीयपानभूमौ नृत्यसंगीतवाद्यादिभिर्मनोरंजनं विधातुं कन्यका नियुक्ता आसन् । पानभूमौ धरातले पुष्पाणि विकीर्णानि ।[४] कामसूत्रानुसारं नैमित्तिकमासीत् समापानकं यत्र सम्भूय समन्तात् पानं कृतम् । नित्यमासीत् सरकाख्यं पानं यत्र नायिकया सह पानं प्रतिदिनं कृतम् ।[५] अर्थशास्त्रानुसारं पानभूमेः सुप्रबन्धाय राजकीयनियन्त्रणमासीत् ।

सुरापानस्य निन्दा सर्वैर्मनीषिभिः कृता ।[६] 'ब्राह्मणा ब्रह्मचारिणो वानप्रस्थाः संन्यासिनो वा कदापि सुरास्पर्शमपि मा कुर्वन्तु' इति विधान-महाभारतानुसारं शुक्राचार्यः सुरापानं ब्राह्मणेभ्यो निषेधितवान् । तथा हि—

यो ब्राह्मणोऽद्य प्रभृतीह कश्चिन्मोहात् सुरां पास्यति मन्दबुद्धिः ।
अपेतधर्मो ब्रह्महा चैव स स्यादस्मिंल्लोके गर्हितः स्यात् परे च ।।आदि० ७१.५४

रामायणेऽपि प्रोक्तम्

न हि धर्मार्थसिद्ध्यर्थं पानमेव प्रशस्यते ।
पानादर्थश्च कामश्च धर्मश्च परिहीयते ।। किष्किन्धा० ३०.४६

बौद्धजैनसंस्कृत्योः सर्वत्र सुराया दोषा आकलिताः । परिणामतः सर्वेऽपि सद्वृत्ति-

---

१. ऋग्वेदे ७.२.१२ शतपथे १.६.३.४;५.५.४.२१; ५.१.२.१२; ५.१.५.२८ । पितृणा कृतेऽपि सुरायाः समर्पणं कृतमिति शतपथे ५.५.४.२७.
२. ऋग्वेदे ७.८६.६
३. चरकसूत्रस्थाने २५.४९; २५.५१
४. रामायणे २.११४.१४; ६.१.२२-२४; ५.११.४-२८
५. कामसूत्रे १.४.३७—३८
६. ऋग्वेदे ७.८६.६; शतपथे ५.९,५.२८ काठकसंहितायां ११.१२; छान्दोग्ये ५.१.२८ आपस्तम्बधर्मसूत्रे १.७२१.८ मनुस्मृतौ ११.९३, ९४; महाभारते शान्ति० १११.२९;३५.२० अर्थशास्त्रे सुराध्यक्षप्रकरणे व्यसनाधिकरणे च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परायणा गृहस्थाः सुराया विरता बभूवुः । भारतोयकयासाहित्ये सुरापानोद्भवानि पापानि निदर्शितानि ।[1]

अन्यपेयानि

वैदिककालतः कीलालं मादकं पेयमासीत् । मधु सर्वेषां सदैव प्रियं पेयमभवत् । मधुपर्कविधौ मधुनः प्रतिष्ठास्थानं सुविदितमेव । इक्षुरसो भारते सदैव लोकप्रियोऽभवत् । फलानां रसोपकल्पने आम्रजम्बुकदलीद्राक्षादीनामुपयोगोऽक्रियत ।[2] एवंविधः रसः कतिपयवृक्षाणां पत्रपुष्पैश्चोपकल्पितः । नारिकेलजलं समुद्रतटवासिभ्यः प्रियमभूत् ।

वनविहारकाले जना मधुमाधवीपानमकुर्वन् । तस्या निर्माणं मधुनोऽभवत् ।[3]

इत्सिङ्गमहोदयस्य लेखानुसारं ख्रीष्टस्य सप्तमे शतके भारते 'चाय' पानस्य प्रचलनमासीत् ।[4]

ऋत्वनुसारं पेयानामुपयोगिता निर्धारितासीत् । तद्यथा काव्यमीमांसायाम्—

सहकाररसार्चिता रसाला जलभक्तं फलपानकानि मन्थाः ।
मृगलावरसाः सृतं च दुग्धं स्मरसंजीवनमौषधं निदाघे ।। अष्टादशमध्याये

भोजनस्य पानस्य च पश्चात् क्वचिद् घ्रेयद्रव्याणामुपयोगः कृतः । महा० सभा ५.६९

स्वास्थ्यसाधनानि

प्रायो नागरिकाः प्रतिदिनं तावन्मात्रं श्रमं न कुर्वन्ति यावान् तेषां स्वास्थ्यधारणायावश्यको भवति । तेषां कृते नित्यव्यायामस्यावश्यकता वर्तते । शरीरे आङ्गिकसौन्दर्यं कर्मण्यतां चाधातुमपि व्यायामः सोपयोगः । व्यायामोद्भवान्याङ्गिकसौष्ठवानि महाभारते वर्णितानि—

पश्य बाहू सुवृत्तौ मे हस्तिहस्तनिभाविमौ ।
ऊरू परिघसङ्काशौ संहतं चाप्युरो महत् ।। आदिपर्वणि १४०.९

---

१. धम्मद्धजजातके २२०; भद्दघटजातके २९१; कुम्भजातके ५१२ महापुराणे ६.२८२
२. रामायणे २.९१.१५; महावग्गे ६.३५.६
३. महा० आदि ७६.३
४. तक्काकुसकृतानुवादे यात्रावर्णने पृ० ९०,१३५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरा राजकुमाराः प्रतिदिनं व्यायामं कुर्वन्ति स्म ।[1] आयुर्वेदानुसारं व्यायामेन शरीरस्य मांसं स्थिरं भवति, कुरूपस्य मानवस्यापि शरीरं सुदर्शनं जायते ।[2]

व्यायामार्थं प्रातःकालः सर्वोत्तमोऽभिमतः । प्लवोत्पतनं वल्गितमास्कन्दः मल्लयुद्धं दण्डयुद्धं मुष्टियुद्धमायुधयुद्धं च व्यायामाङ्गानि सम्मितानि ।[3]

समृद्धिशालिनां व्यायामार्थं विशेषस्थानानि निर्मितानि । तत्र व्यायामभूमौ व्यायामोपयोगिनामुपकरणानि संगृहीतानि । बहवः समवयस्काः सहैव व्यायामं कृतवन्तः । व्यायामकाले तेषां शरीरेषु स्वेदविन्दवोऽशोभन्त ।[4] व्यायामविधिः सम्यक्प्रकारेण वैज्ञानिकनियमानुकूलं विकसितः ।[5]

सौन्दर्यसाधनानि

मानवः शरीरस्य नैसर्गिकसौन्दर्येण परितुष्टो न भवति । शरीरस्य प्रतिचारे स्त्रीणां रुचिः स्वभावतः सविशेषं वर्तते ।[6] नित्यमेव शरीरस्य सौन्दर्याभिवृद्धये नवतराणि उपादानानि उपकल्पितान्येव । अयोध्याविषये प्रवृत्तिरियं वाल्मीकिना प्रमाणिता—

नाकुण्डली नामुकुटी नास्रग्वी नाल्पभोगवान् ।
नामृष्टो न लिप्ताङ्गो नासुगन्धश्च विद्यते ॥ बाल० ५. १०, ११

कतिपये राजानः प्रतिचारोपासका इव प्रजानां स्वपरिचारकादीनां वेशभूषां निरधारयन् । कश्मीरस्य हर्षस्य परिचारकाणां वेशभूषा कल्हणेन वर्णिता—

स्वर्णकेतकपत्राङ्कजूटलम्बोर्जितस्रजः ।
चटुला तिलकाश्लिष्टविलोलतिलकाङ्कुरा ॥
अपाङ्गश्रोत्रयोर्बद्धसन्धयोऽञ्जनरेखया ।
निर्नीरङ्गिककेशान्तबद्धहेमोपवीतिकाः ॥
अधराम्बरपुच्छान्तैर्लम्बैश्चुम्बितभूतलाः ।
प्रच्छादितार्धदोर्लेखकञ्चुकाङ्कपयोधराः ॥ राजतरङ्गिण्यां ७ ९२८.९३०

---

१. सभापर्वणि ५६.२४
२. सुश्रुत० चिकि० २४ अध्यायतः
३. कल्पसूत्रे १ महावीरचरिते
४. कादम्बर्यां १५ पृष्ठे ।
५. सुश्रुतसंहितायां चिकित्सितस्थाने २४.३५—४२, ४५—४७
चरकसंहितायां सूत्रस्थाने ७.३१,३२
६. ऋग्वेदे १.८५.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दोघनिकाये बौद्धकालिकप्रसाधनादीनां सूची वर्तते। तद्यथा उच्छादनं परिमद्दनं नहापनं संवाहनं, आदासं, अंजनं, माला विलेपनं, मुखचुण्णकं मुखलेपनं, हत्थबन्धं, शिखाबन्धं, दण्डकं, नालिकं, खग्गं, छत्तं, चित्रुपाहनं, उण्हीसं, मणिं वालवीजनिं, ओदातानि वत्थानि दीघदसानि।[M]

दन्तधावनम्—

प्रातरुत्थाय सर्वप्रथमं दन्तधावनं करणीयमिति नियम आसीत्। दन्तकाष्ठप्रयोगार्थं वृक्षाणां चयनमायुर्वेदानुसारं कृतम्। जना दन्तकाष्ठस्य शिरोभागं कूर्चीकृत्य तैलेन मधुना वाऽभिषिच्य सैन्धवत्रिफलातेजोवतीचूर्णैः दन्तेषु घर्षयन्ति स्म।[१] दन्तधावनस्य लाभा वैज्ञानिकदृष्ट्या पर्यालोचिताः। तथा हि—दन्तधावनेन नेत्रे स्वस्थे भवतः मुखात् सुगन्धिर्निःसरति। भोजनस्योदरगमनमार्गः परिशुध्यति। भोजने पित्तकफादीनामशुद्धद्रव्याणां सम्मिश्रणं न भवति। भोज्यास्वादनशक्तिरपि वर्धते।[२] विलासिनामुपयोगार्थं सप्ताहपर्यन्तं विविधव्यंजनेषु दन्तधावनं संस्कारितम्।

केशसंस्करणम्—

दन्तधावनस्य पश्चात् स्नानविधेः प्रागेव केशसंस्करणमक्रियत। प्रतिचतुर्थदिनं श्मश्रुकर्तनं, प्रतिपंचमदिनं प्रतिदशमदिनं वा केशकर्तनं नागरिकैः कर्तव्यमिति वात्स्यायनः। स्त्रियोऽपि केशकर्तनमकारयन्। पुरुषाणां रुच्यनुसारं श्मश्रुकेशादीनां पूर्णमांशिकं वा वपनं कृतम्।

अङ्गमर्दनम्—

व्यायामस्य पश्चादङ्गमर्दनं विधेयमासीत्। पादाभ्यां मर्दनमुत्सादनमिति हस्ताभ्यां शिरोऽभ्यङ्गकमं केशमर्दनमिति शेषाङ्गेषु मर्दनं संवाहनमिति कथ्यन्ते। प्रथमं शिरसि तैलमिश्रितम्। विविधेष्वङ्गेषु विभिन्नप्रकाराणां तैलानां मर्दनमभवत्। अङ्गमर्दनविद्याविशारदाः संवाहिकाः समृद्धिशालिभिरस्मै प्रयोजनाय नियुक्ताः।[3] अङ्गमर्दनस्य पश्चादुद्वर्तनं कृतम्।[४]

स्नानम्

स्नानं नित्यमेव कर्तव्यं द्विः त्रिः वा यथेच्छम्। सिन्धुसभ्यतायुगे नागरिकाणां स्नानाय

M दीर्घनिकाये १.१

१. सुश्रुतसंहितायां चिकित्सितस्थाने २४.५

२. चुल्लवग्गे ५.३१.१। अपरंच—दन्तधावनेन शरीरं सुन्दरं भवति मुखकान्तिर्वर्धते वाणी मधुरा जायते च। बृहत्संहितायां ७७.३१-३४ अयमेव विषयो नारदपुराणे पूर्वभागे द्वितीयपादे ५० अध्याये समर्थितः।

३. चरकसंहितायां सूत्रस्थाने ५. ८५-८८; कल्पसूत्रे जिनचरिते।

४. सुश्रुतसंहितायां चिकित्सितस्थाने २४.४९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बहवो जलाशयाः कारिताः।[१] साधारणतो जनाः स्वगृहकूपजलेन स्नानागारे स्नातवन्तः। शरीरं स्वच्छं विधातुं तदा बहुविधद्रव्याणामुपयोगः प्रचलितः। पुरा नगराणि प्रायशो नदीतटेषु स्थितानि बभूवुः। सार्वजनिकसरोवराणां जलविशुद्धये जलागमद्वारजालकानि प्रयुक्तानि।

समृद्धिशालिनां स्नानविधिः महाभारतीयेनाधोलिखितवर्णनेन परिचीयते—

उत्थायावश्यककार्यार्थं ययौ स्नानगृहं नृपः॥
ततःशुल्काम्बराः स्नातास्तरुणाः शतमष्ट च।
स्नापकाः काञ्चनैः कुम्भैः पूर्णैः समुपतस्थिरे॥
भद्रासने सूपविष्टः परिधायाम्बरं लघु।
सस्नौ चन्दनसंयुक्तैः पानीयैरभिमन्त्रितैः॥
उत्साहितः कषायेण बलवद्भिः सुशिक्षितैः।
आप्लुतः साधिवासेन जलेन स सुगन्धिना॥
राजहंसनिभं प्राप्य उष्णीषं शिथिलार्पितम्।
जलक्षयनिमित्तं वै वेष्टयामास मूर्धनि॥
हरिणा चन्दनेनाङ्गमुपलिप्य महाभुजः।
स्रग्वी चाक्लिष्टवसनः प्राङ्मुखः प्राञ्जलिः स्थितः॥ द्रोण० ५८.८-१३

शरीराङ्गेषु स्फूर्तिमाधातुं चर्मरोगांश्च नाशयितुमिष्टकया घर्षणं कृतम्।[१] स्नानागाराः परमरमणीया रत्नमणिमौक्तिकजटिताश्च बभूवुः। स्नानविधिः क्वचित् क्रीडामयोऽभवत्।[२] स्नानस्य प्रायः सर्वेऽपि गुणाः प्राचीनयुगेऽवधारिता आसान्।[३]

स्नानप्रक्रियाणां वैज्ञानिकपर्यालोचनं कृतमासीत्। तथा हि—उष्णजलेन शिरसः स्नानात् नेत्रदौर्बल्यं जायते। शिरसः स्नानं शीतलजलेन कर्तव्यम्। शीततौ वायुकफादीनां विकारोऽतिशीतलजलस्नानेन भवति। ग्रीष्मे पित्तरक्तादीनां विकार उश्णजलस्नानेन संभवति।

भारतीयं स्नानं तु पुरापि शरीरस्याभ्यन्तरबाह्यशुद्धयेऽभवत्।[४] प्राचीनकाले योरपीयस्नानागारा रोमादिनगरेषु प्रायशः कामवृत्तिपरितर्पणायासन्नित्यन्तरम्।

M. तत्र महास्नानागारस्य भवनं १२० × ७२ हस्तायाम आसीत्। तस्मिन् स्नानजलाशयः २६ × १६ हस्तायाम आसीत्। स्नानागारभवनस्याभ्यन्तरभागे परितः प्रघणोऽभवत्। यथाकालं स्नानजलं नवीकृतम्। महास्नानागारस्य दक्षिणपश्चिमभागे उष्णवाष्पस्य स्नानागारोऽत्रस्थितः। एकस्य कक्षस्य मण्डलितपटलादपरेषु स्नानगृहेषु उष्णतायाः प्रसारःकृतः।

१. सुश्रुतसंहितायां चिकित्सितस्थाने २४.५४
२. कल्पसूत्रे जिनचरिते
३. चरकसंहितायां सूत्रस्थाने ५.९१; सुश्रुते चिकित्सितस्थाने २४.५५–५६
४. स्नानं नाम मनःप्रसादजननं दुःस्वप्नविध्वंसनम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आकल्पः प्रसाधनञ्च

स्नानस्य पश्चात् शरीरस्य प्रसाधनं क्रियते। तद् द्विविधम्। प्रथमं तावत्—अनुलेपनं, चित्रणं, वासयोगः, तिलकधारणं च। द्वितीयं तु शरीराङ्गेष्वाभरणधारणम्। प्रसाधनं न केवलं विलासार्थमेव, अपि तु वैज्ञानिकदृष्ट्या चन्दनकेसरादीनां सुगन्धितद्रव्याणामनुलेपनेन पुष्पमालाधारणेन च वृषतासुगन्धिसौन्दर्यायुर्बलपुष्टीनां संवर्धनं भवति, मनः प्रसन्नं जायते, दारिद्र्यं दूरं याति च।[1]

सिन्धुसभ्यतायुगस्य बहूनि प्रसाधनपात्राणि प्राप्तानि सन्ति। कतिपयानि प्रसाधनद्रव्याण्यपि तेषु वर्तन्ते। तस्मिन् युगे नेत्रयोः प्रसाधनं शलाकयाञ्जनयोगेन कृतम्। शरीरस्य रंजनं रक्तद्रव्येण कृतम्। शरीरस्य शुभ्रतां विधातुं कस्यचित् द्युतिमतो वस्तुनः प्रयोगोऽभवत्।

वैदिकयुगेऽपि हिरण्मयत्वमिन्द्रस्य केनचिदनुलेपनेन प्रसिद्धम्।[2] तदा यज्ञकर्मणि प्रयुक्तो यजमानो नवनीतेन शरीरस्यानुलेपनमकरोत्। चूर्णैः शरीरस्य सौन्दर्यं संवर्धितम्।[3] महाभारतानुसारं राजगृहेषु प्रमदानां प्रसाधनाय सैरन्ध्रीणां नियुक्तिः कृता। राज्ञां प्रसाधनार्थं दास्यः शिल्पिनश्चापेक्षितवस्तूनामुपकल्पनं कुर्वन्ति स्म।[4] नायिकानायकयोः मनोविनोदार्थमपि परस्परं प्रसाधनस्य रीतिरासीत्। पतिः पत्न्याः कपोले चित्रमर्पयति स्म।[5] राज्ञां प्रसाधनविधिः कालिदासेन निर्दिशितः—

तं धूपाश्यानकेशान्तं तोयनिर्णिक्तपाणयः।
आकल्पसाधनैस्तैस्तैरुपसेदुः प्रसाधकाः॥
तेऽस्य मुक्तागुणोन्नद्धं मौलिमन्तर्गतस्रजम्।
प्रत्यूपुः पद्मरागेण प्रभामण्डलशोभिना॥
चन्दनेनाङ्गरागं च मृगनाभिसुगन्धिना।
समापय्य ततश्चक्रुः पत्रं विन्यस्तरोचनम्॥ रघुवंशे १७.२२-२४

शौचस्यायतनं मलापहरणं संवर्धनं तेजसः॥
रूपोद्योतकरं रिपुप्रशमनं कायाग्निसन्दीपनम्।
नारीणां च मनोहरं श्रमहरं स्नानं दशैते गुणाः॥

१. चरके सूत्रस्थाने ५.९३
कल्हणानुसारं तु
वज्राद्वज्रकृतं भयं विरमति श्रीः पद्मरागाद् भवेत्।
नानाकारमपि प्रशाम्यति विषं गारुत्मतादश्मनः।
एकैकं क्रियते प्रभावनियमात् कर्मोऽतिरत्नैः परम्॥ राजत० ४.३३१

२. ऋग्वेदे १.१३३.८

३. कौषीतकिब्राह्मणोपनिषदि १.४

४. वनपर्वणि ४६,८; अर्थशास्त्रे 'आत्मरक्षाप्रकरणे'। नारीणां शरीरेषु तासामनुरागिणो जनाश्चित्रणं कुर्वन्ति स्म। सुश्रुतरिते

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

५. प्रतिमानाटके प्रथमाङ्के, सौन्दरनन्दे च।

दिनभागमधिकृत्य वेषवैशिष्ट्यं कृतमासीत् । तद्यथा काव्यमीमांसायाम्—अभिनव-कुशसूचिस्पर्धिकर्णे शिरीषं मरुबकपरिवारं पाटला दामकण्ठे । स तु सरसजलार्द्रोन्मीलित: सुन्दरीणां दिनपरिणतजन्मा कोऽपिवेशश्चकास्ति ॥

विभिन्नर्तुषु प्रसाधनानां वैचित्र्यस्य कल्पना गुप्तयुगे सविशेषं दृश्यते । तथा हि शिशिरं विहाय सदैव चन्दनानुलेपनं नित्यं क्रियते स्म । हेमन्ते रमण्यः कपोलप्रदेशेषु पत्रलेखां चित्रयन्ति स्म । वसन्ते सितचन्दनस्य लेप: प्रियोऽभूत् । वक्षःप्रदेशे प्रियंगुकालीयककुंकुम-कस्तूरिकाणां चन्दनेन मिश्रणं कृत्वा लेप: कृत: । अस्मै प्रयोजनाय रक्तचन्दनमपि प्रयुक्तमभवत् । हरिचन्दनं सुप्रियं बभूव । सर्वाङ्गेषु तस्य लेप: कृत: ।[1] ग्रीष्मस्य सन्तापः प्रसाधनै: शमित: । तद्यथा काव्यमीमांसायाम्—

मुक्तालताश्चन्दनपङ्कदिग्धा मृणालहारानुसृता जलार्द्राः
स्रजश्च मौलौ स्मितचम्पकानां ग्रीष्मेऽपि सोऽयं शिशिरावतारः ।
अपरञ्च गीष्मस्य कल्पवैशिष्ट्यं वर्णितं तत्रैव
कर्णे स्मेरं शिरीषं शिरसि विचकिलस्रग्लताः पाटलिन्यः
कण्ठे माणलिहारो वलयितमसिताम्भोजनालं कलाच्योः ।
सामोदं चन्दनाम्भः स्तनभुविनयने, म्लानमांजिष्ठपृष्ठे
गात्रं लोलज्जलार्द्रं जयति मृगदृशां ग्रैष्मिको वेष एषः ॥

विभिन्नाङ्गानां प्रसाधनार्थं विविधा रचना द्रव्याणि चोपयोजितानि । एषु ताम्बूल-सेवनेन सामान्यतोऽधररागः समजनि । पत्रवल्लीद्वारा मुखे कस्तूरिकया चित्राणि विरचितानि । दन्तलेखका दन्तरंजनं कुर्वन्ति स्म । अधरस्य विशेषरागो यावकेन कृतः ।[2] रञ्जितोऽधरः पल्लववददृश्यत ।[3] कपोले पत्रलेखा तिलकश्च कृतौ । मुखे पाण्डुतां विधातुं लोध्रपरागो विकीर्णः । मुखवासेन श्वासः सुगन्धितः ।[4] नखरञ्जनमक्रियत । बाहुः चन्दनागुरुलेपैर्हषितः ।[5] पादौ लाक्षारसेन रंजितौ । तयोः शोभा पल्लवाकृतिभिः संवर्धिता । अंगुष्ठे तिलको रचितः । अलक्तकरागेण बहुविधानि चित्राणि तत्र कृतानि ।[6] वक्षःस्थले चन्दनलेपं कृत्वा तत्र केसरो विकीर्णः । ललाटे भ्रुवोरुपरि पुष्पगुच्छाकृतिः रचिता ।[7] दन्तानां बहवो रागाः कृताः । तद्यथा नाटयशास्त्रे—

---

१. ऋतुसंहारे २.२२.४.५;६ ७,१४ कादम्बर्यां पृ० २०६ शिशुपालवधे ८.५७; रघुवंशे १६,३७;६ ६०,७२ : हरविजये १७.८६ हरविजये २५.२१
२. शिशुपालवधे ८ ५५;९.४६
३. नाट्यशास्त्रे २१.२६
४, शिशुपालवधे ६.५२
५. सभापर्वणि २१.३०
६. नाट्यशास्त्रे २१.४०.४१; ऋतुसंहारे १.५ कादम्बर्यां ११ पृष्ठे
७. नाट्यशास्त्रे २१.२४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नेत्रयो रंजनं कार्यमधरस्य च रंजनम् ।
दन्तानां विविधा रागाश्चतुर्णां शुक्लता यथा ॥ २१.२८

न केवलं युवका अपि तु बालका अपि धातुरसैः शरीरं रंजयन्ति स्म । प्रसाधनपरीक्षणाय दर्पणस्योपयोगः कृतः । बहुविधा धातुनिर्मिता दर्पणाः बभूवुः ।[१]

गुप्तयुगेऽसंख्यविधा गन्धाङ्गरागादयो निर्मिताः । तेषां वैविध्यं प्रयुक्तोपकरणानां वैचित्र्येण तेषां मात्राया न्यूनाधिक्येन च कल्पितम् ।[२]

केशरचना :

केशा द्वयोरपि स्त्रीपुरुषयोः समानरूपेण लम्बा बभूवुः । लोकास्तेषां संवर्धनाय प्रसाधनाय च प्रायतन्त । सिन्धुसभ्यताया युगादेव भारतस्य विविधभागेषु विविधप्रकारैः केशप्रसाधनं प्रचलितम् । वैदिकयुगे कङ्कतप्रयोगेण केशरचना कृता । केशं संग्रथ्य शिरसः शिखरभागे ओपशरचना कृता । पृथुष्टुका विषितष्टुका च द्विविधे वेण्यौ रचिते । शिरसि केशपाशानां कपर्दाः कृताः[३] ।

श्वेतकेशानां विरलत्वे भूते तेषामुन्मूलनं कृतम् । श्वेतकेशानां बाहुल्ये भूते केशकल्पेन तेषां श्यामीकरणं सुप्रचलितमासीत् ।[४] स्नानस्य पश्चात् केशपाशं शोषयित्वा तैलैः सुगन्धितधूपैश्च तस्य सुवासनमक्रियत ।[५]

कबरीबन्धः शिरसः पश्चभागे चूडश्चाग्रभागे कृतौ । शिरसोऽग्रभागे कुरत्नशोभनाः स्त्रियः प्राग्गुल्फेति प्रथिताः । नापितः कर्तनेन श्मश्रुणोरलङ्करणं कृतवान् ।[६]

प्राचीनयुगस्य केशरचनासमकालिकमूर्तिचित्रादिषु प्रत्यक्षीकर्तुं शक्यते । अजन्ताबाघादिषु स्थानेषु गुहानां चित्रेषु खजुराहोभुवनेश्वरादिषु स्थानेषु मन्दिराणां मूर्तिसहस्रेषु च केशकल्पः प्रत्यत्तं वर्तते । ग्रन्थेषु केशरचनानेकत्र वर्णिता । तथाहि नाटयशास्त्रे—

अवन्तियुवतीनां तु शिरः सालककुन्तलम् ।
गौडीनामलकप्रायं सशिखापाशवेणिकम् ॥

---

१. शतपथे ५.४.५.२२; घतजातके ३५५
२. बृहत्संहितायां ७७ अध्याये
३. ऋग्वेदे ८.३३.१;१०.११४.३ अथर्ववेदे ६.१३६;८ २ १७;शतपथे ५.५.३.१
४. अम्बजातके ३.४४ बृहत्संहितायां ७७.१
५. रघुवंशे १६.५० । विविधानां सुगन्धिततैलधूपवासनद्रव्यकेशकल्पानां निर्माणविधिः बृहत्संहितायां
७७.४-२० वर्तते । तथा हि १७४७२० विधाः गन्धाः षोडशद्रव्याणां मिश्रणेन सम्भवन्ति । शत-
पाकसहस्रपाकादीनां तैलानामुल्लेखः 'उवासग दसाओ' ग्रन्थे प्रथमाध्याये विद्यते ।
६. महाभाष्ये २.१.१;४.१.६० तथा १.२.९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आभीरयुवतीनां तु द्विवेणीधरमेव च ।
शिरः परिगतं कार्यं नीलप्रायमथाम्बरम् ॥
तथा पूर्वोत्तरस्त्रीणां समुद्धतशिखण्डिकम् ।
आकेशं छादनं तासां वेशकर्मणि कीर्तितम् २१.६५-६७

केशस्यैकस्मिन्नेव दिने वारं वारं संस्करणं कृतम् ।[1]
अमरकोशे मनुस्यवर्गे केशरचनामधिकृत्य निर्दशितम्—

अलकाः चूर्णकुन्तलाः काकपक्षः शिखण्डकः ।
कबरी केशवेशः, अथ धम्मिल्लः संयताः कचाः ॥
शिखा चूडा केशपाशी व्रतिनस्तु जटा सटा ।
वेणिप्रवेणी शीर्षण्यशिरस्यौ विशदे कचे ॥
पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ।

केशेषु पुष्पग्रथनं सुप्रचलितरीतिरभवत् । चित्रमाल्यानुकीर्णकेशपाशस्य वर्णनं कालिदासेन कृतम्—

अपि तुरगसमीपादुत्पतन्तं मयूरं
न स रुचिरकलापं बाणलक्ष्यीचकार ।
सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे
रतिविगलितबन्धे केशपाशे प्रियायाः ॥ रघुवंशे ९.६७

अलंकाराः

सौन्दर्यसंवर्धनाय वैभवप्रदर्शनाय सौभाग्याधानाय च प्रायः सदैवालङ्कारधारणविधिः प्रचलितोऽभवत् ।[2] अलङ्कार-निर्माणाय मृत्तिका-शुक्ति-पत्र-पुष्प-लता-फल-धातु-रत्न-मणि-हस्तिदन्त-काचादीनां प्रायोऽनायासप्राप्तव्यानां महार्घाणां च वस्तूनाममुपयोगः कृतः । विशाले भारते अलङ्कारार्थं बहुविधानामुपादानानां प्रायः सर्वत्र प्राचुर्यं वर्तते एव । शरीरस्य प्रायः सर्वाण्यङ्गानि विभूषणस्थानानि भवितुमर्हन्ति ।

---

१. मृच्छकटिके २.९ ।
२. सौभाग्याधानायालङ्कारस्योपयोगिताऽथर्ववेदे वर्णिता । तथा हि—
अग्नेः प्रजातं परियद्धिरण्यममृतं दध्रे अधिमर्त्येषु ।
य एनद्वेद स इदेनमर्हति जरामृत्युर्भवति यो बिभर्ति ॥ १९.२६.१
गजमुक्ताधारणेन पुत्रविजयस्वास्थ्यानि प्राप्यन्ते । बृहत्संहितायां ८१.२२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिरसोऽलङ्काराः

सिन्धुसम्यतायुगे शिरः मृत्तिकाहस्तिदन्तस्वर्णरजतादिभिर्निर्मितैः त्रिकोणैः सज्जितम्। स्त्रियः केशेषु पुष्पग्रथनं कुर्वन्ति स्म । ललाटे स्वर्णपत्रं बद्धम् । परवर्तिकाले विशेषकच्छेद्यविधिना निर्मितः पत्राणां ललाटतिलको धारितः ।[1]

वैदिकयुगे केशगुच्छकाः कुरीरैराबद्धाः । राज्ञां शिरसि स्वर्णमुकुटमशोभत । परवर्तियुगे चूडामणिमुक्तगुणकिरीटादयः शिरोऽलङ्कारा बभूवुः । स्त्रियः वेणीषु स्वर्णसूत्राणि ग्रथ्नन्ति स्म । तासामलकेषु मुक्ताजालानि ग्रथितानि ।

भागवतानुसारं कृष्णस्य शिरसि मयूरपिच्छालङ्करणं बभूव । गोपाला लताप्रतानैः जटाजूटं बध्नन्ति स्म । कतिपयवनप्रियाः शिरसि पुष्पालङ्कारमेव बहु मन्यन्ते स्म । राज्ञां मुकुटान्यपि मालतीकुसुमैः रचितानि ।[2] राज्ञां मौलिषु पुष्पमालाः ग्रथिताः । स्त्रीणामलकेषु बालकुन्दपुष्पम्, चूडापाशेषु नवकुरबकपुष्पम्, सीमन्तेषु नीपपुष्पं ध्रियन्ते स्म । शिरसि पुष्पावतंसः प्रायः धृतः । विविधानां पुष्पमालानां वर्णनममरकोशे विद्यते । तथा हि—

माल्यं मालास्रजौ मूर्ध्नि केशमध्ये तु गर्भकः ।
प्रभ्रष्टकं शिखालम्बि पुरो न्यस्तं ललामकम् ।।
प्रालम्बमृजुलम्बि स्यात्कण्ठात् वैकक्षकं तु तत् ।
यत्तिर्यक् क्षिप्तमुरसि शिखास्वापीडशेखरौ ।।

स्त्रियः सीमन्तप्रदेशे मुक्तामयमलङ्कारं शशिकलेति ख्यातं धारयन्ति स्म । तासां ललाटे स्वर्णशृङ्खलाबद्धश्चटुलातिलकोऽशोभत । कतिपयस्त्रियः ललाटिकां धारन्ति स्म ।[3] पुरुषा अपि ललाटे सुवर्णपट्टिकां धारन्ति स्म । तेषां कपोलतले कुण्डलद्वयं विराजितम् ।[4]

कर्णालङ्काराः

सिन्धुसम्यतायुगादेव कर्णेषु बहुविधा अलङ्कारा ध्रियन्ते स्म । तादृशानामलंकाराणां नामानि—कर्णोत्तंसः, कर्णेन्दुः, कर्णदर्पणः, कर्णमुकुरः, कर्णपाली, कर्णपूरः, कर्णपाशः कर्णभूषणम्, कर्णवेष्टः, कुण्डलम्, कर्णिका, कर्णवलयः, ताटङ्कः, ताडी, शंखपत्रं, पत्रकर्णिका, कर्णमुद्रा, कर्णोत्पलमिति साहित्यग्रन्थेषु प्राप्यन्ते । कर्णालङ्काराः प्रायः पत्रपुष्पैरपि

---

१. कामसूत्रे १.३.१६ टीका
२. कादम्बर्यां ९ पृष्ठे
३. रघुवंशे १७.२३
४. हरविजये २३.३६.३७.४०.२६
५. नैषधचरिते [illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रचिताः । ग्रामवधूटीनां कर्णालङ्करणं शस्यकणिकेनापि कृतम् । पुरुषाणां कर्णालङ्काराः स्त्रीवद् बभूवुः ।[1] कर्णालङ्कारधारणार्थं कर्णवेधस्य प्रचलनमासीत् ।

ग्रीवालङ्काराः

ग्रीवालङ्काराणां संख्या सदैवात्यधिका बभूव। ग्रीवावलम्बनेन बहुभारवन्तोऽपि बहवोऽलङ्कारा धृताः । ग्रीवायां धृतानामलङ्काराणां नामानि—सूत्रं, हारः, माला, ग्रैवम्, ग्रैवेयकम्, कण्ठाभरणम्, मणिमाला, रत्नावली, मुक्तालता, मौक्तिकसरः, कनकसूत्रम्, कण्ठकञ्च प्राप्यन्ते । हाराणां वैदिकनामानि रुक्मः निष्कः सृङ्का प्राप्यन्ते । मणिग्रीवाः निष्कग्रीवाश्च पुरुषाः समादृता बभूवुः ।

परिवर्तियुगे मौक्तिकहाराणां प्रचलनं सविशेषमभवत् । दीर्घह्रस्वमुक्तानां संग्रन्थनक्रमवैविध्येन शीर्षकोपशीर्षकप्रकाण्डकावघाटकतरलप्रतिबन्धकादयः यष्टयो बभूवुः। हारेषु क्रमशः १००८, ५०४, १००, ६४, ५४, ३२, २७, २४, २०, १० यष्टयः संगृहीताः । एतेषां नामानि—इन्द्रच्छन्दो विजयच्छन्दो, देवच्छन्दोऽर्धहारः, रश्मिकलापः, गुच्छः, नक्षत्रमाला, अर्धगुच्छः, माणवकः, अर्धमाणवकश्चासन् । मुक्तामणिस्वर्णगुलिकादीनां परस्परं संग्रन्थनेन यष्टीनां रत्नावली, अपवर्तकः, सोपानकः, मणिसोपानकश्चेति भेदाः कृताः ।[2] नाट्यशास्त्रानुसारं हाराणां भेदा विभूषिताङ्गदृष्ट्यापि भवन्ति । तथा हि कण्ठविभूषणं—'मुक्तावली, व्यालपंक्तिः, मञ्जरी, रत्नावली, रत्नमालिका, शृंखलिकादयः' कण्ठस्य शोभासंवर्धनाय भवन्ति । त्रिसरो हारश्च वक्षःस्थलशोभनाय भवतः । देहभूषणेन समग्रशरीरं शोभते । कटिप्रदेशशोभनाय तरलसूत्रकादयः भवन्ति ।[3]

उपर्युक्तहाराणां रचना बहुमूल्यरत्नादिकैरभवत् । कण्ठस्य विभूषणाय पुष्पमालानां प्रचलनं वैदिकसाहित्येऽपि दृश्यते । अश्विनौ देवौ पुष्करस्रजौ आस्ताम् । न केवलं मनुष्या अपि तु पशवो गृहा अपि च हारैः मालाभिश्च समलंकृताः ।

उपकरणदृशा मालाश्चतुर्विधाः—आर्द्रशुष्कोन्मुक्तमिश्रा बभूवुः । पुष्पादीनामार्द्रमाला, शुष्कपत्रादिसम्भूता शुष्कमाला, सिक्थादिसम्भूतोन्मुक्तमाला, सर्वेषां मिश्रणेन मिश्रमालेति ख्यापितम् ।[4]

भुजालङ्काराः

सिन्धुसभ्यतायुगादेव प्रायः सदैव भुजयोः प्रकोष्ठप्रदेशे धातुशुक्तिमृत्तिकाकाचादिभिर्निर्मिताः कंकणवलयादयोऽलङ्कारा धारिताः । बाहुप्रदेशे भुजबन्धेन करशाखाश्चाङ्गुलीयै

१. नैषधचरिते १५.६५
२. विशेषज्ञानाय अर्थशास्त्रे अध्यक्षप्रचारोऽध्यायः ११ द्रष्टव्यः ।
३. नाट्यशास्त्रे २१.१७-३८
४. पद्मपुराणे २४.४४,४५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विभूषिताः । हिरण्यखादिः कङ्कणवत् धारितः । भुजेषु रामायणमहाभारतानुसारं वलयकेयूराङ्गदानां विभूषणं रराज । पुरुषाणां वलया रत्नमणिस्वर्णादिभी रचिताः । नाट्यशास्त्रानुसारं भुजालङ्कारा बहुविधा आसन् ।[1] तथा हि

अङ्गदं वलयं चैव बाहूमूलविभूषणम् ।
खर्जुरं स्वेच्छितीकश्च बाहुनालीविभूषणम् ।।
कटकं कलशाखा च हस्तपत्रं सुपूरकम् ।
मुद्राङ्गुलीयकं च स्यादङ्गुलीनां विभूषणम् ।। २१.३४-३५

रसिकानां वलयास्तु पद्मनालैरपि रचिताः ।[2] हस्तेषु लीलाकमलानि धारितानि । स्त्रीपुरुषबोर्द्वयोरपि हस्ते छत्रं विभूषणाय बभूव ।

छत्रं यष्टिर्वा नागरिकैरवश्यमेव धारणीया इति सभ्यानां मान्यतासीत् । राज्ञां छत्राणि पक्षिणां पिच्छैः निर्मितानि परितः शुल्कदुकूलैराच्छादितानि च बभूवुः । यत्र यत्र तेषां छत्रेषु मणय उपचिता मौक्तिकहाराश्च बहिर्भागादवलम्बिताः । छत्रस्य मूलभागः स्फटिकमणिना विरचितः, दण्डो वेतसेन निर्मितः । वैभवशालिनां छत्रं स्वर्णपत्रैराच्छादितं पुष्पमालाभिः समलङ्कृतञ्च बभूव । यथाकालमातपाद्वर्षात् शीताच्च रक्षा छत्रेण कृता । यष्टिहस्ता जना याष्टिका इति संज्ञिताः ।

नायिकाः कुमुदिनीहस्ता नायकदर्शनं कुर्वन्ति स्म ।[3]

कटिभूषणानि

कटिप्रदेशे कांचीविभूषणं सिन्धुसभ्यतायुगात् प्रचलति । कांचीकलापे रत्नानि ग्रथितानि । तस्य वैविध्यं नाट्यशास्त्रे वर्णितम्—

कांचीमौक्तिकजालाद्या कुलकं मेखलं तथा ।
रशना च कलापश्च भवेच्छ्रोणीविभूषणम् ।।
एकयष्टिर्भवेत्कांची मेखला त्वष्टयष्टिका ।
रशना षोडश ज्ञेया कलापः पंचविंशतिः ।। २१.३६,३७

पुष्पाणामपि कांची कृता । तद्यथा कुमारसम्भवे

स्रस्तां नितम्बादवलम्बमाना पुनः पुनः केसरदामकाञ्चीम् ।
न्यासीकृतां स्थानविदा स्मरेण मौर्वीं द्वितीयामिव कार्मुकस्य ।। ३.५५.

पादभूषणानि

सिन्धुसभ्यतायुगे जानुप्रदेशादारभ्याप्रपदमलङ्करणमभवत् । पादयोर्नूपुरं सुप्रथितमेव । नाट्यशास्त्रे पादभूषणानामाकलनं कृतम् । तथा हि—

१. कटकोऽङ्गुलिमुद्रा च स्यादङ्गुलिविभूषणम् ।
केयूरमङ्गदं चैव कूर्परोपरि विभूषणम् ।। नाट्यशास्त्रे २१.१७-१९

२. शिशुपालवधे ८.४४; उत्तरमेघे २

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३. हरविजये १.२७

नूपुरः किंकिणीकं च रत्नजालकमेव च ।
संघोषकटकं चैव गुल्फोपरि विभूषणम् ॥
पदयोः पादपत्रं स्यादङ्गुलीष्वङ्गुलीयकम् ।
अङ्गुष्ठे तिलकं चैव पादयोश्च विभूषणम् ॥ २१.३९-४०

पादेषु हंसकः पादकटको वा हंसवद् ध्वनिमकरोत् ।[१] हर्षस्य सामन्ताः रत्नजटितं पादबन्धमधारयन् । हरविजये पादाङ्गदस्य मञ्जीरकस्य वर्णनं वर्तते ।[२]

पादयोः सुरक्षायै पदत्राणधारणस्य रीतिः वैदिककालतः प्रवर्तते । पदत्राणस्य विविधभेदाः तेषामुपादानरंगाकारापेक्षया बभूवुः । पदत्राणेष्वपि स्वर्णरजतसूत्रैः मणिरत्नमुक्तादिभिश्च शिल्पानि रचितानि । चर्मदारुकमलपत्रोर्णादिभिः पादुका निर्मिताः ।[३] पादुका अपि स्वर्णभूषिताः स्वलंकृता बभूवुः । कलकत्तासंग्रहालयस्य लौरियनटङ्गाईति स्थाने प्राप्तस्य गौतमबुद्धस्य मूर्तौ आधुनिकचप्पलवत् पदत्राणं वर्तते ।[m]

भारते सदैव प्रसाधनानामाधिक्यं समृद्धिशालिनागरिकेभ्योऽभूत्, किन्तु साधारणजनाः सदैव सरलजीवनविन्यासेन परितुष्टा बभूवुरिति ह्वेनसांगेन प्रमाणितम्—The kshatriyas and Brahmins are cleanhanded and unostentatious, pure and simple in life and very frugal. The dress and ornaments of the kings and grandees are very extraordinary. Garlands and tiaras with precious stones are their head-adornments; and their bodies are adorned with rings, bracelets and necklaces, wealthy mercantile people have only bracelets. Most of the people go barefoot and shoes are rare.[४]

नखलेखका नखस्य रंजनं कुर्वन्ति स्म ।[५]

वस्त्र-विन्यासः

भारतीयो जलवायुः सामान्यतः समशीतोष्णो वर्तते । स्वभावतो जना द्वन्द्वविनिर्मुक्ताः सन्ति । अस्यां स्थितौ वस्त्राणामावश्यकता नात्यधिका भवति । अपरं च प्राचीनयुगेऽलङ्काराणां प्रदर्शनार्थं नाधिकवस्त्रधारणमपेक्षितमभवत् । तथापि शरीरसौभाग्यं बहुमूल्य-

१. शिशुपालवधे ७.२३
२. हर० १८.८; १५.५
३. तै० सं० ५.४.४ । शतपथ० ५.४.३.१९ महाभाष्ये ५.१.२, १४ महावग्गे ५.२.१-४;५,८ १,३ M. S.K. Saraswati: A Survey of Indian Sculpture Plate XIV Fig.63
४. ह्वनसांगे वाटसकृते भागे १ पृ० १५१
५. महाभाष्ये ६.३.७३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वस्त्रपरिधानेनापि करणीयमिति नागरिकाणां शाश्वतधारणाऽभूत् । तेषां प्राच्यानां वस्त्रविन्यासपरिज्ञानं चित्रमूर्तिशिल्पसाहित्यादीनामनुशीलनेन भवति ।

स्वभावतो वस्त्राकलनमृतुमपेक्ष्य भवति । तथा हि ऋतुसंहारानुसारं—

हेमन्ते—न बाहुयुग्मेषु विलासिनीनां प्रयान्ति सङ्गं वलयाङ्गदानि ।
नितम्बबिम्बेषु नवं दुकूलं तन्वंशुकं पीनपयोधरेषु ।। ४.३

शिशिरे—गुरूणि वासांसि प्रयान्ति सेव्यताम् । ५.२
मनोज्ञकूर्पासकपीडितस्तनाः सरागकौशेयकभूषितोरवः ।। ५.८

वसन्ते—कुसुम्भरागारुणितैर्दुकूलैर्नितम्बबिम्बानि विलासिनीनाम् ।
तन्वंशुकैः कुङ्कुमरागगौरैरलंक्रियन्ते स्तनमण्डलानि ।। ६.५
गुरूणि वासांसि विहाय तूर्णं तनूनि लाक्षारसरञ्जितानि ।
सुगन्धिकालागुरुधूपितानि धत्ते जनः काममदालसाङ्गः ।। ६.१५

रात्रिदिवसयोर्वस्त्राण्यपि विभिन्नान्येव ।[1] तथा हि—

सुरतसमयवेषं नैशमाशु प्रहाय
दधति दिवसयोग्यं वेषमन्यास्तरुण्यः ।। ऋतुसंहारे ५.१४

बौद्धभिक्षूणां वर्षर्तुयोग्यं वस्त्रं निर्धारितमासीत् । तेषां स्नानवस्त्राण्यपि निर्दिष्टानि ।[2] स्थानभेदानुसारं वस्त्रविन्यासवैविध्यं वर्तते । तथाहि काव्यमीमांसानुसारम्—

गौडदेशेषु—सीमन्तचुम्बिसिचयः स्फुटबाहुमूलः
महोदयदेशेषु—आश्रोणिगुल्फपरिमण्डलितान्तरीयम् ।
केरलदेशेषु—कक्षानिवेशनिविडीकृतनीविरेष
वेषश्चिरं जयति केरलकामिनीनाम् ।। काव्यमी० तृतीयाध्याये

वस्त्रविन्यासाभिरुचिः

सिन्धुसभ्यतायाः शिल्पैर्वस्त्रविन्यासे जनानां विशेषाभिरुचिः प्रमाणीक्रियते । वैदिकयुगे सुष्ठु विन्यस्तानि वस्त्राणि 'सुवसनानि' इति ख्यातानि । सुवसनधारिणो जनाः सुवा-

---

१. ऋतुसंहारे ५.१४, महाभारतानुसारं तु—
अन्यदेव भवेद्वासः शयनीये नरोत्तम ।
अन्यद्रथ्यासु देवानामर्चायामन्यदेव हि ।। अनु० १०४,८८

२. महावग्गे ८.१५.१५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सस इति प्रतिष्ठिताः । वस्त्रविन्यासस्यापरं विशेषणं 'सुरभि' इति बभूव। [१] अथर्व-वेदानुसारं नववस्त्रधारिणे कामना वर्तते—

हिरण्यवर्णो अजरः सुवीरो जरामृत्युः प्रजया सं विशस्व ।
तदग्निराह तदु सोम आह बृहस्पतिः सविता तदिन्द्रः ॥ १९.२४.८

अधोवासविन्यासेन हस्तिशुण्ड-मत्स्यजाल-चतुष्कोण-तालवृन्त-शतवल्लिकादीनामाकारा रचिताः ।[२]शरीररंगानुरूपं वस्त्रं भवेदिति रीतिरासीत् ।[३]

परवर्तिसाहित्येऽपि निर्मलवस्त्रधारणेन विशेषयोग्यताधानं निर्दशितम् । चरकानुसारं निर्मलवस्त्रैः सौन्दर्यं यश आयुश्च वर्धन्ते, दारिद्र्यं दूरं भवति, मनः प्रसन्नं जायते, सुश्रीकता सम्भवति, परिषदि च सम्मानो जायते । वस्त्रविन्यासैः सौजन्यं व्यज्यते ।[४] श्वेतवस्त्रे नागरिकाणां विशेषाभिरुचिरभवत् ।

वैदेशिकवस्त्रविन्यासं प्रति भारतीयानां रुचिः प्राचीनकालेऽपि बभूव । शककुशनादि-जातीनां 'टोपकंचुकपायजामाशलवारादीनि' खीष्टाब्दस्यारम्भिकयुगादेव समृद्धिशालिभिर्जनैः परिगृहीतानि ।

वस्त्रोपादानानि

प्रारम्भिकयुगे चर्मवल्कलपत्रादीनां वस्त्रवदुपयोगो वनवासिभिरपि कृतः । एषामुपयोग परिधानार्थं न कदापि निरुद्धः । सिन्धुसभ्यतायुगे 'ऊर्णकार्पासादीनां' वस्त्राणि निर्मितानि

वैदिकवस्त्रोपादानानि मृगचर्मोर्णवल्कलक्षौमादीनि बभूवुः । क्रिमितानस्य कौशेय-वस्त्रस्य वा प्रचलनं खीष्टतः सप्तशताब्दं प्रागेवासीत् । [५] वस्त्रनिर्माणाय पिच्छानां तृणा-नामपि चोपयोगः आसीत् । वस्त्रनिर्माणाय पत्रेभ्योऽपि ऊर्णं गृहीतम् । नागलिकुचवकुल-वटादीनां पत्रोर्णैर्निर्मितानि वस्त्राणि क्रमशः पीतगोधूमश्वेतनवनीतवर्णानि बभूवुः ।[६] पतंञ्जलिः कार्पासं, भाङ्गीनं, कौशेयमौर्णं च वस्त्रकोटिकमुपादानानुसारं वर्णयति ।[७]

वस्त्रालंकरणम्

सिन्धुसभ्यतायुगे वस्त्राणां चित्रणं प्रचलितमासीत् । समृद्धिशालिनामुत्तरीये पत्र-पुष्पाणां चित्राणि शोभन्ते स्म । कतिपयवस्त्राणि रञ्जितानि आसन् ।

१. ऋग्वेदे १.१२४.७;९.९७.५०,६.२९.३
२. चुल्लवग्गे ५.२९.४
३. महापरिनिब्बानसुत्ते २.१८
४. चरकसंहितायां सूत्रस्थाने ५-९२;८.१८-१९
५. पाणिनौ ४.३.४२; रामायणे २.४०.९; महावग्गे ८.१.३६
६. अर्थशास्त्रे कोशाध्यक्षप्रकरणे ११२-१२०
७. महाभाष्ये ५.१२;४.३.१५८

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैदिकयुगे राजसूययज्ञाय दीक्षितस्य राज्ञः तार्प्यंपरिधाने सर्वाणि यज्ञरूपाणि निष्यूतानि भवन्ति स्म।[१] वधूम्यः वाधूये परिधाने चित्रालङ्करणं सविशेषमासीत्।[२] हिरण्मयचित्र-शिल्पैः अत्कद्रापिपरिधानानि द्योतितानि।[३] रजयित्री तु वस्त्ररञ्जिका स्त्री बभूव।[४] ऊर्णं प्रथमं रञ्जितम्। पश्चात् तेन पटं निर्मितम्।[५] पतञ्जलिः नीली-मञ्जिष्ठा-शकल-कर्दम काषाय-हरिद्रा-पीतादीभी रंगैर्वस्त्ररञ्जनं वर्णयति।

बौद्धयुगे वस्त्ररंजनाय वनस्पतीनां मूलस्कन्धवल्कलपत्रपुष्पफलादिम्यो वर्णाः प्राप्ताः।[६] एभिर्वर्णैर्गृहस्थानां विविधरंगेषु परिधानेषु पुष्पनागफणादयश्चित्रिताः।[७] परिधानानां वर्णस्य स्वशरीरवर्णानुरूपीकरणं प्रचलितमासीत्।[८] वस्त्राणां गन्धैः सुवासनं, आतपवायुभिश्च परिशोधनमक्रियत।[९] मृगचर्मपरिधानानामलङ्करणं नैसर्गिकमेव रमणीयमासीत्।

नाटचशास्त्रानुसारं राज्ञां वस्त्राणि प्रायशः चित्रितानि बभूवुः। अन्तःपुरकर्म-चारिणां वस्त्राणि कषायवर्णानि चाभवन्।[१०] गुप्तयुगे पटवासेन वस्त्राणां सुवासनं प्रवर्तितम्।[११] संस्कारार्थं तदा वस्त्राणि धौतानि घृष्टानि मृष्टानि संप्रधूमितानि च बभूवुः।[१२] कतिपयवस्त्राणि रत्नजटितानि कारितानि। स्त्रीणामुत्तरीयेषु रत्नशोभा दर्शनीयासीत्।[१३] धनिकानां दुकूलेषु हंसमिथुनानि गोरोचनेन चित्रितानि, हंसदुकूलेषु हंसानामसंख्यचित्राणि निर्मितानि च। तत्रैव पुष्पपक्षिणामपि चित्राणि कृतानि।[१४] लोकानां वस्त्रेषु चित्रकरणं गुहाचित्रैः समर्थितम्। अजन्ताचित्रेषु वस्त्राणां पक्षिपत्रपुष्पतारावृषभादि-भिरलंकरणं सुसम्पन्नमेव। विविधवर्णानां सूत्राणां संयोजनेन वस्त्राणां वर्णवैविध्यं निष्पादितम्। दशपुरस्थपट्टवायकानां प्रशस्तिः तदेव समर्थयति—

स्पर्शवता वर्णान्तरविभागचित्रेण नेत्रसुभगेन।
यैः सकलमिदं क्षितितलमलंकृतं पट्टवस्त्रेण॥

---

१. शतपथे ५. ३.५२०
२. ऋग्वेदे १०.८५.३४; अथर्ववेदे १४.२.४१
३. ऋग्वेदे १.१२२.२; ५.५५.६; १.१६६.१०; १.२५.१३
४. शुक्लयजुर्वेदे ३० अध्याये
५. शतपथे ५.३.६.२१
M महा० ४.२.१
६. महावग्गे ८.१०
७. महावग्गे ८.२९
८. सिरिकालकण्णिजातके ३८२
९. आचाराङ्गसूत्रे २.५.१.२०; राजत० ४.१२७
१०. नाटयशास्त्रे २१.११७—१२४
११. ऋतुसंहारे ६.१५; कादम्बर्यां २१६ पृष्ठे, बृहत्संहितायां च
१२. बृहत्कल्पसूत्रभाष्ये ३.३००१
१३. रघुवंशे १६.४३   १४. रघुवंशे १७.२५; कादम्बर्यां ९ पृष्ठे

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूचीकर्म

भारते सुदूरप्राचीनकालतः सीवनस्य कला प्रवर्तते ।[१] प्रथमतरं सिन्धुसभ्यतायाः सूचयः प्राप्यन्ते । महाभाष्यानुसारं तीक्ष्णसूचिकया वस्त्राणि स्यूतानि । त्रुटितवस्त्राणां नवीकरणस्य रीतिरासीत् । परवर्तियुगे वैदेशिकानां प्रभावैः 'कुर्ता-ब्लाउज-फ्राक-पायजामा' आदि स्यूतवस्त्राणां प्रचलनं धनिवर्गेऽभूत ।

सीवनस्य विशेषोपयोगो वस्त्राणां शिल्पकर्मणि बभूव ।[२] सीवनेन वस्त्राणां मण्डलं, विवर्तमनुविवर्तं ग्रैवेयकं जांघेयकं बाह्वन्तश्च कृतानि ।[3] बौद्धसाहित्यानुसारं सीवनस्य कला सुविकसितासीत् । बौद्धभिक्षवः सीवने निष्णाता बभूवुः ।[४]

परिधानानि

पतञ्जलिमतानुसारं शरीरं तु वास्त्रयुगिकमेव । अर्थात् साधारणजनानां कृते द्वे वस्त्रे आस्ताम् । तयोरुपरिभागे उत्तरीयमधोभागे चान्तरीयं शरीरस्य परिधानार्थं बभूवतुः । द्वयोर्वस्त्रयोरेका संज्ञा उपसंव्यानमासीत् । अन्तरीयं नाभिप्रदेशादारभ्य जानुपर्यन्तं क्वचिच्चरणपर्यन्तं चासीत् । शाटकमाप्रपदीनभवत् । कन्यकानां शाटकमाप्रपदीनमभवत् । कन्यकानां शाटकमधरोरुक इति ख्यातम् ।[५]

शिरोवस्त्राणि

सिन्धुसभ्यतायाः स्त्रीपुरुषाः शिरसि पक्षाकारं वस्त्रं बध्नन्ति स्म । कतिपयपुरुषाः शिरोवेष्टनं धारयन्ति स्म । अपरे केचिदुष्णीषेण शिरो भूषयन्ति स्म । वैदिकयुगेऽपि तत्रासीदुष्णीषधारणस्य प्रचलनम् । तदा स्त्रीपुरुषयोरपि शिरसि उष्णीषबन्धोऽभवत् ।

परवर्तिकाले उष्णीषे चित्रणमलङ्करणं च सविशेषमभवत् । उष्णीषबन्धेन शंख-मृदङ्ग-गोलक-स्तूप-वृत्त-तोरण-पुष्प-पत्रादीनामाकृतयो विरचिताः । स्त्रीणां शिरसि तदावगुण्ठनवस्त्रं पुष्पलताचित्रादिभिरलंकृतमासीत् ।

---

१. सीवनं कञ्चुकादीनां विज्ञानं हि कलात्मकम् । शुक्र० ४.३२९

२ तन्तुसन्तानयोगेन बहुवर्णकेन वस्त्राणां मनोहारित्वं सम्पादितम् । पद्मपुराणे २४.५८ । कामसूत्रस्य १.३.१६ टीकानुसारं सूच्या यस्सन्धानकरणं तत् सूचीवानं त्रिविधं सीवनं, ऊतनं, विरचनम् । तत्राद्यं कञ्चुकादीनाम्, द्वितीयं त्रुटितवस्त्राणाम्, तृतीयं कुथास्तरणादीनाम् ।

३. विशेषविवरणाय महावग्गे ८.४.२ द्रष्टव्यम् । ४. चुल्लवग्गे ५.११.३ महावग्गे ७.१.५ ।

५. महाभाष्ये ५.१६९.१.१.३७;१.२.४५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्कन्धवस्त्राणि

स्कन्धस्याश्रयेणोत्तरीयं सामान्यतो धारितम्। वैदिकयुगे स्कन्धाश्रितानि वस्त्राणि–अत्क-प्रतिधि-द्रापि-पर्याणहनोपवसनादीनि बभूवुः।

वैदिककालतः चेलकधारणस्य रीतिः प्रायः सदैव प्रचलिताऽभवत्। विभिन्नयुगेषु च चेलकधारणस्य विविधकल्पाः चित्रमूर्तिषु दृश्यन्ते।

वक्षःप्रदेशस्यावरणाय कञ्चुकोऽभवत्। कञ्चुकेन समग्रभुजयोरावरणं बभूव। तस्य प्रतान आजानु आसीत्। स्त्रीणां कंचुको नाभिपर्यन्तोऽभवत्।

गुप्तयुगे स्कन्धादारभ्य कटिपर्यन्तं चोल-कूर्पासकादिवस्त्राणां परिधानमासीत्। स्तनांशुकेन स्तनानामावरणं कृतम्। अमरकोशानुसारं प्रपदीनवस्त्रेण स्कन्धात् पदपर्यन्तमावरणं विहितम्।

कटिवस्त्राणि

सिन्धुसभ्यतायुगेऽपि कतिपयजनाः कटिप्रदेशात् पदपर्यन्तं वस्त्रं धारयन्ति स्म। किंतु बहवस्तत्रासन् जना ये कटिप्रदेशे वस्त्रं नाममात्रमेव धारितवन्तः। वैदिकयुगे कटिप्रदेशे नीविः धृता। नीवितः प्रघात-वातपानादीनि वस्त्राण्यवलम्बितानि। नीव्या उपरि वासो धारितः। वासोधारणामनिवार्यमेवासीत्। स्त्रीणां वासः सट्टं साटकं वा बभूव।

कटिप्रदेशस्य दृढीकरणाय तत्र वस्त्रपट्टिका बद्धा। अस्याः पट्टिकातो गुलिका अवलम्बिताः।

प्रावरणम्

प्रावरणानामावश्यकता प्रायः हेमन्तशिशिरयोर्भवति। तेषां रचना प्रायः बहुमूल्योर्णादिभिः कृता। तत् प्रथमं कम्बलमेव प्रावरणं देशकालशैलीभेदेन विविधसंज्ञासमन्वितं दृश्यते।[1] अमरकोशानुसारं 'नीशारः स्यात्प्रावरणे हिमानिलनिवारणे।'

'निचोलः प्रच्छदपटः, समौ रल्लककम्बलौ।

प्रसाधनस्य परिधानस्य च सौभाग्यं दर्पणदर्शनेन पुरापि निभालितम्। महाभाष्यानुसारं दर्पणो द्विविध आसीत्-यथामुखीनः, सम्मुखीनश्च। यथामुखीनः समतलः सम्मुखीनश्चोन्नतोदरोऽभवताम्।[2] कतिपयदर्पणा रत्नजटिता आसन्।[3]

---

१. विभिन्नप्रदेशेषु निर्मितकम्बलानां परिचयोऽर्थशास्त्रे द्रष्टव्यः। कोशाध्यक्षप्रकरणे ७७.१११। तत्र खचितं वानचित्रं खण्डसंघात्यं च कम्बलभेदाः।

२. महाभाष्ये ५.२.६।

३ हरविजये १४.६;१३.६५।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आवासः

नगराणां ग्रामाणां गृहाणां च विन्यासस्तत्रत्यानां न केवलं सुखाय विश्रमाय रक्षणायासीदपितु आत्मनो वैभवस्य रसिकत्वस्य च प्रदर्शनार्थमपि बभूव । सुदूरप्रागैतिहासिकयुगे वन्या जनाः पर्वतानां गुहासु वृक्षशरणेषु वाऽवसन् । तेषु केचिदेव पर्णकुटीररचनामपि कुर्वन्ति स्म । अद्युनापि तादृशानां शरणानि पूर्ववत् प्राप्यन्ते । अनेन मानवसंस्कृतेः सनातनत्वं व्यज्यते ।

सर्वप्रथमं तावत् सभ्यानां नगरविन्यासः सिन्धुसभ्यताया एव दृश्यते । तेषां नागरिकसभ्यता प्राचीनयुगे सिन्धु-पंजाब-काठियावाड़-राजस्थान-महाराष्ट्र-प्रदेशेष्वपि प्रसारितासीत् । 'हड़प्पा-मोहनजोदड़ो' इति ख्याते द्वे नगरे बभूवतुः, बहवः ग्रामाश्च विविधप्रदेशेषु प्रसृताः ।

सिन्धुसभ्यताया नगरयोः स्थितिर्नदीतटे बभूव । नगरस्य रक्षायै प्राकारो निर्मितः । सरलराजमार्गैर्नगरं बहुषु भागेषु विभक्तमासीत् । तेषां मार्गानुबन्धेन प्रकाशः स्वच्छवायुश्च नगरे प्रसृतौ । गृहेषु बहवः कक्षाः प्राङ्गणं च बभूवुः । गृहेभ्यः मलिनजलनिर्गमनाय प्रणालिका निर्मिताः । सार्वजनिकोपयोगाय संकरनिचयस्थानानि बभूवुः । सिन्धुसभ्यतागृहाः सुविन्यस्ता विशालाः स्वास्थ्यप्रदाः सर्वतः सुरक्षिताश्च । तेषां निर्माणं प्रायश्चूर्णसंयोजितेष्टकाभिः कृतम् ।

सिन्धुसभ्यताया गृहविन्यासस्य कलाविज्ञानयोर्वा सातत्यमद्यावधि नास्ति सुप्रतीतम् । तस्याः प्रायशः द्विसहस्रवर्षं पश्चात् भारते महाराजस्याशोकस्योत्खाता गृहा दृष्टिगोचरा बभूवुः । अस्मिन्नन्तराले भारतीयगृहविन्यासस्य प्रगतिः कीदृशी बभूवेति ज्ञातुं साहित्यमेवावलम्बनीयं वर्तते ।

वैदिकयुगे भारतीयानामार्याणां जीवन-विन्यासो ग्राम्य आसीत् । तेषां कृषिप्रधाना सभ्यता ग्रामेषु प्रसृता । तत्रैव तेषां पशूनां चरणाय पानाय चापेक्षितसामग्रीणां प्राचुर्यमभवत् । गृहमेव तेषां प्रायः सर्वसंग्राहकं सुखदं विस्तृतं च तृणकाष्ठादिभिर्निर्मितमासीत् । तद्यथाऽथर्ववेदे—

इहैव ध्रुवां नि मिनोमि शालां क्षेमे तिष्ठाति घृतमुक्षमाणा ।
इहैव ध्रुवा प्रतितिष्ठ शालेऽश्वावती गोमती सूनृतावती ।
ऊर्जस्वती घृतवती पयस्वत्युच्छ्रयस्व महते सौभगाय ॥
धरुण्यसि शाले बृहच्छन्दाः पूतिधान्या ।
आ त्वा वत्सो गमेदा कुमार आ धेनवः सायमास्पन्दमानाः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ऋतेन स्थूणामधि रोहवंशोग्रो विराजन्नप वृङ्क्ष्व शत्रून् ।
इमा आपः प्रभराम्ययक्ष्मा यक्ष्मनाशनीः ॥
गृहमुप प्रसीदाम्यमृतेन सहाग्निना ॥[१] ३.१२

समृद्धिशालिनामार्याणामार्येतराणां च गृहा दुर्गवत् निर्मिताः । तथा हि वरुणगृहं सहस्रद्वारमेव ।[२] दासानां राज्ञः शम्बरस्य शतदुर्गाः बभूवुः । अन्येषामपि दासनेतॄणां दुर्गाः विख्याताः सन्ति ।[३] गृहविन्यासस्तु प्रायः कलात्मक एवासीदार्याणाम् ।[४] केषांचिन्नागरिकाणां गृहाः प्रासादवद् बभूवुः । कश्चित् कविः सदनायाकामयत—

इन्द्र त्रिधातुशरणं त्रिवरूथं स्वस्तिमत् ।
छर्दि यच्छ मघवद्भ्यश्च मह्यं च यावयादिद्युमेभ्यः ॥

धनिकानां गृहं हर्म्यमिति ख्यातमासीत् ।[५]

परवर्तिगृहविन्यासस्य परिचयः तदानीन्तनसाहित्ये प्राप्यते । रामायणे अयोध्या-किष्किन्धालङ्कादीनां नगराणां अनेन वर्णनेनार्याणामार्येतराणां च प्रायः समग्रभारतीयानां वास्तुविन्यासः स्पष्टो भवति । तथा हि अयोध्यानगरी—

आयता दश च द्वे च योजनानि महापुरी ।
श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा ॥
मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः ।
उद्यानाम्रवणोपेतां महतीं सालमेखलाम् ॥ बाल० ५.७,८,१२ ।

तत्रैव रामवेश्म—

महाकवाटसंयुक्तं वितर्दिशतशोभितम् ।
कांचनप्रतिमैकाग्रं मणिविद्रुमतोरणम् ॥
मणिभिर्वरमाल्यानां सुमहद्भिरलंकृतम् ।
मुक्तामणिभिराकीर्णं चन्दनागुरुधूमितम् ॥
सारसैश्च मयूरैश्च निनदद्भिर्विराजितम् ।
महेन्द्रधामप्रतिमं नानापक्षिसमाकुलम् ॥ अयो० १५.३२-३५, ३७ ।

नेदं वर्णनं केवलं काव्यकल्पनात्मकम् । तत्समर्थितमेव 'एलियन' महोदयस्य चन्द्रगुप्तप्रासादस्य सात्विकवर्णनेनापि—

---

१. अपरमपि वर्णनमथर्ववेदे ९.३ ईदृशं गृहविन्यासं समर्थयति ।
२. बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते । ऋग्वेदे ७.८८.५ ।
३. ऋग्वेदे १.५१.५;६.२० ६;६.१८.८; २.१४.६; २.२४.२ ।
४. ऋग्वेदे १.१३.६; १.५१.१४; ५ ४१.८
५. ऋग्वेदे ७.५६.१६ अथर्ववेदे १८.४.५५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

In the Indian royal palace there are other wonders besides. In the parks tame peacocks are kept and pheasants which have been domesticated. There are shady groves planted with trees and branches of trees which the art of the woodsman has deftly interwoven; while some trees are native to the soil, others are brought from other parts, and with their beauty enhance the charms of the land-scape. Within the palacegrounds are artificial ponds in which they keep fish of enormous size but quite tame.[१]

एतद्धि कामसूत्रे समर्थितम्––तत्र भवनमासन्नोदकं वृक्षवाटिकावत् विभक्तकर्मकक्षं द्विवासगृहं कारयेत् ।m

रामायणसदृशं नगरवर्णनं बुद्धचरिते, सौन्दरनन्दे, मिलिन्दप्रश्ने च लभ्यते । महाभारते इन्द्रप्रस्थस्य विशदवर्णनं तदानीन्तननागरिकसभ्यताया आदर्शं प्रस्तौति ।n

किष्किन्धायामार्येतराणां वसतिः पर्वतगुहासु बभूव । गुहानगरेपु काननोपवनशोभा सविशेषमभवत् । पर्वतेषु हर्म्यप्रासादादयः बहुभूमिका निर्मिताः । लङ्कायामपि मनोरमोपवनानां कलनिनादकारिणां पक्षिणां वापीजलाशयाक्रीडानां प्रतोलीनां स्वर्णकतोरणानां दिव्यलतानां च शोभाऽऽसीत् ।[२] रावणस्य प्रासादे चित्रशालाः क्रीडागृहाः कामगृहाश्च बभूवुः । वर्णीकृता गृहाः चित्रिताश्चातिशयं विराजन्ते स्म ।[3]

महाभारतानुसारं सर्वेषु ऋतुषु सुखदायिनो गृहा विरचिताः ।[४] तेषां जालानि स्वर्णमयानि तलानि मणिजटितानि च बभूवुः । स्रग्भिर्दामभिश्च गृहा अलंकृताः ।[५] रात्रिकाले दीपवृक्षैर्नगरक्षेत्रं प्रकाशितमभवत् । गृहसमीपं निष्कुटकमिति कीडोपवनं बभूव ।[६]

राजकीयवास्तूनि वास्तुकानामाध्यक्ष्ये निर्मीयन्ते स्म । राजभवने वासगृहं मोहनगृहं भूमिगृहं च निर्मितानि । सुरङ्गमार्गैः यथेष्टं राजभवने प्रवेशः सम्भावितः ।

---

१. Mc. Crindle: Ancient India as described in Classical literature P. 141-142 ।

M. कामसूत्रे १.४.४ ।

N आदि० १८९-२८-५० ।

२. सुन्दरकाण्डे २ सर्गतः ३. सुन्दरकाण्डे ६ सर्गतः । ४. सभापर्वणि ३१.२०, २३ महापण्णादजातके २६४ तदेव समर्थितम् । ५. सभापर्वणि ३४.-२०-२३ ।

६, आदिपर्वणि २११.३;२१०.१६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजभवनस्य पश्चभागे अन्तःपुर-प्रसूतिगृहारोग्यगृहादीनि निर्मितानि । बहिर्भागे कुमाराणामावासो रचितः । नगरसमितिर्नागरिकाणामावासव्यवस्थां कौशलेनाकरोत् ।[१]

नगरस्य स्वच्छतायै समीचीना व्यवस्थासीत् । सार्वजनिकमार्गेषु केनापि विधिना मलकर्दमकिट्टजम्बालादिकारिणो दण्डिताः । नगरात् शवस्य निर्गमनाय मार्गो नियत आसीत् । नगराद् जलनिष्कासनाय प्रणालिका निर्मिताः । यदि कस्यापि गृहमवैज्ञानिकरीत्या निर्मितम्, तत्मात्कारणात् परेषां कष्टं च बभूव, तर्हि गृहस्वामी दण्डनीयोऽभवत् । नगरस्याग्निभयाद्रक्षणार्थं सुचारुव्यवस्थासीत् ।[२]

महाभाष्यानुसारं नगरस्य व्युत्पत्तिरस्ति नग + र (मत्वर्थीयः), अर्थात् वृक्षैः सुशोभितमिति । नगरकारो नगरस्य व्यवस्थापने सुनिपुण आसीत् । नगरेषु बहुभौमाः प्रासादा राजन्ते स्म । तत्र नगराणां चतुर्द्वाराणि आसन् ।m

गुप्तयुगे ग्रीष्मर्तोः सन्तापेभ्य आत्मनं रक्षितुं धारागृहा निर्मिताः । तदर्थं जलयन्त्रमन्दिराणां निर्माणमभवत् । जलाशयतटे जलमण्डपानां रचना कृता । जलमण्डपेन ग्रीष्मः पराजित इवासीत् ।[३] जलाभ्यन्तरे समुद्रगृहाणां निर्माणमभवत् ।[४] गृहेषु क्रीडामयूराय यष्टिनिवासो निर्मितः । भित्तिषु गृहभित्तयश्चित्रिताः । गृहस्तम्भेषु रमणीनामाकृतय उत्कीर्णाः । शयनगृहं रचितकुसुमगन्धि बभूव । वात्स्यायनो गृहविशेषमाकलयन्नाह--वेश्म च शुचि सुसंमृष्टस्थानं विरचितविविधकुसुमं संश्लक्ष्णभूमितलं हृद्यदर्शनं भवेत् ।

भारतीयगृहेषु प्रायः केन्द्रभागे प्राङ्गणमभवत् । प्राङ्गणं परितोऽलिन्दयुक्ताः शाला बभूवुः । ईदृशाः गृहाः चतुःशालानि ख्याताः । अपरे गृहाः त्रिशालानि, द्विशालानि, एकशालानि वा बभूवुः । एतेषां प्रत्येकविधस्य गृहस्य बहवो प्रकाराः-- सर्वतोभद्र-नन्द्यावर्त-वर्धमान-स्वस्तिकादयोऽभवन् । सर्वेषां वर्णाश्रमपदाधिकारिणां गृहविशेषा निर्णीताः ।[५]

राजानो जनपदनिवेशार्थं ग्राम-संग्रहण-खार्वटिक-द्रोणमुखस्थानीयानामुपनिवेशायायोजयन्ति स्म । दशग्रामाणांमध्ये संग्रहणं द्विशतग्रामाणां मध्ये खार्वटिकं चतुःशतग्रामाणां मध्ये द्रोणमुखमष्टशतग्रामाणां मध्ये स्थानीयं च स्थापितानि । स्थानीयोपनिवेशाय

---

१. अर्थशास्त्रे दुर्गनिवेशप्रकरणे   २. अर्थशास्त्रे नागरिकप्रकरणे, गृहवास्तुप्रकरणे च ।
M. महाभाष्ये ५.२.१०७;१.१.५१ १.१.२९;४.३. १३४ ।
३. रघुवंशे १६.४९; ऋतुसंहारे १.२; कादम्बर्यां २८३ पृष्ठे ।
४. कामसूत्रे; स्वप्नवासवदत्ते, विष्णुस्मृतौ ५.११७। P. नैषधे १८.५-१० ५, बृहत्संहितायाम् मत्स्यपुराणे २५४ अध्याये च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वास्तुकः नदीनां तटेऽवस्थितं वृत्ताकारमायताकारं वा क्षेत्रमचिनोत् । स्थानीयानि जल-स्थलमार्गैः सुसन्धापितानि बभूवुः ।[१]

महाभाष्यानुसारं कुटीराणां काण्ड-छादनं तृणैः कृतम् । भित्तयः पक्वेष्टकचिता आसन् । भवनस्य तलं प्रस्तरशकलैः कृतं कुट्टिममिति कथ्यते स्म । वायोः प्रकाशस्य चागमनाय गवाक्षा निर्मिता आसन् । स्नानस्य स्थानं प्रस्न इति संज्ञितम् । तत्र वस्त्राणि शङ्कुभिर्लम्बितानि आसन् । दीपस्थानं दीपालय इति ख्यातम् । महागृहमगारो वेश्म वा प्रथितमासीत् । अगारस्योपद्वारं कक्षोऽवसथ इति संज्ञितः । गृहस्य शिखरमामलकीति ख्यातमासीत् । हर्म्यमिति धनिकानां गृहमासीत् ।

न केवलं गृहं वैभवसम्पन्नमासीत्, अपितु गृहकार्यपेक्षितवस्तूनां समाहारस्तत्रासीत् । गृहस्योदारस्य करणं महार्हैर्भाण्डैः परिचारकैश्च गृहपरिच्छेदस्योज्ज्वलता इति वात्स्यायनः कामसूत्रे निर्दिशति ।

अपरंच—तत्र रात्रिशेषमनुलेपनं माल्यं सिक्थ-करण्डकं सौगन्धिकपुटिका, मातुलिङ्ग-त्वचस्ताम्बूलानि च स्युः । भूमौ पतद्ग्रहः । नागदन्तावसक्ता वीणा, चित्रफलकं, वर्तिकासमुद्गको, यत् किञ्चित् पुस्तकं कुरण्टकमालाश्च । आकर्षफलकं द्यूतफलकञ्च । तस्य वहिः क्रीडाशकुनिपिञ्जराणि । एकान्ते तर्कुतक्षणस्थानमन्यासां च क्रीडानाम् । स्वास्तीर्णप्रेङ्खा दोला, वृक्षवाटिकायां सप्रच्छाया स्थण्डिलपीठिका च सुकुसुमेति भवनविन्यासः ।[M]

शयनासनानि

शयनासनानां सर्वेषु युगेषु प्राचुर्यमभवत् । सिन्धुसभ्यतायुगे आसन्दीनामुपयोग उपवेशनाय कृतः । अपरविधानां शय्यासनानां परिचयोऽप्राप्य एवाधुना । वैदिकयुगे तृणानामासनानि निर्मितानि । वर्हिदर्भकूर्च-वृषी-कशिपु-नड्वला-कटाः सर्वेऽपि तृणनिर्मिता उपवेशनाय बभूवुः ।[२] तस्मिन्युगे उच्चासनानि काष्ठनिर्मितपीठतल्पप्रोष्ठादीनि बभूवुः । तल्पासन्दीभिः समृद्धिशालिदम्पतीनां विश्रामागाराः सुशोभिताः । प्रोष्ठासनं स्वल्पं चतुष्पदिकमासीत् ।[3] आसादं प्रस्तार्योपाश्रयमाश्रित्यासन्द्यामुपवेशनं कृतम् ।

राज्ञामुपवेशनाय सिंहासनमासीत् । आस्तरणाच्छादितस्वर्णकपर्यङ्काः राज्ञां नित्योपवेशनाय बभूवुः । आसनानामलंकरणं रत्नमणिस्वर्णादिभिः कृतम् । भद्रासनानि रत्नमणिजटितानि राजभ्यो बभूवुः ।

---

१. अर्थशास्त्रे दुर्गविधानप्रकरणे ।

M. कामशास्त्रे १.४.८-१५ ।

२. ऋग्वेदे १०.१४.४; अथर्ववेदे २.६; शतपथे १०.४.२.१९; ११.५.३.४.७ बृहदारण्यकोपनिषदि ४.२१ ।

३. वाजसनेयिसंहितायां ३०.२१; तैत्तिरीयब्राह्मणे ३.४.१७.१; अथर्ववेदे १४.१.६० ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शयनाय चतुष्पदिका शय्या सुदूरप्राचीनकालतः प्रवर्तते। शय्याया बहुभेदा यथारुचि सदैवाभवन्। उपबर्हस्योपयोगः शिरस आधानाय कृतः। मशककुटिकया मशकेभ्यः शयनकाले त्राणं कृतम्।[1]

महाभाष्यानुसारं मंचा मंचका वा शिशूनां शयनार्थं बभूवुः। खट्वा शय्या वा प्रौढानां जनानां कृते बभूव। तृणशायिनस्तु सदैव भवन्त्येव। आसनार्थं द्विपदिका त्रिपदिका वासीत्। आसन्दी पूर्णविश्रामार्थमासनमभवत्। पादाशक्तानां कृते पर्य इति नामकमासनं सचक्रमभवत्।[2]

गुप्तयुगे वेत्रासनानि सुप्रचलितानि बभूवुः। राजभ्यः पर्यङ्किका चन्द्रकान्तमणिभिर्निमितासीत्। पादपीठं स्फटिकेन रचितम्। रमणीनामुपवेशनाय चित्रास्तरणाच्छादितोपबर्हसमन्वितमंचकमभवत्। पृष्ठाश्रयायौपश्रयगोलकमुपयोजितम्। कतिपयमंचकानां पादाः सिंहाकारा निर्मिताः। अमरकोशानुसारं तु--

उपधानं तूपबर्हः शय्यायां शयनीयवत्।
शयनं मंचपर्यङ्कपल्यङ्काः खट्वया समाः॥

विष्णुपुराणानुसारंतु

नाविशालां न वै भग्नां नासमां मलिनां न च।
न च जन्तुमयीं शय्यामधितिष्ठेदनास्तृताम्॥ ३.११.१०९।
प्रतिपादिकविन्यस्तरत्नमंचोपशोभिनि।
दधत्यालम्बिभिर्मुक्ताजालकैर्हसिताश्रियम्॥
कुन्देन्दीवरमन्दारसान्द्रामोदाश्रितालिनि।
चित्रभित्तिगतानेकरूपकर्ममनोहरे॥
वासगेहेऽन्यदा शिश्ये तल्पे मृदुनि हारिणि।
गंगासैकतनिर्भासिदुकूलप्रच्छदोज्ज्वले॥ महापुराणम् ९.२२.२४

यात्रासाधनानि

मानवानां यात्रा प्राचीनयुगे स्थलमार्गेर्जलमार्गेश्चाभूदिति सुनिश्चितम्। आकाशे यात्रा समभवदिति केचित् सन्दिहन्ति।

---

१. महावग्गे ५.१३.३ दीघनिकाये १·१ बहुविधानि आसनानि वर्णितानि सन्ति। तद्यथा-आसन्दी-पल्लङ्क-गोनक-चित्तक-पटिक-पटलिक-तूलिक, - विकतिकउद्दलोमिक-एकन्तलोमिक-कट्ठिस्स-कोसेय्य-कुत्तक-हत्यत्थरण-अस्सत्थरण-रथत्थरण-अजिनप्पवेणि।

१. महाभाष्ये ४.१.४४; ३.३.६९; ३.२.११०; १.१.५७; ८.२.१०; ४.४.९।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्थल-यात्रा

साधारणतः सर्वेषां जीवधारिणां पदयात्रा भूमौ दृश्यते, किन्तु क्षिप्रगामिनां पशूनां पृष्ठे आसाद्य यात्राकरणं बुद्धिमतां मानवानां वैशिष्ट्यम् । तथा हि— प्रथमं तावत् हस्ति-घोटकवृषभादीनां पृष्ठे यात्राकरणं संस्कृतेः समारम्भादेव प्रारब्धम् । यानेषु घोटकरासभ-वृषभादीनां संयोजनं यात्राकरणे द्वितीयोपक्रमः । सिन्धुसभ्यतायुगे बलीवर्दोढशकटिकाः प्रचलिताः । तासां प्रचलनं भारते शाश्वतिकमेवाभवत् । तस्मिन् युगे शकटेषु चत्वारि चक्राणि रथेषु च द्वे चक्रे बभूवतुः । कतिपयरथानामाकृतिः पशुसमा पक्षिसमा च बभूव ।

वैदिकयुगे आर्याणां रथेषु प्रायशो द्वौ घोटकौ संयोजितौ । रथेषु रासभा उष्ट्राश्चापि योजिताः । कतिपयरथेषु सप्त दश वा चक्राणि बभूवुः । रथा गोचर्मच्छादिता आसन् । रथानां शीघ्रसंचरणाय 'परिरथ्या' इति ख्याता मार्गाः निर्मिताः । वैदिकयुगेऽश्वहस्तिरास-भोष्ट्रादीनां पृष्ठेऽपि यात्रा कृता । वाहनयोग्या हस्तिनस्तु स्वर्णभूषणैरलंकृताः ।

रामायणमहाभारतयोः रथशकटादीनि यानानि वर्णितानि सन्ति । शिबिकानां विशिष्टप्रचलनमभवत् । शिबिकासु प्रायः स्त्रीणां यात्राऽभवत् । शिबिका नरवाहियान-मासीत् ।

महाभारतानुसारं रथैर्दीर्घा यात्रा कृता । तथाहि अयोध्यातो विदर्भपर्यन्ता यात्रा कतिपयहोराभिरेव कृतेति रथानामतिरंहसः प्रमाणम् । तदा रथेषु हस्तिनोऽपि संयोजिता बभूवुः । राजानोऽपि रथचारणे निपुणा आसन् ।[1]

अर्थशास्त्रानुसारं श्रेष्ठाश्वसमायुक्ता रथाः प्रतिदिनं द्वादशयोजनान्यगच्छन् ।

महाभाष्यानुसारं शकटे शकट्यां च बलीवर्दा योजिता आसन् । बृहच्छकटेषु अष्टान-ड्वाहो योजिता बभूवुः । रथस्तु सुखदायक आसीदिति तस्य व्युत्पत्त्या 'रमन्तेऽस्मिन्' इत्यनेन ज्ञायाते । वास्त्राः काम्बलाश्चार्मणाश्च रथाः क्रमशो वस्त्रेण, कम्बलेन, चर्मणा चावृता बभूवुः । आश्वा औष्ट्रा गार्दभाश्च रथाः क्रमशोऽश्वेनोष्ट्रेण गर्दभेण च वाहिता आसन् ।M

स्त्रियोऽपि हस्तिघोटकरासभादीनां पृष्ठे यात्रां कुर्वन्ति स्म ।[2] रथाश्वहस्तिचर्यासु नागरिका राजकुमाराश्च सुशिक्षिता बभूवुः । स्वयं भगवान् कृष्णः सारथिरासीत् ।

बलीवर्दयुक्येषु प्रवहणेषु नागरिका नगरेऽभ्रमन् ।[3]

---

१. सभापर्वणि ४८.२९ ।

२. शिशुपालवधे ५.७,१८ ।

M. महाभाष्ये १.२.२४;८.१.३०; ६,३.४६; १.४.२४; ४.२.१० ।

३. गणिकाप्रवहणं गणिकानामुपयोगाय बभूव ।
गोष्ठीयानं वधूसंयानं च प्रयोजनवैशिष्ट्यमुद्दिश्याचलताम् । ग्रामीणा ग्रामशकटे यात्रामकुर्वन् । मृच्छकटिके षष्ठाङ्के ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जलयात्रा

प्राचीनतमे हडप्पमोहेंजोदडोनगरे नदीपथेन सम्बद्धे आस्ताम्। तदानीन्तनमुद्रासु नौकाकृतयः सन्ति। तस्यां स्थितौ द्वयोर्नगरयोः नौकाभिर्यातायातसम्बन्धोऽवश्यमेवासीत्। वैदिकयुगे त्रिशालनौका रचिताः। कतिपयासु नौषु शतारित्राणि सम्प्रयोजितानि। सिन्धुषु नौका व्यतरन्।

रामायणयुगे नौकाः सागरगामिन्यो बभूवुः। तीर्थेषु नौकानामवस्थानमभवत्। प्रयागे गंगातटे पंचशतनौका बभूवुः। नौकानिर्माणकला तदा सुविकसितासीत्। तथा हि—कतिपयनौकाः स्वस्तिकशैलीमनुकृत्य रचिताः। अपराश्च नौकाः पाण्डुकम्बलसंवृता नन्दिघोषसमन्विता बभूवुः। नौकाभिः घोटका रथाश्च नदीपारं नीताः। नौकावेगो महाभारते वायोर्मनसो वा वेगेनोपमितः। प्रभंजनोद्वेजने सत्यपि नौकानां स्थैर्यं तासां दाढर्यं व्यनक्ति।[1]

अर्थशास्त्रानुसारं नौकाध्यक्षो नौमार्गाणां सुव्यवस्थायै नियुक्तः। महानौकासु नियामकदात्र-रश्मिग्राहकोत्सेचकादयः पंचाधिकारिणोऽवर्तन्त। नौशुल्कस्य निर्धारणं राजकीयप्रशासनेन कृतम्।[2]

उडुपेन भस्त्रया च प्रायशो जना नदीपारं गतवन्तः। राजकीया नौका उदवाहनमासीत्। उपादानाकारदृष्ट्या उत्सङ्ग-पिटकोत्पदादयो बहुविधा नौका आसन्।m घटेन नदीतरिणवो घटिका इति ख्याताः। गोपुच्छिको गोपुच्छं धृत्वा नदीमतरत्।

प्राचीनयुगे नौभिः समुद्रयात्रा कृता। विशालासु नौकासु व्यापारसामग्रीं विहायानेकशतयात्रिणां भारोऽभवत्। तैः कतिपयमासं निरन्तरं जलयात्रां कृत्वैव कदापि द्वीपदर्शनं कृतम्। प्रभंजनोद्वेजिताः यात्रिणस्तु संशयितप्राणा अर्धमृता एव बभूवुः। चन्द्रतारादीनां गत्या दिशाज्ञानमभवत्। दिशाकाका अपि दिशाज्ञानाय प्रयुक्ताः। गुप्तशिलोच्चयै क्वचिन्नौकाप्रभ्रंशः संजातः।[3]

आकाशयात्रा

आकाशयात्रायाः वर्णनानि प्रथमं वैदिकसाहित्ये वर्तन्ते। देवानामाकाशयात्रा विदितचरमेव। रामायणमहाभारतयोरनेकत्र देवासुरराक्षसमानवानामाकाशयात्रावर्णनमुल्लिखितम्।[4] पुष्पकविमानं कुबेरात् रावणः रावणाद्रामश्च प्राप्तवानिति सुप्रसिद्धम्।

---

१. आदिपर्वणि १४०.५।

२. मनुस्मृतौ ८.४०४-४०६।

M. महाभाष्ये ५.४.६९; ४.४.५; ४.४.४६।

३. फाह्यानमहोदयस्य यात्रावर्णनं दर्शनीयम्।

४. सुन्दरकाण्डे ४.२७; मोरजातके १५६; रामायणे युद्धकाण्डे १२२ ३६; १२३.२१।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारद्वाजरचितवैमानिकशास्त्रानुसारं विमानरचना १८९० खीष्टशतके कृता । स विमानः प्रायः सहस्रहस्तपर्यन्तमुत्पतितः । विमानरचनाविज्ञानंमिति प्रकरणं समराङ्गणसूत्रेऽपि वर्तते ।[1]

मार्गाः

सिन्धुसभ्यतायुगाद् विस्तृतराजपथा अभवन् । तस्मिन्युगे तत्रत्यनिवासिनां भारतस्य विविधप्रदेशेषु विदेशेषु च यातायाते बभूवतुरिति सुनिश्चितम् । तेषां कृते सुमार्गाणां व्यवस्था देशान्तरेष्वपि कल्पनीया ।

वैदिकयुगे प्रपथमहापथाध्वानश्चेति विविधभेदा मार्गाणां बभूवुः । प्रपथस्तु विस्तारेऽत्यधिकोऽभवत् । महापथेन ग्रामाणां परस्परं सम्बन्धः कृतः । मार्गाणां सुरक्षायै तेषु शान्तिव्यवस्थायै च सुप्रबन्ध आसीत् । वनमध्ये मार्गनिर्माणाय वनानि प्रदग्धानि । शाकटिकमहापथेषु वृक्षा आरोप्यन्त । तत्र स्थाने स्थाने जलाशया निर्मापिताः । विश्रामस्थलेषु यात्रिभ्यो भोजनादीनां क्वचिन्निःशुल्कापि प्राप्तिरभवत् । अतिथियज्ञविधानेन यात्रिणां सौविध्यमासीत् ।

अशोकस्य राजकीययात्राव्यवस्थास्तु निरुपमा एव विद्यन्ते । मार्गेषु वृक्षारोपणम्, विश्रामागारस्थापनम्, आपान-प्रतिष्ठा च महाराजस्य माहात्म्यं निदर्शयन्ति ।[2] यात्रिणो निषद्यायामवस्थानं कुर्वन्ति स्म । परवर्तिकाले कश्मीराणां राजानो यात्रिकेभ्यो मठान् कारयामासुः । कतिपयमठा अवारितातिथय आसन् । मठेषु यात्रिकेभ्यो भोजनादेः सुव्यवस्थासीत् ।[3] यात्रिभ्यः सुखविधानेन महापुण्यलाभ इति पुराणवचनम् ।

---

१. पुस्तकमिदं बरौदानगरीत ओरियण्टलसीरीजप्रकाशनम् ।

२. परवर्तिंयुगेऽपि राजानः समृद्धिशालिनश्च जनाः उपर्युक्तादर्शानुसारं यात्रिभ्यः सुखानि सुखमयानि साधनानि च कारितवन्तः । द्रष्टव्यश्च नासिकगुहालेखः १७

३. महाभाष्ये ३.३.६६; कथासरित्सागरे ३.४३१; राजतरंगिण्याम् ८.२३२० ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यवसायाः

प्राचीनभारतस्य निवासिनामुपभोग्यवस्तूनां परिचयेन स्पष्टं प्रतिभाति यत् तेषां संग्रहणाय प्रचुरपरिश्रमेण ते प्रायतन्त । राष्ट्रस्याधिभौतिकाभ्युत्थानाय सर्वेषां देशवासिनामुद्योगपरायणता आवश्यकी एव । अधिकाधिकश्रमेण पुरा सर्वोत्तमवस्तूनां निर्माणार्थं लोकानां सुवृत्तिरासीदिति—

न मृषा श्रान्तं यदवन्ति देवाः । ऋग्वेदे १.७९.३
न ऋते श्रान्तस्य सख्याय देवाः ।। ऋग्वेदे ४.३३.११

अभ्युदयस्तु भारते धर्मेण साध्यः ।[1] गीतायां लोकसंग्रहप्रतिपत्तिः कर्मण्यताधानाय वर्तते । भागवतेऽपि कर्माभिरुचिमुत्पादयता प्रोक्तम्—

यथावर्णविधानमपवर्गश्चापि भवति ५.१९.१९.

भारते व्यवसायपरायणता समादृता, किन्तु बौद्धिका व्यापारा श्रेष्ठा न तु शारीरिका इति लोकनीतिरासीत् ।[2] तथा हि महाभारते उद्योगपर्वणि—

बुद्धिश्रेष्ठानि कर्माणि बाहुमध्यानि भारत ।
तानि जंघा जघन्यानि भारप्रत्यवराणि च ।।३५.६५

अस्यां स्थितौ ज्ञानमयप्रवृत्तयो दारिद्र्याभिमुख्योऽपि सर्वश्रेष्ठा इति विचार्य मनीषिणो लोकवैभवसंग्रहार्थं क्वचिदेव यतन्ते स्म, यतो हि नाम बुद्धेः सर्वोत्तमोपयोगो मोक्षाधिगमार्थं भवति ।

कृषिः

पुरा त्रयो व्यवसायाः प्रधानरूपेण प्रचलिता आसन्—कृषिः पशुपालनं शिल्पं च । एतैर्निष्पन्नानि वस्तूनि व्यापारद्वारा देशेषु विदेशेषु प्रेष्यन्ते स्म । क्षत्रधर्मपरायणास्तु शस्त्रास्त्रबलैः राष्ट्ररक्षामकुर्वन् ।

कृषेर्लोकप्रियता

आर्याः कृषिप्रधाना इति तेषां नाम्नैव व्यक्तं भवति । परवर्तियुगे एतत् सम्यक् समर्थितममरेण 'ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः ।' अर्य एवार्यः वैदिकसंस्कृतेः ।[3]

---

१. यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ।

२. ऋग्वेदानुसारं व्यशादिकर्मणि व्यापृता जनाः श्रेष्ठा, न तु कृषकाः । १०.७१.९ ।

३. आर्यः ऋ + ण्यत् । अर्यः ऋ + यत् । उभौ समानार्थौ वर्तेते । ऋधातोः समकक्षौ लैटिनभाषायां area, ग्रीकभाषायां aroein शब्दौ कृषिद्योतकौ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माङ्गलिकः कृषेः समारम्भोऽभूत् ।[१] कृषिकर्मणो दिव्यत्वं तस्य लोकप्रियतायाः संवर्धनायैव । तथा हि ऋग्वेदे

अर्वाची सुभगे भव सीते वन्दामहे त्वा ।
यथा नः सुभगाससि यथा नः सुफलाससि ।।
शुनं नः फाला वि कृषन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ।। ४·५७

अन्नस्य महिम्ना कृषेर्गौरवं जायते । तथा हि—अन्नं न निन्द्यात् । अन्नवानन्नादो भवति । अन्नं न परिचक्षीत । अन्नं बहुकुर्वीत । तद्व्रतम् ।[२]

अन्नं ब्रह्मेति मतम् । तदधिकृत्यान्नस्य संवर्धनाय कविनाथर्ववेदे प्रगीतम्—

उच्छ्रयस्व बहुर्भव स्वेन महसा यव ।
मृणीहि विश्वा पात्राणि मा त्वा दिव्याशनिर्वधीत् ।।

कृषिसमृद्धया राष्ट्राभ्युदयो भवतीति सम्मतम् ।[३]

अन्नात् सृष्टेः समारम्भ इति धर्मशास्त्रमतम् । तथा हि तैत्तिरीयोपनिषदि—अन्नात्पुरुषः । अन्नाद्वै प्रजाः प्रजायन्ते इति ।[४]

कवयोऽपि कृषेर्लोकप्रियतामाधातुमादिकालतोऽगायन् ।[५] तथा हि वाल्मीकी रामायणे—

खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः ।
शोभन्ते किंचिदालम्बाः शालयः कनकप्रभाः ।। अरण्य० १६.१७

कालिदासो निदर्शयति—

काशांशुका विकचपद्ममनोज्ञवक्त्रा सोन्मादहंसरवनूपुरनादरम्या ।
आपक्वशालिरुचिरानतगात्रयष्टिः प्राप्ता शरन्नववधूरिव रूपरम्या ।।

---

१. तदथर्ववेदे—यस्यामन्नं व्रीहियवौ यस्या इमाः पंचकृष्टयः ।
भूम्यै पर्जन्यपत्न्यै नमोऽस्तु वर्षमेदसे ।।१२.१.४२

२. तैत्तिरीयोपनिषदि भृगुवल्ली ७-९ ।
अथर्ववेदेऽपि निदर्शितम्—
उदुत्सं शतधारं सहस्रधारमक्षितम् ।
एवास्माकेदं धान्यं सहस्रधारमक्षितम् ।।३.२४.४

३. अर्थवानयं देश उच्यते यस्मिन्गावो शस्यानि च वर्तन्ते । महाभाष्ये ।

४. तैत्तिरीयोपनिषदो मतमिदं मनुस्मृतौ ३.७६ समर्थितम् ।

५. शिशुपालवधे १२.४२–४३; ६.४९ महापुराणे ४.६२–६३; ३५.३० ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काव्यमीमांसायां च

गेहाजिरेषु नवशालिकणावपात–
गन्धानुभावसुभगेषु कृषीवलानाम् ।
आनन्दयति मुसलोल्लसनावधूत–
पाणिस्खलद्वलयपद्धतयो वधूट्यः ।।१८ अध्यायतः

अस्यां स्थितौ समग्रं राष्ट्रं कृषेरभ्युदयाय जागरूकमभवत् । महर्षीणामाश्रमेषु राज्ञां प्रासादपरिधिषु दरिद्राणां कुटीरेष्वपि कृषेः शस्यश्यामलता गौरवमाधत्ते स्म ।

कृषि-विज्ञानम्

नवीनप्रस्तरयुगे वन्यानामन्नानां भोज्यत्वमभोज्यत्वं वा परिज्ञातुं प्रयासोऽभवत् । खाद्यान्नानां कृषियोजनया कृत्रिमोपायैर्विकासः समारब्धः । तस्मात् कालादारभ्य कस्मिन्नृतौ कीदृशे क्षेत्रे कियन्मात्रं बीजं वपनीयम्, तस्य सुसंवर्धनाय च कियद्वारं सेचनं कर्तव्यम्, भूमेरुत्पादनशक्तिः कथं वर्धनीयेति समस्या अधिकृत्य सम्यग्गवेषणं कृतम् । प्रयतमानाश्च ते कृषका अस्यां दिशायां वैदेशिकानि बीजानि फलादीनि च स्वदेशे संवर्धितवन्तः नित्यमेव वन्यानामन्नानां कृषिकल्पं कृतवन्तश्च ।

सिन्धुसभ्यतायुगे जना नदीभ्यः सेचनार्थं कुल्या विधाय नालिकाभिः कूपजलं चोद्धृत्य क्षेत्रेषु जलादानं कुर्वन्ति स्म । सिन्धुनदस्य जलं सेचनायोपयोजितम् ।[1]

वैदिकयुगे हले कदाचित् चतुर्विंशतिबलीवर्दाः संयोजिताः : ।[2] द्वादशानामष्टानां षण्णां च बलीवर्दानां हले संयोजनमपि प्रचलितमासीत् ।[3] क्षेत्राणामुत्पादनशक्तिर्भूमिलेपेन करीषादिना संवर्धिता । घृतेन मधुना च समक्ता सीता सुशोभना भवतीति सम्मतम् ।[4] कृषिकर्मणः सर्वाः प्रक्रियाः वैदिके युगेऽपि प्रायशस्तादृश्यो बभूवुः, यादृश्योऽधुना वर्तन्ते । कृषियोग्या भूमिः 'अप्नस्वती' इत्याकलिता । अयोग्या भूमिः 'अर्तना' इति ख्याता ।[5] क्षेत्राणां मापः कृतः । शकधूमप्रयोगैः कदा कियन्मात्रं वर्षणं भवेदिति ज्ञेयमासीत् ।[6]

परवर्तियुगेऽर्थशास्त्रानुसारं कृषिविज्ञानस्य त्रयो भेदाः—कृषितन्त्रं, गुल्मं वृक्षायुर्वेदश्च

१. In Sindh, even if the rainfall was heavier in prehistoric times, cultivation must have depended to a large cxtent on irrigation works connected with thc Indus. Piggott : Prehistoric India P. 10.

२. काठकसंहितायां १५.२ ।

३. तैत्तिरीयसंहितायां १.८.७.१;५.२.५.२ अथर्ववेदे ६.९.१ शतपथब्राह्मणे ७.२.२.६ ।

४. अथर्ववेदे ३.१७.९ ।

५. ऋग्वेदे १.१२७.६ ।

६. अथर्ववेदे ६.१२८.१–४ Vedic Index शकधूम ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बभूवुः । कृषिकर्मणे सीताध्यक्षादयो राजकर्मचारिणः कृषिविद्याविशारदा बभूवुः । विविध-प्रदेशानां वर्षाप्रमाणमनुमतम् । तदनुकूलं तत्रत्योत्पाद्यान्नानां निर्णयः कृतः । वर्षाया उपयोगित्वमनुपयोगित्वं च निर्णीतम् । शाकफलादीनामुत्पादनाय विशिष्टा भूमिः पर्यालोचिता । बीजानामुपकल्पनं वैज्ञानिकविधिना कृतम् । तथा हि—तुषारपायनमुष्णशोषणं चासप्तरात्रादिति धान्यबीजानां त्रिरात्रं पंचरात्रं वा कोशीधान्यानां मधुघृतसूकरवसाभिः काण्डबीजानां छेदलेपो मधुघृतेन कन्दानामस्थिबीजानां शकृदालेपः शाखिनां गर्तदाहो गोस्थिशकृद्भिः काले दौहृदं च । प्ररूढांश्चाशुष्ककटुमत्स्यांश्च स्नुहिक्षीरेण वापयेत् ।[1]

राजा कृषिकर्मणि वैज्ञानिकानुसन्धानं पुरस्कर्तुं सचेष्ट आसीत् । तथा हि मेगस्थानीजलेखानुसारं—

Any philosopher who may have committed any useful suggestion to writing, or observed any means for improving the crops and the cattle, or, for promoting the public interests declares it publicly.[2]

शालेः क्षेत्राणि प्रदाहेन बहुशस्यप्रदानि कृतानि । धान्यानि द्वी रोपितानि । धान्यक्षेत्रात् कक्षाणामुन्मीलनमक्रियत ।[3] अभिनवक्षेत्राणि कृषियोग्यानि संस्कृतानि । तेषां तृणानि वनानि च प्रदग्धानि । कार्पासबीजस्य लाक्षारसावसेचनेन रक्तवर्णः कार्पास उत्पादितः ।[4]

सेचनसाधनानि

सिन्धुसभ्यतायुगे सेतुबन्धेन नदीनां जलं समाहृत्य प्रणालीभिः प्रवाह्य क्षेत्राणां सेचनं कृतम् । वैदिकयुगे कूपजलं चक्रेणोद्वाह्य नालिकाभिः क्षेत्रसेचनाय प्रयुक्तम् ।

महाभारतयुगे प्रायशो जलाशयानामुपयोगिता सेचनाय बभूव ।[5] नदीतटवासिनस्तु नदीमातृका बभूवुः ।

अर्थशास्त्रानुसारं सर्वेषां ग्रामीणानां जनानां सहयोगेन सेचनार्थं सेतुबन्धाः निर्मिताः । महाजलाशया उच्चतमधरातले निर्मापिताः । तेषां जलं निम्नस्थलेषु स्थितानां जलाशयानां पूरणायोपयोजितम् । शासकाः सेचनायोजनानां विषये समुत्सुका आसन् । सौराष्ट्रप्रदेशे

---

१. अर्थशास्त्रस्य सीताध्यक्षप्रकरणतः ।
२. M' Crindle : Ancient India p. 83.
३. मनुस्मृतौ ७.११०. सुश्रुते सूत्रस्थाने ४६.१.१७,२० ।
४. सर्वदर्शनसंग्रहे आर्हतदर्शनप्रकरणे ।
५. कच्चिद्राष्ट्रे तडागानि पूर्णानि च बृहन्ति च ।
भागशो विनिविष्टानि न कृषिर्देवमातृका ॥सभापर्वणि ५.६७ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गिरिनगरस्य सुदर्शनतडागस्येतिहासः मौर्ययुगाद् गुप्तयुगपर्यन्तं भारतीयानां राज्ञां तत्सम्बधिप्रयत्नं निदर्शयति । चन्द्रगुप्ताशोक-खारबेल-रुद्रदाम-स्कन्दगुप्त-वाक्पतिभोज-करिकाल-राजेन्द्रादीनां नृपतीनां सेचनकार्याणि प्रख्यातानि सन्ति । क्वचित्तुलाकोटिः सेचनाय प्रयुक्तासीत् ।[१]

काश्मीरको महाराजो ललितादित्यस्तु 'अरघट्टालीं' निर्माय वितस्ताया जलं बहुषु ग्रामेषु संचारयामास । तद्यथा कल्हणः

चक्रे चक्रधरे तेन वितस्ताम्भःप्रतारणम् ।
विनिर्मायारघट्टालीस्तांस्तान् ग्रामान् प्रयच्छता ॥ राज० ४·१९२

कृषिसमृद्धिः

भारतस्य मूलत एव प्राप्तव्यानि कृषिफलानि—शालिः, इक्षुः, कार्पासश्च सन्ति । एषां कृषिर्विदेशेषु भारतादेव प्रसृता । सिन्धुसभ्यतायुगे गोधूमयव-तिलादीनामपि कृषिरक्रियत । ऋग्वेदे यवशालिधान्यानामुल्लेखो वर्तते । परवर्तियुगे व्रीहि-यव-मुद्ग-माष-तिल-गोधूम-नीवार-प्रियङ्गु-श्यामाकादीनामन्नानामुर्वारुकादीनां शाकानामुत्पत्तिः कृता । बहुविधाः शालयः—व्रीहि-महाव्रीहितण्डुल-शारिशाकाशु-प्लाशुकादय उत्पादिताः । अथर्ववेदानुसारमिक्षुकृषिः कृता । तैलदान्नानां—तिलसर्षपैरण्डादीनां कृषिः सुप्रचलितासीत् । शणं वन्यमेव श्रुतं वैदिकयुगे । सम्भवतः तस्यापि कृषिः कृता ।

महाभारतयुगे धान्य-यव-तिल-माष कुलत्थ-सर्षप-चण-कलाप-मुद्गगोधूमातसीनां कृषिः कृता । अर्थशास्त्रानुसारं तु सीताध्यक्षो धान्यपुष्पफलशाककन्दमूलफलवाल्लिक्यक्षौमकार्पासबीजानि यथाकालमगृह्णात् ।

तत्र पूर्ववापास्तु--शालिव्रीहिकोद्रवतिलप्रियङ्गुदारकवराकाः ।
मध्यवापाः—मुद्गमाषशिम्बिकादयः ।
पश्चाद्वापाः—कुसुम्भमसूरकुलुत्थयवगोधूमकलायातसीसर्षपाः ।

अर्थशास्त्रानुसारमिक्षवो हि बह्वाबाधा व्ययग्राहिणश्च । फेनाघातः प्रदेशः वल्लीफलानां कूपपर्यन्ताः शाकमूलानाम्, उपनदप्रदेशाः मृद्वीकेक्षूणां हरितप्रदेशा हरितकानां शाकादीनां गन्धभैषज्योशीरह्रीवेरपिण्डालुकादीनामुत्पादनाय वरेण्या आसन् ।

चरकसुश्रुतसंहितानुसारं परवर्तियुगे भारते शालीनामिक्षूणां च बहवो भेदा विविधप्रदेशेषूत्पादिताः ।[२] एषु ग्रन्थेषु ग्रामयोग्यानि कृषिफलान्यपि परिगणितानि सन्ति । तेषां संख्या तु शतपर्यन्तास्ति । आधुनिकयुगस्य प्रायः सर्वाणि शाकमूलफलव्यंजनादीनि

---

१. चाणक्यसूत्रे २. ७४ ।
२. चरके सूत्रस्थाने २७.२३१-२३८ सुश्रुते सूत्रस्थाने ४५ अध्याये इक्षुवर्गे च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्राचीनकालेऽपि उत्पादितानि । भारते केसर-पिप्पली-लवंगैलाकुष्ठशृंगिवेरहरिद्रादीनां कृषिः समुन्नतासीत् । दक्षिणभारतादेषामुपस्कराणां—विशेषतः पिप्पलीनां निर्यातं रोमक-प्रदेशेषु विक्रयाय बभूव ।

राजकीयसंरक्षणम्

कृषिफलेषु राज्ञो भागो बभूव । अतः कृषिमधिकृत्य नृपनीतिः सदैवाधिकोत्पादनाय कृषकाणां प्रोत्साहनाय चाभवत् । महाभारतानुसारं राजा तु साधुपुरुषान् कृषिकर्मणि नियोजयेत् ।

कच्चित् स्वनुष्ठिता तात वार्ता ते साधुभिर्जनैः ।
वार्तायां संश्रितस्तात लोकोऽयं सुखमेधते ॥

कृषिफलानि बहुलीकर्तुमर्थशास्त्र राजकीययोजनाः समुत्थापिताः । तथा हि—अकृषता-माच्छिद्यान्येभ्यः प्रयच्छेत् । अकृषन्तोऽपहीनं दद्युः । सहोदकमाहार्योदकं बा सेतुं बन्धयेत् । अन्येषां वा बध्नतां भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात् । नटनर्तकगायनवादकवारजीवन-कुशीलवा वा न कर्मविघ्नं कुर्युः । निराश्रयत्वाद् ग्रामाणां क्षेत्राभिरतत्वाच्च पुरुषाणां कोशविशिष्टद्रव्यधान्यरसवृद्धिर्भवति ।

दण्डविष्टिकराबाधैः रक्षेदुपहतां कृषिम् ।
स्तेनव्यालविषग्राहैः व्याधिभिश्च पशुव्रजान् ॥
एवं द्रव्यद्विपवनं सेतुबन्धमथाकरान् ।
रक्षेत्पूर्वकृतान् राजा नवांश्चाभिप्रवर्तयेत् ॥[1]

दुर्लभबीजानि शुल्करहितान्येव राष्ट्रे आनेतव्यानीति राजनियमोऽभवत् ।[2] कृषिविवा-देषु निर्णयं स्वल्पव्ययसमयसाध्यं विधातुं निकटवर्तिनः सज्जना निर्णायका नियुक्ताः । व्यर्थविवादिनः कठोरदण्डार्हा इति नीतिरभवत् । राष्ट्रियकृषेर्हानिं कुर्वतां दण्डो विहितः । कृषिसम्बन्धिनीं हानिं निवारयितुं नियमाः कृताः । सेचनकर्मणि बाधाकारिणो दण्ड्या अभिमताः । अपरेषां जलाशयानामुपयोगकारिणस्तेषां जलाशयानां नवीकरणं कुर्युरीति विधानमासीत् ।[3] कृषिरक्षणाय राजकीयनियमानां कठोरता स्मरणार्हा । तथाहि उदक-धारणं सेतुं भिन्दतस्तत्रैवाप्सु निमज्जनमिति ।[4] विवीतक्षेत्रखलवेश्मदीपिकमग्निना दाह-येत् इति च ।[5]

---

१. अर्थशास्त्रे जनपदनिवेशप्रकरणात् २. अर्थशास्त्रे शुल्काध्यक्षप्रकरणात् ।
३. अर्थशास्त्रे धर्मस्थीये सीमाक्षेत्रविवादप्रकरणे ।
४. अर्थशास्त्रे कण्टकशोधने चतुर्थेऽधिकरणे । मनुस्मृतौ ९.२७९ ।
५. तत्रैव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैश्यानां कृषिकर्मणि नियोजनमपि राजधर्मः। तथा हि मनुस्मृतौ

वाणिज्यं कारयेद्वैश्यं कुसीदं कृषिमेव च ॥ ८.४१०

नवक्षेत्राणां स्वामित्वं तु मृगवाणन्यायेन समीहितं मनुना। तथा हि—

पृथोरपीमां पृथिवीं भार्यां पूर्वविदो विदुः।
स्थाणुच्छेदस्य केदारमाहुः शल्यवतो मृगम् ॥ ९.४४

याज्ञवल्क्यानुसारमलसाः कृषका दण्डनीयाः। राजा तेषां भूमिं कार्यक्षमकृषकेभ्यो दद्यात्।[1] महापुराणानुसारन्तु

तथा भूपोऽप्यतन्द्रालुर्भक्तग्रामेषु कारयेत्।
कृषिं कर्मान्तिकैर्बीजप्रदानाद्यैरुपक्रमैः॥
देशेऽपि कारयेत् कृत्स्ने कृषिं सम्यक्कृषीवलैः॥ ४२.१७६-१७७

कश्मीरकोऽयं महाराजो ललितादित्यः कृषिसंवर्धनेन महत्तमं महिमानं लेभे इति कल्हणस्य तत्सम्बन्धिवृत्तेन प्रमाणितमेव। तद्यथा राजतरंगिण्याम्—

ललितादित्यभूभर्तुरुद्योगेन बलीयसा।
किंचिदाकृष्टसलिलः प्रापोत्पत्ति मनाक्ततः ॥५.६९

अवन्तिवर्मणो महाराजस्य प्रजा सूय्य इति नामकस्य विज्ञानविदो योजनाभिः समृद्धीकृतेति वर्णयति कल्हण :—

असिञ्चच्च जलैर्ग्रामान् ग्रामान्मृदमुपाहृताम्।
या यावता क्षणेनागाच्छोषं तां तावता हृदि ॥५.११०
कालेन मत्वा सेकार्हं प्रतिग्रामं जलस्रुतेः
परिमाणं विभागं च परिकल्प्य निरत्ययम् ॥५.१११
चकार चानूलाद्याभिः सिन्धुभिः सर्वतो दिशः
सत्फलोदारकेदारसम्पत्सम्पन्नविभ्रमाः ॥५.११२
न कश्यपेनोपकृतं न यत्संकर्षणेन वा हेलया
मण्डलेऽमुष्मिंस्तत्सुय्येन सुकर्मणा ॥५.११३

धार्मिकनियोजनम्

कृषेः समृद्धिरधिकांशतो दैवाधीना भवति। देवतानामनुग्रहेण कृषिर्वर्धते इति लौकधारणा। सिन्धुसभ्यतायुगे शस्यशालिनीदेव्याः पूजा कृता। वैदिकयुगे मन्त्रप्रयोगैर्यज्ञादिभिः कर्मकाण्डैश्च यथाकालं वृष्टिप्रवर्तनं कृषिरक्षणं फलबाहुल्यं च सुकरं विहितम्। आग्रयणयज्ञे

१. याज्ञवल्क्ये २.१५८।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गृहपतिर्नवान्नानि देवेभ्यः समर्प्य स्वयं भुक्तवान्।[१] जलवर्षणाय 'कारीरी' इति ख्यातोः यज्ञः सम्पादितः।

धर्मशास्त्रेषु तडागनिर्माणस्य पुण्यात्मकः प्रभावो निर्दशितः। एभिस्तडागैः सेचनकर्म सरलमजायत। जलदानं सर्वोच्चमिति व्यवस्थापित्।[२]

बलीवर्दानां सुखकर्षणं धर्म्यमिति सम्मतम्।[३] तत्र विधानमासीदापस्तम्बस्मृतौ—

हलमष्टगवं धर्म्यं षड्गवं मध्यमं स्मृतम्।
चतुर्गवं नृशंसानां द्विगवं वृषघातिनाम्॥ २२-२३

स्वस्थबलीवर्दानां कर्षणं ब्राह्मणेभ्योऽपि पौराणिकयुगे समीचीनं विहितम्। बलीवर्देभ्योऽवकाशदिवसा—अमावस्यासंक्रान्तिपूर्णिमादयो निर्धारिताः।[४] परवर्तियुगे बलीवर्दानामलङ्करणं पूजनं हलविधानं हलयोजनमुहूर्तं कर्षणं वपनं क्षेत्रचयनं चाधिकृत्य धार्मिकविधानमनुशिष्टम्।[५]

उपवनम्

पुष्पफलपत्रादीनामुपयोगिताः प्रागेव निर्दशिता उपभोग्यप्रकरणे। वनानामधिकोपगिवृक्षलतादीनां स्वाधिकारस्याकांक्षा स्वाभाविकी भवति। तेषां कृत्रिमोपायैः स्वाधिकृतभूमौ संवर्धनमुपवनविधानस्य प्रयोजनम्।

लोकप्रियता

ऋग्वेदानुसारं फलेषु लोकानां रुचिरासीत्। तथा हि—

एवा ह्यस्य सूनृता विरप्शी गोमती मही पक्वा शाखा न दाशुषे ॥१.८.८

इयं शाखिनां प्रशस्तिः सोपमं व्यज्यते। वैदिकयुगे आरण्यकानां मुनीनां वनप्रवृत्तिः प्रायश उपवनानां संग्रहणार्थं बभूव। मुनयस्ते सुवृक्षाणामभ्युदयाय निकृष्टवृक्षाणां दूरीकरणाय च स्वभावतः सचेष्टा बभूवुः। ततः प्रभृति सदैवोपवनसंवर्धनं लोकसाधारणं कर्मासीत्।

मुनीनामाश्रमेषु भिक्षुकाणां विहारेषु नगरीणामञ्चलेषु प्रासादानां परिधिषु च सर्वत्रोपवनं सुस्निग्धं विराजितम्। तद्यथामरकोशे

---

१. ऋग्वेदे ४·५७.६.८; शुक्लयजुर्वेदे १२.७०, ७२; अथर्ववेदे ३.१७; ६.१४२; ६.७९; आपस्तम्बश्रौतसूत्रे २.९.१।
२. अनुशासनपर्वणि ५८ अध्यायतः ३. रामायणेऽयोध्याकाण्डे ६४ सर्गतः।
४. पद्मपुराणे सृष्टिखण्डे ४७.१११-१२०। ५. पराशरस्मृतौ ३ अध्याये।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गृहारामास्तु निष्कुटाः ।
आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ।
अमात्यगणिकागेहोपवने वृक्षवाटिका ।
पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ।
स्यादेतदेव प्रमदवनमन्तःपुरोचितम् ॥

उपवनानां क्रीडार्थमुपयोगः प्राचीनकालतो वर्तते स्म ।[१] अयोध्या-कपिलवस्तू-ज्जयिनीषूपवनानां शतान्यासन् । उपवनेषु लतागृहं शैलगृहं जलक्रीडापुष्करिणी आरामागाराश्च बभूवुः । बहवो माङ्गलिकवृक्षा आरोपिताः । प्रायो वसन्तोत्सवेषु प्रमदवने आम्रमञ्जरी-कुरबकपुष्पस्तबकादीनां मनोहारित्वं सार्वजनिकप्रमोदाय बभूव । तत्र राजदम्पतीनां विहारस्थली बभूव । सर्वेषु समृद्धिशालिनां गृहायतनेषु प्रतिष्ठतो मदनवृक्षः कामदेवपूजार्थमभवत् । भवनसहकारशाखासु शुकपंजरावस्थानमभूत् । वृक्षास्तु कुटुम्बसदस्या इव सम्मानिताः ।

तत्र पुष्पशकटिकाकला नागरेषु प्रचलितासीत् । तदर्थं पुष्पोपादानेन शकटिका प्रणीता ।[३]

भारतीयकाव्येषु सौन्दर्यशालिनामुपवनानां चारुता प्रायशो निर्दशिता । तत्र बालाः पयोघटेन शिशुवृक्षाणां संपोषणं कुर्वन्ति स्म । तथा हि कुमारसम्भवे—

अतन्द्रिता सा स्वयमेव वृक्षकान्घटस्तनप्रस्रवणैर्व्यवर्धयत् ।
गुहोऽपि येषां प्रथमाप्तजन्मनां न पुत्रवात्सल्यमपाकरिष्यति ।५.१४
पयोघटैराश्रमबालवृक्षान्संवर्धयन्ती स्वबलानुरूपैः ।
असंशयं प्राक्तनयोपपत्तेः स्तनंधयप्रीतिमवाप्स्यसि त्वम् ॥ रघु० १४.७८

उपवनेषु मानवानां चित्तवृत्तय उल्लसिताः सुखे । दुःखे वा तेषूपवनेषु मानवानां समवेदनाप्रतीतिरभवत् । लतावृक्षादीनां पुष्पैः शरीरालङ्करणं भवति । देवपूजार्थं पुष्पफलादीनां भूय उपयोगितासीत् । फलदानं तु साधारणधर्मो वृक्षाणाम् । उत्सवावसरे पुरा पुष्पगृहा विरचिताः ।

वृक्षास्तु कुटुम्बिन इवेति प्रवदति कल्हणः । तद्यथा—

सप्रसूनफला वृक्षा गृहस्था इव पातिताः ।
कुटुम्बैरिव रोलम्बैरशोच्यन्त पदे पदे ॥ राजत० ७.१२२४

---

१. अंगुत्तरनिकायानुसारं समृद्धनागरिकस्य चत्वारि लक्षणानि बभूवुः—उपवनभोगः, रमणीयवस्त्रधारणम्, ऋतुयोग्यावासः, स्वादुभोजनं च १.१४५ ।
२. कादम्बर्यां ३१६ पृष्ठे । अभिज्ञानशाकुन्तले चतुर्थाङ्के च ।
३. कामसूत्रटीकायाम् १.३.१६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृक्षविज्ञानम्

वृक्षविज्ञानेनोपवानां समृद्धिर्विस्मयकारिणी बभूव । तथा हि—'आम्रफलानि घटाकाराणि सम्भावितानि । तृतीये वर्षे आम्रवृचाः फलदा बभूवुः । पुष्पफलादीनामकाले प्रसवः सम्भावितः ।'[१] आरामिका वृक्षविज्ञाने तेषां संवर्धने च विशारदा बभूवुः । शुष्यमाणानां वृक्षाणामायुः संवर्धनं सर्वौषधयोगेन कृतम् ।[२]

अर्थशास्त्रानुसारं वृक्षायुर्वेदनिष्णाताः जनाः सीताध्यक्षपदे नियोजिताः । वृक्षारोपणात् प्राग् गर्तं प्रदाह्य गोऽस्थिशकृद्भिः काले दौहृदं च । प्ररूढांश्चाशुष्ककटुमत्स्यांश्च स्नुहिक्षीरेण वापयेत् ।[३]

वराहमिहिरस्य बृहत्संहितायां वृक्षायुर्वेदस्य गुप्तयुगं यावत् प्रगतिर्निर्दशिता। तदनुसारं वृक्षाणां रोपणं कलमपद्धत्याऽक्रियत । विभिन्नर्तौ वृक्षकाणां सेचनकालो नियत आसीत् । वृक्षाणां रोगाणां लक्षणानि तेषां निदानानि च कृतानि । तेषां शल्यचिकित्सा प्रचलितासीत् । वृक्षाणां शीघ्रसंवर्धनाय शतविधानि बल्यानि रचितानि । कलात्मकविधिना लघुदीर्घमहावृक्षलतादीनामुपवने विन्यासो निष्पाद्यते स्म ।[४]

फलानां षड्विधत्वं वैज्ञानिकदृष्ट्या पर्यालोचितम्—

अन्तर्व्याजं बहिर्व्याजं बाह्यान्तर्व्याजमेव च ।
सर्वव्याजं बहुव्याजं निर्व्याजं च तथा फलम् ॥

काव्यमीमांसायम् १८ अध्याये

उपवनसमृद्धिः

वृक्षारोपणस्य बहुविधानि प्रयोजनानि प्राचीनकालतो बभूवुः । तथाहि छायार्थं शरणार्थं वा फलार्थं पुष्पार्थं लतापत्रादीनां सौन्दर्यार्थं च । छायार्थं शरणार्थं वा वटवृक्षा रोप्यन्ते स्म । तेषां शरणे पंचशतजना अपि शरणं प्राप्नुवन्ति स्म ।[५] पुष्पाणामेव षड्विध उपयोगो ज्ञात आसीत् ।[M]

राजकीयोद्यानस्य संरक्षणाय द्वाराट्टालिकाभिः समन्विताः प्राकारा रचिताः । उद्यानस्य केन्द्रभागे पुष्करिण्यां कमलशोभाऽवर्तत । तत्रैवारामागारो निर्मितः ।[६]

---

१. दधिवाहनजातके १८६ ।

२. छान्दोग्ये ६.३.७–१३ ।

३. रोपणपुष्टिचिकित्सावैचित्र्यकृते गृहोद्यानार्थाः । कामसूत्रटीकायाम् १.३.१६ ।

४. अस्य विषयस्य विवरणं बृहत्संहितायामग्निपुराणे च द्रष्टव्यम् । आनुषंगिकरूपेण नैषधीयचरिते १६.८२;१.८२; रत्नवल्यां ३.८ च द्रष्टव्यस्थलानि ।

५. भरुजातके २१३ ।

M. शोभान्धोगन्धरसैः फलार्चनाभ्यां च पुष्पमुपयोगि ।

६. धम्मद्धजजातके २२० ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नगराणामुपवनेषु कर्णिकार-खर्जूर-प्रियाल-मुचुलिन्द-कुटज-केतकप्रियङ्गु-नीप-सप्तच्छद-कोविदारासन-करवीरादीनां शोभासीत् । एषां वृक्षाणां पुष्पप्रदत्वमेव विशिष्टम् । वृक्षाणामङ्काश्रयप्रणयिन्यो लताः संवर्धिताः ।

आम्रवृक्षाणां भारते सदैव प्रथमस्थानमुपवनेषु दृश्यते।[1] बहुविधाः फलपुष्पप्रदा वृक्षाः चरकसुश्रुतसंहितयोः परिगणिताः ।[2] ह्वेनसांगेन भारतस्य विविधप्रदेशानां विशिष्टफल-पुष्पादीनां वृक्षाणां वर्णनं कृतम् ।[3]

राजकीय-संरक्षणम्

उपवनारोपणविषये राज्ञामभिरुचिः सातिशयं विद्यते । वैदेशिकवृक्षाणामायातस्य व्यवस्था राजभिः कृता । तेषामुपवने प्रथमं संवर्धिता वैदेशिकवृक्षाः साधारणनागरिकाणामुपवनेषु पश्चात् प्रत्यानीताः । चन्द्रगुप्ताशोकखारवेलादीनां नृपाणामुपवनरुचिः प्रसिद्धा । अर्थशास्त्रानुसारं राजकीयशासनमनुसृत्य निर्जलप्रदेशेषु कूप-कासारोत्सा निर्मिताः । तत्र पुष्पफलादीनामुपवनानि च रोपितानि ।

उपवनपृक्षाणां हानिकरणे घोरदण्डस्य व्यवस्थासीत् । तथा हि—

वनस्पतीनां सर्वेषामुपभोगो यथा यथा ।
तथा तथा दमः कार्यो हिंसायामिति धारणा ॥मनु० ८.२८५

राजशासनानुसारं सीमाप्रदर्शिनो वृक्षाः—वट-किंशुक-शाल्मलि-साल-तालादयः प्रतिग्रामं रोपिताः ।

धार्मिकानियोजनम्

धार्मिकनियोजनेन प्रधानतो वृक्षाणां पुण्यात्मकप्रभावोऽभिव्यक्तः । तेषां सुरक्षायै च योजना विहिताः । तथा हि—'वृक्षारोपणेन पुरुषस्य कीर्तिवर्धते; मरणानन्तरं शुभं कल्प्यते । वृक्षारोपणेन पूर्वापरवंशजा उद्धृताः । पुत्र एव वृक्षो जायते आरोपकारिणः पुरुषस्य । देवगन्धर्वमानवाः सर्वे वृक्षाश्रिताः । वृक्षाः पुत्रवत् पाल्याः' ।[4] वृक्षाणां हानिकर्तुः प्रायश्चित्तविधानमासीत् । तथा हि—

तिर्यग्योनिवधं कृत्वा द्रुमांश्छित्त्वेतरान्बहून् ।
त्रिरात्रं वायुभक्षः स्यात्कर्म च प्रथयन्नरः ॥शान्ति० ३५-३४

---

१. बृहदारण्यके ४.३.३६ ।
२. फलवर्गपुष्पवर्गयोः ।
३. ह्वेनसांगे वाटर्सकृते प्रथमे भागे पृ० ६३ ।
४. महाभारतेऽनुशासनपर्वणि ५८. २३-३१ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वृक्षारोहणमशिष्टमेव ।[१] राजभ्योऽपि वृक्षाणां नमस्कारः साधु समादिष्टः ।[२]

प्रायश्चित्तविधानेन यावत् वृक्षारोपणस्य व्यवस्था कृता । तथा हि—प्रतिमाभंजन-कर्ता त्रिवर्षं यावत् पिप्पलवृक्षसेचनं करोतु । स्त्रीहन्ता दशपिप्पलवृक्षारोपणं करोतु ।[३] वृक्षहत्या तु प्रायश्चित्तविधानानुसारं गोहत्यावदभिमता ।

पिण्डदानसामर्थ्यमपि वृक्षाणामभ्यारोपितम् । पिप्पलवृक्षस्तु सहस्रपुत्रेण समीकृतः । विविधवृक्षाणामारोपणस्य विविधानि पुण्यफलानि सम्मितानि । यथा—चन्दनपनसवृक्षौ क्रमशः पुण्यलक्ष्मीप्रदौ । चम्पकस्तु सौभाग्यदः, बकुलेन कुलवृद्धिर्जायते ।[४] विविधदेवानां परितुष्टिर्विविधपुष्पैः सम्मता ।[५]

पशुपालनम्

कृषिपशुपालनयोः साह्यमेव । पुरा जनसंख्यायाः स्वल्पत्वे सति वनप्रदेशेषु गोचरेषु च घासस्याधिक्यमभवत् सर्वत्र । जलं सर्वत्र प्राप्यमेवासीत् । धार्मिकविचारेणापि प्राचीन-युगे पशूनां विशेषमहत्त्वमासीत् ।

पशूनां लोकप्रियता

सिन्धुसभ्यताया बलीवर्दानां प्रतिकृतीनां दर्शनेन स्पष्टं प्रतिभाति यत् तत्रत्यजनानां पशुपालने विशेषाभिरुचिरासीत्, यतो बलीवर्दास्तेषामतिशयपुष्टतरा आसन् । वैदिकयुगे गोपालने रुचिरनेन मंत्रेण प्रमाणिता—

आ गावो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठं रणयन्त्वस्मे ।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीमुषसो दुहानाः ।।
यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकम् ।
भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु ।। ऋग्वेदे, ६.२८.१,६ ।
यच्चिद्धि सत्य सोमपा अनाशस्ता इव स्मसि ।
गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ।। ऋ० १.२९.१

गोभिरश्वैश्च वैदिका ऐश्वर्यकामाभवन् ।[६] तथा हि गा अधिकृत्य प्रोक्तमथर्ववेदे—

शिवो वो गोष्ठो भवतु शारिशाकेव पुष्यत ।
इहैवोत प्रजायध्वं मया वः सं सृजामसि ।।

---

१. चरके सूत्रस्थाने ८.२० ।
२. सभापर्वणि ५.१०३ ।
३. शातातपस्मृतौ ३.१८; २.३७ ।
४. पद्मपुराणे सृष्टिखण्डे २८ अध्यायतः ।
५. अग्निपुराणे २०२, २०७ अध्याययोः ।
६. ऋग्वेदे १.२९,१०.६८.१२ अथर्ववेदे ३.१२ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मया गावो गोपतिना सचध्वमयं वो गोष्ठ इह पोषयिष्णुः ।
रायस्पोषेण बहुला भवन्तीर्जीवाजीवन्तीरुप वः सदेम ॥ ३.१४.५६

अश्वास्तु मुक्तास्वर्णादिभिरलङ्कृताः ।[१] गोष्ठं तु गृहपतेरायतने निर्मितम् । दर्शपूर्णमासयज्ञे यजमानोऽकामयत—पशवस्तु मया प्रसन्ना भवन्तु । अनेन यज्ञेनाहं सन्तानैः पशुभिश्च सह पवित्रो भूयासम् ।

अश्वस्तु वैदिकयुगस्य प्रकृष्टतमो बलिष्ठः शक्तिसम्पन्नो महावेगः पशुरासीत् । तस्य मूल्यं सहस्रगवां समं बभूव ।[२] पशून् प्रति वैदिकानामुपनिषद्युगे धारणा प्रशस्या वर्तते । तथा हि—यशोऽधिष्ठानं पशव इति ।[३] पशुमान् भवितुमेव पशुषु पंचविधं सामोपासनं निर्णीतम् ।[४]

रामायणमहाभारतयुगे पशुषु जनरुचिः समवर्धत । गोषु स्वभावतः सम्पन्नता सम्मता ।[५] महाभारतानुसारं राजानो राजकुमारास्तु स्वहस्तेन गवामपरेषां च प्रियपशूनां सेवामकुर्वन् ।[६] नकुलसहदेवौ पशुसेवाविशारदौ बभूवतुः ।[७] गवां पयोऽमृतमेव मतम् । गौस्तु प्रतिष्ठाकामाय श्रेष्ठसाधनमिति मान्यताभवत्[८] । हस्तिनोऽश्वाश्चालंकृताः । उपहारार्थं पशवः काञ्चनमालाभिरलंकृताः । राजभ्यस्तेषामुपहारः प्रकल्पितः ।[९] नगरस्य शोभा हस्तिरथाश्वसंकुलत्वेनाभिमता । गोपास्तु राज्ञां स्नेहास्पदं बभूवुः ।[१०]

अर्थशास्त्रानुसारं पशुपालनविधिः पशूनामतिशयलोकप्रियत्वं समर्थयति ।[११]

परवर्तियुगे कालिदासेन वर्णितं दिलीपस्य गोपालनव्रतं विदितचरमेव । भागवते कृष्णस्य गोपालनचरितं स्पृहणीयं वर्तते । पशूनां कृते महोत्सवानामायोजनं कृतम् । कृष्णस्य गोवर्धनपूजा गिरियज्ञश्चाद्यावधि सम्प्रतिष्ठितौ । अन्येषूत्सवेषु पशवो गृहसदस्या इवालंकृताः ।

भारतीयकाव्येनापि पशूनां लोकप्रियत्वं प्रसाधितम् । वैदिकयुगे गौर्माता तस्या वत्सः पुत्र एव मतः तद्यथा—

---

१. ऋग्वेदे १.६८.११ ।
२. शतपथब्राह्मणे १३.१.२.५-८;१३.३.३.१;१३.४.२.१ ।
३. तैत्तिरीयोपनिषदि भृगुवल्ली १०.३ ।
४. छान्दोग्ये २.१७.२ ; २.६.२ ।
५. रामायणे युद्धकाण्डे १६९ ।
६. वनपर्वणि २३८.२०; २३९.४-६ ।
७. वनपर्वणि ६८.२-६; ७१.१२-१८ विराटपर्वणि ३.३ ।
८. वनपर्वणि यक्ष-युधिष्ठिरसंवादे ।
९. सभापर्वणि ५२ अध्यायतः । रामायणेऽयोध्याकाण्डे ७०.२०-२३ हस्तिनां स्वर्णालङ्कारप्रतिष्ठा वैदिकयुगेऽपि प्रसिद्धा । ऐतरेयब्राह्मणे ८.२३.३ ।
१०. रामायणे अयोध्याकाण्डे १०.४०, ४४, ४७ ।
११. अश्वाध्यक्षप्रकरणात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनड्वान् दाधार पृथिवीमुत द्याम्,
अनड्वान् दाधारोर्वन्तरिक्षम् ।
अनड्वान् दाधार प्रदिशः षडुर्वीः,
अनड्वान् विश्वं भुवनमाविवेश ॥

बौद्धसंस्कृतौ गावः कौटुम्बिकसदस्या इव मताः। गवामार्जवं स्निग्धत्वं च गौतमेन सुष्ठु प्रतिपादितम् ।[१]

गोपवधूनां दधिमन्थनं कस्य हृदयं न हरतीति पुराणवचनम् ।[२] भागवतवचनं गोपालमधिकृत्य सुप्रियमेव—

गावश्च कृष्णमुखनिर्गतवेणुगीत-
पीयूषमुत्तभितकर्णपुटैः पिबन्त्यः ।
शावाः स्नुतस्तनपयः कवला स्म तस्थु-
र्गोविन्दमात्मनि दृशाश्रुकलाः स्पृशन्त्यः ॥ १०.२१.१३

पशुसमृद्धिः

सिन्धुसभ्यतायुगात् भारते सदैव हस्ति-गो-महिषाजाविगर्दभोष्ट्रशूकरादीनां परिपालनं विविधप्रदेशेषु बभूव । प्रधानत आर्या गोबलीवर्दाश्वान् परिपालयन्ति स्म । एषां पशूनां संख्या समृद्धिशालिनां स्वामित्वे लक्षावधिरपि बभूव ।[३] अवीनां पालनमूर्णायै कृतम् । गर्दभा भारितमा भारहाराः सन्तः सर्वेषां कृते उपयोगिनः बभूवुः ।

रामायणानुसारं राज्ञां कृते हस्तिगोरासभाश्वानां सहस्राण्यपि पालितानि । हस्तिनो नागवने पालिताः ।[४] वनवासिनामाचार्याणां सहस्राणि गवां बभूवुः । महाभारतानुसारं कौरवपाण्डवानामनेकलक्षगावो बभूवुः ।[५] युधिष्ठिरस्य कृते पशूनां पालनं सिन्धुप्रदेशात् पर्णाशां यावदक्रियत ।[६] ऐतिहासिकयुगेऽपि राज्ञां लक्षाधिकगवामुल्लेखा वर्तन्ते । हर्षचरितानुसारं महाराजो हर्षोऽर्बुदशो गवां दानमकरोत् ।[७] उषावदातेन त्रिलक्षगवां दानमक्रियत ।[८]

---

१. सुत्तनिपाते ब्राह्मणधम्मिकसुत्ते ।
२. महापुराणे २८.३२-३६ ।
३. ऋग्वेदे ५.३०.१२–१५;१ २९; ऐतरेयब्राह्मणे ८.४२२, २३ ।
४. अयोध्याकाण्डे १००.५० ।
५, विराटपर्वणि १०.१०, वनपर्वणि ३९.४ ।
६. सभापर्वणि ४८.६ ।
७. हर्षचरिते सप्तमोच्छ्वासे ।
८. नासिके गुहालेखे सप्तदशे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्थशास्त्रानुसारं राज्ञां कृते पशुपालनाय—अश्वाध्यक्षः, गोऽध्यक्षः, हस्त्यध्यक्षश्च नियुक्ताः। गो-महिषी-खराजोष्ट्रवराहादीनां पालनं गोऽध्यक्षेण कृतम्।[1] अश्वा राजकीय-प्रयोजनाय बहुभ्यो देशेभ्यः कम्बोजसिन्धुवनायुसौवीरारट्टवाह्लीकपापेयतैतलेभ्य आनीय पालिताः।

राज्ञां सेनासु हस्त्यश्वबलीवर्दादीनां संख्या गणनाबाह्यासीत्। तथा हि युधिष्ठिरसेना-परिमाणं द्रष्टव्यम्—

अयुतं त्रीणि पद्मानि गजारोहाः ससादिनः।
रथानामर्वुदं चापि पादाता बहवस्तथा॥ सभापर्वणि ५२.४४

विनयाधानम्

अश्वानां कार्यक्षमत्वं विधातुं सम्यग्विनयनं कृतम्। साधारणोपयोगाय वल्गनलंघन-घोरणनारोष्ट्रादीनां शिक्षा दत्ता। युद्धार्थमश्वानां शिक्षकाः सारथय एव नियुक्ताः।

अर्थशास्त्रानुसारमश्वानां चिकित्सकास्तेषामारोग्याय ऋत्वनुकूलाहाराय च सचेष्टा अभवन्। सूत्रग्राहकोऽश्वबन्धको यावसिको विधापाचकः स्थानपालकः केशकारो जाङ्गली-विच्चापरे सेवका अश्वानां सुखार्थं नियुक्ताः। किमधिकम्—

द्विरह्नः स्नानमश्वानां गन्धमाल्यं च दापयेत्।
कृष्णसन्धिषु भूतेज्याः शुक्लेषु स्वस्तिवाचनम्॥ अश्वाध्यक्षप्रकरणे

'हस्त्यध्यक्षो हस्तिवनरक्षां दम्यकर्मक्षान्तानां हस्तिहस्तिनीकलभानां शालास्थान-शय्याकर्मविधायवसप्रमाणं कर्मस्वायोगं बन्धनोपकरणं सांग्रामिकमलंकारं चिकित्सकानी-कस्थोपस्थयुकवर्गं चानुतिष्ठेत्। हस्तिनां शिक्षणं भोजनादिकं च विशिष्टमेवासीत्। युद्ध-शिक्षया हस्तिनां योग्यता संवर्धिता। शिक्षिता हस्तिनः भित्ति-स्तम्भ-द्वार-तोरणादीनां भंजने दक्षा बभूवुः। भारतीयानां हस्तिशिक्षा विदेशेऽपि सम्मानिता।[2] अग्निपुराणे गज-चिकित्साश्वचिकित्साप्रकरणे स्तः। तत्र पशूनां रोगाणामुपचारविधिः वैज्ञानिकपद्धतिमनु-सृत्य पर्यालोचितः।

सुशिक्षिता अश्वाः स्वामिनो रक्षार्थं प्राणपणेन समुद्यता बभूवुः। तद्यथा राजतरंगिण्यां विजयमल्लस्य मन्त्रिणोऽश्वस्य गाथां कल्हणो वर्णयति—

---

१. गोऽध्यक्षप्रकरणात्।

२. The proficiency of the Indians in this art (management of elephants) early attracted the attention of Alexander's successors; and natives of India were so long exclusively employed in this service that the term Indian was applied to every elephant driver to whatever country he might belong. Wilson Theatre of the Hindus p. 92.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इलियनमहोदयस्य लेखानुसारं शिक्षिता हस्तिनः चन्द्रगुप्तस्याङ्गरक्षका नियुक्ताः।

सत्त्ववानकरोत् पत्न्या मज्जनं रिपुसंकटे ।
सिन्धुं प्रवृद्धामुत्तीर्यं तुरङ्गोऽपि तमन्वगात् ।। ७'९१०

महाराजप्रतापस्य चेतक इति ख्यातस्याश्वस्य जीवनवैशद्यं सुविदितमेव ।

धार्मिकनियोजनम्

वैदिकधर्मानुसारं पूषा पशुनां संरक्षको देवः । पशवस्तु धार्मिकविचारेण समृद्धिसूचका इति सम्मतम् । गवां नामकीर्तनं नामश्रवणं दानं दर्शनं च महाभारतानुसारं प्रशस्यम् । ततः पुरुषस्य कल्याणोत्पत्तिरभिमता । गावस्तु यज्ञस्य नेत्रं मुखं वा मताः । स्वर्गसोपानमेव गावः ।[1]

मनुना पशूनां कल्याणार्थं योजनाः कृताः । तदनुसारं तु—

नाभिनीतैर्व्रजेद् धुर्यैर्न च क्षुद्व्याधिपीडितैः ।
न भिन्नशृङ्गाक्षिखुरैर्न बालधिविरूपितैः ।। ४.६७

बलीवर्दानां प्रतोदनं दोषावहमिति कल्पितम्। गवां पृष्ठे आरुह्य यात्रा न कर्तव्या ।[2]

पूर्वजानां कल्याणार्थं पौराणिकयुगे वृषभोत्सर्जनं श्रेष्ठकर्म इति सम्प्रधारितम्। गोदानं तु पृथ्वीदानसमं प्रसिद्धम् । सवत्सगोदानेन ब्रह्मलोकः सुलभ इति धारणासीत् । गोदानं कुर्वतो जनस्य सेविका ब्रह्मलोके चन्द्रवदन्यः, स्वर्णवर्णा नितम्बिन्यः, तन्व्यो रमण्यश्च भवन्तीति धारणा । नीलवृषभोत्सर्गेण पितॄणां परितृप्तिर्भवति । ग्रामेषु मंगलवृषभस्य पूजा कृता । तस्य निधने ग्रामवासिनः शोकनिमग्ना अभवन् ।

राजनीतिकसंरक्षणम्

महाराजाशोकेन पशूनां हिंसा निषेधिता । तेन तेषां कृते चिकित्सालया निर्मापिताः । पशूनां छायार्थं राजमार्गमभितो वृक्षा आरोपिताश्च । यदि कोऽपि जनः सदोषमपि पशुमदण्डयत् स तावन्मात्रं दण्डं स्वयमेव भोक्तुं निर्णीतः । पशुचौराणां कृते घोरराजदण्डव्यवस्थासीत् ।

अर्थशास्त्रानुसारं पशूनां हानिकारिणः मृत्युदण्डमार्हन् । गवां दोहनेऽपि नियम आसीत् । तथा हि गोवत्सानां स्वल्पे वयसि गोदोहनं सकृदेव प्रतिदिनं कर्तव्यम् । राजकीयपशुविभागानामध्यक्षा नियुक्ता आसन् । हस्तिनां संवर्धनाय कृत्रिमवनानि रक्षितानि बभूवुः ।[3]

---

१. अनुशासनपर्वणि ५१.२६-३३ ।
२. मनुस्मृतौ ४.६७;७२ ।।
३. जनपदनिवेशप्रकरणात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गोवधः सर्वथा निषिद्धो बभूवार्थशास्त्रानुसारम् ।[१]
पशुपालनं वैश्येभ्यो जीविकार्थं एकाधिकाररूपेण नियोजितम् ।[२]

कतिपयनृपाः पशुप्रिया बभूवुः । कश्मीरराजः सुस्सलोऽश्वप्रिय आसीत् । राजानो राज्यश्च गोकुलानि निरमापयन् । महाराज्ञ्यो रत्नादेव्या गोकुलस्य वर्णनं कल्हणेन कृतम्–

गवामव्याहतस्वैरसञ्चारचरकाञ्चिते ।
तत्र वैतस्ततोयाढ्ये यदपोढामयं वपुः ॥ राज० ८.२४३७

व्यापारः

व्यापारस्यापरं नाम वाणिज्यमस्ति । व्यापारोऽयं प्राचीनयुगे वणिग्वृत्तीनां वैश्यानां प्राय एकाधिकारः प्रणीतः । उपभोग्यानां वैविध्यं सर्वेषु देशेषु कालेषु च व्यापारद्वारा प्रसिध्यति । क्षेत्रमस्य कुटुम्बादारभ्य ग्रामनगरप्रान्तदेशविदेशं यावत् निःसीममेव । लाभ-दृष्टया व्यापारस्य सर्वोत्कृष्टता सुविदितैव । कौटिल्यानुसारं शतप्रतिशतं लाभं व्यापारिणः कर्तुं शक्नुवन्ति ।

पण्यानि

प्रायशः सर्वोपभोग्यानि वस्तूनि तेषामुपादानानि च वाणिज्ययोग्यानि भवन्ति । अपरं च साधनरूपाण्यस्त्रशस्त्राणि वास्तूपकरणानि विभूषणार्हाणि मणिरत्नदन्तसुवर्णादीनि औषधादीनि व्यंजनानि च वाणिज्यवस्तूनि सन्ति । पशुपक्षिणां तेभ्यः प्राप्याणां चर्मोर्णानां च व्यापारः प्राचीनकालतः प्रचरति ।

खीष्टतः त्रिसहस्रवर्षं प्राग् दक्षिणभारतेभ्यः प्रेषितमर्णकाष्ठं काल्डियाप्रदेशस्थचन्द्र-मन्दिरे प्रयुक्तम् ।[३] प्रायः तस्मिन् युगे मिसरप्रदेशस्य शवानामावरणाय भारतीयवस्त्रं समीहितमासीत् । सिन्धुसभ्यताया निर्माणे बिलोचिस्थानाफगानिस्थान-पारसीकादिभ्यो देशेभ्यः प्राप्तानि धातुमणिस्वर्णरजतानि प्रायुज्यन्त । सिन्धुवासिनां कार्पासवस्त्राणां निर्यातं सुमेरप्रदेशेऽभवत् ।[४]

वैदिकसभ्यतायां कृषक - पशुपालक - कुम्भकारायस्कारस्वर्णकारमणिकारतन्तुवाय - चर्मम्न-तक्षक-रथकारादीनामुत्पादितानां वस्तूनां परस्परं व्यापारोऽभवत् । सोमविक्रेतारः सम्भवतः पर्वतप्रदेशेभ्य आगताः । दूर्शपवस्ताजिनानां व्यापारोऽथर्ववेदे निर्दशितः ।[५]

---

१. सूनाध्यक्षप्रकरणात् ।
२. मनुस्मृतौ ८.४१०,९.३२८ ।
3. Hibbert lectures 1877.
४. Piggott Prehistoric India p. 208.
५. अथर्ववेदे ४.७.६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिन्धुप्रदेशादश्वलवणादीनां निर्यातमभवत् । वैदिकयुगे भारतीयानां व्यापारोऽरबदेशवासिभिः सह बभूव । व्यापारेऽस्मिन् लोहवस्तूनां व्यञ्जनानां सुगन्धिद्रव्याणां रत्नादीनां च बाहुल्यमासीत् ।[१]

कश्मीरदेशे कलिंगगजाः सेनायां प्रयुक्ता आसन्निति तेषां व्यापारेण देश-विदेश-प्रचारं प्रकटयति । एतत्समुद्दिश्य कल्हणो वर्णयति—

पश्यद्भिर्जन्मवसुधां सेर्ष्याघोरणभर्त्सितैः ।
तन्मातङ्गैः कलिङ्गेभ्यः कथंचित् प्रस्थितं पथि ॥४.१४७॥

खीष्टवः सप्तशताब्दं प्राग् भारतदेशस्य कस्तीरं हस्तिदन्तश्च ग्रीसदेशे निर्यातं । भारतीयानां बीजवृक्षकाणां निर्यातमक्कडप्रदेशायाभूत् ।[२] पशूनामपि निर्यातमभवत् । तथा हि—'टालेमी फिलाडेल्फस' इति ख्याताय महाराजाय भारतीयकुक्कुर-गो-दारादीनां निर्यातं कृतम् । उष्ट्रादिभिर्भारहारैस्तदा भारतीयव्यंजनानि विदेशेषु प्रेषितानि । रमणीनामपि निर्यातं श्रूयते ग्रीसप्रदेशात् ।mm

खीष्टतः चतुःशताब्दं प्राक् भारतीयकौशेयानां पारसीकदेशे बहुमानोऽभवत् । कौशेयस्य तत्तुल्यस्वर्णं मूल्यमासीत् ।[3] भोगविलासे चितवस्तूनां रोमदेशेऽतिशयसमादरो बभूव । तदर्थं भारतेऽतुलितस्वर्णराशिः समागतः । तदधिकृत्य लिखितं प्लीनीमहोदयेन–There was no year in which India did not drain the Roman Empire of a hundred million sesterces (£ 10,00000)---so dearly do we pay for our luxury and our women.[४] अपरं च तस्य समर्थनम्–The annual drainage of gold from Rome was estimated at 500 steria, equal to abont Rs 4000,000.[५]

चीनप्रदेशस्य कौशेयं प्रथमं भारते आनीतं पश्चात् विदेशेषु प्रेषितम् ।[६] भारतीयमं-

---

१. अरब और भारत के सम्बन्ध पृ० ६१-६२ ।

२. Rawlinson–Intercourse Between India and the Western World p. 93-94

MM. It represents the fondness of the princes of India for the fascinating hetaerae of Greece and the readiness of Greek traders to make the high profits to be drained from shipping these youthful cargoes. Keith : Sanskrit-Drama p. 62.

३, India shipping p. 83 ।

४. Natural History.

५. Encyclopaedia Brittanica pt XI p. 460

६. Warmington : Commerce Between the Roman Empire and India p. 176, 212; Periplus p. 172

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शुकं 'मलमल' इति ख्यातं अफ्रीकादेशेऽरबे सकोत्रायां च प्रेषितम् ।[१] सर्वेषु देशेषु भारतीयकलाकृतीनां समादरो बभूव ।

उपर्युक्तवस्तूनां वैदेशिकव्यापारः प्रायशः खीष्टस्य सप्तशताब्दपर्यन्तं भारतीयवणिग्भिः कृतः । पश्चादरबदेशवासिनो भारतीयवस्तूनां पश्चिमदेशेषु निर्यातं कुर्वन्ति स्म ।[२] कतिपयव्यापारवस्तूनां भारतीयनाम्नामरबपर्याया दर्शनीया एव--

संस्कृतम्	अरबभाषायाम्	संस्कृतम्	अरबभाषायाम्
एला	हेल	कनकफल	करनफल
कर्पूर	कांपू	मूषक	मश्क
चन्दन	सन्दल	जातिफल	जायफल
ताम्बूल	ताम्बोल	त्रिफला	इत्रीफल
नीलोत्पल	नीलोफेर	पिप्पली	फिलफिल
भिल्लातक	बलादर	विभीतक	बलीलह
हरीतकी	हलीलज	गोपदल	फोफल

अरबदेशवासिनस्तु भारतीयवस्तूनि चीनप्रदेशे प्रेषितवन्तः ।

विदेशेभ्यो भारते बहूनि वस्तून्यपि वैदेशिकव्यापारिभिरानीतानि । मिसरप्रदेशात् हीरकाङ्गुलीयकानि सुरा च पारसीकदेशात् जपापुष्पजलं बसराप्रदेशात् खर्जूरमरबदेशादश्वश्च भारते आनीय विक्रीतानि ।[३]

व्यापारसाधनानि

व्यापारास्तु प्राचीनयुगे स्थलमार्गैर्जलमार्गैश्चाभवत् । स्थलमार्गेषु पण्यवहनं पशुभिः कृतम् । जलमार्गे नौकायानमुपयोजितमासीत् ।

सुदूरप्राचीनकालतो नगरेषु गमनागमनरीत्या प्रशस्तमार्गा निर्मिता इति निःसन्देहं प्रतिभाति । सिन्धुसभ्यताया व्यापारिकसम्बन्धा देशेषु विदेशेषु चाभवन् । व्यापारयोग्या मार्गास्तदा बभूवुः । तेषु मार्गेषु व्यापारिणामवस्थानायाश्रया निर्मिताः । पण्यानां वहनाय गर्दभा बलीवर्दशकटिका उष्ट्राश्चोपयोजिताः ।[४] तदा नगरेषु विस्तृतराजमार्गा आसन् ।

वैदिकयुगे 'अनस्' इति ख्याता बलीवर्दशकटा बभूवुः । उष्ट्रा गर्दभाश्च भारहाराः बभूवुः । प्रपथ-महापथ-पथ-वर्त्मादीनि शकटानां पशूनां च गमनागमनायाभिप्रेतानि ।

महाभारतयुगे महासार्थो हस्त्यश्वरथोष्ट्रसंकुलोऽभवत् । सार्थवाहस्तु नेताऽभवत् ।[५]

---

१. The Periplus p. 42, 72, 73, 179–180
२. अरब और भारत के सम्बन्ध ।
३. अरब और भारत के सम्बन्ध पृ० ६७–६८ ।
४. Piggott, Prehistoric India p. 174–177
५. वनपर्वणि ५१ २०८; ८२.९ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बौद्धसाहित्यानुसारं श्रावस्तीनगराद्राजगृहप्रतिष्ठानं यावत् वाराणसीपुरत: उज्जयिनीं यावत् विदेहाद् गन्धारं यावत् च स्थलमार्गे: सार्थानां गमनागमनं बभूव।[1] सार्थानां बलीवर्दशकटानां संख्या सहस्रं यावद् बभूव। मरुप्रान्तरेषु यात्रार्थं सार्थो जलकाष्ठभोजनादीनि पाथेयानि संगृहीतवान्। रात्रावेव यात्राभूत्। स्थलनियामका: तत्र मार्गनिर्देशका बभूवु:। दिशाज्ञानं तारादर्शनेनाभूत्। राजभि: स्थलपथकर्मिका: व्यापारमार्गाणां पर्यवेक्षणाय नियुक्ता:। ते विविधदिग्भ्य आगतपण्यानि पूर्वत एव जानन्ति स्म।[2] वनरक्षका: सार्थेभ्य: शुल्कं गृहीत्वा तेषां वनमध्ये सुरक्षितां यात्रामकारयन्। वनरक्षकाणां सेनायां पंचशतं यावत् पुरुषा बभूवु:। सार्वारणव्यापारिण: पृष्ठे नीत्वा ग्रामाद् ग्रामं विचरन्त: पण्यं कुर्वन्ति स्म। तेषु कतिपया: हीरकमौक्तिकादीनि पण्यानि विक्रीणते स्म।[3]

व्यापारसार्थेभ्यो राजानो बहुविधानुपहारान् प्राप्तवन्त:। ते पण्यानि करमुक्तानि कुर्वन्ति स्म सार्थेभ्यश्चावासाय सुप्रबन्धं संविदधति स्म।[4]

अर्थशास्त्रानुसारं व्यापारद्वारा दक्षिणापथेभ्य: स्वर्णशंखहीरकरत्नमुक्तादीनां प्राप्ति: सम्भवासीत्। तस्मिन् व्यापारे लाभस्य मात्रात्यधिकासीत्, किन्तु व्यापारमार्गो दुर्गमोऽभूत्। व्यापारमार्गा बहुविधा बभूवु:। तथा हि—चक्रपथ:, पादपथ:, खरोष्ट्रपथ:, अंसपथश्च। वारिस्थलपथयोर्वारिपथ: श्रेयानिति निर्दिष्टम्।[5]

मौर्ययुगे पन्थानो दीर्घा बभूवु:। भारतस्य प्राय: सर्वे प्रदेशा: राजमार्गैरनुस्यूता बभूवु:। प्रधानराजमार्गा अधोलिखिता आसन्—

पाटलिपुत्रात्[6]	वाराणसी	१७ योजनानि
वाराणसीत:	कौशाम्बी	१३ योजनानि
कौशाम्बीत:	भारहुतम्	१० योजनानि
भारहुतात्	विदिशा	२३ योजनानि
विदिशात:	उज्जयिनी	१५ योजनानि
उज्जयिनीत:	भरुकच्छम्	२५ योजनानि
उज्जयिनीत:	हैदराबादम् (सिन्धप्रदेशे)	६३ योजनानि

अस्मिन्युगे एको राजमार्ग: पाटलिपुत्र-मथुरा-सिन्धुप्रदेशेभ्य: गान्धारवैक्ट्रियानापर्यन्तं प्रसृत:। भारतीयसीमातो बहि: पश्चिमोत्तरप्रदेशेभ्य: चीनदेशे गमनाय पन्थानोऽभवन्।

१. चुल्लवग्गे ६४; गुत्तिलजातके २४३ गन्धारजातके च।
२. वण्णुपथजातके २ चुल्लसेट्ठिजातके ४।
३. सेरिवाणिजजातके ३।
४. पायाधम्मकहाओ परिच्छेद: ३।
५. अर्थशास्त्रे कर्मसन्धिप्रकरणे।
६. पाटलिपुत्रादेको राजमार्ग: वैशाली-स्रावस्ती-नेपाल-पर्यन्तं प्रसृत:।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पूर्वभारतप्रदेशेभ्यो हिन्दचीनं ततश्चीनप्रदेशं गन्तुं मार्गा बभूवुः। परवर्तियुगे आन्ध्रप्रदेशस्य केन्द्रभागो वेङ्गीप्रान्तः उत्तरकोसल-कलिङ्ग-महाराष्ट्र-कर्णाटक-द्रविडप्रदेशैस्तत्कालीनराजमार्गैः सुसम्बद्धः। गुप्तयुगस्य मार्गव्यवस्थाया वर्णनं कालिदासेन कृतम्। तथा हि रघुवंशे—

दापीष्विव स्रवन्तीषु वनेषूपवनेष्विव।
सार्थाः स्वैरं स्वकीयेषु चेरुर्वेश्मस्विवाद्रिषु ॥१७.६४

भारितमानि वस्तूनि हस्तिभिर्दूरतरं नीयन्ते स्म। मगधेभ्यो मूर्तयः कश्मीरान् हस्तिपृष्ठ उद्गूढा इति कल्हणो निर्दिशति—

गजस्कन्धेऽविरोप्यैतन्मागधेभ्यो यदाहृतम्।
दत्त्वा सुगतबिम्बं तज्जनोऽयकनुगृह्यताम् ॥ ४.२५९

ते साहसिका महाजनाः प्रातःस्मरणीयाः सन्ति ये प्रागैतिहासिकयुगेषु लघुनौकास्वपि समुद्रस्योत्तालतरङ्गाणामुपरि द्वीपाद् द्वीपं ययुः। तेषां नदीषु गमनागमनयोर्जलयानानि सम्भावितव्यान्येव।

सिन्धुसभ्यतायुगे हड़प्पामोहेंजोदड़ोनगरवासिनः पारस्परिकसम्बन्धं जलयानसंचारेण दृढीकृतवन्तः। ते नौकासंचारणे निष्णाता आसन्।[1] वैदिकार्याणां नावः शतारित्रा अपि बभूवुः।[2] नौव्यापारस्य परिचय ऋग्वेदेन प्राप्यते। तथा हि—

तं गर्तयो नेमन्निषः वपीणसः समुद्रं न संचरणे सनिष्यव ॥ १.५६.२
उवासोषा उच्छाच्च नु देवी जीरारथानाम्।
ते अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यः ॥ १.४८.३
वेदा यो वीनां पदमन्तरिक्षेण पनताम् वेद नावः समुद्रियः ॥ १.२५.७
आ देयो ददे बुध्न्या ३ नसूनि वैश्बाचर उदिता सूर्यस्य।
आ समुद्रादवारादा परस्मादाग्निर्ददे दिब आ पृथिव्या ॥ ७.६.७

बौद्धयुगस्य जलयात्राणां वर्णनं त्रिपिटकसाहित्ये भूरि विद्यते। जलयात्रा सततं षाण्मासिकी अपि बभूव। दिशाकाकानुपयुज्य तत्र दिशा ज्ञायन्ते स्म। द्वीपद्वीपान्तरेषु नाविकानां प्रगमनं सुविदितम्। नदीश्रितनौभिः नागरिकेभ्यः पण्यानि नीतानि। नदीतटेषु पत्तने नौस्थानं नियतमासीत्। पत्तनानां पर्यवेक्षणाय जलपथकर्मिका नियुक्ता आसन्। वृहत्तरा नावस्तैः समयोजिताः। कासांचिन्नावा दोर्घत्वमष्टशतहस्तायाममभूत्।[3] एकस्यां

१. सिन्धुसभ्यतावासिनां समुद्रयात्रया सुमेर- एलमादिदेशैः सम्बन्धः स्थापितः इति मैकेमहोदयस्य मतम्।

2. It is not easy tc refuse to recognise here the existence of large vessels with many oars voyage. Vedic Index नौ।

३. संजातके।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भावि सहस्रतक्षका यात्रां कर्तुं शक्नुवन्ति स्म ।[1]

ख्रीष्टतः प्राक् प्रथमशताब्दे मिसरभारतयोः साक्षात्सम्बन्धो व्यापारद्वारा समपद्यत । ख्रीष्टतः प्राक् २५ वर्षे १२० नावो मिसरदेशस्य रक्तसागरीयनौकाश्रयात् प्रतिष्ठन्ते स्म ।[2] कतिपयग्रीकव्यापारिणो नौभिर्दक्षिणभारतस्य समुद्रतटं पर्यटन्तो गंगासागरसङ्गमं यावदाजग्मुः । हिप्पालस इति ख्यातेन नाविकेन 'मानसून'–वायुवेगस्य साह्यं प्राप्य समग्रारबसागरः सरलमार्गेण पारितः । अभिनवोऽयं मार्ग आसीत् ।[3]

नावां सुरक्षार्थं कुशलधनुर्धरा नियुक्ताः। परवर्तियुगे शतघ्नीगोलादिभिराक्रमणकारिणां प्रत्याघातः कृतः । अस्मिन्युगे भारतस्य कावेरीपत्तने ग्रीसतः चीनं यावत् सर्वेषां देशानां नावः समागताः । भारतीयनाविका अपि तेषु सर्वेषु देशेषु गतवन्तः ।[4]

गुप्तयुगस्य नावां प्रतिकृतयोऽजन्तागुहाचित्रणे बोरोबुदुरमूर्तिषु च प्राप्यन्ते । विशालास्ता बभूवुरिति प्रत्यक्षमेव । अस्मिन्युगे गंगासागरसंगमात् आसिन्धुसंगमं प्रायशः विंशतिर्नौकाश्रया बभूवुः । चीनदेशगामिनीनां नावां विशालता प्रमाणितैव वर्तते, यतस्तासु सहस्रजना जलयानचारणाधिकारिणो बभूवुः । तासु चतुःशतधनुर्धरा बभूवुः । लघुनावः दुर्घटनाकाले रक्षणार्थं सम्बद्धा असन् । ख्रीष्टतः पश्चात् सप्तमशतकात् प्रभृति भारतीयसामुद्रिकव्यापारोऽरबदेशवासिनां हस्ते गतः । भारतीयपण्यानामापणाः पारसीकसमुद्रबङ्के 'उबलासैराफकैश' पत्तनानि, ईराकप्रदेशे बरसापत्तनं च बभूवुः । भारतीयवस्तूनि रक्तसागरं यावन्नौभिर्नीतानि ।[5]

नौभिर्नदीनामुपरि सेतुनिर्माणस्य प्रचलनं कल्हणेन वर्णितम्—

वितस्तायां स भूपालो बृहत्सेतुमकारयत् ।
ख्याता ततः प्रभृत्येव तादृङ् नौसेतुकल्पना ॥ ३·३५४

एकादशशतके भोजराजेन रचिते युक्तकल्पतरुग्रन्थे तदानीन्तननौनिर्माणविज्ञानस्य परिचयः प्राप्यते । तदनुसारं दीर्घा उन्नताश्च विविधा नावः । दीर्घाणां दशभेदाः—

---

१. समुद्दवाणिजे जातके । रालिंसन महोदय इदमधिकृत्य लिखति—Evidently from early days the Indian sea men built ships larger than those usually employed even at a much later date in the mediterranean. Intercourse Between India and the Western World p. 4.

२. Straieo II C. 118 ।

३. स्काफ पेरिप्लसे ।

४. Dr. W. Vincent: The Commerce and Navigation of the Ancient Book IV p. 475. Cambridge History of India vol I P. 214–213; मिलिन्दपन्हो ।

५. अरब और भारत के सम्बन्ध पृ० ३८–३९, ४२–४६, ४७, ७२ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दीर्घिका, तरणी, लोला, गत्वरा, गामिनी, तरी, जंघाला प्लाविनी, धारिणी वेगिनी च। उन्नतानां पंचभेदाः-ऊर्ध्वा, अनूर्ध्वा, सुवर्णमुखी, गर्भिणी, मन्थरा च । सर्वाश्च ताः समुद्रतरणाय बभूवुः । नदीषु तरणाय क्षुद्रा भीमा मध्यमा च नावो बभूवुः । नावामलङ्करणं स्वर्णरजतताम्रमयमासीत् । महानौका १८४ × २४ × १८ घनहस्तायामासीत् ।m

मुद्रा

पुरा प्रायः सदैव व्यापारस्य संवर्धनाय रत्नादीनि मुद्रारूपेण स्वीकृतानि। वैदिकयुगे स्वर्णमुद्रा निष्ककृष्णलशतमानादयो बभूवुः ।[१] गावोऽपि मुद्रावत् प्रयुक्ताः । अन्येऽपि धातुखण्डाः मुद्रा बभूवुः । निष्कादीनामलङ्कारवदुपयोगोऽपि बभूव। बौद्धसाहित्ये निष्क-सुवर्ण-हिरण्य-धरण-कार्षापण-रूपि-कंस-पादमाषक-काकणिकादीदयः मुद्रा आसन् ।[२] आहतमुद्रा रूपीति ख्याता ।[3] काकणिका स्वल्पतमा मुद्रासीत् । मुद्राणां धातुपरिमाणं मनुना निर्दिष्टम् ।[४] भारतस्य विविधप्रदेशेषु बहुविधा मुद्राः प्रवर्तिताः ।[५]

प्राचीनभारते वैदेशिकमुद्राणां प्रचलनमपि बभूव । अधुनापि ग्रीसपारसीकानां शासकानां बहवो मुद्राः प्राप्यन्ते। परवर्तियुगे कुशनराजानां सुसंस्कृतमुद्राः प्रचलिता आसन् ।

गुप्तवंशीयानां राज्ञां बहुविधा मुद्रा बभूवुः। तासु मुद्रासु राज्ञामुपाधयः पराक्रमद्योतका वर्तन्ते । राज्ञां पराक्रमाणां द्योतनमभिरुचीनां च प्रदर्शनं तेषां प्रतिकृतिमुद्राभिः कृतम् । तथा हि—गरुडध्वज-धनुर्धर-वीणावादकाश्वमेधपरायणरूपाणि दर्शितानि, उपाधयश्च तत्र वर्तन्ते—पराक्रमः, अप्रतिरथः, कृतान्तपरशुः, सर्वराजोच्छेत्ता, व्याघ्रपराक्रमः, अश्वमेधपराक्रमः, श्रीविक्रमः, विक्रमादित्यः, रूपकृती, सिंहविक्रमः, नरेन्द्रचन्द्रः नरेन्द्रसिंहः, सिंहचन्द्रः, अजितविक्रमः, परमभागवतः, विक्रमाङ्कः। चन्द्रगुप्तस्य मुद्राः स्वर्णरजतताम्राणामेव प्राप्यन्ते। महाराजहर्षस्य मुद्राः पूर्ववत् निर्मिताः ।

कतिपयमुद्राः व्यापारिभिः, तेषां संघैश्च प्रचारिता आसन् ।

M. In the 13th century Marcopolo saw Indian ships carrying ten small boats, slung on the sides with falls and tackle. The boats could be lowered into the water or hauled over the sides. These vessels had 60 cabins below the main deck, many were four or five masts and had an equal number cf sails.

१. इमा मुद्राः प्रायः परस्परं शतगुणा दशगुणा वा बभूवुः ।

२. अष्टाध्यायीग्रन्थे पाणिनिना कंसशतमानकार्षापणपणपादमाषत्रिष्कादीना मुद्राणामुल्लेखः कृतः ।

३. रूप्यकं रूप्यं रूपको वा पर्यायः। आहतं रूपमस्यास्तीति रूप्यम् ।

४. मनुस्मृतौ ८ १३१-१३७ ।

५. Life in Ancient India p. 120 ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिगणनमानोन्मानम्

परिगणनमानोन्मानस्य समारम्भः संस्कृतेः समारम्भादेव सम्भाव्यते। सिन्धुसभ्यता-युगीनानां नागरिकाणामुन्मानेषु १, २, ८/३, ४, १६, ३२, ६४, १६०, २००, ३२०, ६४० इति गुणनविन्यास इव दृश्यते। सर्वेषां मानयोगो दृढः प्रतिभाति।

हस्तः प्रमाणितो मापदण्डो गृहीतः। १३.२ इंचसमो मापदण्डोऽवर्तत। हस्तायामः २०.६२ 'इंच' इति सम्मितः।

वैदिकयुगे तुलाप्रयोगेण पात्रप्रयोगेण च मानं नियतम्। कृष्णलः (गुंजाबीजं) लघुतमो मानभारोऽभवत्। माषश्चतुःकृष्णलसमोऽभवत्।[१] परवर्तियुगे विविधप्रकाराणां मानभाराणां प्रचलनमभवत्। प्रतिमाना लोहस्य प्रस्तरस्य वा निर्मिताः। अर्थशास्त्रानु-सारं प्रतिमानविन्यासोऽत्रो दीयते—

१० माषाः (५ गुंजाबीजानि)	= सुवर्णमाषः
१६ सुवर्णमाषाः	= १ सुवर्णः वा कर्षः
४ कर्षाः	= १ पलम्

अपराण्यपि प्रतिमानानि बभूवुः।

तुलाया दण्डस्यायामो बहुविध आसीत्। तस्या द्वयोः पर्यन्तभागयोः पात्रमव-लम्बितम्। तुलाया वैविध्यं तोलनीयद्रव्यानुकूलं कृतमासीत्।

अर्थशास्त्रानुसारं मापदण्डा अधोलिखितविधा बभूवुः—

८ यवाः	= १ अंगुलम्
८ अंगुलानि	= १ धनुर्ग्रहः
२ धनुर्ग्रहौ	= १ धनुर्मुष्टिः
३ धनुर्ग्रहाः	= १ वितस्तिः छाया पुरुषः वा
२ वितस्ती	= १ अरत्निः प्राजापत्यहस्तः वा
४ अरत्नयः	= १ दण्डः

गुप्तयुगस्य मानोन्मानादीनां परिचयोऽमरकोशात् प्राप्यते। तथा हि

यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम्।
मानं तुलाङ्गुलिप्रस्थैः गुंजाः पंचाद्यमाषकः॥
ते षोडशाक्षः कर्षोऽस्त्री पलं कर्षचतुष्टयम्।
सुवर्णविस्तौ हेम्नोऽक्षे कुरुविस्तस्तु तत्पले॥
तुला स्त्रियां पलशतं भारः स्याद्विंशतिस्तुला।
आचितो दशभाराः स्युः शाकटो भार आचितः॥

---

१. वाजसनेयिसंहितायां ३०.१७; तैत्तिरीयसंहितायां २.३,२,१।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्त्रियामाढकद्रोणौ खारी॰ वाहो निकुंचकः ।
कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ॥

राजकीयसंरक्षणम्

व्यापारस्य प्रगतिः सर्वप्रथमं राज्ञो भर इति निश्चप्रचम् । तद्यथाथर्ववेदे आर्याणां सम्राज इन्द्रस्य स्तुतिः—

इन्द्रमहं वणिजं चोदयामि स न ऐतु पुर एता नो अस्तु ।
नुदन्नरातिं परिपन्थिनं मृगं स ईशानो धनदा अस्तु मह्यम् ॥ ३.१५.१

महाभारतानुसारं राजा सर्वोच्चव्यापाराधिकृतः प्रतिभाति । तथा हि शान्तिपर्वणि—

अजस्रमुपयोक्तव्यं फलं गोमिषु भारत । प्रभावयन्ति राष्ट्रं च व्यवहारं कृषिं तथा ॥
सर्वत्र क्षेमचरणं सुलभं नाम गोमिषु । न ह्यतः सदृशं किंचिद् वरमस्ति युधिष्ठिर ॥

अर्थशास्त्रानुसारं व्यापारस्याभ्युदयाय सर्वा व्यवस्था राज्ञा कृताः, तेन पण्यपत्तनं प्रतिष्ठापितं व्यापारमार्गाणां नवीकरणं विधापितं च । राजा मानोन्मानादीनां सत्यव्यवहारार्थं सचेष्टोऽभवत् । राज्ञा नियुक्तः पौतवाध्यक्षः तुलाप्रतिमानमापदण्डानां निर्माणमकारयत् ।

राज्ञा नियुक्तः पण्याध्यक्षः प्रजानां लाभाय विक्रेयाणामुचितं मूल्यं निर्धारितवान् । वैदेशिकव्यापारिणां लाभार्थमपि पौतवाध्यक्षः सचिन्तो बभूव । शुल्काध्यक्षो राज्ञा नियुक्तो वैदेशिकव्यापारिणामितिवृत्तं संगृहीतवान् । अन्तपालाः स्वसीम्नि विनष्टानां पण्यानामन्वेषणमकारयन् । नौकाध्यक्षो जलमार्गैः प्रवर्तितस्य व्यापारस्य सुरक्षायै प्रयत्नमकरोत् । स नौकाश्रये शान्तिस्थापनाय कृतप्रयत्नो बभूव । विवीताध्यक्षो निर्जनप्रदेशानां भयकारणानि—चौरहिंसकपशुशत्रुबाधादीनि दूरीकृतवान्, जलरहितस्थानेषु सेतुबन्धकूपव्यवस्थामकरोच्च । स व्यापारिणां सार्थं रक्षितवान् । समाहर्त्रा नियुक्ता गुप्तचरा व्यापारिणां शौचाशौचयोः सूचनां ददति स्म ।

आपणस्य विक्रयप्रक्रियायाः नियमाः प्रणीता आसन् । अनार्जवस्य कपटस्य वावकाशः स्वल्पतमोऽपि नासीत् । अशुद्धवस्तूनां कपटाचरणा विक्रेतारो दण्डनीया बभूवुः । संस्थाध्यक्षः पण्यपत्तने मानोन्मानमापादीनां परिशुद्धये प्रायतत । यदि वैदेशिकवस्तूनामायातं स्वदेशीवस्तूनां प्रचारे बाधकं बभूव, तर्हि राजपण्यानां देशान्तराहरणं निषेधितवान् ।[1]

अन्नानां राशीकरणाय कतिपयव्यापारिणो नियुक्ता आसन् । अन्नमूल्यं प्रजालाभं विचिन्त्य निर्णीतम् । खीष्टतः १०७७ वर्षं पश्चाद् भारतीयनरेशेन कुलोत्तुङ्गेन व्यापा-

---

१. स्वपण्योपघातीनि वा परपण्यानि निवर्तयिष्यामि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रिकाभ्युदयार्थं चीनदेशे प्रतिनिधयः प्रेषिताः। काकातीयवंशी राजा गणपतिदेवः सामुद्रिकचौराणां समूलविनाशं कृत्वा चीनजंजीवारादिदेशैः सह व्यापारं समवर्धयत्।

व्यापारिणां प्रजापीडनं प्रायः सदैव लोकविदितमभूत्। सोमदेवेन सुष्ठु पर्यालोचितं यत्—

मानेन किंचित् मूल्येन किंचित् तुलयाऽपि किंचित् कलयापि किंचित्।
किंचिच्च किंचिच्च प्रहीतुकामाः प्रत्यक्षचौरा वणिजो नराणाम्॥

धार्मिकनियोजनम्

व्यापारे सिद्धिर्दैवायत्ता हि भवतीति लोकधारणा। देवानां साहाय्येन व्यापारे लाभं ग्रहीतुकामा व्यापारिणस्तेषामुपासनां कुर्वन्ति स्म। अवश्यमेव तेषां देवानां चरितैर्व्यापारिणः प्रभाविता बभूवुः। व्यापारिणां चरित्रप्रतिष्ठायै वसिष्ठेन नियमः कृतः—ब्रह्महाऽपि न तावान् पापभाक् यावानल्पमूल्यस्य वस्तुनोऽधिकमूल्यग्राही वणिग् भवति। व्यापारकार्यं वैश्यानामेकाधिकारः साधारणतो बभूव। सर्वासु धार्मिकसंस्कृतिषु व्यापारिणामार्जवं प्रशंसार्हमेव। तथापि तेषां कौटिल्यं विगर्हणीयं प्रायश्चित्तार्हं वा निन्दितमेव। पण्यसिद्धिरितिधार्मिकविधानेन पण्यस्य कस्यचिदंशस्य हवनेन व्यापारे लाभस्य सम्भावनाभवत् पण्याजीवानाम्।m

व्यापारिणां साहसम्

व्यापारिणां समक्षं बहुविधानि संकटानि बभूवुः। स्थलमार्गेषु हिंस्रजन्तुभ्यो भयमवर्तत। वनमार्गेषु कदाचित् रात्रौ वनगजानामाक्रमणेन समग्रसार्थः पण्यानि च तस्य विनष्टानि।[1] मरुप्रान्तरेषु भ्रान्तानां सार्थानां दुर्गतिरभवत्। कदाचित् जलविरहितानां तेषां कूपखननेनापि जलप्राप्तिर्यदि नाभवत् तर्हि पिपासितास्ते मृताः।[2]

समुद्रगामिनां वणिजां संकटान्यधिकतराणि बभूवुः। मार्गे यदि तेषां नावः क्वचिदवरुद्धास्तर्हि तत्कारणं कोऽप्यशोभनीयो जनो भवेदिति शलाकाद्वारा निर्णीय तं समुद्रे प्राक्षिपन्। अपरं च जलजन्तूनां प्रत्याक्रमणं स्थलोत्सोदनभयं जलान्तर्हितपर्वतैः प्रत्याघातः प्रभञ्जनश्च विनाशाय बभूवुः। दुर्वृत्तानां राज्ञां तेषां कर्मचारिणां च भयं नाल्पमासीत्।[3]

स्थलमार्गेषु सर्वापहारिणां प्रवंचकानां च भयमासीत्। वनेषु कदाचित् दावाग्निग्रपरिवृतः सार्थः दग्धः। वंशवनं यदि समक्षमापतितं तर्हि प्रत्यावर्तनमावश्यकमभवत्।

M. हिरण्यकेशी गृ० सू० १.१५.१।
१. वनपर्वणि महाभारते ६२.१२२।
२. वण्णुपथजातके।
३. दिव्यावदाने धर्मरुच्यवदानाध्यायात्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्र कदाचित् वन्यानां म्लेच्छादीनामाक्रमणभयमासीत् । विषवृक्षाणां सम्पर्केण क्वचित् पीडनमभवत् ।[1]

वणिजां वर्चस्विता

व्यापारिणामदम्योत्साहः कर्मण्यता बुद्धिकौशलं साहसं प्राणभये जातेऽपि निर्भीकत्वं विघ्ने जातेऽपि कार्याभिनिवेशश्च महान्तो गुणा आसन् ।

इन्द्रो वणिगिति वैदिकधारणा । वणिगिन्द्रगुणैः समन्वितो भवत्विति तत्र मान्यता प्रतीयते । इन्द्रवत्पराक्रमिणो व्यापारे योग्या सन्तीति प्रमाणमासीत् । व्यापारिणां धार्मिकाभिरुचिः प्रशस्ता ।

व्यापारिणस्तु सर्वासु स्थितिषु कालानुवर्तिनो यथाकालव्यवहारिणो वा बभूवुः । अपरिचितदेशेषु ते केवलं बुद्धिकौशलेन स्वकार्येषु सफलतां लभन्ते स्म । व्यापारिणां योग्यतां प्रतिपादयन् मनुर्लिखति—

सारासारं च भाण्डानां देशानां च गुणागुणान् ।
लाभालाभं च पण्यानां पशूनां परिवर्धनम् ॥
भृत्यानां च भृतिं विद्यात् भाषाश्च विविधा नृणाम् ।
द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च ॥ ३.३३१-३२

साहसरसिकत्वेन जीवन-पारावारे संशयितप्राणा अपि महोत्साहशालिन इमे वणिजो राष्ट्रियसमृद्धिसंवर्धकाः सर्वथा प्रशस्याः ।

प्रकीर्णव्यवसायाः

उपभोग्यानामाधिक्येन प्रतिभाति यत् पुरा कृषिपशुपालनादीनि विहायासंख्यविधा व्यवसायास्तत्रासन् यानाश्रित्य नागरिकाणां जीवनावश्यकताः सम्पूरिता बभूवुः । तद्यथा भोजन-पेय-वस्त्र-प्रसाधन-द्रव्य-गृहास्त्र-शस्त्रादीनामुपकल्पनं संगीतनृत्यादीनां मनोरंजनोपायानां सम्पादनं रत्न-धातु-काष्ठ-पुष्प-फलौषधीनां प्रकृतस्वरूपे संग्रहणं च बहुसंख्यकानां जनानामुद्योगा बभूवुः । अपरं च ब्राह्मणानां याजनं क्षत्रियाणां प्रजापालनं युद्धं वा शूद्राणां शिल्पं दासकर्म वा प्रमुखा प्रवृत्तयो बभूवुः ।

सिन्धुसभ्यतायुगे वस्त्ररचनोद्योग उपाचीयत । तत्रत्यबालकानां मनोरंजनार्थं बहुविधाः क्रीडनका निर्मिताः । शकटरचना तस्मिन्युगे विशिष्टव्यवसाय एवासीत् । नगरभवनानां निर्माणेऽसंख्या इष्टकानिर्मातारः स्थपतयः तक्षकादयो नियुक्ताः । गृहकार्यार्थं भाजनानां

१. Life in Ancient India p. 116.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यनासनानां च निर्माणे बहुजनाः व्यापृता आसन्। अस्त्रशस्त्रकारिणां संख्या बहुला प्रतिभाति। अवश्यमेव सहस्रसंख्यका अलङ्कारप्रसाधनादीनां रचयितारस्तत्र बभूवुः। चित्रकारा मूर्तिकाराश्च सर्वत्रालङ्कारप्रसाधकाश्चासन्।

सिन्धुसभ्यतायुगे भारतस्य विविधभागेषु खनिजपदार्था भूयः संगृहीताः। दक्षिण-भारते, सौराष्ट्रे, राजस्थाने च खनिजव्यवसायः प्राधान्येनासीत्।[1] हिमालयाञ्चले वन-वृक्षच्छेदकानां काष्ठिकानां व्यवसायः प्राचीयत। आखेटकाः वनेषु बहुविधानि पथ्यानि नागरिकाणामुपयोगाय वन्यपशून् निहत्यालभन्त।

वैदिकयुगे प्रकीर्णव्यवसायाः—काष्ठकर्म वस्त्रनिर्माणं धातुकर्म मृत्तिकाभाजनरचना चर्मकर्म च बभूवुः। बहवो वनवासिनोऽर्धसभ्याश्च मृगयायां मत्स्यग्रहणे वा नियुक्ता बभूवुः। अपरं च धातुभिरस्त्रशस्त्रादीनामलङ्काराणां च निर्मातारो बहुसंख्यका आसन्। भूगर्भस्य धातून् ध्माता पर्यशोधयत्। वाजसनेयिसंहितायां व्यावसायिकानां सूची वर्तते—रथकारः, तक्षा, कुलालः, कर्मारः, मणिकारः, इषुकारः, धनुष्कारः, ज्याकारः, रज्जुसर्जः, मृगयुः, श्वनी, भिषक्, सुराकारः, दार्वाहारः, चर्मसन्धाता, चर्मम्नः, धीवरः शौष्कलः, कैवर्तः, गणक इत्यादयः पुरुषा एव। स्त्रीषु विदलकारी, कण्टकीकारी, पेशस्कारी, रज-यित्री, वासःपल्पूली, आंजनीकारी, कोशकारी च बभूवुः।[1] मनोरंजनयोगे व्यापृतास्तु नृत्तगीताभिनय-द्यूत-वीणावादन-तूणववादन-शंखवादनादिषु विशारदा बभूवुः।[2] मौक्तिक-संग्रहणेऽपि कतिपयजनास्तत्पराः आसन्।[3] याजकानां पुरोहितादीनां व्यवसायस्तु सुप्रति-ष्ठितो बभूव।

परवर्तियुगेऽपि व्यवसायानां प्रवृत्तिः प्रायः पूर्ववदासीत्।[4] अभिनवव्यवसायानां प्रच-लनं संस्कृतिसाह्येन सदैवाभूत्। सर्वेषु युगेषु श्रेष्ठनागरिका राजकर्मणि नियुक्ता बभूवुः। भारतीयशिल्पकलादीनां प्रख्यातिर्देशदेशान्तरं प्रसृता। तासामादर्शा विदेशेषु संगृहीताः। चित्रमूर्ति-वास्तु-शिल्पानां पुनरुत्थानं ख्रीष्टाब्दस्य प्रारम्भिकयुगाद्विशेषरूपेणाभवत्। अमर-कोशे तदानीन्तनशिल्पिकादीनां सूची वर्तते—

---

१. तद्यथा सुवर्णसंग्रहः सौन्दरनन्दे—सुवर्णहेतोरपि पांसुधावको विहाय पांसून् बृहतो यथादितः। जहाति सूक्ष्मानपि तद्विशुद्धये विशोध्य हेमावयवान्नियच्छति॥ १५.६६

१. वा० स० ३०।

२. वा० सं० ३०.६,३९, २०।

३. ऋग्वेदे १.३५.४।

४. उदाहरणार्थं महाभारते सभापर्वणि ५१.२६-१७,३२-३६; ५२ ५,६,६, १२, ३५, ३६;६२.५ रामायणेऽयोध्याकाण्डे ८३.१२,१५; अर्थशास्त्रे रत्नपरीक्षाप्रकरणमाकराध्यक्षप्रकरणं सुवर्णाध्यक्ष-प्रकरणं सूत्राध्यक्षप्रकरणं कोष्ठागाराध्यक्षप्रकरणं सुराध्यक्षप्रकरणं कुप्याध्यक्षप्रकरणं गणिकाध्यक्ष-प्रकरणम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुलकः स्यात् कुलश्रेष्ठी मालाकारस्तु मालिकः ।
कुम्भकारः कुलालः स्यात् पलगण्डस्तु लेपकः ।।
तन्तुवायः कुविन्दः स्यात् तुन्नवायस्तु सौचिकः ।
रङ्गाजीवश्चित्रकारः शस्त्रमार्जोऽसिधावकः ।।
पादकृच्चर्मकारः स्यात् व्याकारो लोहकारकः ।
नाडिंधमः स्वर्णकारः कलादी रुक्मकारकः ।।
स्याच्छाङ्खिकः काम्बविकः शौल्विकस्ताम्रकुट्टकः ।
तक्षा तु वर्धकिस्त्वष्टा रथकारश्च काष्ठतट् ।।
ग्रामाधीनो ग्रामतक्षः कौटतक्षोऽनधीनकः ।
क्षुरि-मुण्डि- दिवाकीर्ति - नापितान्तावसायिनः ।।
निर्णेजकः स्याद्रजकः शौण्डिको मण्डहारकः ।
स्यान्माया शाम्बरी मायाकारस्तु प्रातिहारकः ।।
शैलालिनस्तु शैलूषा जायाजीवाः कृशाश्विनः ।
भरता इत्यपि नटाः चारणास्तु कुशीलवाः ।।
मार्दङ्गिका मौरजिकाः पाणिवादास्तु पाणिघाः ।
वेणुध्माः स्युर्वैणविकाः वीणावादास्तु वैणिकाः ।।
जीवान्तकः शाकुनिकः द्वौ वागुरिकजालिकौ ।
वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् ।।

एतैः श्लोकैर्वैविध्यं प्रतीयते व्यवसायानाम् । भारतीयचतुष्पष्टिकलासु २४ कर्माश्रयाः सन्ति । ता व्यवसाय रूपेणाजीविकार्थं स्वीकृता आसन् ।

व्यावसायिकसंघाः

प्रथमं तावत् सिन्धुसभ्यतायाः संघात्मकव्यवसाया उपाचीयन्तेति सम्भाव्यते । तत्रत्यशिल्पिनां निर्मितवस्तुषु समरूपता गणसंस्थया व्यवस्थापितेति विदुषां मतम् ।[1]

वैदिकसाहित्ये प्रारम्भतः गणानामुदयो दृश्यते । तथा हि—मरुदादीनां देवानां गणः सुप्रसिद्धः।[2] गणपतिस्तत्रासीत् । वैदिकजातिसंस्था परवर्तियुगस्य गणसंस्थासमाना एवासीत् ।

---

१. Within the area already described the uniform products of the Harappa civilisation can be traced with the monotonous regularity of a highly organised community under some strong system of centralised government, controlling production and distribution. Piggott : Prehistoric India p. 138.

२. स नैव व्यभवत स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा [illegible] ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रत्येकस्या जात्या विशिष्टव्यवसायोऽभवत् । तं व्यवसायमपेक्ष्य ये जनाः सम्बद्धास्तेषां पृथक् जातिरभवत् । जातीनां परिषदो बभूवुः, याभिर्जातीनामभ्युदयाय विधानानि विरचितानि।[१]

बौद्धसाहित्यानुसारं द्विविधौ संघौ बभूवतुः—सार्थानां शिल्पिनां च । संघानां स्थापना ज्येष्ठकानामध्यक्षत्वेऽभूत् । शिल्पिसंघाः शिल्पाचार्याणामध्यक्षत्वे व्यवस्थिता आसन् । तस्मिन्युगे चौराणमपि संघा बभूवुः । एकस्मिन् दस्युसंघे ५०० लुण्टाका बभूवुः ।

संघस्य नामानि रामायणमहाभारतादिषु निगमः, गणः श्रेणी वा प्राप्यन्ते । कतिपय-संघा आत्मरक्षार्थं सेनासमन्विता बभूवुः ।[२] रामायणानुसारं कैवर्तयुवकानामपि संघ आसीत् । तेषां नायको राजा इति ख्यातो गुहोऽभवत् । तस्य सेना महती बभूव ।

अर्थशास्त्रानुसारं शिल्पिनां संघा महत्त्वपूर्णा बभूवुः । संघव्यवस्थायै राजकीयविधानानि बभूवुः । तस्मिन्युगे श्रेणीबलानामतिशयं माहात्म्यमासीत् । श्रेणीबलानि राजकीय-युद्धेष्वपि क्वचिन्नियोजितानि बभूवुः । श्रेणीबलं जनपदबलमासीत् । ईदृशानां सैनिकानां प्राथमिकप्रवृत्तिः स्वराष्ट्रस्य रक्षणं बभूव ।

महाभाष्यानुसारं नियोजकास्तु अर्या इति ख्याता आसन् । भृत्यास्तु बहुविधा आसन् । तथा हि प्रायः कर्मकरो गृहकार्येषु सहायक आसीत् । प्रसाधकः स्वामिनोऽलङ्करणमकरोत् । भाक्तिकस्तु भोजनमात्रेण परितुष्टोऽभवत् । उदहारस्तु जलभरणे, छत्रधारश्छत्रधारणे, भक्तकरः पाचने, आगवीनश्चारणे नियुक्ता आसन् । वांशभारिकः वंशयष्टया भारवहनमकरोत् । प्रेष्यस्तु इतस्ततः संचरन् कार्यं समपादयत् ।[M]

ख्रीष्टाब्दस्य प्रारम्भिकयुगतः श्रेणीनां प्रतिष्ठा संवर्धिता । श्रेणीविवादमधिकृत्य श्रेणीविधानानुरूपं न्यायकरणमिति मनुना प्रतिपादितम् । संघहितार्थमायोजनं सम्पादयि-तव्यमिति प्रजासु राजकीयनियोगः प्रसिद्धः[३]। संघेषु समृद्धिशालिनां प्रजानां धनं संवर्धनाय निक्षिप्तम् । धार्मिकसंस्थानां संचालनार्थं धनं संघेषु निक्षिप्तं सुविन्यस्तमिति सम्मतम् ।[४]

संघानां शासनविधिः सर्वेषां सदस्यानां सम्मत्या प्रावर्तत । संघस्य प्रधानः सर्वैः सदस्यैर्निर्वाचितः तस्य साहाय्यार्थं द्वौ त्रयः पंच वा सहायाः कार्यचिन्तका इति बभूवुः । तेषां समितिः संघस्य शासनव्यवस्थामकरोत् ।[५] संघे स्वेच्छाकारिताया अवसरो नासीत् ।

---

१. गौतमधर्मसूत्रे ११.२० २१ ।

२. आश्रमवासिकपर्वणि ७ अध्यायतः ।

M. महाभाष्ये १.१०३, ४.४.६८, ६.३.६०; १.३.७२; ५.२.१४; ५.१.५० ।

३. मनुस्मृतौ ८.४१, २१९ ।

4. Epigraphia Indica
   Vol Vlll P. 82-86

५. बृहस्पतौ १७.६, १०, १७ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संघसदस्याः स्वेच्छाचारिणां बहिष्कारमकुर्वन् । यदा कदा राजापि संघविवादे हस्तक्षेपमकरोत् । तथा हि बृहस्पतिः—

मुख्यैः सह समूहानां विसंवादो यदा भवेत् ।
तदा विचारयेद्राजा स्वधर्मे स्थापयेच्च तान् ॥

राजा स्वयमेव संघानां गतिविधेः प्रवृत्तेश्च पर्यवेक्षणमकरोत् ।

अमरकोशस्य शूद्रवर्गे तत्कालीनसंघानामुल्लेखो विद्यते । तथा हि—

कारुः शिल्पी संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः ।
कुलकः स्यात् कुलश्रेष्ठी ॥

प्राचीनयुगे कतिपयसंघैर्मन्दिराणि निर्मापितानि, तेभ्य आर्थिकसहायता प्रदत्ता, यज्ञकर्माणि च व्यवस्थापितानि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मनोविनोदः

प्रायशो मनोविनोदाः क्रीडा एव सन्ति चतुर्विधाः—(१) व्यायामादिभिः शरीरजा चेष्टा (२) कन्दुकादिभिरुपकरणैरेवोपकरणक्रीडा (३) सूक्तिश्रवणं वाणीक्रीडा तथा (४) द्यूतक्रीडा। प्रतिदिनमेव नागरकस्य मनोविनोदक्रम आसीत्। तथा हि भोजनान्तरं शुकसारिकाप्रलापनव्यापाराः, लावककुक्कुट-मेषयुद्धानि, गोष्ठीविहारः प्रदोषे संगीतमभिसारिकाणां च स्वागतम्।

सर्वेषु सामूहिकसमारम्भेषु यज्ञ-संस्कार-देवार्चन-युद्धादिषु यज्ञादिमाङ्गलिककार्येषूत्सवेषु च लोकानां विनोदो गीतवाद्याभिनयादिभिः सम्पादितः। अपरं च विश्रामकालं सानन्दं व्यत्येतुं मनोविनोदाः श्रेष्ठसाधनानि समीहिताः। कतिपयमनोविनोदानामुपयोगिस्वरूपाणि प्रशस्यानि सन्ति।[1] तथा हि वनविहार-जलविहार-मल्लयुद्ध-मृगयादिकं स्वास्थ्यसंवर्धनाय, नृत्य-संगीत-वाद्याभिनय-कथादिकं कलाविलासाय, समाज-गोष्ठी-वसन्तोत्सव-कौमुदीमहोत्सवादिकं नागरिकताया विकासाय च बभूवुः। यद्यपि नवयुगे द्यूतादीनां विनाशात्मकत्वमेव प्रकाशितम्, किन्तु प्राचीनयुगे तेषामपि बहुगुणा अनुसंहिताः। एतेषु मनोविनोदेषु कलात्मकविनोदाः श्रेष्ठाः सन्तीति निश्चप्रचम्। भारतीयर्तवस्तु मनोविनोदक्षमाः सन्ति। प्रायशः प्रकृतिदर्शनमेव स्वाभाविको मनोविनोदः। नागराणां कर्तव्यमेवासीत् मनोरञ्जनप्रवर्तनम्। तथा हि कामसूत्रे ग्रामवासी च सजातान् विचक्षणान् कौतूहलिकान् प्रोत्साह्य, नागरकजनस्य वृत्तं वर्णयन् श्रद्धां च जनयन्, तदेवानुकुर्वीत, गोष्ठीश्च प्रवर्तयेत् संगत्या जनमनुरञ्जयेत्। १.४.४९

नाट्याभिनयः

नाट्याभिनये बहुविधमनोविनोदानामन्तर्भावो वर्तते। संस्कृत्या सह नाट्यस्य समारम्भो बीजरूपेण कल्पितुं शक्यते। सर्वप्रथमं वैदिककाले नाट्याभिनयस्य कतिपययज्ञेषु विधानमासीत्। तथा हि राजसूययज्ञे गविष्टिमभिनयन् यजमानो राजा सम्बन्धिनमपि राजानं प्रत्याक्रमणं कृतवान्।[2] विष्णोर्वामनरूपेणासुराणां छलनं विदितमेव। वैदिकशैलूषा

---

१. जैनबौद्धधर्मानुयायिनो नाट्यं धर्मप्रचारसाधनमिति स्वीकृतवन्तः।
Keith : Sanskrit Drama p. 44

२. शतपथब्राह्मणे ५.४.३.१; तैत्तिरीयसंहितायां १.८.१५।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नाटकपात्राण्येव प्रतिभान्ति ।[1] पाणिनिना नटसूत्राणां कतिपयरूपकाणां चोल्लेखः कृतः । परवर्तियुगेऽपि सदैव नाट्यप्रवृत्तिः समवर्धत ।

अभिनयाय विशाला नाट्यमण्डपा रचिताः । तद्यथा ज्येष्ठमण्डपोऽष्टोत्तरशतहस्तायामो बभूव । नाट्यमण्डपस्य भित्तिषु चित्रकर्मप्रसाधनं कृतम्, मणयोऽपि खचिताः, यन्त्रजाल-गवाक्षादीनां व्यवस्था कृता च ।[2]

पूर्वरंगविधानेनाभिनयस्य माङ्गलिकसमारम्भः कृतः । प्रथमं तावद्वाद्यायोजनं गायनं च, पश्चात् नान्दीपाठः नृत्यं च समारब्धानि । अन्ततः सूत्रधारपारिपार्श्वकादीनां संलापः नाट्यविषयस्य प्रकाशनं च कृते ।[3]

नाट्याभिनयाश्चतुर्विधाः—आङ्गिकः, वाचिकः, आहार्यः, सात्त्विकश्च । आङ्गिकोऽपि त्रिविधः—शारीरः मुखजः चेष्टाकृतः । तत्र शारीराभिनयेऽङ्गानामनेकानेकगतिस्थिति-विधानानामभिव्यक्तयो कृताः । तद्यथा नेत्रस्य षट्त्रिंशद्विधानानि परिगणितानि । तदनुसृत्य दर्शनस्याष्टौ भेदा उपकल्पिताः । नेत्रताराभिरष्टविधानि पुटकर्माणि, भ्रूभिः सप्तविधानि भ्रूकर्माणि च व्याख्यातानि । अनया दिशा नाट्यविनोदस्य सूक्ष्मकलातत्त्वाभिनिवेशः प्रदर्श्यते ।[4] तथा हि—अभिनयदृष्ट्या शिरोहस्तोरःपार्श्वकटीपादाः प्रधानाङ्गानि । नेत्र-भ्रूनासाधरकपोलचिबुकान्युपाङ्गानि । तेषां सर्वेषामभिनयकर्माणि सूक्ष्मरूपेण व्याख्यातानि ।

सर्वे लौकिकव्यवहारा रंगे दर्शनीया भवन्ति । तत्तेषां सम्पादनविधिः शास्त्रीयविधानैः नियतः । कस्मिन्नभिनये केषामङ्गानां कीदृशी गतिर्भवेदिति चारीकरण-मण्डलाङ्गहारा-दिभिरभ्यसनीयम् । लौकिकव्यवहारप्रदर्शनसामर्थ्यमङ्गहारादिषु व्यायामेन जायते ।

वागभिनयो नाट्यपुरुषस्य शरीरं मतम् । रंगे वचनविन्यासो व्याकरणछन्दःशास्त्रानु-सारं शुद्धो भवेत् । काव्यबन्धस्य समीचीनस्वरूपं भरतेन निर्दिष्टम्—

मृदुललितपदाढ्यं गूढशब्दार्थहीनम्
जनपदसुखबोध्यं युक्तिमन्नृत्ययोज्यम् ।
बहुकृतरसमार्गं सन्धिसन्धानयुक्तम्
भवति जगति योग्यं नाटकं प्रेक्षकाणाम् ।। ना० शा० १७.१२४

पात्राणां भाषा तेषां मातृभाषैव भवेत् । अतः प्राकृतभाषाणामपि नाट्ये प्रयोगो निर्धारितः । रसानुसारमपि पाठ्यं समीहितम् । यथा हास्यशृंगाराभ्यां मध्यमपंचमस्वरौ । नाट्याभिनयवाक्यानां सर्वजनमनोहारित्वं नाट्यशास्त्रे निर्धारितम् ।

---

१. वाजसनेयिसंहितायाम् ३०.६; तैत्तिरीयब्राह्मणे ३.४.२.१ ।
२. नाट्यशास्त्रे द्वितीयाध्यायतः ।
३. नाट्यशास्त्रे पंचमाध्यायतः ३४. १९७-२०६ ।
४. नाट्यशास्त्रेऽ[illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आहार्येणाभिनेतॄणां वेश-भूषा, मानवेतरप्राणिनां प्रतिमाः, नदीपर्वतवनादीनां चित्राणि च समाविष्टानि । एभिराहार्यैरभिनेतॄणां पदानि स्थितीनां भावविघटनानां च स्वरूपाणि व्यक्तानि । अभिनेतॄणां वेशैः रंगैः श्मश्रुरचनादिभिश्च तेषामभिनीतपात्राणां देशजातिव्यवसायादीनां परिचयः प्राप्यते स्म । संजीवाहार्यैरपदद्विपदचतुष्पदादीनां पशूनां रंगे प्रदर्शनमभवत् ।

नाट्ये सत्त्वाभिनयस्य प्राधान्यमासीत् । सत्त्वाभिनये रसभावादीनां निष्पत्तये मनसः समाधिना रोमांचाश्रु-स्वरभेद-स्तम्भ-स्वेद-वेपथु-वैवर्ण्यप्रलय-भावादयः प्रदर्शिताः ।[1] अभिनेतॄणां वरणाय नियम आसीत्—

सुशीला ज्ञानवन्तश्च तथा च प्रियदर्शनाः ।
कुमारराजभूमीषु प्रयोज्या भरतोत्तमाः ।। ना० शा० ३५.११

कतिपयपुरुषाः स्त्रीभूमिकास्वभिनयन्ति स्म । ते भ्रूकुंसा इति विख्याता आसन् । पुरुषभूमिकासु स्त्रीणामभिनेयः क्वचिदासीत् । नाट्यशास्त्रे चित्राभिनयस्य वैशिष्ट्यं प्रतीयते । चित्राभिनयस्तु शरीरस्य विविधाङ्गानां विभिन्नगतिभी रात्रि-प्रदोष-दिवस-जन्तु-जलाशय-दिशा-ग्रह-नक्षत्र-चन्द्र-ज्योत्स्ना-वायु-रस-गन्ध- सूर्य-सिंहर्तु-पर्वत-वनवृक्षगृहादीनामभिव्यक्तिः क्रियते । तथा हि—

कृत्वा स्वस्तिकसंस्थानौ पद्मकोशावधोमुखौ ।
सिंहर्क्ष-वानर-व्याघ्र-श्वापदानां निरूपणम् ।। ना० शा० २५.१८
शिखिनः सारसा हंसाः स्थूला येऽन्ये च पक्षिणः ।
पक्षाङ्गोदारगतिभिरभिनेयाः प्रयोक्तृभिः ।। ना० शा० २५.६७

दिवसस्य विविधभागा विभिन्नविषयाणां रूपकाणां प्रयोगाय सम्प्रधारिताः । तथा हि नाट्यशास्त्रे—

यच्छ्रोत्ररमणीयं स्याद्धर्मोत्थानकृतं च यत् ।
पूर्वाह्णे तत्प्रयोक्तव्यं शुद्धं वा विकृतं च यत् ।।
सत्त्वोत्थानगुणैर्युक्तं वाद्यभूयिष्ठमेव च ।
पुष्कलं सत्त्वसंयुक्तमपराह्णे प्रयोजयेत् ।।
कैशिकीवृत्तिसंयुक्तं श्रृंगाररससंश्रयम् ।
नृत्तवादित्रगीताढ्यं प्रदोषे नाट्यमिष्यते ।।
यत्तु माहात्म्यसंयुक्तं करुणप्रायमेव च ।
प्रभातकाले तत्कार्यं नाट्यं निद्राविनाशनम् ।। २८.८०–८३

---

१. अङ्गाद्यभिनयस्यैव यो विशेषः क्वचित्क्वचित् ।
अनुक्त उच्यते चित्रः स चित्राभिनयः स्मृतः ।। २५.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अहर्निशं प्रायः सदैव नाट्यं प्रवर्तनीयमासीत् पुरा। लोकसंग्रहार्थमभिनेयार्था निर्धारिता एव। तद्यथा नाट्यशास्त्रे--

न कार्यं शयनं रङ्गे नाट्यधर्मं विजानता।
केनचिद्वचनार्थेन छेदमत्र प्रयोजयेत् ॥ २८.२८४
यदा स्वपेदर्थवशादेकाकी सहितोऽपि वा।
चुम्बनालिङ्गनादीनि रंगमध्ये न कारयेत् ॥ २८.२८५
भोजनं सलिलक्रीडां तथा लज्जाकरं तु यत्।
एवंविधं भवेद्यद्यत्तत्तद्रङ्गे न कारयेत् ॥ २८.२८७
पितृपुत्रस्नुषाश्वश्रूदृश्यं यस्मात्तु नाटकम्।
तस्मादेतानि सर्वाणि वर्जनीयानि यत्नतः ॥ २८.२८८

खीष्टाब्दस्य प्रथमशतकात् प्रभृति लिखितरूपकाणि लभ्यन्ते। अश्वघोष-भास-कालिदास-हर्ष-भवभूति-भट्टनारायण-शूद्रक-राजशेखरादयः प्राचीनयुगे महानाटककारा बभूवुः। एषां महाकवीनां रूपकाणि राजाश्रयेण प्रवर्तितानि राज्ञां नाट्यशालासु प्रायशोऽभिनीतानि च। कालिदासेन नाटकस्य गौरवं प्रतिष्ठापयता प्रोक्तं मालविकाग्निमित्रे—

देवानामिदमामनन्ति मुनयः शान्तं क्रतुं चाक्षुषम्
रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।
त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधकम् ॥ १

नाट्यं माङ्गल्यं, सुपुण्यं, पवित्रं शुभं पापविनाशनञ्च भवतीति शास्त्रसम्मतमेव।[1] तदनुसारं देवानां प्रीत्यर्थं मन्दिर-प्राङ्गणे नाट्याभिनयाः समायोजिताः।

उपर्युक्तनाट्यप्रणाली प्रायशो राजाश्रितनटानामभिनेयान्येव पर्यालोचयति। सुदूर-प्राचीनकालत आधुनिकरामलीलावत् सविशेषं स्वाभाविकतामादधानं नाट्यं प्रवर्तते। न तत्र नाट्यशास्त्रानुसारि नेपथ्यं प्रेक्षागृहं च वर्तेते। अभिनयस्यावश्यकतानुसारं नाट्य-भूमिः परिवर्तनक्षमा भवति। रंगोऽपि कार्यानुसारं स्वल्पो विशालतरो वा क्रियते। ईदृशस्य स्वाभाविकनाट्यस्याभिनिवेशः कालिदासस्य नाटकेऽपि प्रतिभाति। तथा हि— अभिज्ञानशाकुन्तले द्वितीयाङ्के मृगयादृश्यं वर्तते। तत्र

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥

१. नाट्यशास्त्र ३६. ७२-७५।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्याभिनयाय प्राकृतिकस्थली आवश्यिकी प्रतिभाति। अन्यथा कथं सूतः कथयेत्—

आष्युमन् उद्घातिनी भूमिरिति मया रश्मिसंयमनाद्रथस्य मन्दीकृतो वेगः । तेन मृग एष विप्रकृष्टान्तरः संवृत्तः । सम्प्रति समदेशर्वतिनस्ते न दुरासदो भविष्यति ।

उत्तररामचरितस्य गर्भनाटकमपि तादृशीं प्राकृतिकस्थलीमपेक्षते ।

नृत्यं नृत्तं च

नाट्यवदभिनयप्रधानं नृत्यं भवति, किन्तु नाट्ये वाक्याभिनयो रसाश्रयो भवति, नृत्ये च पदार्थाभिनयो भावाश्रयो भवति । नाट्ये सात्त्विकाभिनयस्य नृत्ये चाङ्गिकाभिनयस्य प्राधान्यं भवति । [1] नृत्यस्य स्पष्टोदाहरणं मालविकाग्निमित्रे वर्तते । तत्र मालविका नर्तकी वर्तते । सा प्रथममुपगानं कृत्वा चतुष्पदवस्तु गायति ।

दुल्लहो पिओ मे तस्सिं भव हिअअ णिरासं
अम्हो अपङ्गवो मे परिप्फुरइ किं वामओ ।
एसो सो चिरदिट्ठो कहं उण उवणइदव्वो
णाह मं पराहीणं तुई परिगणअ सतिण्हं ॥ मा० २.४

अस्याभिनयः कृतः । तदधिकृत्व प्रोक्तम्—

अंगैरन्तर्निहितवचनैः सूचितः सम्यगर्थः
पादन्यासो लयमनुगतस्तन्मयत्वं रसेषु ।
शाखायोनिर्मृदुरभिनयस्तद्विकल्पानुवृत्तौ
भावो भावं नुदति विषयाद्रागबन्धः स एव ॥ मा० २.८

रत्नावल्यां नृत्येन द्विपदीगीतस्याभिनयो वर्णितः ।[2]

नृत्तमभिनयविरहितमङ्गविक्षेपमात्रमेव भवति । तदधिकृत्य भरतेन स्पष्टीकृतम्—

अथोच्यते न खल्वर्थं कश्चिन्नृत्तमपेक्षते ।
किन्तु शोभां जनयतीत्यतो नृत्तं प्रवर्तितम् ॥
प्रायेण सर्वलोकस्य नृत्तमिष्टं स्वभावतः ।
मंगल्यमिति कृत्वा च नृत्तमेतत्प्रकीर्तितम् ॥ ४.२६९-२७०

---

१. कालिदासानुसारं नृत्यमङ्गसत्त्वचनाश्रयमपि भवति । रघुवंशे १९. ३६ कामसूत्रानुसारं तु— करणान्यङ्गहारा च विभावो भाव एव च । अनुभावा रसाश्चेति संक्षेपान्नृत्यसंग्रहः । कामसूत्रे १.३. १६ टीका ।

२. रत्नावल्यां १.१२ पश्चाच्च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पद्मपुराणानुसारं तु 'अङ्गहाराश्रयं नृत्तम्' इति । नृत्यमभिनयसंश्रयं भवति । नृत्तं व्यायामिकं भवतीत्ति प्रत्यक्षमेव ।

नृत्तस्य नृत्यस्य च द्वौ भेदौ—ताण्डवः लास्यं च सुकुमारोद्धतभेदेन भवतः । पार्वत्याः सुकुमारं लास्यं शिवस्योद्धतस्ताण्डवश्च सुप्रसिद्धे ।[1]

नृत्यकलायाः समारम्भः सुदूरप्राचीनकाले समभवत् । प्रस्तरयुगीनेषु कतिपयचित्रेषु प्राचीनतमनृत्यस्य स्वरूपमधुनाऽपि दृश्यते । नृत्तस्य प्राचीनतमस्पष्टस्वरूपं सिन्धुसभ्यताया नर्तकीनां मूर्तिभिर्लभ्यते। नर्तनकाले तासां नर्तकीनां शरीरं विवसनमभवत्। नर्तकानां मूर्तयोऽपि प्राप्यन्ते। नर्तनद्वारा हावभावादीनामभिव्यक्तिरक्रियत ।ताललयाश्रितं नृत्तमपि प्रचलितमासीत् । नृत्येन सह वाद्यस्य संगतिः कृता । सामूहिकनृत्यस्य प्रचलनं तदासीत् ।

शोभनवस्त्रावृता उषःस्वरूपधारिण्यो नर्तक्यो वैदिकयुगे मनोरमा बभूवुः । नृत्येन सहाघाटिवाद्यस्य संगतिः कृता । यज्ञावसरे मनोरंजनाय वंशनर्तिनां वंशावलम्बनेन नर्तनमायोजितम् । पुरुषाणां नृत्यं प्रचलितमासीत् ।

महाभारतयुगे राजकुलेषु नृत्यस्य प्रचलनमासीत् । स्वयमर्जुनो नृत्यमशिक्षत । राजकुमारीणां नृत्याचार्याः शिक्षका बभूवुः । राजकुलस्य परिचारिका नृत्यविशारदा बभूवुः । युधिष्ठिरस्य राजसूययज्ञावसरे नर्तकसमुदायो दर्शकानां मनोरंजनमकरोत् ।[2] नृत्यगीतादिविशारदा गन्धर्वाः प्रतिदिनं यज्ञकर्मणि समाप्ते स्वकलानां प्रदर्शनमकुर्वन् ।

रामायणानुसारमयोध्याकिष्किन्धालङ्कादिषु नगरीषु नागरिकाणां राज्ञां च मनोरंजनाय प्रतिदिनं नृत्यायोजनं कृतम् । राज्ञां प्रातःकाले जागरणाय नर्तका नियुक्ताः । गणिका नृत्यसंगीतादिषु निपुणा बभूवुः । जैन-बौद्धसाहित्यानुसारं समाजे गणिकानां प्रतिष्ठा समधिकासीत् । राजधानीषु काचित् प्रमुखगणिका बभूव । राजधान्या ललामभूतैव सा गणिका समादृता ।

न केवलं मनुष्याणामपितु हस्तिनामपि नृत्यशिक्षणं समभवत् । ग्रीकलेखक एरियनो लिखति---I have myself actually seen an elephant playing on cymbals, while other elephants were dancing to his strains: a cymbal had been attached to each foreleg of the performer and a

१. रेचकैरङ्गहारैश्च नृत्यन्तं वीक्ष्य शङ्करम् ।
सुकुमारप्रयोगेण नृत्यन्तीं चैव पार्वतीम् ॥ ४.२५६।
नृत्तप्रयोगः सृष्टो यः स ताण्डव इति स्मृतः ॥ ४.२६६ ।

२. सभापर्वणि ३०.४८ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

third to what is called his trunk, and while he beat in proper time those on his two legs. The dancing elephants all the while kept dancing in a circle, and as they raised and curved their forelegs in turn they too moved in proper time, following as the musician led.[१] मयूरनृत्यं तु प्राकृतिकं संविधानमेव ।

नृत्यस्यान्येऽपि बहवो भेदा सन्ति । तथाहि—अर्धाङ्गनृत्ये शरीरस्यैकार्धस्य सर्वाण्यङ्गानि नर्तनशीलानि बभूवुः । अपरार्धस्याङ्गानि निश्चलानि बभूवुः ।[२] देवानां परितोषार्थं नृत्यायोजनस्य कथा दशकुमारचरिते लभ्यते । तथा हि कन्दुकोत्सवे कन्दुक-क्रीडितेन देवी विन्ध्यवासिनीमाराधयितुं कन्दुकावती भगवतीमभिवन्द्य कन्दुकममन्दरागरूषिताक्षमनङ्गमिवालम्बत, लीलाशिथिलं च भूमौ मुक्तवती, मन्दोत्थितं च किंचित्कुंचिताङ्गुष्ठेन प्रसृतकोमलाङ्गुलिना पाणिपल्लवेन समाहत्य हस्तपृष्ठेन चोन्नीय, चटुलदृष्टिलाञ्छितं स्तबकमिव भ्रमरमालानुविद्धमवपतन्तमाकाश एवाग्रहीत्, अमुञ्चच्च मध्यविलम्बितलये द्रुतलये मृदु-मृदु च प्रहरन्ती तत्क्षणं चूर्णपदमदर्शयत्, प्रशान्तं च तं निर्दयप्रहारैरुदपातयत्, विपर्ययेण प्राशमयत्, पक्षमृज्वागतं च वामदक्षिणाभ्यां कराभ्यां पर्यायेणाभिघ्नन्ती शकुन्तमिवोदस्थापयत्, दूरोत्थितं च प्रपतन्तमाहत्य गीतमार्गमारचयत्, प्रतिदिशं च गमयित्वा प्रत्यागमयत् ।

परवर्तियुगे राज्ञां सामन्तानां च मनोरंजनाय प्रायशोऽसंख्या नर्तक्यो नियुक्ताः ।[३] नर्तकीनां नृत्यद्वारा मृगयापराणां पुलिन्दानामनुकरणं वेशभूषारंगादीनां संस्करणैरभवत् । अपरं च योगिनीनृत्यद्वारा लय-प्रदर्शनं कतिपयाभिर्नर्तकीभिः कृतम् ।[४] नर्तकीनां नेतृत्वे सामन्तवधूनामुत्सव-यात्रा कृता ।[५] राजकन्यका राजभवनस्य मण्डपे नृत्तस्य सार्वजनिकं प्रदर्शनं कुर्वन्ति स्म । राजकुमारीणां विवाहयोग्यता तासां नृत्तपरीक्षयाऽपि निर्णीता ।[६]

पौराणिकयुगे देवार्चनाय नृत्यस्य श्रेष्ठसाधनरूपेण ग्रहणमभूत् । तद्यथा हरचरितचिन्तामणौ—

नृत्येन यस्तोषयति शिवलिंगमकैतवः ।
लभते स शरीरान्ते सुरविद्याधराङ्गनाः ॥

---

1. M' Crindle Ancient India P. 221.
२. सुरुचिजातके ४८९ ।
३. कश्मीराणां राजा हर्षः स्वयमेव नर्तकीरशिक्षयत् राजत० ७.११.४० ।
केचन राजानो नर्तकीनां समाहारेणैव परितृप्ता आसन् । राजत० ७.६६ ।
४. कर्पूरमंजर्यां चतुर्थेऽङ्के ।
५. कथासरित्सागरे ४.३.८२-८५ ।
६. कथासरित्सागरे १२.४.७३-७८;९.५.८२ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संगीतकं ये कुर्वन्ति भक्त्या लिंगस्य सन्निधौ ।
ते गन्धर्वपुरे राज्यं प्राप्नुवन्ति परं पदम् ॥ १.८१—८२

भक्तानां नृत्यं प्रसिद्धम् । कृष्णस्य कालियदमननृत्यं महारासनृत्यं च लोकप्रियम् । महारासे कृष्णो नायको गोपिकाश्च नायिका बभूवुः । कृष्णस्य गायनमनुसृत्य गोपिका अनृत्यन्त । भागवते बहुविधं बालनृत्यं वर्णितम् ।[1]

भारतीयशिल्पकलायां नृत्यस्य प्रदर्शनं रुचिकरो विषय आसीत् । प्राचीनयुगस्य चित्रावलीमूर्तिपट्टेषु बहुविधानि नृत्यानि दर्शितानि ।

संगीतम्

संगीतस्य प्राकृतिकस्वरूपमनादिकालादेव प्रवर्तितम् ।[2] ब्रह्माण्डे प्रायः सर्वत्र पशुपक्षिणां संगीतं श्रूयते । प्रकृतेः संगीतं समाहृत्य तस्मात्प्रेरणां वा प्राप्य मानवोऽपि विशेषसंगीतरसिकोऽभूत् । तथा हि सप्त स्वराः पशुपक्षिध्वनिमनुकुर्वन्ति—

स्थानाङ्गानुसारं रागाणां विवृत्तिरधोलिखित-तालिकया स्पष्टीक्रियते--

रागनाम	उच्चारणस्थानम्	पक्षिगानम्	वाद्यस्वरः
षड्जः	जिह्वाग्रम्	मयूरः	मृदङ्गः
ऋषभः	वक्षस्थलम्	कुक्कुटः	गोमुखी
गान्धारः	कण्ठः	हंसः	शङ्खः
मध्यमः	जिह्वामध्यम्	अविः	झल्लरी
पञ्चमः	नासिका	कोकिलः	दर्दरिका
धैवतः	ओष्ठः	सारसः	पटहः
निषादः	शिरः	क्रौञ्चः	महाभेरी

रागा अपि प्राकृतिकसंविधानैः सम्बद्धाः सन्ति । भैरवरागः प्रातःकालिकीं छटां मानसपटले स्फोटयति, पशूनां कलरवस्य, पुष्पाणं गन्धस्य माधुर्यस्य, नवतायाश्च समारम्भं वासयति च । हिन्दोलरागस्तु वासन्तिकमधुरिमाणं कुसुमराशेः सौरभं च श्रोतॄणां मनसि निदधाति । दीपके ग्रीष्मसन्तापो भवति । श्रीरागेणास्तप्रायदिवसस्याभिव्यक्तिः क्रियते । मेघरागेण वर्षर्तोर्मेघागमनस्य च प्रवृत्तयः सन्दर्श्यन्ते ।

---

१. भागवते १०.१८ ।

२. तद् दृश्यते राजकुलेऽपि प्राकृतिकसंगीतं प्रति रुचिः । तथा हि—
राजभवनमयोध्यायां—
शुकबर्हिणसंघुष्टं क्रौञ्चहंसरुतायुतम् ।
सारसैश्च मयूरैश्च निनदद्भिर्विराजितम् ॥ अयोध्याकाण्डे १०.१२;११.३५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैदिकयुगे गायत्रीप्रगाथादीनां छन्दसां गायनप्रवृत्तिरासीत् ।[1] उद्गाता यज्ञावसरे सामवेदस्य गायनमकरोत् । सामवेदस्यार्चिकभागस्य श्लोका विद्यार्थिनां गायनशिक्षणाय बभूवुः । आर्चिकस्य पंचाशीत्युत्तरपंचशतर्चः सप्तत्युत्तरैकादशशतसाममाध्यमेन गेयाः । गायनकाले स्वराभिव्यक्तिर्हस्ताङ्गुलीनां गत्या कृता । कतिपयसाम्नां गानं केवलमरण्ये कृतम् । ततो ग्रामगेयगानमरण्यगेयगानं च प्रावर्तताम् । वैदिकसंहितासु प्रायः देवाभिप्रायाणां स्तुतीनां संकलनं वर्तते । तेषु क्वचित् कृषकाणां गीतानि संगृहीतानि । यथा—ऋग्वेदे—

शुनं नः फाला विकृषन्तु भूमिं शुनं कीनाशा अभियन्तु वाहैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ॥ ४.५७.८

यज्ञविधानेन संगीतविद्याया विशेषोन्नतिरभूत् । अश्वमेधसत्रे वर्षपर्यन्तं प्रतिदिनं यजमानस्य चरितगाथा गीताः । ब्राह्मणगायका राज्ञ औदार्यमधिकृत्य क्षत्रियगायकास्तु तस्य पराक्रममधिकृत्य गायन्ति स्म । तस्मिन्युगे गाथानाराशंसीसाहित्यस्य वैपुल्यमभवत् । राज्ञां चरितगाथागायनस्य प्रचलनं महाभारतयुगेऽपि प्रावर्तत ।

महाभारतानुसारं युद्धकाले सैनिकानां मनोरंजनार्थं मंगलगीतानां गायनमायोजितम् । पाणिस्वनिकमागध-मधुपर्किकवैतालिक-सूतादयः राज्ञां मनोरंजनार्थं स्तुतिगानमकुर्वन् । तेषां गीतेषु राजवंशविरुदावली व्याख्याता ।[2] शयनात्प्राक् राजकुमाराणां मनोरंजनार्थं गायिकाः संगीतं प्रास्तुवन्[3] ।

महाभारतयुगे गन्धर्वकिन्नरादीनामार्येतराणां संगीते परमप्रावीण्यमासीत् । अर्जुनस्य गुरुश्चित्रसेनो गन्धर्व आसीत् । स एवार्जुनो विराटस्य राज्ञः संगीतशालायाः प्रधानाचार्यः सन् राजकुमारीमुत्तरां संगीतमशिक्षयत् ।

रामायणीयसंगीतस्य वैशिष्ट्यं लवकुशौ प्रति रामवचनैः प्रतीयते—

इमास्तन्त्रीः सुमधुराः स्थानं वापूर्वदर्शनम् ।
मूर्छयित्वा सुमधुरं गायेथां विगतज्वरौ ॥
गायेथां मधुरं गेयं तन्त्रीलयसमन्वितम् ।

लङ्कायामपि राजभवनेषु हनुमान्—

शुश्राव मधुरं गीतं त्रिस्थानस्वरभूषितम् । सुन्दर १.१०

---

१. गायत्रीप्रगाथयोरुद्भवः 'गै' धातोः वर्तते । अतः तयोः गायनं सिद्धम् । पाणिनियुगे गायकः, गाथकः पुरुषगायकस्य, गायिका-गाथनो स्त्रीगायिकानां संज्ञा द्रष्टव्याः । ३.१.१४६-१४७ ।

२. द्रोणपर्वणि ५८.२-४ ।

३. सभापर्वणि ५२.३६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न केवलं मानवानां प्रलोभनाय संगीतमभवत्, अपितु मृगादीनामपि मृगयार्थं प्रलोभनं कृतं संगीतेन। तत्र हस्तिकान्तावीणा सुप्रसिद्धासीत्।

संगीतशास्त्रस्य वैज्ञानिकं विवेचनं सर्वप्रथमं भरतस्य नाट्यशास्त्रे लभ्यते।[१] तस्य किंचिद्विकसितं स्वरूपं वायुपुराणे दृश्यते। नागरिकाणां सुखार्थं गीतप्रवृत्तिः कालिदासेनोपलक्षिता—

व्रजतु तव निदाघः कामिनीभिः समेतो
निशि सुललितगीते हर्म्यपृष्ठे सुखेन॥ ऋतुसंहारे १.२८

कामसूत्रानुसारं तु संगीतं चतुर्विधं सम्मितम्। तद्यथा—

स्वरगं पदगं चैव तथा लयगमेव च।
चेतोऽवधानगं चैव गेयं ज्ञेयं चतुर्विधम्॥ १.३.१६ टीका

भारतीयसंगीतकला विदेशेषु प्रावर्तत। तथाहि—

In music the Hindus have exerted an immense influence on the west, perhaps through Greece, and also on Asia, where the Indian quarter tones and subtle harmonies can be found every where, as they may be found in Spain and other countries, whither the Arabs carried them.[2]

वैदेशिकसंगीतज्ञा अपि भारतेऽभ्यर्थिता बभूवुः। भरुकच्छप्रदेशस्य राज्ञे संगीतप्रवीणा यवनरमण्य उपहारार्थं प्रेषिताः।[3]

क्षेमेन्द्रानुसारं तु गायनासक्तिः परं दोषावहास्ति। गायकास्तु सर्वस्वं हरन्ति नागरकाणाम्।[४]

वाद्यम्

नाट्यस्य नृत्यस्य संगीतस्य च संगतिः वाद्येन भवति। वाद्यं तु संगीतस्य मौखिकं ध्वनिं संवदति। नृत्यापेक्षिततालो वाद्येनापि व्यक्तीक्रियते। वाद्यस्य समारम्भः संस्कृतेरादिकालतो बभूवेति सुनिश्चितम्।

---

१. नाट्यशास्त्रे २८ अध्याये।
2. A Pageant of India p. 126.
3. Intercourse Between India and the Western World p. 117.
४. कलाविलासे ७, १२, २४।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिन्धुसभ्यतायुगे ढोल-वीणा-कांस्यतालकोटिकानां वाद्यानां प्रचलनं बभूव । वैदिक-युगे नृत्यसंगतावाघ्राटिः वाद्यते स्म । दुन्दुभिः युद्धवाद्यमासीत् । वीणा वैदिकयुगस्य श्रेष्ठवाद्यमासीत् । वीणायां शततन्तूनां प्रवर्तनमक्रियत ।[1] वीणा स्वरूपदृष्ट्या बहुविधासीत् । तस्या विविधानि नामानि प्रचलितान्यभवन् । गवामयनस्य षष्ठे दिवसे महाव्रतोत्सवे यजमानस्य भार्या अनुवीणं गायन्ति स्म । श्वासापूरणेन शंखवेणुनाडीतूण-वादयो वादिताः ।

महाभारतयुगे भेरी-मृदङ्ग-पणवानकझर्झरक्रकच-दुन्दुभि-पुष्कर-पटहादयो युद्धोप-योगिनो ढोलस्य भेदा बभूवुः ।[2] भेरीतूर्यादीनां निनादं श्रुत्वा सेनाः शस्त्रास्त्रैः सुसज्जिता बभूवुः । युद्धकाले गोविषाणिकगोमुखयोः विविधसन्देशप्रसारायोपयोगोऽभूत् । विजये प्राप्ते बहुमासान् भेरीनिनादात्मकोत्सवोऽक्रियत । प्रातःकाले राज्ञां जागरणाय मृदङ्गझर्झरभेरी-पणवानकगोमुखाडम्बरशंखदुन्दुभीनां वाद्यं प्रास्तूयत ।[3]

रामायणानुसारं राजकुलस्य स्त्रियो वीणाभ्यासं कुर्वन्ति स्म । तासामन्यानि वाद्यानि पटहमड्डुकवंशविपञ्चीमृदङ्गपणवडिण्डिमाडम्बरादयो बभूवुः । बौद्धसाहित्या-नुसारमन्यानि वाद्यानि--पणिस्सर–सम्मतल-कुम्भत्थूण–मूतिङ्गा-मुरजादयो बभूवुः । श्वासापूरणवाद्यानि शंखपणव-वेणु-देण्डिमा–सरमुख–गोधा-परिवादेन्तिका-कुटुम्ब-तिण्डि-मादीनि बभूवुः ।

भरतानुसारं बहुष्वसरेषु वाद्यायोजनं सम्पादितम् । तथा हि

नास्ति किंचिदनायोज्यमातोद्यं दशरूपके ।
रसभावप्रयोगं तु ज्ञात्वा योज्यं विधानतः ॥
उत्सवे चैव याने च नृपाणां मंगलेषु च ।
शुभकल्याणयोगे च विवाहकरणे तथा ॥
······उत्पन्ने संग्रामे युद्धसंकुले ।
ईदृशेषु च कार्येषु सर्वातोद्यानि वादयेत् ॥

कतिपयवाद्यानां लोकप्रियत्वं देवानां तदनुकूलप्रवृत्तिभिः समापन्नमिति प्रतिभाति । तथा हि–शिवस्य डमरुः कृष्णस्य वंशी नारदस्य सरस्वत्याश्च वीणा सर्वत्र समादृता बभूवुः । राज्ञामपि वाद्यप्रियत्वं प्रसिद्धम् । समुद्रगुप्तस्तु स्वयं वीणावादकोऽभवत् । वाद्यानां समा-रम्भो देवानां परितोषाय सम्मतः । बालकानां वाद्यप्रियता तु शाश्वतरूपिणी दृश्यते । भागवतानुसारं वृक्षाणां पत्रैरपि तेषां वाद्यानि निर्मितानि ।

---

१. ऋग्वेदे १०.३२.४ ।
२. गीतायाम् १.१३; भीष्मपर्वणि ९५.४१ ।
३. द्रोणपर्वणि ५८,४–६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वीणाया माहात्म्यं भासेन वर्णितम् । तद्यथा—

वीणा नाम समुद्रोत्थितं रत्नम्—
उत्कण्ठितस्य हृदयानुगता सखीव
सङ्कीर्णदोषरहिता विषयेषु गोष्ठी ।
क्रीडारसेषु मदनव्यसनेषु कान्ता
स्त्रीणां तु कान्तरतिविघ्नकरी सपत्नी ॥ चा० ३.१

वाद्यानि मूलतः चतुर्विधानि सदैव बभूवुः । तथा हि—ततं वाद्यं तन्त्रीसमायुक्तं भवति । आनद्धं चर्मणाच्छादितं वर्तते । सुषिरवाद्ये छिद्राणि भवन्ति । घनवाद्यं तु घनत्वविशिष्टं घण्टादिकमेव ।[1] अन्यच्चोदकाघात इति वाद्यमासीत् ।

एतानि गीतवाद्यनृत्यालेख्यानि परानुरागजननानि आत्मविनोदार्थानि च । संगीतं तु गीतवाद्यनृत्यानां समष्टिरेव ।

कथा

मनोरंजनार्थं कस्यापि वस्तुनः कौतुकपूर्णविधिना वर्णनं कथायाः शाश्वतस्वरूपं ज्ञायते । कथास्त्रिविधाः—संघर्षात्मिकाः, उपकारात्मिकाः तथा यज्ञात्मिकाः । देवासुरसंग्रामकथाः संघर्षात्मिकाः सन्ति । देवानामुपकारशीलत्वमुपकारात्मिकासु कथासु संगृहीतम् । यज्ञविधानानां व्याख्यापराः कथा यज्ञात्मिकाः सन्ति । तासां त्रिविधानां कथानां संग्रहो यत्र तत्र ब्राह्मणसाहित्ये वर्तते ।

परवर्तियुगे कथासाहित्यस्य पुराणेतिहासनाम्ना लोकप्रियः संग्रहोऽभवत् ।[2] महाभारतं पुराणानि च तादृशानां कथानां सागरा एव । पौराणिककथासु देवानां तेषामवताराणामृषीणां महापुरुषाणां च चरितगाथाः, तेषां पूजायाः लाभाश्च प्रासंगिकव्रतोपवासादिवृत्तान्तेन सह निबद्धाः । अपरं च भारते प्रायः सदैव पशु-पक्षिसम्बद्धाः कथा बभूवुः ।

पशुपक्षिभिः सम्बद्धानां कथानां प्रथमो महासंग्रहो बौद्धानां जातकान्येवोपलभ्यन्ते । पश्चात् पञ्चतन्त्रहितोपदेशयोः कथाः विकसिताः । ख्रीष्टाब्दस्यारम्भिकयुगे गुणाढ्येन पैशाचीभाषायां बड्ढकहाओ (बृहत्कथा) लिखिता । तस्याः परवर्तिरूपं कथासरित्सागरे निबद्धम् ।

---

१. ततं तन्त्रीसमुत्थानमवनद्धं मृदङ्गजम् ।
सुषिरं वंशसम्भूतं घनं तालसमुत्थितम् ॥ पद्मपु० २४.२०

२. एतस्मिन् सङ्ग्रहे इहलोकस्य परलोकस्य वा सर्वेषां सम्भूतानां, सम्भाव्यानां काल्पनिकानां वा विषयाणां कथारूपमास्वादनीयं वर्तते । सुमंगलविलासिन्यां १.८९ तथा दीघनिकाये १,१ एतेषां गणना कृता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वर्गकामाय वाचका धार्मिककथा अश्रावयन्। महापुरुषसम्बन्धिकथानां वाचकाः श्रोतारश्च स्वर्गे स्थानं लभन्ते इति भारतीया धारणा।[1]

कवयः कथानां रसोत्कर्षं जानन्त एव काव्यशैलीप्रयोगेण तासां माहात्म्यं समवर्धयन्। तथा हि बाणानुसारम्—

स्फुरत्कलालापविलासकोमला करोति रागं हृदि कौतुकाधिकम्।
रसेन शय्यां स्वयमभ्युपागता कथा जनस्याभिनवा वधूरिव॥
हरन्ति कं नोज्ज्वलदीपकोपमैर्नवैः पदार्थैरुपपादिताः कथाः।
निरन्तरश्लेषघनाः सुजातयो महास्रजश्चम्पककुड्मलैरिव॥

तत्र काव्यशैलीमनुगताः वासवदत्ता-कादम्बरी-दशकुमारचरितादयः कथाः विरचिताः। तस्मिन् युगे राज्ञीभ्योऽपि कथावृतान्तज्ञानं पुण्यकथाश्रावणमितिहासपठनं च धर्म्यं सम्मतम्। सम्राजामपि दिग्विजयकाले राजभिरमात्यादिभिश्च वर्णिताः कथाः मनोरंजनाय बभूवुः।[2] राजसभासु कथा-श्रावणं विज्ञानमिति प्रतिष्ठितम्। पञ्चतन्त्रादिभिः राजकुमाराणामपि नीतिशिक्षा सम्पादिता। कथां शृण्वन्तो वियोगिनः सुखं लभन्ते इति विलासिवर्गे कथाप्रचारकारणम्। अतिथीनां मनोरंजनाय मुनयोऽपि कथां कुर्वन्ति स्म। राज्ञा सह कथाविदां परिवारोऽभूत्। राज्ञीनां मनोविनोदाय परिव्राजिका नियुक्ताः। धार्मिककथाकारिणः प्रायशो मनीषिण उदारचरिता बभूवुः। कथा प्राचीनभारते दीनहीनानां समृद्धानां च बालानां वृद्धानां च, शयालूनां पथिकानां च सर्वेषां सर्वासु स्थितिषु विनोदायोत्थानपथप्रदर्शनाय च बभूव। आदर्शकथास्वरूपं महाभारते व्याख्यातम्—

गुणप्रभाववीर्यौजः सत्त्वोत्साहवतामहम्।
न तृप्यामि कथां शृण्वन्नमृतास्वादसम्मिताम्॥ आदि० ९०-५

जनजीवन-सम्बद्धा एता आदर्शकथाः कलाकृतिषु मूर्त्तिचित्रवास्तुषु सुशिल्पिताः एव रमणीयतराः कृताः।

राजसभा ब्रह्मसभा च

राजभवनं तु साधारणतोऽद्भुतवस्तूनां सङ्ग्रहात् मनोरञ्जकमभवत्। तत्र प्रबालकुट्टिममणिभूमिकावृक्षवाटिका-मृद्वीकामण्डप - समुद्रगृह-प्रासादगूढभित्ति-सञ्चार-क्रीडामृग-यन्त्र - शकुन-व्याघ्र-सिंहादीनां प्रदर्शनमभवत्। राजसभायां विविधविनोदानां प्रचलनमभवत्। वैदिककाले विशिष्टमनोविनोदप्रवणा जना अमात्यमण्डलस्य सदस्या बभूवुः। कवीनां

---

१. विष्णुपुराणस्य प्रह्लादाख्यानप्रशस्तिः।
२. कादम्बर्याम् पृ० ६३, ११८।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गाथागायनेन राज्ञां मनोरंजनमभूत् । रामायणानुसारं रामस्य राजसभायां लवकुशयोः रामायणगायनं सार्वजनिकमनोविनोदाय बभूव । परवर्तियुगे राजभिर्नियुक्ता राजकवयो राज्ञां प्रशस्तिमतिशयोक्तिपूर्णकाव्यमुखेन कुर्वन्ति स्म, राजसभासु तां श्रावयित्वा विनोदानुतुल्यं पारितोषिकं लब्धवन्तश्च । दिग्विजयैषिणां कवीनामागमने सति कविसम्मेलनमायोजितम् ।

धाराया महाराजभोजस्य राजसभा लोकविश्रुतैव । कश्मीराणां राज्ञो हर्षस्य राजसभाया वर्णनं कल्हणेन राजतरंगिण्यां कृतम् । तद्यथा—

वितानैः सपयोदेव साग्निवप्रेव दीपकैः ।
रुक्मदण्डैः सशम्पेव सधूमेवासिमण्डलैः ॥
साप्सरा इव कान्ताभिः सनक्षत्रेव मन्त्रिभिः ।
सर्षिसंघेव विबुधैः सगन्धर्वेव गायनैः ॥
नित्यसंकेतवसतिर्धनदस्य यमस्य च ।
एकं विहरणारण्यं दानस्य च भयस्य च ॥
क्षपास्थानस्थितस्तस्य राज्ञः शक्राधिकश्रियः ॥

कस्य वाचस्पतेर्वाचा वक्तुं कार्त्स्न्येन शक्यते । ७·९४६-९४९
विद्वद्गोष्ठीगीतनृत्तप्रस्तावेन क्षपा ययुः
कथान्ते शुश्रुवे तत्र पर्णचर्वणजः परम् ।
कान्ताधम्मिल्लशेफालीत्रुटिजन्मा च मर्मरः ॥७-९४४-९४५

राजसभासु द्यूताष्टापदपरिवादिनीवाद्य-चित्रकरण-काव्यालाप - परिहास-बिन्दुमतीरचना-प्रहेलिकाविचार-शरीराङ्गचित्रण-संगीतादीनि सामन्तानां विनोदसाधनानि बभूवुः ।[1] राजकुलविनोदाय वानरकुब्जनपुंसकवधिरवामनमूकादयो नियुक्ताः । मेषकुक्कुटकुररकपिंजललावकवर्तिकादीनां युद्धं तत्राभवत् । पक्षिणां पारस्परिकः संलापोऽजायत । सिंहहरिणमयूरसारसादयस्तत्र प्रदर्शनाय विनोदाय च पालिताः । राज्ञे विचित्रपशुपक्षिणामुपहारः सर्वतः समागतः । अपरं च राजसभाविनोदार्थं मल्लयुद्धमस्त्रशस्त्रकलाप्रदर्शनं च बभूवतुः । ईदृशो विनोदो रंगभूमौ व्यवस्थापितः । राजसभासु विदूषकाणां स्थानं सुविदितमेव ।

महानगरेषु काव्यशास्त्रपरीक्षार्थं ब्रह्मसभाभवत् । तत्र परीक्षोत्तीर्णानां ब्रह्मरथयानं पट्टबन्धश्चाभवताम् । कालिदासामरभारविहरिश्चन्द्रादीनामुज्जयिन्या ब्रह्मसभायां परीक्षाभवत् ।

---

१. कादम्बर्याम् पृ० ८८ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समाजो गोष्ठी च

नागरिकाणां मनोरंजनार्थं राजसभावदायोजनानि नगरेषु कृतानि। वैदिकयुगे समनसंस्था स्त्रीपुरुषाणामानन्दोल्लासाय बभूव। तत्रैव कवीनां नवरचनाः श्राविताः, धनुर्धराणां कलाप्रदर्शिता रथधावनमायोजितं च।

महाभारते वारणावतनगरस्य समाजोत्सवे परिजनैः सह राजकुमाराः समागताः। गायकास्तत्र पुरस्कृताः। कतिपयदिनानि समाजोत्सवः प्रावर्तत। रामायणानुसारमयोध्यायाः सुश्रीकता समाजोत्सवैः समवर्धत। तेषु समाजेषु नाटचनृत्यादीनां वैशिष्ट्यमभूत्।

सरस्वत्या गणपतेः शिवस्य वा मन्दिरे प्रतिपक्षमेकवारं नृत्यगीतादीनामायोजनं प्रावर्तत। ईदृशेषु समाजेषु देशदेशान्तरेभ्यः समागताः कलाविदः सभाजो बभूवुः। कंसस्य समाजोत्सवः कृष्णादीनां विनोदाय समायोजितः। तस्मिन्नुत्सवे धनुर्महो मल्लयुद्धं च प्रवर्तितम्।

समाजस्यैव प्रायः लघुरूपा गोष्ठी बभूव। मर्यादितसंख्यकानामेव कृते गोष्ठीनामायोजनं नागरिकाणां वेश्यानां गणिकानां वा गृहेषु कृतम्। तत्र नृत्य-नाटच-वाद्य-संगीत-काव्य-कथादयः काव्यसमस्यापूरण-प्रतिमालान्त्याक्षरिकाप्रहेलिकाश्च समारब्धाः।

वनविहारः

नित्यनगरवासश्चित्तं वनोन्मुखं करोति। कृत्रिमैः साधनैः प्राप्तव्यानि बहूनि सुखानि सन्ति, किन्तु तेभ्यः प्रतिकूलं मनः प्राकृतिकसंश्रयैर्विनोदमिच्छति। तस्यां स्थितौ वनोपवनेषु पुष्पलतापशुपक्षिणां वन्यानां साधारणं सौरभं सौन्दर्यं च मनोहारि भवति। वैदिककालेऽरण्यानी विहारस्थली बभूव।[1]

जातकानुसारं यदा नागरिकाय गृहं पिञ्जरमेव प्रतीतं तदा स प्रेयस्या सह भोजनपानादिभिः सामग्रीभिः सज्जितो यानेनोद्यानं गतवान्। तत्र विलासमयीषु लीलासु दिनमयापयत्।[2] राजानोऽपि स्वानुयायिभिः सहोद्यानविहारं कुर्वन्ति स्म। महाभारतानुसारं राजकुमाराणां घोषयात्रा वनविहाररूपासीत्। जनास्तत्र मृगयन्ते स्म। ईदृशेषु वनविहारेषु रमणीनां सहस्राणि, सपत्नीकाः नागरिकाः, वेश्याः वन्दिनः, हस्त्यश्वरथयानानि वनाय प्रस्थितानि। तदा वने नवनगरमेवोद्भूतम्। तत्र गोपानां नृत्यगीतादिकं मनोरंजनमभूत्।[3] केवलं कन्याकानामपि वनविहार आयोजितः।

---

१. ऋग्वेदे १०.१४६.२,३,५।

२. कणवेरजातके ३१८।

३. वनपर्वणि २२७—२२८। अध्यायतः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रामायणानुसारं लङ्कायाः रमणीयवनेषु बहवो रम्याक्रीडा निर्मिताः ।[१] जनपदेषु कुमारीणां सन्ध्याकालिकमनोरंजनायोद्यानानि नियतानि । अयोध्या-वासिनस्तु दिनकाले वने विहृत्य सन्ध्यायां सौमनस्येन गृहमागताः । समुद्र-तीरेषु पुष्पितवृक्षाणां मध्ये प्रेयस्या सह विहरणस्य प्रचलनमासीत् ।[२] पाणिन्यनुसारं भारतस्य पूर्वप्रदेशेषु उद्दालकपुष्पभंजि-कावीरणपुष्पप्रचायिका-शालभंजिकादयो वनविहारक्रीडाः प्रचलिताः ।

वनविहारवत् पर्वतविहारा अपि महाभारतानुसारमायोजिताः । कृष्णस्यार्जुनेन सह पर्वतविहारो रैवतके सक्रीडं सेवितः । विहार-स्थलो तदा शैलश्रृङ्ग-वननिर्झर-देव-तायतन-वनदुर्ग-पुष्पितद्रुम-सानु-सरोनदी-द्वीप-वैदूर्य-सिकता - सागरतट- तापसायतनादीनि बभूव[3] ।

खीष्टतः पश्चात् सप्तमशतके वन-विहारस्य श्रृङ्गारव्यापारोऽतिशयोद्दामोऽभवत् । तत्र युवकयुवतीनां पुष्पावचयः, पल्लवचयनं नायिकानां हावभावाश्च सविशेषं बभूवुः । तत्र पल्लवेषु नखाग्रैः प्रेमपत्रं लिखितम् । पुष्पप्रहारः सर्वेषां मनोरंजनमासीत् ।[४]

साधारणजनानां कृते तु वनविहारकाले वनप्रदत्तं भोजनं वनप्रदत्तपात्रेषु बभूव । तद्यथा भागवते—

केचित् पुष्पैर्दलैः केचित् पल्लवैरङ्कुरैः फलैः ।
शिग्भिस्त्वग्भिर्दृषद्भिश्च बुभुजुः कृतभाजनाः ॥ १०.१३.९ ।

जलविहारः

मानवेभ्यो जलक्रीडा स्वाभाविकी प्रतिभाति । वैदिकसाहित्ये अप्सरसां क्रीडाया उल्लेखः पुरूरवसः कथाप्रसङ्गे प्राप्यते । वैदिकयुगे जलोर्मिषु नौकामध्ये आन्दोलने प्रेङ्खानुभूता ।

परवर्तियुगे राजकीयपुष्करिणीषु जलविहारस्य वर्णनं प्राप्यते । प्रथमं वन-विहारं कृत्वा मध्याह्नकाले जलविहारेणानन्दातिरेको विश्रान्तिश्च प्राप्तौ । विहारकालेऽन्तःपुररम-णीनां राज्ञां च सहक्रीडा बभूवुः । साधारणजनानां जलविहारो नदीषु नावारोहणेन प्लवनेन वाभवत् ।

---

१. सुन्दरकाण्डे २.१२ ।
२. सुन्दरकाण्डे २०.३६ ।
३. आदिपर्वणि २१०.८--१२; १४३.२०—२६ १७३.८ ।
४. शिशुपालवधे सप्तमसर्गतः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाभारतानुसारं समृद्धिशालिनां जलविहारायोदकक्रीडनकनामकं भवनं जले स्थले च निर्मितम्। गृहेऽस्मिन् भोज्यपानानि निहितानि। अभिनवराजदम्पतीनां वनविहारजलविहारयोः प्रचलनमासीत्। हरिवंशानुसारं तु समुद्रमह इति ख्यातायां जलक्रीडायां द्वारकायाः समीपे पिण्डारकतीर्थे प्रतिवर्षं नागरकाः राजादिभिः सह चित्रितनौकासु क्रीडामण्डलीं कृत्वा भोजन-पान-नृत्य-गीतादिषु प्रमोदेषु रमन्ते स्म। गणिकाः वेश्याश्च तत्र प्रमोदार्थं समाहूताः।[1]

राज्ञां जलविहारात् प्रागेव नदीजलेभ्यो हिंस्रजन्तवो विनाशिताः। नौकामारुह्य प्रथमं राजान्तःपुररमणीनां विहारमपश्यत्। पश्चात् स स्वयमेव ताभिः सह जलक्रीडामकरोत्।[2]

कामसूत्रानुसारं तु जलक्रीडायामुदकाघातोऽक्रियत। अस्मिन् प्रयोगे हस्तयन्त्रमुक्तैरुदकैस्ताडनं बभूव। अपरञ्च जलक्रीडायां नायको दूरतोऽप्सु निमग्नो नायिकायाः समीपमागत्यैनां स्पृष्ट्वा तत्रैवोन्मज्जेत्।[3]

राजभवनदीर्घिकासु जलक्रीडायै मोहनगृहा रचिताः।

राज्ञां जलविहारो नागरिकैः सहापि बभूव। सार्वजनिकोऽयं जलविहारः कुमारपालचरिते हेमचन्द्रेण वर्णितः।

जलविहारे विशिष्टरुचिरेव प्राचीनकाले जलाशयानामतिशयरमणीयोपकल्पनाद्रिम्यः कारणमभूत्। तत्रोपवनवृक्षलतापशुपक्षिणां शोभा समाहृता। तीर्थानां रचना जलविहारार्थमभूत्।

मृगया

पुरा मृगयाया विशेषावश्यकता जनपदनिवेशनानां हिंस्रकपशूनां विनाशार्थमासीत्। वनानां वनपशूनां च बाहुल्यमासीत्। वन्यपशून् हत्वा वनमार्गा भयरहिताः कृताः। तेषां पशूनां मांस-चर्म-शृंगास्थि-पुच्छखुरादीनां च विक्रयेण धनमपि लब्धम्। तत्र बहवो व्यावसायिका एव मृगयवो बभूवुः, किन्तु मनोरंजनार्थं मृगयाकारिणां संख्या नाल्पासीत्। राजाधिष्ठिता मृगया सदैव समादृता बभूव।

प्रस्तरयुगस्य वनवासिनां गुहासु वन्यचित्रेष्वपि मृगयादृश्यानि विद्यन्ते। तेषु चित्राचार्याणां कला मृगयूनामुत्साहस्य मृगयारुचेश्चाभिव्यक्तिं करोति। व्यावसायिकी मृगया स्वभावतो मनोरंजनपूर्णा भवति।

सिन्धुसभ्यताया आखेटका धनुर्भिः, गोलिकाभिः भल्लासिगदादिभिश्च मृगयां कुर्वन्ति

१. हरिवंशे विष्णुपर्वणि ८८, ८९ अध्यायौ।

२. रघुवंशे १६,५४–७०।

३. कामसूत्रे १,४,१ [illegible]।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्म । मत्स्यग्रहणमपि जालादिभिरक्रियत । वैदिकयुगे विशेषत आर्येतराणां मृगया दृश्यते । ते मत्स्यपक्षिपशूनां विविधैः कुशलोपायैः ग्रहणं कुर्वन्ति स्म ।

परवर्तियुगे सामूहिकमृगयायाः प्रचलनं बभूव । तथा हि—उपद्रवकारिणां व्याघ्र-महिषाणां मृगयायै द्विसहस्रधनुर्धराः समागताः । उपाया अपि मृगयूनां मनोरंजनपूर्णा आसन् । तथा हि—शृगालानां मृगयायै शववत् श्मशाने शयनं कृत्वा तेषु समीपमागतेषु दण्डप्रहारेण तेषां मारणं सम्भावितम् । मयूराणां ग्रहणाय पालितमयूराङ्गना तेषां प्रलोभ-नाय नियुक्ता । पालिततित्तिरस्य ध्वनिं श्रावयित्वा समागतानां तित्तिराणां ग्रहणं कुर्वन्ति स्म कतिपयाखेटकाः । मृगयायै ग्रामसिंहानामुपयोगोऽभूत् ।

रामायणयुगीना मृगयाभिरुचिः रामविषयकेण रामायणस्याधोलिखितश्लोकेन भवति—

निघ्नन्मृगान्कुंजरांश्च पिबंश्चारण्यकं मधु ।
नदीश्च विविधाः पश्यन्न राज्यं संस्मरिष्यति ॥[1]

दशरथो मृगयाभिषक्त आसीदिति श्रवणवृत्तान्तेन ज्ञायते । मृगयाकर्मणि स शब्द-वेधिबाणप्रयोगमकरोत् । यज्ञदीक्षिता ऋषयोऽपि मृगयितुं योग्याः । चन्द्रगुप्तमौर्यादीनां मृगयाया वर्णनं ग्रीकलेखकैः कृतम् । तदनुसारं राजानः सैनिकैः सुरक्षिता एव हस्ति-पृष्ठेभ्यो मंचेभ्यो वा मृगयां कुर्वन्ति स्म । राजप्रासादसमीपवर्तिनो जलाशयात् पालित-महामत्स्यानां ग्रहणे कुमारा आनन्दमनुभवन्ति स्म ।

मृगयाया गुणदोषविवेचनं सम्यक्प्रकारेण कृतम् । दोषं विविच्य मृगया व्यसनमिति मन्यन्ते मनीषिणः । तथा हि—दशरथस्य पाण्डोश्च मृगयायां मुनिकुमारवधः सुविदित एव । प्राणसंशयोऽपि नातिस्वल्प आसीन्मृगयायाम् । हिंस्रपशूनामाक्रमणैः मरणं दावाग्निभिः प्रज्वलनं मार्गभ्रंशने इतस्ततो भ्रमणं कठोरजीवनं दस्यूनां भयं च मृगयां भीषणामेव प्रमाणयन्ति ।[2] चाणक्यसूत्रानुसारं मृगयाशीलस्य राज्ञो धर्मोऽर्थश्चापयातः ।

मृगयागुणानामाकलनं कालिदासमुखेन श्रवणीयम्—

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥ अभि० २.५

---

१. अयोध्याकाण्डे ३६.६ ।

२. अर्थशास्त्रे पुरुषव्यसनप्रकरणे पिशुनमतम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाल्मीकिना तदेव प्राक् प्रतिपादितम् । वनवासाय प्रस्थानकाले रामः कथयति—

कदाहं पुनरागम्य सरय्वाः पुष्पिते वने
मृगयां पर्यटिष्यामि मात्रा पित्रा च संगतः ।।
नात्यर्थमभिकांक्षामि मृगयां सरयूवने ।
रतिर्ह्येषातुला लोके राजर्षिगणसम्मता ।।
राजर्षीणां हि लोकेऽस्मिन् रत्यर्थं मृगया वने ।
काले वृतां तां मनुजैर्धन्विनामभिकांक्षितम् । अयो० ४९.१५-१७

मृगयाया भयङ्कररूपं सोमदेवेन चित्रितम् । तथा हि—

तदेवं मृगया नाम प्रमादो नृपभूभृताम् ।
घोरनादामिषैकाग्रा रूक्षा धूम्रोर्ध्वमूर्धजा ।
कुन्तदन्ता कथं कुर्याद्राक्षसीव हि सा शिवम् ।।
तस्माद्विफलमायासं जहीहि मृगयारसम् ।
वन्यवाहनहन्तॄणां समानः प्राणसंशयः ।। कथा० ४.१.१२८-३०

श्रीहर्षो राजदण्डरूपां राज्ञां कृतेऽधाय न मन्यते । तथा हि

अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान् ।
अनवद्यतृणार्दिनो मृगान् मृगयाघाय न भूभुजां घ्नतां ।। नैषध० २.१०

द्यूतक्रीडा

प्राचीनैव द्यूतक्रीडा महाव्यसनमूर्तिः । सिन्धुसभ्यताया नागरिकाः १,२,३,४ आदिभिः लक्षितैरक्षैर्दीव्यन्ति स्म । वैदिकयुगे सभाभवनेषु द्यूतेन मनोरंजनं कृतकार्याणां जनानामभूत् । धार्मिकविधानेऽपि द्यूतं समादृतमासीत् । अग्न्याधानकाले यजमानः पत्न्या सहादीव्यत् ।

वैदिकसाहित्ये द्यूतस्य महती निन्दा वर्तते । द्यूतस्य संगतिः मांसमदिराभ्यां चाभूत्[१] । द्यूते चौर्यस्य शाश्वतप्रतिष्ठा वर्तते । महाभारतानुसारं राजकुमाराणां द्यूतक्रीडायै सभा-भवनं समृद्धं निर्मितम । नलयुधिष्ठिरयोर्हृदयविदारिणी द्यूतक्रीडा प्रसिद्धा । महाभारतयुगे द्यूतविद्यायाः शिक्षणमपि प्रचलितम् ।

अर्थशास्त्रानुसारं द्यूतक्रीडाया आयोजनं राज्ञा नियुक्तेन द्यूताध्यक्षेण कृतम् । नागर-काणां वासगृहे द्यूतफलकमाकर्षफलकं च बभूवतुस्तेषां सुरुचिप्रदर्शनाय ।

---

१. अथर्ववेदे ६. ७०.१ CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कामसूत्रानुसारं द्यूतस्य वहवो भेदा उपजीविताः। तथाहि आकर्षक्रीडा, पट्टिका-कोडा, मुष्टिद्यूतं क्षुल्लकद्यूतं च। द्यूताश्रया विंशतिकला विकसिताः। तासु प्रमुखा अक्षविधानम्, बीजग्रहणम्, नयज्ञानम्, गूढराशिः, क्षिप्तग्रहणम्, अनुप्राप्तिलेखनस्मृतिः, अग्निक्रमः, ग्रहदानम्, युद्धम्, रुतम्, नृत्तं च सन्ति।[1]

स्त्रीपुरुषाणां सामूहिकद्यूतमप्यायोजितम्। सिद्धहस्ता द्यूतकारास्तु धौर्त्येन नागरिकाणां धनमपहरन्ति स्म। ख्रीष्टतः पश्चात् दशमे शतके द्यूतस्य भीषणस्वरूपमवर्धत। तदा द्यूतगृहस्य गुणानुसारं नाम महाठिण्ठा बभूव। द्यूतेऽपहृतवना जना वस्त्रहीना एव पलायमानाः कृताः, यदा कदा ते दण्डैः प्रहारिताश्च।[2] तदनुसृत्य सोमदेवेन कथितम्——

द्यूततान्तस्य किं नाम कितवस्य हि दुष्करम्। कथासरित्सागरे ५.१.६५

द्यूतकाराणामनुपमसहानुभूतिरपि द्यूतकारेभ्यो भवति नाम। तथा हि——

मालवराजः श्रीसेनो दरिद्रतां गतेभ्यो द्यूतकारेभ्यो महामठेषु जीवनव्यवस्थामकरोत्।[3] कविवाणी कदाचिद् द्यूतप्रशस्तौ प्रवर्तते। तथा हि शूद्रकः—द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यम्। दण्डी तु द्यूतेनौदार्यवर्धनं सुखदुःखयोः समव्यवहाराभ्यसनं साहसबुद्धिपराक्रमात्मविश्वासादीनामौत्कृष्ट्यं च सम्भावयति।

द्यूतस्य परिवृत्तिः कविना विशदीकृता—

द्रव्यं लब्धं द्यूतेनैव दारामित्रं द्यूतेनैव।
दत्तं भुक्तं द्यूतेनैव सर्वं नष्टं द्यूतेनैव॥

इन्द्रजालम्

अलौकिकसाधनैर्लौकिकसिद्धीनां प्रदर्शनमिन्द्रजालः। वैदिकमन्त्रस्तुतिभिर्देवानुग्रहेण चालौकिकसिद्धयो लभ्या इति लोकविश्वासः। तद्यथा मन्त्रतन्त्रैः पत्युरीर्ष्याभावस्य विलोपनं, नायकस्य कौटुम्बिकजनानां स्वापनं, नायके श्रृंगारभावस्योत्पादनं च कृतानि। देवासुराणामिन्द्रजालपरायणता मायापूर्णाचरणं च विदितचरमेव।

बौद्धसाहित्ये मेण्डकपरिवारस्येन्द्रजालकथोपलभ्यते। तदनुसारमन्नवर्षया कोष्ठागारपूरणं भोजनशालायां सर्वश्रेष्ठपाकानामुपकल्पनम्, एककालेन सप्तसीताकर्षणं च साधि-

---

१. कामशास्त्रे ३.३.६।
२. कथ.सरित्सागरे १२.२५.१५.३०।
३. कथासरित्सागरे ?.?.??.?०।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तानि ।[१] कश्चिन्नटः स्वाङ्गानि परिच्छिद्य पुनः तानि संयोजयति स्म । दीघनिकाये तदानीन्तनेन्द्रजालमधोलिखितं वर्तते–जिह्वानिबन्धनम्, हनुसंहननम् आदर्श–प्रश्नः कुमारी-प्रश्नः, देव-प्रश्नः अम्युज्ज्वलनम् ।[२] गान्धारी-विद्यया एकस्मादनेकाः, अनेकभ्य एकश्च बभूवुः । चिन्तामणिविद्यया परेषां भावानां ज्ञानं क्रियते स्म ।[३] प्रज्वलिताग्नौ नटानां प्रवेशं कारयित्वा पुनर्जलेनाग्निं निर्वाप्य नटानां संजीवनमपि तेन प्रदर्शितम् ।[४]

रामायणमहाभारतानुसारं तपोमन्त्रतन्त्रैर्दिव्यास्त्रशस्त्राणां निर्माणं कृतम् । रावणो मायया सिंह-व्याघ्र-गृध्रकुक्कुर-कुक्कुटमुखान् बाणानसृजत् ।[५]

अर्थशास्त्रानुसारमौषधिप्रयोगेण मासपर्यन्तं निराहारजीवनयापनं शरीरस्य रंगस्य परिवर्तनम्, अग्निना शरीरस्याज्वलनं धूमाग्नीनां भक्षणमेकस्मिन्नेव दिने ५० योजनानि गमनं सम्भावितानि । ईदृशैः प्रयोगैः रात्रावपि दिनवद्दर्शनं शरीरस्यादर्शनत्वविधानं प्राणिनां प्रस्वापनं पिहितद्वारस्यानावरणं यथेच्छफलप्राप्तिकरणं च सम्पादितानि ।[६]

परवर्तियुगे कापालिकानामिन्द्रजालप्रदर्शनं श्रूयते । तेषां प्रदर्शनपरिधिः राजभवना-दारभ्य दीनकुटीरपर्यन्तं विस्तृतः । तद्यथा दशकुमारचरिते–'स च विद्येश्वरनामधेयोऽहमैन्द्रजालिकविद्याकोविदो विविधदेशेषु राजमनोरंजनाय भ्रमन्नुज्जयिनीमद्यागतोऽस्मि' इति शशंस । परेद्युः प्रभाते विद्येश्वरो रसभावरीतिगतिचतुरः परिजनताड्यमानेषु वाद्येषु नवत्सु, गायकीसु मदकलकोकिलामञ्जुलध्वनिषु मुकुलितनयनः क्षणमतिष्ठत् । तदनु विषमं विषमुल्बणं वमन्तः फणालंकरणा भोगिनो निश्चेरुः । गृध्राश्च तुण्डैरहिपतीनादाय दिवि समचरन् । ततोऽग्रजन्मा नरसिंहस्य हिरण्यकशिपोर्दैत्येश्वरस्य विदारणमभिनीय महदाश्चर्यान्वितं राजानमभाषत ।[७]

खीष्टतो दशमशताब्दे डाकिनीभिः स्त्रीभिः कृतानि बहुविधानि विस्मयजननानि वर्णितानि । वायौ संचरणम्, अदृश्यकरणं पुरुषस्य पशुरूपविधानं भित्तिदारणं च सुकराणि तासाम् ।

दृष्टिविभ्रमस्तु इन्द्रजालस्योपभेदो वर्तते । अनेन योगेन एकस्य वस्तुनो युगपदेव द्वे रूपे प्रकटिते । तद्यथा शिशुपालवधे—

कृतिभिः कृतदृष्टिविभ्रमाः स्रजमेके भुजगं यथापरे ॥१६.६८

---

१. महावग्गो ६.३४ ।
२. दीघनिकाये प्रथमभागे ब्रह्मजालसुत्ते
३. दीघनिकाये केवट्टसुत्तं ।
४. सुरुचिजातके ४८९ ।
५. लङ्काकाण्डे २७.४–२० ।
६. अर्थशास्त्रे प्रलम्भनभैषज्यप्रकरणे द्रष्टव्ये ।
७. दशकुमारचरितस्य [illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मल्लयुद्धम्

स्वाभाविकमेव मल्लयुद्धं मनोरंजनार्थं भवति। प्राचीनयुगे मानवा न केवलं परस्परमयुध्यन्त, अपि तु पशुभिरपि युद्धं कृत्वा शरीरबलस्य युद्धकलायाश्च परिचयं ददति स्म। सिन्धुसभ्यतायाः मल्लाः चित्रकैरयुध्यन्त। महाभारतीयमल्लयुद्धं भीमजरासन्धप्रकरणे विवृतम्। तथा हि--

करग्रहणपूर्वं तु कृत्वा पादाभिवन्दनम्।
कक्षैः कक्षां विधुन्वानावास्फोटं तत्र चक्रतुः॥
चित्रहस्तादिकं कृत्वा कक्षाबन्धं च चक्रतुः।
गलगण्डाभिघातेन स स्फुलिङ्गेन चाशनिम्॥
उभौ कटचां सुपार्श्वे तु तक्षवन्तौ च शिक्षितौ।
अधोहस्तं स्वकण्ठे तूदरस्योरसि चाक्षिपत्॥[१]

युद्धमिदं चतुर्दशदिवसानचलत्। स्त्रीपुरुषा बालवृद्धाश्च दर्शकाः समागताः।

ब्रह्ममहोत्सवे जनपदेभ्योऽगणितमल्ला राजधानीं समागताः। विजयिभ्यो उपहारधनं दीयते स्म। अप्रतिद्वन्द्वि महामल्लानां युद्धं व्याघ्रसिंहहस्तिवृषभादिभिरायोजितम्। केचिन्मल्ला दिग्विजयिनो बभूवुः। द्वन्द्वयुद्धं तु लोकप्रियमासीत्।[२]

परवर्तियुगेऽपि मल्लानामीदृशं युद्धं मल्लमहोत्सवे संयोजितम्। गोपानां नित्यमल्लयुद्धे क्रीडनं साधारणमेव।

पशूनां पारस्परिकयुद्धमायोजितम्। हस्ति-महिष-वृषाजकुक्कुट-लावादीनां युद्धस्य दर्शनाय बहुशो जनाः समापतिताः। चन्द्रगुप्तमौर्यस्य पशुयुद्धदर्शने महती रुचिर्बभूव। मल्लयुद्धे क्वचिन्मल्लाः पारितोषिकधनं प्राप्तवन्तः। एतादृशं मल्लयुद्धं प्रधनमिति ख्यातमासीत्[३]। विजयिनो ध्वजचिह्नानि प्राप्तवन्तः।[४]

वसन्तोत्सवः

हर्षोल्लासप्रकरणे मानवानां प्रकृत्या सह संगतिः स्वभावतः भवति। वसन्तस्तु मानवानां शृंगारवासनानामुद्दीपक इति शाश्वतं सत्यं वाल्मीकिना प्रतिपादितम्।[५] तत्परिलक्ष्यादिकविना राममधिकृत्य गीतम्—

१. सभापर्वणि एकविंशाध्यायतः।
२. विराटपर्वणि १३ अध्यायतः अर्थशास्त्रेऽपि ये जनपदे शूरास्त्यक्तात्मानो हस्तिनं व्यालं वा प्रतियोधयेयुः ते तीक्ष्णाः। आदि प० १२६.३०।
३. राजत० ८.१७०।
४. अविमारके
५. मधुर्माधवो वसन्त इति चैत्रवैशाखयोः वसन्तसंज्ञा।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मां हि पल्लवताम्रार्चिर्वसन्ताग्निः प्रधक्ष्यति ।
न हि तां सूक्ष्मपक्ष्माक्षीं सुकेशीं मृदुभाषिणीम् ।।
अपश्यतो मे सौमित्रे जीवितेऽस्ति प्रयोजनम् ।
अयं हि दयितस्तस्याः कालो रुचिरकाननः ।। किष्कि० १.३०-३१

वसन्तस्तु सर्वाणि श्रेष्ठमनोरञ्जनानि पोषयति । तथाहि—

मनोऽधिकं चात्र विलासलास्ये प्रेङ्खासु दोलासु च सुन्दरीणाम् ।
गीते च गौरीचरितावतंसे पूजाप्रपञ्चे च मनोभवस्य ।।
काव्यमीमांसायाम् १७ अध्याये

वसन्तोत्सवविधाने पुरा कामार्चनस्य स्थानं महत्त्वपूर्णमासीत् । स्त्रिय आम्रमंजरीं
धनुर्धराय कामदेवाय समर्पयन् । नागरिकाणां काममहोत्सवे तेषां सार्वजनिकं सामूहिकं
च चर्चरीसंगीतमभवत् । राजमार्गेषु स्त्रीपुरुषा वासन्तिकसौरभेणोन्मत्ताः वासन्तिकवेश-
धारिणो नृत्यसंगीतपरायणाश्च बभूवुः । वाराङ्गनाभिरपि नागरिकाणां मनोरंजनं कृतं
शृङ्गकजलप्रहारादिभिः । मदनोद्याने पुष्पावचय-मालागुम्फन-नृत्य-संगीतादीनि समायो-
जितानि ।

वसन्तोत्सवे कदाचित् परिहासपूर्णायोजनानि कृतानि दुर्ललितैर्जनैः । तद्यथा बाणेन
समर्थितम्—वृद्धधार्मिकस्य कस्यचिद्विवाहः कयाचिद् वृद्धया सह भग्नशय्यायामेव सम्पन्नः ।

पौराणिकधारणानुसारं चैत्रशुक्लद्वादश्यां रतिकामयोरावाहनं कृत्वा नृत्यगीतादिभिः
तयोः पूजा कृता; विष्णुकामदेवविषयककथाः श्रुताश्च । तदा काम एव जनार्दनः सर्वेषां
कल्याणाय प्रार्थितः । अपरं च फाल्गुनशुक्लपूर्णिमायां कामस्य प्रदाहः क्रियत इति कति-
पयपुराणानां सम्मतम् ।

कौमुदीमहोत्सवः

कौमुदीमहोत्सवः कार्तिकमहोत्सवो वा ऋतुसौष्ठववैशिष्ट्यात् राष्ट्रियमहोत्सवः समा-
योजितः। सन्ध्यागमे नागरिकदम्पती गृहाद् बहिर्गतौ रात्रिपर्यन्तं कौमुदीमहोत्सवानन्दमन्व-
भवताम् ।

तद्यथा मुद्राराक्षसे—

धूर्तैरन्वीयमानाः स्फुटचतुरकथाकोविदैर्वेशनार्यो
नालंकुर्वन्ति रथ्याः पृथुजघनभराक्रान्तिमन्दैः प्रपातैः ।
अन्योन्यं स्पर्धमाना न च गृहविभवैः स्वामिनो मुक्तशंकाः
साकं स्त्रीभिर्भजन्ते विधिमभिलषितं पार्वणं पौरमुख्याः ।। ३.१०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजानस्तु समागता दिव्यवेषधरा चित्रराजयज्ञसमीपं पुष्पसज्जितं चित्रितबाणं क्षिपन्ति स्म ।

पौराणिकयुगे आश्विनपूर्णिमायां लक्ष्मीः पूजिता । दिनकाले व्रतपरायणा जनाः सन्ध्यायां स्वर्ण-रजत-मृत्तिकादीनां शतदीपकान् प्रज्वालयन्ति स्म । पश्चात् घृतशर्करा-समायुक्तक्षीरोदनं रजतपात्रे चन्द्रिकायां प्रहरपर्यन्तं निधाय तेन द्रव्येण लक्ष्म्या आराधनं कृतवन्तः। पश्चात् मांगलिकसंगीतमायोजितम् । तदानीन्तनधारणानुसारं निशीथे विचरन्ती लक्ष्मीः पूजापरायणेभ्यो जनेभ्यो महदैश्वर्यं प्रददाति ।

रामायणानुसारमाश्विनपूर्णिमायामिन्द्रमहोत्सवः सम्पादितः ।

देवोत्सवो यज्ञोत्सवश्च

मानवानामिव देवानामपि नाट्य-नृत्यसंगीतवाद्यादिभिर्विनोदः संकल्पितः । वैदिक-युगे यज्ञावसरे गाथागायनसमारम्भे वीणावादनं कृतम् । वाजपेययज्ञे रथधावनमायोजि-यम् । रामायणमहाभारतानुसारं कथानृत्यगीतवाद्यादीनामायोजनं समागतानां जनानां मनोरंजनायाभूत् । एभिरायोजनैर्नकेवलं मानवानाम्, अपितु देवानामपि मनोरंजनं विधेय-मिति तेषां यज्ञस्यानिवार्याङ्गता प्रकटयति ।

वैदिकयुगस्य पश्चात् पूजाया लोकप्रियत्वमवर्धत । पूजानां समारम्भः क्वचिदुत्सव-रूपेण कृतः । ईदृशेषूत्सवेषु महाभारतकाले राज्ञा परिचरेणेन्द्रमहोत्सवः प्रवर्तितः। अस्मि-न्नुत्सवे यष्टिरेका भूमौ संस्थापिता । सा इन्द्रयष्टिरिति समाख्याता । यष्टिर्वस्त्रगन्धमाल्या-लङ्कारैर्विभूषिता । तस्याः समीपं हंसरूपेण भगवत इन्द्रस्य पूजा कृता । अनेन समारम्भेण राष्ट्रे श्रीः विजयश्च सङ्कल्पितौ । जैनसाहित्यानुसारं सप्तदिवसपर्यन्तं विविधमनोरंजन-समायुक्त इन्द्रमहोत्सवोऽभूत् । इन्द्रध्वजः संस्थापितः । पूर्णिमायां स्वयं राजा ध्वजस्य पूजां कृतवान् । कुमार्यो बलिपुष्पादिभिरिन्द्रपूजां कृत्वा सौभाग्याय प्रार्थयन्त ।

पौराणिकयुगे पुरग्रामेषु शरदि देवेन्द्रमहोत्सवोऽनुष्ठितः । व्रजप्रदेशे कृष्ण इन्द्रमहोत्स-वस्थाने गोवर्धनपूजां सन्धारितवान् । अपरेऽपि देवोत्सवाः स्कन्दनागमुकुन्दादीनां कृते समारब्धाः । उत्सवेषु रथयात्रा सज्जिता ।

अशोकस्य धर्मयात्रा विख्याता बुद्धानुयायिनाम् । परवर्तियुगे गौतमबुद्धस्याराधनाय सुशोभना रथयात्रा कल्पिता । तस्मिन्नवसरे दीनहीनरुग्णादीनां सहायता सविशेषं कृता । देवोत्सवमधिकृत्य प्रायो नाट्याभिनय आयोजित इति रूपकाणां भूमिकातः प्रमाणितम् ।

भागवतानुसारं यज्ञावसरे मनोविनोदानां समाहार एवासील्लोकानां प्रमोदाय ।[1]

---

१. भागवते १०.७५.१०, १४, १५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बालक्रीडा:

शिशूनां मनोरंजनानि प्राय: सर्वेषु युगेषु बहुविधानि बभूवु:। स्वभावतः शिशवो विनोदप्रियाः। तेषां मनोरंजनानि महार्घाणि न भवन्ति। अतः सर्वदा सर्वत्र च झटिति मनोविनोदायापेक्षितानि वस्तूनि तेभ्यः संयोज्यन्ते। वृद्धानामनुकरणं बालानां शाश्वत-क्रीडास्ति।

सिन्धुसभ्यतायुगे शिशूनां बहुविधानि मृण्मयानि क्रीडनकानि बभूवुः। चलशिरा बलीवर्दः, रज्जुद्वारा नीचैरुपरि गच्छन् वानरः, शकटः, पक्षिसदृशः शोरकृत्, पिञ्जराधीनः पक्षी, झणझणकृत्, वामनश्च मृण्मयाः कृताः। अपरेषामपि पशुपक्षिणां बहुविधानि मनोरंजकानि मृण्मयस्वरूपाणि निर्मितानि। क्रीडनकानां बाहुल्येन तेषां लोकप्रियता प्रतिभाति। कतिपयक्रीडनकानि बालैः रचितानीति प्रतिभाति।

बालानां मनोरंजनं सूत्रबद्धपक्षिणामुत्पतनेन, तृणसर्पेणान्येषां भयजननेन च बभूव। क्रीडायै वामनाकाराः पशुपक्षिणो निर्मिताः। अश्वघोषानुसारं राजकुमारगौतमस्य क्रीडायै स्वर्णमयानिक्रीडनकानि दत्तानि। तद्यथा बुद्धचरिते—

मृगप्रयुक्तान् रथकांश्च हैमानाचक्रिरेऽस्मै सुहृदालयेभ्यः।
वयोऽनुरूपाणि च भूषणानि हिरण्मयान् हस्तिमृगाश्वकांश्च।
रथांश्च गोपुत्रकसंप्रयुक्तान् पुत्रीश्च चामीकररूप्यचित्राः॥ २.२१-२२

कन्याः पुलिनसिकतासु गोपितमणीनामन्वेषणं क्रीडायै कुर्वन्ति स्म। मृगशावैर्बालकानां सदा क्रीडा भवति। दुष्यन्तकुमारस्य भरतस्य सिंहशावकैः क्रीडा सुविदिता।

भागवते बालकृष्णलीलाः साङ्गोपाङ्गं वर्णिताः। गोपबालाः सुरभिसम्पन्नवनभूमिषु वेणुवंशिकादिभिः संगीतायोजनं कुर्वन्ति स्म। तद्यथा—

प्रवालबर्हस्तबकस्रग्धातुकृतभूषणाः।
रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः॥
कृष्णस्य नृत्यतः केचिज्जगुः केचिदवादयन्।
वेणुपाणितलैः शृङ्गैः प्रशशंसुरथापरे॥
भ्रामणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः।
चिक्रीडतुर्नियुद्धेन काकपक्षधरौ क्वचित्॥
क्वचिद् बिल्वैः क्वचित्कुम्भैः क्व चामलकमुष्टिभि
अस्पृश्यनेत्रबन्धाद्यैः क्वचिन्मृगखगेहया॥
क्वचिच्च दर्दुरप्लावैर्विविधैरुपहासकैः।
कदाचित् स्पन्दोलिकया कर्हिचिन्नृपचेष्टया॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं तौ लोकसिद्धाभिः क्रीडाभिश्चेरतुर्वने ।
नद्याद्रिद्रोणकुञ्जेषु काननेषु सरस्सु च ॥[1]
यदि दूरं गतः कृष्णो वनशोभेक्षणाय तम् ।
अहं पूर्वमहं पूर्वमिति संस्पृश्य रेमिरे ॥
केचिद्भृङ्गैः प्रगायन्तः कूजन्तः कोकिलैः परे ।
विच्छायाभिः प्रधावन्तो गच्छन्तः साधु हंसकैः ॥
बकैरुपविशन्तश्च नृत्यन्तश्च कलापिभिः ।
विकर्षन्तः कीशबालानारोहन्तश्च तैर्द्रुमान् ।
विकुर्वन्तश्च तैः साकं प्लवन्तश्च पलाशिषु ॥
साकं भेकैर्विलङ्घन्तः सरित्प्रस्रवसम्प्लुताः ।
विहसन्तः प्रतिच्छायाः शपन्तश्च प्रतिस्वनान् ॥[2]
क्वचिच्च कलहंसानामनुकूजति कूजितम् ।
अभिनृत्यति नृत्यन्तं बर्हिणं हासयन्क्वचित् ॥
चकोरक्रौञ्चचक्राह्वभारद्वाजांश्च बर्हिणः ।
अनुरौति स्म सत्त्वानां भीतवद् व्याघ्रसिंहयोः ॥[3]
क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् ।
क्वचित्पादैः किंकिणीभिः क्वचित् कृत्रिमगोवृषैः ॥
वृषायमाणौ नर्दन्तौ युयुधाते परस्परम् ।
अनुकृत्य रुतैर्जन्तूंश्चेरतुः प्राकृतौ यथा ॥[4]
एवं विहारैः कौमारैः कौमारं जहतुर्व्रजे ।
निलायनैः सेतुबन्धैर्मर्कटोप्लवनादिभिः ॥[5]

कन्यकानां क्रीडाः क्रीडनकानि च प्रायो बालकेभ्यो भिन्नानि बभूवुः । तासां कन्दुकक्रीडा क्वचित्सनृत्याभवत् । पंचालिकाभिः कन्यकानां क्रीडनं विशिष्टमेव । मालाविरचनम्, मृत्तिकाकाष्ठादीनां गृहनिर्माणम्, मृत्तिकादीनामेवान्नरूपपाचनं तासां शिल्पात्मकं मनोरंजनमभूत् ।

पार्वणोत्सवाः

पार्वणोत्सवा मासानां नियततिथिषु समायोजिताः । तथा हि-आश्विनस्य कार्तिकस्य

१. भागवते १०.१८ ।
२. भागवते १०.१२ ।
३. भागवते १०.१५.११,१३ ।
४. भागवते १०.११.३९,४० ।
५. भागवते १०.११.५९ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वा प्रथमदिवसे यक्षरात्रिरित्युत्सवो यक्षाणां तत्र सन्निधानात् प्रसिद्धः। अस्मिन्नुत्सवे लोकानां प्रायो द्यूतक्रीडा बभूव। कौमुदीजागर आश्वयुज्या पौर्णमास्यां दोला द्यूतप्रायाः क्रीडा बभूव। सुवसन्तकः मदनोत्सव एव वसन्तागमे समायोजितो नृत्यगीतवाद्यप्रायोऽभवत्।

पार्वणोत्सवेषु कपिपया देश्या बभूवुः। तथा हि—सहकार-भञ्जिका- क्रीडायां प्रायो मगधेषु सहकारफलानां भञ्जनमक्रियत। अभ्यूषखादिकायां चणकादिफलानां विटपस्थानां प्लोषितानां वाशनमभवत्। अयमुत्सवः कृषिप्रदेशेषु प्रचलितः। एवमेव विसखादिकायां सरःसमीपवासिनो मृणालानि खादन्ति स्म। नवपत्रिकायां प्रथमवर्षणेन प्ररूढनवपत्रासु वनस्थलीषु क्रीडा बभूव। प्रायेण मध्यदेश्यानामाटविकानामुदकक्ष्वेडिका बभूव। एतस्यामुदकपूर्णक्ष्वेडा कृता। सा एव शृङ्गक्रीडा आधुनिकयुगे होलिकेति प्रसिद्धा। प्रायशो मिथिलायां पाञ्चालानुयानमिति पुत्तलिकाविवाह-क्रीडा प्रचलिता। विदर्भे शाल्मलिविनोदः प्रचलितः। तत्र कस्यचित् महाशाल्मलेराश्रये लोकानां कुसुमाभरणक्रीडा बभूव। पाश्चात्त्येषु यवचतुर्थीविनोदे वैशाखशुक्लचतुर्थ्यां नायकानां सुगन्धयवचूर्णक्षेपेण विनोदोऽभवत्। श्रावणशुक्लतृतीयायां हिन्दोलक्रीडा समायोजिता चैत्रसितचतुर्दश्यां मदनोत्सवे क्वचिन्मदनस्य मूर्तिः पूजिता। दमनभञ्जिकायां परस्परं दमनकपुष्पावतंसनं चैत्रसितद्वादश्यां कृतम्। फाल्गुनपूर्णिमायां शृङ्गकादिमुक्तेन किंशुकादिकुसुमानां रागाम्भसा परस्परोक्षणं 'होलाका' इति प्रसिद्धासीत्। तत्र पटवासप्रक्षेपश्चाभवत्। अशोकोत्तंसिकायामशोकपुष्पैः चैत्रसिताष्टम्यां शिरोभूषणरचना कृता। पुष्पावचायिकायां पुष्पाणि संचितानि। चूतलतिकायां चूतपल्लवावतंसनं सम्पादितम्। इक्षुभञ्जिकायमिक्षुखण्डमण्डनं कृतम्। कदम्बयुद्धे कदम्बकुसुमैः प्रहरणं लोका द्विधा विभज्य कुर्वन्ति स्म। दीपावलेः पश्चात् राजभवनप्राङ्गणे यष्टिका-कर्षणोत्सवे बाला द्विवर्गीया कुशकाशस्य रज्जोः कर्षणं कुर्वन्ति स्म। शरदि महानवम्यां राज्ञां मनोरञ्जनपूर्णमुत्सवोऽभवत्—

महानवम्यां निखिलास्त्रपूजानीराजनावाजिभटद्विपानाम्।
दीपालिकायां विविधा विलासा यात्रोन्मुखैरत्र नृपैर्विधेयाः॥ काव्यमी० १७अध्यायतः

विविधमनोरंजनानि

अपराण्यपि बहूनि मनोरंजनानि प्रचलितानि बभूवुः। वैदिकयुगेऽश्वारोहाणां प्रतियोगिता 'आजिः' इति विख्याता। रथधावनमपि प्रतियोगितारूपेणायोजितम्। तदा प्रेङ्खान्दोलनं मनोरंजनरूपेण प्रचलितम्।

परवर्तियुगे सुरानक्षत्रोत्सवे मण्डपे समागता नागरिका यथेच्छं पानं कुर्वन्ति स्म। रेखाकूर्दनं कृत्रिमहल्लकर्षणप्रतियोगिता विलुठनं वायुचक्रिकानिर्माणं शरसन्धानम्, भङ्ग-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लिप्रहारेण मर्मरोत्पलक्षेपणं मुष्टिप्रहरणं च विनोदा असंयतानां भिक्षूणामपि बभूवुः ।[१] राज्ञा प्रवर्तिते मंगलोत्सवे प्रजाभ्यो बहुविधानि मनोरंजनानि कल्पितानि । सर्पक्रीडाकारिणः, वानरिकाश्च क्रमशः सर्पनर्तनं वानराभिनयं च दर्शयन्ति स्म । लंघनटाः शक्तिलंघनं कुर्वन्ति स्म । अतिशयवेगेन कूर्दनं धावनमास्कन्दनं च सार्वजनिकमनोरंजनाय प्रदर्शितानि ।

मनोरंजनप्रसङ्गे गणिकानां गणना कर्तव्यैव । गणिकावासस्तु पुरा नागरकसंस्कृतेरनुत्तमं केन्द्रं बभूव । नासीत् सा वेश्या यतो हि नाम वेश्या तु सदैव परित्याज्येति सम्मतम् । गणिका तु कुलीनैरपि नागरकैः संग्राह्यासीत् । राजभी राजधानीषु राजगणिका नियुक्ताः । ता राजकोशाभिवृद्धये बभूवुः ।

अर्थशास्त्रे वाग्जीवनप्लवक-सौभिक-चारणादयोऽपरे मनोरंजनकारिणो बभूवुः । तदा सार्वजनिकमनोरंजनाय क्रीडागृहा निर्मिताः शिल्पानां प्रदर्शनेन प्रजानां मनोरंजनं राज्ञायोजितम् ।

गुप्तयुगे दोलोत्सवस्य विशेषप्रचारोऽभवत् । दोलायमाना शय्या लम्बिता । सारिकाभिः सह वार्तालापेन मयूरनर्तनेन च स्त्रीणां मनोरंजनमभूत् । खीष्टतः पश्चात् सप्तमे शतके शुकसारिकादीनां विवाहायोजनं कृतं विनोदाय । नकुलिका तु राजकुमारीणामङ्के शयितवती । अन्तःपुरे मृगशावकाः पालिताः । क्रीडापर्वते चकोरदम्पती सन्निवेशितौ । वनमानुषी राजकुले मनोरंजनाय बभूव । अपरेऽपि कलहंस-मयूर-चक्रवाक-कोकिल-हारीत-चकोराः कुब्जकिरातनपुंसकबधिरवामनमूकाः मेषसिंहाश्च मनोरंजनाय राजकुले रक्षिताः ।[२] समाजे विषमप्रकृतयः कतिपयजनाः सदैव सार्वजनिकमनोरंजनाय भवन्त्येव । तदधिकृत्य कादम्बर्यां जरद्द्रविडधार्मिकस्य कथाऽमरीकृता बाणेन ।[३]

परवर्तियुगेऽश्वक्रीडायाः प्रचलनं समवर्धत । अश्वारोही विविधप्लुतिभंग्या दर्शकानां मनोरंजनमकरोत् । तदधिकृत्य सोमदेवेन लिखितम्—अत्यर्थं हयविनोदोऽङ्गभंगमनापाद्य न तिष्ठति ।[४] अपरं च वाजिवाह्यालीविनोद आधुनिक 'पोलो' वदासीत् । रज्जौ शरीरसंस्थानं कृत्वा गोलिकाभिः क्रीडाः कृताः । अष्टापदं चतुरंगं (शतरंज) चतुस्सारिः (चौसर) भारतादेव अरबदेशं ततः योरपदेशं च गते ।[५] काष्ठपुत्तलिकानां नृत्यं नाट्यं कथाकरणं च प्रायशः मनोरंजनमभूत् । एतदर्थं दारुमयी नारी यन्त्रमयो मृगश्च प्रयुक्तौ[६]

---

१. चुल्लवग्गो १.१३.१-२ ।

२. कादम्बर्यां ८९, १८८, ३१६ पृष्ठेषु।

३. कादम्बर्यां २२६-२२८ पृष्ठेषु ।

४. वाक्यामृते प्रकीर्णकसमुद्देशात् ।

५. सौन्दरनन्दे १·३२ अरब और भारत का सम्बन्ध १४९-१५७ ।

६. यथा दारुमयी योषा नरवीरसमाहिता । ईरयत्यङ्गमङ्गानि तथा राजन्निमाः प्रजाः ॥ वन० ३०·२३ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाभारतीया वीटा-क्रीडा आधुनिक 'हाकी'-समाभवत्।[१]

मनोरञ्जन-वैषम्यम्

पुरा भारतीया मनोरञ्जनानां वैषम्यमपि सम्यग् जानन्ति स्म। द्यूततान्तानां नलयुधिष्ठिरादीनां वृत्तं तु विदितचरमेव। अपराण्यपि मनोरञ्जनानि व्यसनभूतानि लोकान् संहरन्ति' इति क्षेमेन्द्रेण सुष्ठु प्रतिपादितमधोविधिना—

नटनर्तकचक्रचराः कुशीलवाश्चारणा विटाश्चैव।
ऐश्वर्यशालिशलभाश्चरन्ति तेभ्यः श्रियं रक्षेत्॥ कलाविलासे। ७.२५

अतएव ब्रह्मसंस्कृतिपराणां कृते गायनं नर्तनं वा निषिद्धमासीत्। २

१. आदिपर्वणि १२२,१२।
२. ब्राह्मणो नैव गायेन्न नृत्येत्। गोपथब्राह्मणे २.२१।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजतन्त्रम्

सर्वेषु समाजेषु प्रजानां शासनस्यावश्यकता प्रत्यक्षं विद्यते। शासनस्य मूलस्रोतः पुरा राजा बभूव। राजकीयव्यवस्थाया विपुलपरिधौ—प्रजापरिपालनं धर्मसंस्थापनं पापानां निग्रहणं शान्तिव्यवस्था सत्प्रवृत्तीनां समाधानं च शाश्वतरूपेणान्तर्भूतानि सन्ति।

राजकर्मपरिधिः

वैदिककालत एव राजकर्मपरिधिः सुविपुलोऽभवत्। वैदिकसंस्कृतेः प्रथमसम्राजौ वरुण इन्द्रश्च बभूवतुः।[1] वरुणस्य कार्यवृत्तिभी राज्ञो नित्यकार्याणि प्रतीयन्ते। तद्यथा—प्रजाकल्याणम्, तासां विपत्ते रक्षणम्, तासामभ्युदयः, पापानां दण्डाधानम्, ऋतस्य प्रतिष्ठापनं चेति राज्ञः कर्तव्यानि वरुणादर्शानुसारं सन्ति।[2] इन्द्रस्य कार्योद्योगेन राज्ञः पराक्रमा आदर्शीभूताः। तद्यथा शत्रुभिर्युद्धम्, पापानां विनाशनम्, दस्यु-विजयः, आर्याणामुत्थापनं चेति राज्ञः कर्तव्यानि निश्चीयन्ते।[3]

महाभारते संक्षेपेण राजकीयव्यवस्थायाः परिधिः वर्णितः—

यज देहि प्रजां रक्ष धर्मं समनुपालय।
अमित्रान् जहि कौन्तेय मित्राणि परिपालय॥ शा० १५.५३

प्रजानामभ्युदयाय महाभारतयुगे राजा प्रजावृत्तं निवेदयितुं चारान् नियुक्तवान्, राजमार्गाणां निर्माणं कृतवान्, रोगिणामुपचारे वैद्यान् अधिकृतवान्, नागरिकाणां मनोरंजनार्थं नटमल्लादीन् व्यापारितवांश्च। युधिष्ठिरमधिकृत्य तत्रैव प्रोक्तम्—

दीनान्धकृपणानां च गृहाच्छादनभोजनैः।
आनृशंस्यपरो राजा चकारानुग्रहं प्रभुः॥ शा० ४२.११

अन्यत्रापि

असुखानामनाथानां तिर्यग्योनिषु वर्तताम्।
स एव राजा भूतानां सर्वेषामभवत् पिता॥आदि० ९४.१६

---

१. ऋग्वेदे ११.१७.१;४.४२.३;१.२४.१२-१३;१.६५.७;६.६८.९;८.१६.१।
२. ऋग्वेदे ५.८५.३;१.२५.१०;२.२८.१०;८.६।
३. ऋग्वेदे १.३२।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रभविष्णुरासीत् पुरातनो राजा । महाभारतानुसारं तु

राजा कृतयुगस्रष्टा त्रेतायां द्वापरस्य च ।
युगस्य च चतुर्थस्य राजा भवति कारणम् ॥ शान्ति० ६९.९८

तस्मिन्युगे राष्ट्रस्यौद्योगिकाभ्युदयाय राज्ञः प्रयत्नः श्लाघ्योऽभवत् ।

अर्थशास्त्रानुसारं राज्ञः कर्मसु दण्डस्य विधानं प्रधानं बभूव ।[1]

चतुर्वर्णाश्रमो लोको राजदण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वर्त्मसु ॥ १.४.१९

राष्ट्रस्य प्रायशः सर्वासामाधिभौतिकप्रवृत्तीनां नियन्त्रणाय विविधानां विभागानामध्यक्षा नियुक्ताः । राजा प्रजाः पीडकेभ्यः सर्वथारक्षत् । अर्थशास्त्रे राजा धर्मप्रवर्तकोऽभिमतः । नववसतयो राजभिः कारिताः ।

उपर्युक्तराजकर्मणां व्यवस्था प्राचीनानामैतिहासिकराजानामितिवृत्तेषु लभ्यते । तद्यथा—अशोकस्य धर्मविजयो धर्मयात्रा च सुविदितौ । धर्ममङ्गलादर्शेन स सर्वेषां प्राणिनां समादरं प्रतिष्ठापितवान् । स सर्वेषां सम्प्रदायानां पारस्परिकसहिष्णुताभावं व्यक्तीचकार । अशोकः सामाजिकजीवनस्यादर्शप्रतिष्ठां विन्यस्तवान् । तथा हि—तत एवं देवानां प्रिय आह—मातापितरौ शुश्रूषितव्यौ, गुरुत्वं प्राणेषु द्रढयितव्यम् । सत्यं वक्तव्यम् । ते इमे धर्मगुणाः प्रवर्त्तयितव्याः । एवमेव अन्तेवासिना आचार्योऽपचेतव्यः । ज्ञातिकेषु च कुले यथार्हं प्रवर्तयितव्यम् । एषा पुराणी प्रकृतिः दीर्घायुषे च । एतत् एवम्—एतत्कर्तव्यं च ।[2] न केवलं भारतेऽपितु विदेशेष्वपि स मनुष्यचिकित्सायाः पशुचिकित्सायाश्च व्यवस्थां कारितवान् । स्वराष्ट्रे स मार्गेषु छायाप्रदान् वृक्षान्, जलाशयान् विश्रामगृहान् च व्यवस्थापितवान् । सौराष्ट्रप्रदेशे सुदर्शनतडागस्य रचनसंस्करणादिकर्मणो यशश्चन्द्रगुप्तमौर्याशोक-रुद्रदाम-स्कन्दगुप्तादीनां राज्ञां विदितचरमेव ।[3] सार्वजनिकोपयोगिताया अपरा अपि बहवः संस्थाः पुरा राजभिःप्रवर्तिताः सञ्चालिताश्च ।

प्रजाभिः समागमो राज्ञः सदैव कर्तव्यमासीत् । कश्मीराणां राजा हर्षस्तु—

सिंहद्वारे महाघण्टाश्चतुर्दिक्कमवन्धयत् ।
ज्ञातुं विज्ञप्तिकामान्स प्राप्तांस्तदाद्यसंज्ञया ॥
आर्तां च वाचमाकर्ण्य तेषां तृष्णानिवारणम् ।
प्रावृषेण्यः पयोवाहश्चातकानामिवाकरोत् ॥ राजत० ७.८७९-८८०

---

१. दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदुर्बुधाः ॥ मनु ७.१८

२. अशोकस्य ब्रह्मगिरौ द्वितीये शिलालेखे

३. परवर्तियुगे कश्मीरस्य राजा हर्षो विशालं पम्पासरोवरं कारितवान् । राजत० ७.९४०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कवीनां दार्शनिकानां कलाकाराणां चैकाश्रयः पुरा राजा बभूव । अश्वघोषः, कालिदासः, बाणः, भवभूतिः, वाक्पतिः, राजशेखरः, हेमचन्द्रः, बिल्हणश्चेदृशा राजसमाश्रिताः कवयो बभूवुः ।

प्रजानां विपत्तीनां निवारणाय राजानः सदैवोद्योगपरायणा बभूवुः । ते प्रायः युद्धभूमिषु राष्ट्ररक्षार्थं अग्रस्थानमलंचक्रुः । बहवो राजानः स्वयं प्रजानां दशां ज्ञातुं ग्रामाद् ग्रामं पर्यटन्ति स्म । तेषां तात्कालिकचेष्टाभिः प्रजानां सुखमुदभवत् ।

कश्मीराणां राजभिः राष्ट्रस्य सांस्कृतिकविकासाय बहु कृतम् । तथा हि राजा हर्षः प्रजां सुवेशधारिणीं कृतवान् । अपरेभ्यो देशेभ्यो विदुषोऽभिमन्त्र्य राजा जलौकः कश्मीरे तान् न्यवेशयदग्रहारांश्च विदधे । मेघवाहनस्तत्र जीवहिंसां निषिद्धवान् । कतिपयनृपैरौषधालयाः स्थापिताः ।

सुदूरप्राचीनकाले शिक्षाया व्यवस्थाचार्याणामाश्रमेषु बभूव । ते आचार्याः कदाचिदेव राजसहायतां वाञ्छन्ति स्म । किन्तु कालान्तरे शिक्षायाः प्रकामविस्तारे भूते राजकीयसहायताया अपेक्षा बभूव । राजानोऽपि शिक्षाप्रसाराय समुत्सुका बभूवुः । राजभिः संचालिता बहवः शिक्षणसंस्था बभूवुः । शिक्षाभवनानि राजभिर्निर्मापितानि । नालन्दाविश्वविद्यालयस्य प्राङ्गणेऽधुनापि तेषां राज्ञां कीर्तिर्दर्शनीया ।

कश्मीर-प्रदेशे महाराजजयापीडस्य सर्वविद्याप्रसारार्थं महान् प्रयत्नोऽभवत् । तथा हि--

> उत्पत्तिभूमौ देशेऽस्मिन् दूरदूरतिरोहिता
> कश्यपेन वितस्तेव तेन विद्यावतारिता ॥ ४.४८६
> देशान्तरादागमय्य व्याचक्षाणान् क्षमापतिः
> प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥ ४.४.८८

राज्ञः कर्मपरिधिः संक्षेपेण वर्णाश्रमधर्मरक्षापरं बभूव । तदनुसारं सर्वे वर्णाश्रमिणो निजाभ्युदयं कर्त्तुं राजकीयसंरक्षणमपेक्षन्ते इति स्पष्टम् । राज्ञः प्रयत्नेन ब्रह्मचारिणः शिक्षां प्राप्तवन्तः, गृहस्था उद्योगपरायणाः सुखेन समृद्धिं प्राप्तवन्तः, वानप्रस्था वनानां शान्तपरिसरे तपसः तत्त्वज्ञानस्य च संवर्धनं कुर्वन्ति स्म, संन्यासिनोऽपि सर्वत्र प्रचारक्षेत्रमनुभवन्ति स्म । सर्वेषां वर्णानां स्वकीयोद्योगेषु नियोजनं तत्रत्यबाधानां निवारणं च राज्ञः कर्तव्यमासीत् ।[2] तत् परिलक्ष्य कालिदासेनामरवाक्यमुद्घाटितम्--

---

१. मनु० ७.४-५

२. परीक्षिद्विषये महाभारते प्रोचितम्—
चातुर्वर्ण्यं स्वधर्मस्थं स कृत्वा पर्यरक्षत । आदि० ४५.७
आदिपर्वणि [illegible]
दीघनिकाये कुटदन्तसुत्ते १.५ राज्ञ एतादृशं कर्तव्यं समीहितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रजानां विनयाधानाद्रक्षणाद् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ॥

राज्ञो गुणसम्पत्

'यथा राजा तथा प्रजा' इति सिद्धान्तानुसारं राज्ञो चरित्रस्य राजतन्त्रेऽतिशयमहत्त्वं विद्यते । भारतीयराज्ञः स्वरूपं दिव्यं भवतीति मनुना पर्यालोचितम्[१] । वैदिककालतः भारते राजा इन्द्रविष्णुवरुणादीनां देवानां प्रतिनिधिरमन्यत । इन्द्रादर्शमनुसृत्य राजा विजेता बभूव । वरुणादर्शमनुसृत्य स न्यायपरायणोऽभवत् । विष्णोरादर्शमनुसृत्य राजा प्रजापालकश्चाभवत् । वैदिककालस्य राज्ञो व्यक्तित्वमुदात्तमासीदिति प्रमाणितमाप्तवचनैः—

ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति । अथर्व० ११.५.१७
सिंहप्रतीको विशो अद्धि सर्वा व्याघ्रप्रतीकोऽवबाधस्व शत्रून् ॥ अथर्वं० ४.२२.७

उपनिषत्कालस्य कतिपयनृपा जनकाजातशत्रुप्रमुखाः परमदार्शनिका बभूवुः । राजकुमाराः साधारणच्छात्रसमाना एव वेदविद्यानां शिल्पविज्ञानकलादीनां शिक्षां गृह्णन्ति स्म[१] । अर्थशास्त्रानुसारम्—विद्यानां तु यथास्वमाचार्यप्रामाण्याद्विनयो नियमश्च । वृत्तोपनयनः त्रयीमान्वीक्षिकीं च शिष्टेभ्यो वार्तामध्यक्षेभ्यो दण्डनीतिं वक्तृप्रयोक्तृभ्यः । ब्रह्मचर्यं चाषोडशाद्वर्षात् । नित्यश्च विद्यावृद्धसंयोगो विनयवृद्ध्यर्थं तन्मूलत्वाद्विनयस्य । पूर्वमहर्भागं हस्त्यश्वरथप्रहरणविद्यासु विनयं गच्छेत् ।[२] पश्चिममितिहासश्रवणे । पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रमर्थशास्त्रं चेतोतिहासः । शेषमहोरात्रभागमपूर्वग्रहणं गृहीतपरिचयं च कुर्यात् ।

विद्याविनीतो राजा हि प्रजानां विनये रतः ।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः ॥ विनय० पंचमाध्यायात्

महाभारतानुसारं तु—

---

१. महासीलवजातके ५१, पंचावुधजातके ५५, तिलमुट्ठिजातके २५२ ।
२. विनयस्य परमोदाहरणं कल्हणेन प्रस्तुतं राजकुमारस्य शंकरवर्मण उक्त्या—
सोऽहं धर्मे महद्धर्म शीते दत्त्वाच्छमंशुकम् ।
पदातिरपपादत्रः पित्रा संचारितोऽभवम् ॥ ५.१९६
मृगव्यादौ हयैः सार्धमटन्तं कण्टकक्षतम् ।
अन्तर्बाष्पं मां विलोक्य तमसूयिषुरग्रगाः ॥ ५.१९७
सतानुवाच सामान्यो भूत्वाहं राज्यमाप्तवान् ।
काले काले सेवकानां जाने सेवापरिश्रमम् ॥ ५.१९८
ईदृग्दुःखमयं भुक्त्वा शास्त्यत्यन्यथां भुवम् ।
प्राप्तेश्वर्यो भवेन् मूढो ... ॥ ५.१९९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सङ्ग्रहश्चैव भूतानां दानं च मधुरा च वाक् ।
अप्रमादश्च शौचं च राज्ञो भूतिकरं महत् ।। शान्तिपर्वणि ९२.५०

दातारं संविभक्तारं मार्दवोपगतं शुचिम् ।
असंत्यक्तमनुष्यं च तं जनाः कुर्वते नृपम् ।।
यस्तु निःश्रेयसं श्रुत्वा ज्ञानं तत् प्रतिपद्यते ।
आत्मनो मतमुत्सृज्य तं लोकोऽनुविधीयते ।। शान्ति० ९४.२७-२८

अहो महती विभूतिर्वर्तते कतिपयनृपाणां प्रजापरित्राणार्थम् । दुर्भिक्षे समापतिते कश्मीरराजस्तुञ्जीनोऽपरो विष्णुरिवाभवत् । तथा हि राजतरंगिण्याम्--

सपत्नीको निजैः कोशैः संचयैर्मन्त्रिणामपि ।
क्रीतान्नः स दिवारात्रं प्राणिनः समजीवयत् ।। २.२८

अटवीषु श्मशानेषु रथ्यांश्चावसथेषु च ।
क्षुत्क्षामः क्ष्माभुजां तेन नहि कश्चिदुपैक्ष्यत् ।। २.२९

मन्वनुसारं चान्द्रव्रतिको नृप आदर्श एव प्रतिभाति । तद्यथा--

परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः ।
तथा प्रकृतयो यस्मिन्स चान्द्रव्रतिको नृपः ।।

पार्थिवव्रतिको राजा पृथिवीवत् सर्वेषां प्राणिनां भरण-पोषणं करोति । जितेन्द्रियस्य नृपस्य प्रकल्पनं मनुस्मृतौ विद्यते । तथाहि—

इन्द्रियाणां जये योगं समातिष्ठेद्दिवानिशम् ।
जितेन्द्रियो हि शक्नोति वशे स्थापयितुं प्रजाः ।। ७.४४

पुराणानुसारं शिबि-हरिश्चन्द्र-राम-युधिष्ठिरादयो नृपतय उपर्युक्तगुणैर्मण्डिता आसन् । इतिहासप्रसिद्धानां राज्ञामशोक-विक्रमादित्य-हर्ष-भोजादयस्तादृशा उदारगुणा बभूवुः । अशोकस्तु गौतमबुद्धेन तुल्यो मानवतायाः विपत्तीनामभावानामार्तीनां चानुभूत्या द्रवितो बभूव । स सत्प्रवृत्तीः प्रवर्तयितुं तासां स्वर्गप्राप्तिक्षमत्वं जनान् प्रति बोधयामास । स प्राणिमात्रेभ्यो दयालुरासीत् । तस्य कर्मण्यताधुनापि शिलालेखेन प्रमाणिता । तथाहि—
देवानां प्रियः प्रियदर्शी राजा एवमाह—तत् मया एवं कृतं—सर्वं कालमदतः मे अवरोधने, गर्भागारे, वर्चसि, विनीते, उद्याने सर्वत्र प्रतिवेदकाः स्थिताः अर्थं जनस्य प्रतिवेदयन्तु मे इति । सर्वत्र जनस्यार्थं करिष्यामि अहम् । नास्ति हि मे तोष उत्थाने अर्थसन्तरणाय च । कर्तव्यमतो हि मे सर्वलोकहितम् । तस्य च पुनः एतत् मूलमुत्थानमर्थसन्तरणं च । नास्ति हि कर्मान्तरं लोकहितात् । यत् च किंचित् पराक्रमे अहं किमिति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भूतानामानृण्यमियाम् ।[१]

पर्वर्तियुगे कश्मीरे महाराज उच्चलोऽभवद्यस्य विषये कल्हणो विशदयति—

एकया लोकवार्तार्थं प्राह्वात् प्रभृति निर्गतः ।
बहिरुद्दिश्य बाह्यालीरचारीदादिनक्षयम् ॥ राजत० ८.४६
सोऽश्वेनैकश्चरन्नाजेत्य ज्ञात्वा कथितं जनैः ।
यं यं स्वदोषमश्रौषीत्तं तं त्वरितमत्यजत् ॥ राजत० ८.५५

तेजस्वितैव राज्ञां श्रेष्ठगुण इति प्रतिपादयन् कल्हणो जयसिंहमुदाहरति—

अनुच्चलन्नपि स्थानाद् भ्रूभङ्गेन चकार सः ।
विलोलांल्लोमकम्पेन दिङ्नाग इव भूधरान् ॥ राजत० ८.१५५८

बहूनां विलासिनां दुर्वृत्तानामर्थलोलुपानां च राज्ञां कुकृत्यानां परिचयेन भारतीय इतिहासः कलुषीकृत इति नाविदित विदुषाम् ।[२]

राजपदस्य योग्यता

राजपदाय प्राचीनकाले प्रायः सदा युद्धवीरत्वमपेक्षितमभवत् । आक्रमणकारिभ्यः शत्रुभ्यः प्रजानां रक्षणं राज्ञः प्रथमं कर्तव्यमासीत् । अस्यां स्थितौ यदि क्वचित्कोऽपि

---

१. षष्ठशिलालेखात्

२. तथा हि राजा हर्षो मन्दिराणि लुण्ठितवान् मूर्तिविध्वंसनं च कृतवान् । एतदर्थं देवोत्पाटनायकं नियुक्तवान् । राजत० ७-१०९०-१०९१

ललितादित्यः प्रवरपुरमग्निसात् कृतवान् । राजत० ४.३१०-३१.३

उन्मत्तवर्मा तु विहारेषु भिक्षां कृत्वा जीवनयात्रां कुर्वाणं स्वपितरं राजपुरुषैरमारयत् ।
राजत० ४.४३३

अहो दुर्वृत्तमुन्मत्तस्य—

सम्प्रेरितः कुसचिवैः शस्त्राभ्यासं चकार सः ।
पाटयन् क्षुरिकाघातैः कोटवोस्तनकोटरम् ॥
गर्भिणीनां च जठरं द्रष्टुमपाटयत् ।
का ठिन्यस्य परोक्षार्थमङ्गकर्मकृतामपि ॥ राजत० ५.४४०-४४१

कलशस्तु दुष्टराजतम आसीत् । स तु स्वपितुः संन्यासभवनमग्निसादकरोत् । पितुः सवनाशकाले कलशस्तु तद्राजधानीसौधाग्रात् पश्यन् कलशभूपतिः । तोषादनृत्यज्ज्वालौघैर्गगनालिंगिभिः समम् ॥ ७.४१२

एतेभ्यो राजभिर्नासोदूनः क्षेमगुप्तः—

ष्ठीवनं श्मश्रुमालासु गालयः श्रोत्रपालिषु ।
तेन क्षिप्ताः प्रतीक्ष्याणां करोटीषु च टक्कराः ॥ ६.१५७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

योग्यताविहीनः पुरुष उत्तराधिकारित्वेनापि राजपदं प्राप्तवान् तर्हि स चिरकालं स्वपदमलङ्कर्तुं समर्थो नाभवत् । अयोग्यानां राज्ञां स्थाने तेषां विजेतॄन् स्वीकर्तुं प्रजा समुत्सुका आसीत् ।

प्रायशो राज्ञां ज्येष्ठपुत्रस्तेषां पदं गृह्णन्ति स्म । क्वचित् राज्ञो निर्वाचने मन्त्रिणामधिकारो बभूव । ते राजपुत्रस्य परीक्षणं कृत्वा तस्य तीक्ष्णबुद्धेः परिचयमनु तं राजपदेऽभिषेचयन्ति स्म । राजपुत्रेऽयोग्ये सति ते कंचित् परं गुणीनं प्रतिभाशालिनं पुरुषं राजपदेऽधिष्ठापयन्ति स्म । राजा स्वयं योग्योत्तराधिकारिणं नियुनक्तु––इति कौटिल्यमतम् ।

युद्धवीरनेतारः शस्त्रबलेन विशालभारतीयप्राङ्गणे यथेच्छं राज्यं परिकल्पयन्ति स्म । राजा भवितुं पुरा क्षत्रियत्वमपि नासीदपेक्षितम् । आर्येतराणां राजानः प्रायशः आर्येतरा बभूवुः । बहवो राजानो ब्राह्मणाः, वैश्याः, शूद्रा वा बभूवुः । स्त्रियोऽपि क्वचिद्राजपदमलंचक्रुः ।

राज्ञां क्वचिन्निर्वाचनमपि गण्यमानपुरुषैः कृतमासीदिति एतादृशं निर्वाचनमाधुनिकनिर्वाचनाद् भिन्नं सुनिश्चितम् ।

दुष्टानां राज्ञां विनाशोऽवश्यम्भावीति शास्त्रकाराणामुद्घोषो बभूव[1] तद्यथा मनुः—

कामात्मा विषमः क्षुद्रो दण्डेनैव निहन्यते । ७.२७

एतदेव समर्थितं कल्हणेन राजतरंगिण्यां प्रमाणपुरस्सरम्—

वंशः श्रीर्जीवितं दारा नामापि पृथ्वीभुजाम् ।
क्षणादेव क्षयं यान्ति प्रजाविप्रियकारिणाम् ।।

तथापि प्रजानां शुभाशुभै राजा साधुरसाधुर्वा भवतीति विज्ञापितं महाकविना—

न यन्त्रपुत्रकस्येव शक्तिः कापिभू भुजः ।
भवेत्साधुरसाधुर्वा स प्रजानां शुभाशुभैः ।। ७.३४०

राज्य-विस्तारः

पुरा प्रजानामितिवृत्तस्य ज्ञानायाधुनिकयुगवत्साधनानि नासन् । सुदूरस्थप्रजानां केन्द्रस्थानात् सम्यक् परिपालनं कठिनमासीत् । अस्यां स्थितौ यद्यपि विशालराज्यानां समीचीनत्वं नासीत्, तथापि दिग्विजयिनां समग्रभारते स्वाधिपत्यस्थापनस्याभिलाषः प्रायः सदैवावर्तत । तेन साम्राज्यानि, राज्यानि, आश्रितराज्यानि च बभूवुः । साम्राज्यानां

१. कल्हणानुसारं क्रूरराजानां विनाशः प्रायशः [illegible] कृतः । [illegible] चाण्डालर्हतौ । राजत० ५.२१७ तथा ४७७ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विभाजनं प्रान्तेष्वभवत् । दिग्विजयिनां सम्राजां वाधिपत्ये बहूनि राज्यान्याश्रितानि बभूवुः । वनप्रदेशेषु पर्वतभागेषु चार्येतराणां वन्यजातीनां वा राज्यानि आसन् ।

साम्राज्यमितिपदं प्रथममृग्वेदे प्राप्यते[1] । वैदिकयुगे राजत्वसूचकानि पदानि बहुविधानि बभूवुः । तद्यथा––साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं राज्यं माहाराज्यमाधिपत्यं च[2] । इमानि पदानि राज्यविस्तारं शासनप्रणालीं वाधिकृत्य प्रयुक्तानि बभूवुरिति कल्प्यते । सार्वभौमपदाय वैदिकयुगे आसमुद्रं राज्यविस्तारोऽपेक्षितः । ऐन्द्रमहाभिषेकेण सार्वभौमपदं समारभ्यत[3] ।

तान् भारतवर्षस्य हिमवतोः समुद्रपर्यन्तभागस्य नवद्वीपान् यो जयति स सम्राडित्युच्यते । कुमारीपुरात् प्रभृति विन्दुसरोऽवधि योजनानां दशशती चक्रवर्तिक्षेत्रम् । तद्विजयमानश्चक्रवर्ती भवति । काव्यमीसांसायां १६ अध्यायतः ।

उपनिषद्युगे भारतस्य विविधभागेषु प्रायः स्वतन्त्रराज्यानि बभूवुः । तद्यथा काश्यामजातशत्रोः, विदेहे जनकस्य, पंचाले प्रवाहणस्य जैवलेः, कैकयेऽश्वपतेः राज्यानि बभूवुः । महाभारतस्य दिग्वजयप्रकरणे वनभागेषु, पर्वतप्रदेशेषु मध्यदेशेषु चावस्थितानि बहूनि राज्यानि समुद्दिष्टानि ।

परवर्तियुगे षोडशजनपदा प्रादुरभवन् । तद्यथा––काशी-कोशलाङ्ग-मगध-वृजि-मल्ल-चेदि-वत्स-कुरु-पंचाल-मत्स्य-शूरसेनाश्मकावन्तिगान्धार-कम्बोजाः ।

ऐतिहासिकयुगे सर्वप्रथममशोको महाराज्यमस्थापयत् । तस्मिन् महाराज्ये पश्चिमोत्तरप्रदेशे कम्बोज-गान्धार-यवनराज्यानि समाविष्टानि बभूवुः । उत्तरस्यां कश्मीरपर्यन्ता महाराज्यसीमासीत् । पूर्वभागे वङ्गप्रदेशो महाराज्येऽन्तर्भूतः । प्रायः समग्रदक्षिणभारतमपि तस्याधिपत्ये आसीत् । इदं महाराज्यमनेकप्रान्तेषु विभज्यते स्म ।

परवर्तियुगे यद्यपि कस्यापि सम्राजः राज्यसीमा तावन्मात्रं विस्तृता नाभूत्, तथापि खारवेल-कनिष्क-समुद्रगुप्त-चन्द्रगुप्त-हर्षादीनां महाराज्येषु भारतस्याधिकांशभागः सन्निधापितो बभूव । लघुराज्यानां संख्या तु गणनाबाह्या बभूव ।

मन्त्रिपरिषदः प्रजासभाश्च

वैदिकयुगे सभा समितिश्च द्वे राजनीतिकसंस्थे महत्त्वं भजेताम् । तस्मिन्युगे ग्रामेषु सभाभवने सम्मिलिता जनाः सामाजिकसमस्या राजनीतिकसमस्याश्चाधिकृत्य विचार-

१. ऋग्वेदे ४.४२.१ ।
२. ऐतरेयब्राह्मणे ८.१४ ।
३. ऐतरेयब्राह्मणे ८.१२ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विमर्शं कृतवन्तः । सभाधुनिक 'पञ्चायत' समाभूत् । सभासदां निर्णया राज्ञे निवेदिताः । राजापि क्वचित्सभायाः सदस्योऽभवत् ।

उपनिषद्युगे स्वयं मिराजातेः स प्रधानो बभूव। तत्र गण्यमानसदस्या राजनीतिकस्थितीरधिकृत्य व्याख्यानं प्रददुः । समितेर्मतं राज्ञेऽवश्यं ग्रहणीयमासीदिति प्रतिभाति। समितिविरोधे भूते राजा स्वपदात् च्युतो बभूव ।

वैदिककालानन्तरं गणराज्येषु राजधान्यां समितयो विशेषाधिकारयुता बभूवुः । ताः शासनकर्मणि व्यापृता आसन् । ग्रामेषु नगरेषु च साधारणसमितयो बभूवुः ।

रत्निसंस्था

वैदिकयुगे राज्ञः समीपवर्तिनां श्रेष्ठजनानां शासनकर्मणि विशेषाधिकारो बभूव । ते 'रत्नि' इति ख्याता आसन् । पुरोहितः, सेनानी, भागधुक्, संग्रहीता, राज्ञी, सूतः, ग्रामणी, क्षत्ता च साधारणतो रत्निसदस्या आसन् ।[1] इयं संस्था परामर्शदात्री बभूव। संस्थेयं परवर्तियुगे मन्त्रिमण्डलरूपेण विकसिता अभवत् ।

मन्त्रिमण्डलम्

राज्ञे परामर्शदातारो महाभारतयुगेऽमात्याः मन्त्रिणो वा ख्याता बभूवुः । अमात्यानां संख्या सप्तत्रिंशदासीत् । तथा हि महाभारते—

चतुरो ब्राह्मणान् वैद्यान् प्रगल्भान् स्नातकाञ्छुचीन् ।
क्षत्रियांश्च तथा चाष्टौ बलिनः शस्त्रपाणिनः ॥
वैश्यान् वित्तेन सम्पन्नानेकविंशतिसंख्यया ।
त्रींश्च शूद्रान् विनीतांश्च शुचीन् कर्मणि पूर्वके ॥
अष्टाभिश्च गुणैर्युक्तं सूतं पौराणिकं तथा ।
पञ्चाशद्वर्षवयसं प्रगल्भमनसूयकम् ॥
श्रुतिस्मृतिसमायुक्तं विनीतं समदर्शिनम् ।
कार्ये विवदमानानां शक्तमर्थेष्वलोलुपम् ॥
वर्जितं चैव व्यसनैः सुघोरैः सप्तभिर्भृशम् ।
अष्टानां मन्त्रिणां मध्ये मन्त्रं राजोपधारयेत् ॥

शान्ति० ८६.७-११

मन्त्रणायै मन्त्रिणां संख्या तिस्रः, पञ्च, अष्ट वा निर्धारितासीत् । मन्त्रोपयोगो महाभारते निर्दिष्टः । तथा हि

---

१. दीघनिकायानुसारं राज्ञः सप्त रत्नानि भवन्ति—चक्रम्, हस्ती, अश्वः, मणिः, महिषी, गृहपतिः, पण्डितश्च । महासुदर[illegible] ?.४ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तेषां त्रयाणां विविधं विमर्शं विबुद्ध्य चित्तं विनिवेश्य तत्र ।
स्वनिश्चयं तं परनिश्चयं च निवेदयेदुत्तरमन्त्रकाले ।।
धर्मार्थकामज्ञमुपेत्य पृच्छेद् युक्तो गुरुं ब्राह्मणमुत्तरार्थम् ।
निष्ठा कृता ते न यदा सहः स्यात् तं मन्त्रमार्गं प्रणयेदसक्तः ।।

शान्ति० ८४.४४,४९

साधारणतो राजपुरोहितः सर्वोच्चः परामर्शदाता बभूव । तमधिकृत्य महाभारते प्रोक्तम्—

य एव तु सतो रक्षेत् असतश्च निवारयेत् ।
स एव राज्ञा कर्तव्यो राजन् राजपुरोहितः ।। शान्ति ७३.१

महाभारते मन्त्रिणो गुणाः पृथक् वर्णिताः—

कच्चिदात्मसमा बुद्ध्या शुचयो जीवितक्षमाः ।
कुलीनाश्चानुरक्ताश्च कृतास्ते वीरमन्त्रिणः ।। सभा० ५.१६

अर्थशास्त्रानुसारं तु मन्त्रपूर्वाः सर्वारम्भाः । कौटिल्यः त्रिभिश्चतुर्भिर्वा मन्त्रिभिः सह मन्त्रणां समीचीनां मन्यते । अपरं च कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद्देशकाल-विभागो विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः । तानेकैकशः पृच्छेत् समस्तांश्च ।[1]

रुद्रदाम्नः शिलालेखे द्विविधौ मन्त्रिणौ—कर्मसचिवः मतिसचिवश्च वर्णितौ । मति-सचिवा मन्त्रणार्थं, कर्मसचिवा राजकर्मसम्पादनाय च नियुक्ताः ।

गुप्तयुगे सर्वोच्चमन्त्रिणः–प्रधानमन्त्री सान्धिविग्रहिकः, अक्षपटलाधिकृतश्च बभूवुः । शुक्रनीतौ मन्त्रिपरिषदः सदस्यानां संख्या दश निर्धारिता—पुरोहितः, उपराजः (प्रतिनिधिः), प्रधानमन्त्री, सचिवः, मन्त्री, प्राड्विवाकः, पण्डितः, सुमन्त्रः, अमात्यः, दूतश्च ।[2]

कल्हणेन कश्मीरदेशस्य बहूनां राजमन्त्रिणां कार्यादिकं वर्णितम् । अनेन वृत्तेन कतिपयमन्त्रिणामुच्चादर्शाः प्रतिफलन्ति । तथाहि जयापीडस्य मन्त्री देवशर्मा नेपालदेशे स्वामिनि वन्दीभूते आत्महत्यां कृत्वा तस्य विमोचनं सम्भावितवान् । अवन्तिवर्मा तस्य मंत्री शूरश्च परस्परं भृत्यवदाज्ञाकारिणौ बभूवतुः । यदा जयसिंहस्य मन्त्री धन्यो रुग्णोऽभवत्, राजा क्षणमपि तस्य रोगशय्यातो दूरो नाभवत् । कतिपयमन्त्रिणो राज्ञां प्रजापीडनपरां दुष्प्रवृत्ति नियन्त्रितवन्तः । प्रजासुखार्थं तैर्बहुकृतं कारितञ्च ।[3] कल्हेणमतानुसारं तु मन्त्रि-पदं कण्टकपूर्णमेव । यतोहि नाम

१. अर्थशास्त्रे मन्त्राधिकारप्रकरणात् ।
२. सचिवो युद्धमन्त्री बभूव । मन्त्री परराष्ट्रसमस्याधिकृतोऽभवत् । पण्डितस्तु राष्ट्रे सदाचारप्रतिष्ठामकरोत् । सुमन्त्रः कोशाध्यक्ष आसीत् । अमात्यो राजकीयस्यायस्य चिन्तामकरोत् ।
३. राजत० ४.५६९–५७७; ५.३; ७.२१२-२१४ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेतालोत्थापनाच्छ्वभ्रलंघनाद्विषचर्वणात् ।
व्यालाश्लेषाच्च विषमं सत्यं राजोपसेवनम् ।। राजत० ८.२१८७

तथापि दुष्टानां राज्ञामाज्ञामन्यथा कुर्वाणा मन्त्रिणस्तेषां प्रजानां च धन्यवादमर्हन्ति स्म ।[1]

साधारणतो मन्त्रिणः सुयोग्या बभूवुः । राष्ट्रस्याभ्युत्थाने मन्त्रिणां भरोऽतिशय एवासीत् । भारतीयेतिहासे सर्वगुणसम्पन्नानामुदारचरितानां राज्ञः कृते सर्वस्वत्यागिनां मन्त्रिणामादर्शाः प्रेरणाधायका आसन् ।

शासनतन्त्रम्

सिन्धुसभ्यतायुगे राष्ट्रोत्थानिकप्रवृत्तीनां संचारणाय कुशलशासनप्रबन्धः प्रकल्पितुं शक्यते । तत्रत्यनगरपालिकायाः सुव्यवस्थानुकरणीयासीत् ।

वैदिकयुगे ऋतस्य प्रतिष्ठापनं राजनीतेः प्रधानमुद्देश्यमासीत् । वरुणस्यादर्शो राजभिरस्मै प्रयोजनाय स्वीकृतः । दुर्वृत्तानां जनानामन्वेषणं राजा दूतैरकारयत् । पापिनस्तु सदैव दण्ड्या अभिमताः ।

वैदिकशासनस्य प्रारम्भिकसंयोजनं 'जन' संस्थया कृतम् । आर्या आर्येतराश्च मूलतो विविधजनेषु संविभक्ता बभूवुः । तथाहि पुरु-यदु-द्रुह्यु-भारत-गन्धारादय आर्याणां जना यक्षु-शिग्रु-शिम्यु-कीकटादय आर्येतराणां जना आसन् । जना विट्सु, विशो ग्रामेषु च विभक्ता बभूवुः । ग्रामेषु बहवः कुटुम्बानि वसन्ति स्म । ग्रामाध्यक्षो 'ग्रामणी' इति ख्यातो बभूव । स ग्रामसेनानायक आसीत् सततं ग्रामस्य सुरक्षार्थं स प्रायतत । ग्रामेषु 'अविता' सर्वश्रेष्ठः शासको सर्वविधलोककल्याणाय चेष्टतेति ऋग्वेदस्य 'असि ग्रामेष्वविता' वाक्येन प्रमाणितम् ।

वैदिकयुगे सेनाया द्विविधं महत्त्वमासीत् । प्रथमं तावत् सेना विजयार्थं नियोजिता । सेनया स्वराष्ट्रस्य शत्रुभ्यो रक्षा कृता । अपरं च प्रजासु सेनया शान्तिर्व्यवस्थापिता । राष्ट्रियविपत्तिनिवारणार्थं राजा सेनया सह समुद्यतोऽभवत् ।

जातकानुसारं ग्रामाणां शासनं राजा ग्रामभोजकैरकारयत् । ग्रामभोजको ग्रामे दण्डार्हानदण्डयत्, मादकवस्तूनां क्रय-विक्रययोर्नियन्त्रणमकरोत्, पशु-वधं निषेधितवान्, ग्रामाभ्युदयोपायान् समपादयत् । ग्रामभोजकाः साधारणत सदाचारिण आसन् ।

ग्रामस्याभ्युदयार्थं ग्रामवासिनां सहयोग आदर्श आसीत् । कतिपयग्रामवासिनः प्रातरुत्थाय मार्गाणां जलाशयानां सभाभवनानां च स्वच्छतां स्वयं कुर्वन्ति स्म । तस्मिन् युगे

१. राजत ४.
CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वयंसेवका इव नागरिकाः कर्तव्यरूपेण ग्रामकृत्यानि—सार्वजनिकभवनानां निर्माणं मार्गस्य समतलविधानं सेतुरचनं जलाशयखननं च कुर्वन्ति स्म ।[1]

महाभारतानुसारं राष्ट्रगुप्ती राष्ट्रसंग्रहश्च शासनस्य द्वे अङ्गे बभूवतुः । राष्ट्रगुप्ती राष्ट्रस्य रक्षणाय राष्ट्रसंग्रहः राष्ट्रस्याभ्युदयाय चास्ताम् । राष्ट्रस्य विविधाः परस्परानुबद्धा विभागाः शासनसौकर्यार्थं कृताः । तद्यथा ग्रामः, दशग्रामाः, विंशतिग्रामाः, सहस्रग्रामाश्च परस्परं शासनसूत्रे प्रत्येकस्याधिपतिरिति ख्यातैरधिकारिभिः शासिताः । यस्मिन्नर्थे कश्चिदपि अधिपतिरुच्चतराधिकारिणां सहायतामपेक्षितवान् तदर्थं स तेभ्यो निवेदितवान् । इमेऽधिकारिणो ग्रामकृत्येषु सङ्ग्रामकृत्येषु च व्यापृता बभूवुः । ग्रामकृत्यं तु प्रागेव वर्णितम् । सङ्ग्रामकृत्यं युद्धमासीत् । नगराणां शासनं सर्वार्थचिन्तकेन कृतम् ।

अर्थशास्त्रानुसारं पुरा गुप्तचराणां नियोजनं राज्ञां प्रधानकर्मासीत् । गुप्तचरेभ्यः समाचारं विज्ञाय राजानः आत्मरक्षार्थं प्रजारक्षार्थं चोपायान् साधयन्ति । अपरं च—राज्ञः शासनतन्त्रेष्वजस्रं नियोग एव कौटिल्येन समीहितः । तथा हि—राजानमुत्तिष्ठमानमनूत्तिष्ठन्ते भृत्याः । प्रमाद्यन्तमनुप्रमाद्यन्ति । तस्मादुत्थानमात्मनः कुर्वीत । नाडिकाभिरहष्टधा रात्रिं च विभजेत । तत्र पूर्वे दिवसस्याष्टभागे रक्षाविधिनमायव्ययौ च शृणुयात् । द्वितीये पौरजानपदानां कार्याणि पश्येत् । तृतीये स्नानभोजनं सेवेत । स्वाध्यायं च कुर्वीत । चतुर्थे हिरण्यप्रतिग्रहमध्यक्षांश्च कुर्वीत । पञ्चमे मन्त्रपरिषदा पत्रसम्प्रेषणेन मन्त्रयेत । चारगुह्यबोधनीयानि च बोधेत् । षष्ठे स्वैरविहारं मन्त्रं वा सेवेत । सप्तमे हस्त्यश्वरथायुधीयान्पश्येत् । अष्टमे सेनापतिसखो विक्रमं चिन्तयेत् । प्रथमे रात्रिभागे गूढपुरुषान्पश्येत् । द्वितीये स्नानभोजनं कुर्वीत स्वाध्यायं च । तृतीये तूर्यघोषेण संविष्टश्चतुर्थपञ्चमौ शयीत । षष्ठे तूर्यघोषेण प्रतिबुद्धः शास्त्रमितिकर्तव्यतां च चिन्तयेत् । सप्तमे मन्त्रमध्यासीत गूढपुरुषांश्च प्रेषयेत् । अष्टमे ऋत्विगाचार्यपुरोहितसखः स्वस्त्ययनानि प्रतिगृह्णीयात् ।

समीचीनः शासनविधिः कौटिल्येन प्रस्तुतः । तद्यथा—उपस्थानगतः कार्यार्थिनामद्वारासङ्गं कारयेत् । दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः कार्यते । तस्माद्दैवताश्रमपाषण्डश्रोत्रियपशुपुण्यस्थानानां बालवृद्धव्याधितानाथानां स्त्रीणां च क्रमेण कार्याणि पश्येत् ।

प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥ राजप्रणिधिप्रकरणात्

शासनतन्त्रस्य व्यवस्थायै विविधविभागानामध्यक्षाः, संख्यायकाः, गोपाः, स्थानिकाः, अनीकस्थाः (पशुचिकित्सकाः), चिकित्सकाः, अश्वदाः (अश्वशिक्षकाः) च बभूवुः । साधारणपदाधिकारिणो लेखकाः, रूपदर्शकाः, नीवीग्राहकाः, उत्तराध्यक्षाश्चासन् । एते

१. कुलावकजातके ३१ । काश्मीराणां राजानः ग्रामाणामभ्युदयार्थं मायतन्त । राजत० ८.२४२५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजकर्मचारिणो राष्ट्रस्याभ्युदयाय, प्रजानां संरक्षणाय, साधूनां परित्राणाय, पापिनां विनाशाय च सर्वा योजनाः साधयन्ति स्म । दिङ्मात्रनिर्देशार्थम्—पौतवाध्यक्षः मापतोलयोः, पण्याध्यक्षः क्रयविक्रययोः, सुराध्यक्षः मदिरापानस्य, नावध्यक्षः नौव्यापारस्य व्यवस्थायां व्यापृता बभूवुः । समाहर्त्ता जनपदस्य सर्वेषां ग्रामाणां ग्रामवासिनां चेतिहासं योगं क्षेमं च संग्राहितवान् । नागरिको नगराणां व्यवस्थामकरोत्, अग्निप्रकोपान्नगराणां सुरक्षायै समुचितविधानानि कृतवांश्च । प्रजापीडकेभ्यः प्रजां रक्षितु त्रयोऽमात्याः प्रदेष्टारो वा नियुक्ताः ।

चन्द्रगुप्तस्याशोकस्य च शासनपद्धतिः प्रायश उपर्युक्तविधानानुसारं प्रावर्तत । सांस्कृतिकदृष्ट्याशोकस्य शासनतन्त्रे यद्वैशिष्ट्यमासीत् तद् धर्मशासनमिति विख्यातम् । स राजकर्मचारिणां कृते उत्कारितवान्—देवानां प्रियस्य वचनेन तोसल्यां महामात्या नगरव्यवहारका वक्तव्याः—सर्वे मनुष्याः प्रजा मम । यथा प्रजायै इच्छामि अहं किमिति सर्वेण हितसुखेन ऐहलौकिकपारलौकिकेन युज्येरन् इति तथा मनुष्येषु अपि इच्छामि अहम् ।

गुप्तयुगे केन्द्रीयशासनस्य वैशिष्ट्यमासीत् । केन्द्रीयकार्यालयप्रधानः सर्वाध्यक्ष आसीत् । सर्वाध्यक्ष राजकीयशासनसूत्रेण प्रान्तेषु जनपदेषु च राजकर्मचारिणामनुबन्धनं कृत्वा सर्वत्र शासनस्यैकसूत्रतां व्यधात् । प्रान्ताधिपतीनां विषयपतीनां च साहाय्यार्थं दाण्डिकाः, चौरोद्धरणिकाः, दण्डपाशिकाः, नगरश्रेष्ठिनः, सार्थवाहाः, प्रथमकुलिकाः, प्रथमकायस्थाः, पुस्तपालाश्च नियुक्ताः ।[1] ग्रामशासनाय ग्रामिकाः, महत्तराः, भोजकाश्च नियुक्ताः । ग्रामशासनस्य परिधौ ग्रामीणानां गृहक्षेत्र-मार्ग-मन्दिर-कूप-वनादीनां सुव्यवस्था कृता । सीमाकरः क्षेत्राणां मापं कृतवान् । ग्राममुख्यः ग्रामेयको ग्रामाध्यक्षो वा बभूव । कतिपयप्रदेशेषु 'पंचायत'–समा संस्था पंचमण्डली, ग्रामजनपदो वा बभूव । नगराणां शासनं पुरपालोऽकरोत् । तत्र नगरमहत्तराणां परिषदाधुनिकनगरपालिकासमासीत् । नगरपरिषदां प्रचलनं परवर्तियुगे दक्षिणभारते विशेषरूपेण प्रावर्तत । नगरस्य सर्वोच्चाधिकारी पुरपालो नागरिकाणां प्रतिनिधीनां परिषदः साहाय्येन नगरशासनमकरोत् । राजस्थान-मध्यप्रदेश-गुर्जर-कर्णाट-कोङ्कणादिप्रदेशेषु नागरिकाणां प्रतिनिधीनां सभा कार्यकारिणीति ख्याता ।

परवर्तियुगे ग्रामान् तत्रत्यप्रधानपुरुषोऽशिषत् ।[2] तत्र शासनसहायाः कर्मचारिणः

---

१. दाण्डिको दण्डव्यवस्थामकरोत् । सार्थवाहो व्यापारिणां संघानां संचालक आसीत् । प्रथमकुलिकः शिल्पकाराणां नेतासीत् । प्रधानकायस्थः प्रधानलेखको बभूव । पुस्तपालः शासनलेखानां संग्रहमकरोत् ।

२. ग्रामप्रधानस्योपाधिर्महाराष्ट्रे 'ग्रामकूटः', 'पट्टकीलो' वा, कर्णाटप्रदेशे 'गावुन्दः', उत्तरप्रदेशे महत्तरो महत्तमो आसन् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साहसाधिपतिः, ग्रामनेता, भागहारः, लेखकः, शुल्कग्राहः, प्रतिहारश्च बभूवुः।[१] दक्षिणभारते ग्रामसभायां सर्वे ग्रामवासिनोऽपि क्वचित् समागताः। तेषामेका कार्यकारिणी समितिरभवत्। क्वचिदुपसमितीनां निर्वाचनमपि कृतम्।

प्रजा कुशासनस्य यदा कदा विरोधमाचरत्। प्रजाशक्तिः क्वचित् समुन्नतासीत्। दुष्टानां राज्ञां वधोऽपि प्रजया तेषां पीडनादात्मानं विमोचयितुं कृत इति राजतरंगिण्यां बहुशः निर्दिशितम्।[२]

ग्रामाणां शासनव्यवस्था सर्वतोमुखी बभूव। तथा हि--आभिर्ग्रामसभाभिरकालपीडितानां प्राणरक्षा, दुर्बलेभ्यो भोजनदानम्, शिक्षणसंस्थानां धार्मिकसंस्थानां च संचालनं सार्वजनिकोपयोगिपूर्तादीनां निर्माणं च सम्पादितानि

कश्मीरेषु ग्रामशासने राज्ञां रुचिर्बभूव। द्वादशशताब्दे जयसिंहेन ग्रामोत्थानाय बहु कृतम्। तथा हि राजतरंगिण्याम्—

स एव ग्रामान् सामग्रीमहापणसमर्पणैः
निर्दोषपारिषद्याविद्धान् निश्चोद्यधीर्व्यधात्। ८.३३१९

सेना युद्धं च

सेना राजत्वस्य प्रधानं कारणं भवति। सिन्धुसभ्यताया राज्ञां महती सेनासीदिति सम्भावना स्थाने स्यात्। तस्मिन्युगे राज्ञां युद्धानि बभूवुरिति कल्पना नासमीचीना।

वैदिकयुगे

आर्याणामार्येतराणां च महती सेना, घोरयुद्धानि च सविशेषमुल्लेखनीयानि वर्तन्ते। इन्द्रो देवराजो देवसेनाया नेता बभूव। आर्याणां सेनाः प्रायशो राजभिरधिष्ठिता बभूवुः। युद्धेषु बाणा प्रधानास्त्राणि बभूवुः। अन्यानि शस्त्रास्त्राणि--ऋष्टचङ्कुश-शतघ्नीपरशुकृपाण-वज्रादीनि बभूवुः। सैनिकाः कवच-शिरस्त्राणादिभिः सुरक्षिता आसन्।

युद्धानि महोत्सव एवाभिमन्यन्ते स्म। तत्र वीराणां हर्षनादो दुन्दुभिप्रमुखवाद्यानां सिंहनादश्च मनोज्ञो बभूवतुः। युद्धेषु प्रायो रथानामश्वानां चोपयोगः कृतः। वैदिकयुद्धकला सुविकसिता प्रतिभाति। शत्रूणां मार्गावरोधनं तेषां मार्गे पाशजालादीनामाधानं च सन्धारिते। मायाविभिः सह मायात्मकं युद्धं कृतम्।[३] युद्धकौशलमाकूतमिति ख्यातम्। उत्तरवैदिकयुगे दिग्विजयानां विशेषप्रचलनं बभूव। दिग्विजयिनः सम्राडिति उपाधिना विभूषिताः।

---

१. साहसाधिपतिर्न्यायकर्मणि व्यपृतो बभूव। ग्रामनेवा ग्रामं दुर्वृत्तजनानामाक्रमणेभ्योऽरक्षत्। भागहारो ग्रामवृक्षाणां रक्षामकरोत्। लेखको गणक आसीत्। प्रतिहारः शस्त्रधरो योद्धाभवत्।

२. राजत० ५.२२१;४.४७७।

३. विष्णुर्वामनो भूत्वाऽसुराणां छलने सफलो बभूव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैदिकयुगेऽपि कतिपयजना युद्धानां बिभीषिकां सम्यगजानन् । तथाहि

यस्मिन्राजा भवति किं च न प्रियम् । ऋग्वेदे ७.८३.२

तदा युद्धाचारः सम्प्रतिष्ठितोऽभवत् । धर्मयुद्धं तु साफल्यस्य बीजमिति सम्भावितम् । मित्रावरुणौ युद्धे सत्यव्रतानां रक्षां कुरुत इत्यनेन युद्धाचारस्य व्यवस्था कल्प्यते ।

जातकयुगे

वैदिककालानन्तरं प्रायः सदैव युद्धेषु हस्तिनां विशेषोपयोगोऽभवत् । जातकानुसारं स्तम्भभञ्जनाय, तोरणपातनाय, नगरद्वारभ्रंशनाय च हस्तिनां कृतित्वमपेक्षितम् ।

जातकानुसारं सेनायाः प्रयाणपथे विशेषसौविध्यमुपकल्पितम् तथा हि—सेनापथे ग्रामा निवेशिताः, तेषु ग्रामेषु भोजनवस्त्रालङ्कारादयः संचिताः । बहुविधयानानि तेषु ग्रामेषु सम्भृतानि । सौख्योपकरणानि तत्र राशीकृतानि ।

सकारणं युद्धं तु परिचितमेव । निर्निमित्तानि युद्धान्यपि प्राचीनग्रन्थेषु श्रूयन्ते । यथा हि—कलिङ्गराजः कदाचित् मन्त्रिणः प्राह योद्धुकामः⋯प्रतिपक्षी न दृश्यते । तर्हि किं कर्तव्यं मयेति । मन्त्रिणः प्रोचुः—निजदुहितरो ग्रामाद् ग्रामं, नगरात् नगरं भ्रामय । यः कश्चित्ताः स्वभवने नेतुमिच्छति तेनैव सह योद्धव्यम् । एवं कुर्वन्नेवास्सकराज्ञेन सह सोऽयुध्यत ।

केवलमपवादरूपमेव पराजितै राजभिः सह सद्व्यवहारो बभूव । काशिराजः पराजितान् नृपान् 'वयं न पुनः विद्रोहं करिष्यामः' इति गृहीतशपथान् मुक्तवान् ।[१] अपरे तु कतिपयविजेतारः पराजितं राजानं मारयन्ति स्म ।[२]

युद्धविज्ञानं विकसितमिव प्रतिभाति । तद्यथा–नगराणामवरोधः कृतः । नगरगामिमार्गेष्ववरुद्धेषु शीघ्रं नागरिका भोजनपानादीनामभावात् व्याकुलीभूताः शत्रुराजस्य विजयं काङ्क्षन्ति स्म । तस्यां स्थितौ राजविद्रोहस्य सम्भावनाऽभवत् ।[३] कदाचित् राजापरस्य कस्यापि साधारणसैनिकस्य वेषं गृहीत्वा सैन्यसंचालनमकरोत्, राजवेषे तु साधारणसैनिकोऽयुध्यत ।[४]

सेना चतुर्विधा बभूव—हस्तिसेना, रथसेना, अश्वसेना, पदातिसेना च । युद्धवीरा राजभक्तिनिर्णयाय क्वचित्परीक्षिता इति श्रूयते । तथाहि कश्चिन्मन्त्री सहस्रसैनिकेभ्यः प्राह—यदि यूयं राज्ञे प्राणान् परित्यक्तुमुद्यतास्तर्हि पर्वतादस्मादधः पतनेन प्रमाणयध्वम् । यदा ते पतनासन्ना बभूवुः तदा स तान्न्यवारयत् ।[५]

---

१. संगामावचरजातके ।
२. भोजाजानीयजातके २३ ।
३. असातरूपजातके १००; एकराजजातके ३०३; घतजातके ३५५ ।
४. असातरूपजातके १०० [illegible] ५. [illegible]जातके १५६ ।
६. चुल्लाकालिङ्गजातके ३०१ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजधान्यां विजयोत्सवः समायोज्यत । राजा तदा स्वलंकृतस्य नगरस्य प्रदक्षिणामकरो ।[१]

रामायणमहाभारतयोः युगे

रामायणमहाभारतानुसारमेकाकिनो वीरस्य पराक्रमगाथा सोत्कर्षं वर्तते । रामायणे रामो महाभारतेऽर्जुनश्चैकशः प्रायः स्वयुद्धकौशलं प्रदर्शयन्तौ विजयं प्रापतुः । युद्धपरायणा वीराः परस्परं क्वचित् संलपन्ति स्म । अनेन प्रकारेण तेषां सुप्रवृत्तीनां दुष्प्रवृत्तीनां वा परिचयः चीयते । दुष्प्रवृत्तयस्तु पराजयाय दैवविधानमिति संख्यातम् ।

कतिपययुद्धानि धर्मसंस्थापनार्थाय बभूवुः । यज्ञविरोधिनो राक्षसाः पराजेतव्या इति कर्तव्यं समाम्नातम् । तद्यथा रामायणे ताडकावधाय रामं प्रोत्साहयन् विश्वामित्र उवाच—

विश्वामित्रः—स्वबाहुबलमाश्रित्य जहीमां दुष्टचारिणीम् ।
मन्नियोगादिमं देशं कुरु निष्कण्टकं पुनः ॥ बाल० २४.३०

रामः — गोब्राह्मणहितार्थाय देशस्य सुखाय च ।
तव चैवाप्रमेयस्य वचनं कर्तुमुद्यतः ॥ बाल० २५.५

अपरं च रामो राक्षसान् प्रत्यवदत्—

युष्मान् पापात्मकान्हन्तुं विप्रकारान् महाहवे ।
ऋषीणां तु नियोगेन प्राप्तोऽहं सशरायुधः ॥ अरण्ये २०९

निष्कारणं योद्धुकामा बहवस्तत्रासन् । दुन्दुभिरिति ख्यातोऽसुरो युद्धार्थं शत्रुमन्विष्यन् वालिनं समागच्छत् । स तेन युद्धे हतः ।

युद्धदृश्यमद्भुतरसमयं बभूव । एकाकी रामः खरेण तस्य सहस्रवीराणां सेनया च सहायुध्यत । रामो बाणप्रहारैरसंख्यान् राक्षसानवधीत् । तत्र[२] छिन्नशरीराङ्गानां नर्तनं हस्त्यश्वादीनां मरणं भीषणशत्रुसंहरणं च सर्वं भयङ्करमेवाभूत् । द्वन्द्वयुद्धमपि पराक्रमपूर्णमासीत् । तत्र गदाबाणाश्वकर्ण-सप्तपर्ण-खड्गतोमर-शक्ति-पट्टिशादीनामस्त्रशस्त्राणि प्रयुक्तानि । रात्रावपि क्वचिद्युद्धानि बभूवुः । शब्दवेधिबाणाः प्रयुक्ताः । तत्र म्रियमाणानां वीराणां व्यथापूर्णो ध्वनिर्दुन्दुभिनिनादेन प्रत्याहतः । भिन्नदेहानां सैनिकानां चिकित्सायै क्वचित् साधनानि समुपस्थापितानि बभूवुः ।

युद्धे प्रयुक्तानि शस्त्रास्त्राणि गणनाबाह्यानि सन्ति । दिव्यास्त्राणां प्रयोगो भृशं प्रावर्तत ।[३]

सन्ध्यायां प्रायो राक्षसा अपि युद्धविरामं प्रययुः । आत्मप्रशंसापरा वीरा निन्द्यन्ते स्म । मत्त-प्रमत्त-सुप्त-परित्यक्तादीनां जनानां हन्ता भ्रूणहेति सम्मतः । शरणागतो जनो

---

१. बन्धनजातके १२० ।

२. रामायणे अरण्यकाण्डे २९ सर्गतः ।

३. कतिपयदिव्यास्त्रशस्त्राणि—दण्डचक्र-धर्मचक्र-वज्र-ब्रह्मास्त्रवरुणपाशाग्नेयाशास्त्र - मुसल-प्रस्वापन-प्रशमन-सौर-वर्षण-शोषण-पैशाचादीनि सन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रक्षितः। सत्यवादिनो दूताः शत्रुसेनायामपि दुर्वार्ताः कथयन्तोऽपि वध्या नासन्। युद्धारम्भात्प्रागन्तिमक्षणेऽपि सन्धिप्रस्तावो नासीदनभीष्टः।

सैन्यप्रयाणं शुभमूहूर्ते समारब्धम्। कश्चित् कुशलः सेनापतिः प्रयाणमार्गस्य पर्यवेक्षणायाग्रेऽगच्छत्। सेनापतिः सैन्यार्थं भोजनपानादीनां सुलभतां विमृश्य प्रयाणपथं निर्णीतवान्। क्वचित् शत्रुभिर्विषाक्तेभ्यो भोजनपानादिभ्यः सेना रक्षणीयाभवत्। वनदुर्गेषु गूढान् शत्रून् निष्प्रभावयितुमुपायाः कृताः। प्रयाणमार्गे सेनासुखेन सन्निवेशिता। सैन्यं परितः कतिपयवीराः निरन्तरं परिभ्रमणं चक्रुः। मार्गस्य नद्यः सेतुभिः पारंगमिताः।

सैन्यस्याष्टाङ्गानि सम्मतानि—

रथा नागा हयाश्चैव पादाताश्चैव पाण्डव।
विष्टिर्नावश्चराश्चैव देशिका इति चाष्टमम्॥ शान्ति० ५९.४१।

सेनाविभागाः पत्तिः सेनामुखं (गुल्मः) गणो वाहिनी पृतना चमूः अनीकिनी च उत्तरोत्तरं त्रिगुणा बभूवुः।[1] रथेषु चत्वारोऽश्वाः प्रायः नियोजिताः। सारथिना सह चत्वारो योद्धारो रथे उपाविशन्। हस्तिन उपरि द्वौ अङ्कुशधरौ, द्वौ धनुर्धरौ, द्वौ असिधरौ, एकः शक्तिधरः, एकः पिनाकधरश्चोपाविशन। रथस्य रक्षार्थं दश हस्तिनः, हस्तिनो रक्षार्थं दशाश्वाः अश्वस्य रक्षार्थं च दश पदातयो नियोजिताः। सेनायाः प्रमुखवीराः महारथिनः, अर्धरथिनश्चेति प्रविभक्ताः। तत्रैकः सर्वसेनापतिः नियुक्तः। तस्मिन् मृते कश्चिदपरः सर्वसेनापतिरभवत्। प्रमुखवीराः स्वध्वजैः शङ्खैर्वा विशेषिताः।

महाभारतयुगे शतघ्नी महास्त्रमासीत्। युद्धसामग्रीणामस्त्रशस्त्रादीनां च परिगणनमीदृशमासीत्—

सानुकर्षाः सतूणीराः सवरूथाः सतोमराः।
सोपासङ्गाः सशक्तीकाः सनिषङ्गाः सहर्ष्टयः॥
सध्वजाः सपताकाश्च सशरासनतोमराः।
रज्जुभिश्च विचित्राभिः सपाशाः सपरिच्छदाः॥
सकचग्रहविक्षेपाः सतैलगुडवालुकाः।
साशीविषघटाः सर्वे ससर्जरसपांसवः।
सघण्टफलकाः सर्वे सायोगुडजलोपलाः।
सशालभिन्दिपालाश्च समधूच्छिष्टमुद्गराः॥
सकाण्डदण्डकाः सर्वे ससीरविषतोमराः।
सशूर्पपिटकाः सर्वे सदात्राङ्कुशतोमराः॥

---

१. एको रथो गजश्चैको नराः पञ्च पदातयः।
त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते॥ आदि० २.२५।
सेना पंचशतं नागा रथास्तावन्त एव च।
दशसेना च पृतना पृतना दशवाहिनी॥ उद्योगपर्वणि १५२.२५।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सकीलकवचाः सर्वे वासीवृक्षादनान्विताः ।
व्याघ्रचर्मपरीवारा द्वीपिचर्मावृताश्च ते ॥
सहर्ष्टयः सश्रृङ्गाश्च सप्रासविविधायुधाः ।
सकुठाराः सकुद्दालाः सतैलक्षौमसर्पिषः ॥ उद्योग १५२.३-९

बहूनि तत्रालौकिकान्यस्त्राणि बभूवुः । तथा हि—शरं सन्धाय पर्जन्यास्त्रेण संयोज्य च पृथ्वीं वेधयित्वा ततः वारिधारोत्पादिता ।[1] ब्रह्मेषीकाया अग्निः प्रज्वालितः । तेन शत्रूणां दहनं कृतम् ।[2]

युद्धाय प्रस्थानं प्रतिदिनमुत्सव एवाभूत् । तथा हि—

आप्लाव्य शुचयः सर्वे स्रग्विणः शुक्लवाससः ।
गृहीतशस्त्रा ध्वजिनः स्वस्तिवाच्यहुताग्नयः ॥
सर्वे ब्रह्मविदः शूराः ; सर्वे सुचरितव्रताः ।
प्रययुः सर्व एवैते भारद्वाजपुरोगमाः ॥ उद्योगे १९६.३-५

युद्धवाद्येभ्यः प्रयाणकाले तुमुलध्वनिरजायत । वीरा युद्धभूमौ वृषभवन्ननदुः शंखांश्च-दध्मुः ।[3]

सेनाभिः सह सैन्यसन्निवेशे सूताः, मागधाः, वन्दिनः, व्यापारिणः, गणिकाः, चाराः, दर्शकाश्च निवसन्ति स्म । रुग्णानां व्रणितानां च सैनिकानामुपचाराय वैद्याः नियुक्ताः । सन्ध्याकाले तूर्यादिभिर्माङ्गलिको ध्वनिः कृतः । मनोरञ्जनाय रात्रिकाले नर्तनं समायोजितम् । शिविरेषु स्त्रियो वर्षवराश्च सेवार्थं नियुक्ताः ।[4]

प्रायशः भूम्यर्थं युद्धानि कृतानि । तद्यथा महाभारते प्रोक्तम्—

भूमौ च जायते सर्वं भूमौ सर्वं विनश्यति ।
भूमिः प्रतिष्ठा भूतानां भूमिरेव परायणम् ॥
यस्य भूमिस्तस्य सर्वं जगत् स्थावरजंगमम् ।
तत्रातिगृद्ध्रा राजानो विनिघ्नन्तीतरेतरम् ॥ भीष्म ५२०-२१

क्वचित् प्रजानां सामूहिकरूपेण दस्युभिः सह युद्धमभूत् । दस्युभिः सह युद्धं कर्त्तुं राजाऽपि सेनया सह प्रयाणमकरोत् ।[5] राजकन्यानां कृते स्वयंवरावसरे प्रायो युद्धानि समारब्धानि । गवार्थं महाभारंतानुसारं बहुशो वीरा अयुध्यन्त ।

महाभारतकालीनो युद्धाचारः प्रशस्तोऽभवत् । तथा हि—युद्धे जिता यशोहीनाः,

१. भीष्मपर्वणि ११६.२२-२३ ।
२ सौप्तिकपर्वणि १३.२०; १४.७–१०,९६
३. उद्योग० ९५१ अध्याये ।
४. उद्योगपर्वणि १९६.१८–१९; द्रोणपर्वणि ६१.७, १७०;५०,१०-१८ शल्यपर्वणि ६२.५ ।
५. शान्तिपर्वणि ७६.३४,३६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्त्रीभिः रक्षिताः, पराक्रमरहिताः शत्रवो न मारणीयाः। युद्धस्थले दर्शका रक्षितव्याः। दिव्यास्त्रैः शत्रुमारणमसमीहितम्। मायाविभिः सहैव केवलं कुटिलं युद्धं समीचीनमिति सम्मतम्। अतिकटु वदन्नपि दूतोऽक्रोधनीयोऽभवत्। युद्धाय धर्माः समयाश्च प्राक् प्रकल्पिताः। महाभारतयुद्धे तु—

निवृत्ते विहिते युद्धे स्यात् प्रीतिर्नः परस्परम्।
यथापरं यथायोगं न च स्यात् कस्यचित् पुनः॥
वाचा युद्धप्रवृत्तानां वाचैव प्रतियोधनम्।
निष्क्रान्ताः पृतनामध्यान्न हन्तव्याः कदाचन॥
रथी च रथिना योध्यो गजेन गजधूर्गतः।
अश्वेनाश्वी पदातिश्च पदातेनैव भारत॥
यथायोगं यथाकामं यथोत्साहं यथाबलम्।
समाभाष्य प्रहर्तव्यं न विश्वस्ते न विह्वले॥
एकेन सह संयुक्तः प्रपन्नो विमुखस्तथा।
क्षीणशस्त्रो विवर्मा च न हन्तव्यः कदाचन॥ भीष्म० १.२७-३१

महाभारते स्पष्टं प्रोक्तम्—यतो धर्मस्ततो जयः।[१] अपरं च—

न तथा बलवीर्याभ्यां जयन्ति विजिगीषवः।
यथा सत्यानृशंसाभ्यां धर्मेणैवोद्यमेन च॥ भीष्म० २१.९

विपक्षेऽपि स्थितेभ्यो गुरुभ्योऽनुमतिमाशीर्वादं च गृहीत्वा वीरा युद्धं समारभन्त।

युद्धाचारानुसारमवध्यानां संख्यानल्पैव समभवत्। तथा हि—स्त्रियः, शरणागताः, प्रमत्ताः, सुप्ताः, बालकाश्च न हन्तव्याः। ये केचित् मुखे तृणं धारयित्वा गच्छन्ति ते न प्रहर्तव्याः। व्यसनग्रस्तः सन्तानहीनो वा न वध्याः। सन्नाहरहितैः सह युद्धमकरणीयमासीत्।

युद्धस्थले मरणासन्नस्य महावीरस्य समीपमन्ये पार्थिवा उपतिष्ठन्ति स्म। सहस्रशः कन्यास्तत्र गत्वा चन्दनचूर्णैर्लाजैर्माल्यैश्च सर्वशोऽवाकिरन्। सर्वे तस्याभिवादनं कृत्वा तस्योपभोगाय सामग्रीमुपाजह्रुः।

विजिता राजानो वर्षपर्यन्तं वन्दिन एव विनीताः। पश्चात् ते विजेतुः पुत्रवत् सम्मानिताः। विजिताः कन्या वर्षान्ते पितृगृहं गन्तुमनुमताः। युद्धकाले द्वयोः सैन्ययोर्मध्ये यदि कोऽपि सन्धिकामो ब्राह्मण आगच्छत् तर्हि युद्धं स्थगितम्। अन्यथाव्यवहारिणो जातिबहिष्कृता एव निर्मर्यादिता इति घोषितम्।[२]

---

१. भीष्मपर्वणि २.१४।
२. शान्तिपर्वणि ९७ अध्यायतः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विपक्षे स्थितानामादरणीयपुरुषाणां प्रणामं कर्तुं कुशलं प्रष्टुं च तेषां चरणस्य कर्णस्य च समीपं बाणौ निक्षिप्तौ ।[1]

महाभारतयुगे युद्धविज्ञानं विकसितमासीत् । प्रयोजनानुसारं सेनानां बहुविधा व्यूहा रचिताः । युद्धार्थिनां सैनिकानां शिक्षा परीक्षा च सम्यक् प्रकारेण कृते । तेषां व्यायामः परिश्रमापेक्षोऽभवत् । कुलीना यशस्विनो मनस्विनश्च सेनार्थं स्वीकृताः ।

महाभारतकाले युद्धस्य लोकप्रियता संवर्धिता । धर्मयुद्धे क्षत्रियाणां प्राणत्यागः प्रशस्ततमोऽभिज्ञातः ।[2] कतिपयविचारका युद्धे नरसंहारं समीक्ष्य विधानं चक्रुः यत्—

उपायविजयं श्रेष्ठमाहुर्भेदेन मध्यमम् ।
जघन्य एव विजयो यो युद्धेन विशाम्पते ॥ भीष्म० ३.८१

युद्धदृश्यं तु प्रायो द्वन्द्वमयमासीत् । तत्र रथिनां युद्धे रथाः परस्परसंघट्टेन चूर्णिताः, हस्तिनः परस्परं दन्तेन विदारिताः, वीराणां प्रहारेण हस्तिनो मारिताः । गदामुसलादिभिराहता असिना छिन्नाः, हस्तिदन्ताभ्यां विदारिताः, हस्तिपादैर्मर्दिता वा धराशायिनो वीराः परस्परमाक्रोशन्ति स्म । हस्तिभिः रथा अश्वाश्च मर्दिताः । अश्वानां पादघातैर्बहवो व्रणिताः । बीभत्सं सर्वं युद्धदृश्यमासीत् । तद्यथा भीष्मपर्वणि प्रोक्तम्—

गजवाजिमनुष्याणां शोणितान्त्रतरङ्गिणी ।
प्रावर्तत नदी तत्र केशशैवलशाद्वला ॥ ८९.२५

युद्धस्थले क्वचिद्वाग्युद्धमपि समारभत ।[3] स्वपक्षस्य विपक्षस्य वा वीरमधिकृत्य यत्सर्वमवद्यं प्रोक्तं तदशोभनीयमासीत् । तत्र कदाचित् कचाकचि दन्तादन्ति नखानखि युद्धमपि समभवत् । मुष्टियुद्धं मल्लयुद्धं च क्वचित् सोत्साहं संसाधिते ।

विजेतॄणां स्वागतं सोत्सवं सम्पादितम् । सर्वे स्वलंकृताः पुरवासिनः कुमारीभिर्गणिकाभिश्च सह वाद्यैर्नभसि तुमुलीकृते विजेतॄणामभिनन्दनं कुर्वन्ति स्म । तदा राजमार्गेषु पताकाः सज्जिताः, सर्वे देवाः पूजिताश्च । नागरिका हस्ते मंगलद्रव्याणि गृहीत्वा, स्त्रियो बहुमूल्यवस्त्राणि परिधाय च सूतमागधादिभिः सह नगराद् बहिरेत्य सुगन्धिभिरलङ्कारमालादिभिश्च विजेतॄन् प्रसाधितवन्तः ।[4]

अर्थशास्त्रानुसारं राज्यं परितः सर्वेषामन्येषां राज्यानां शासकाः शत्रवः सन्ति । तेषां न्यक्करणं समीचीनं कल्पितम् । शत्रूणां शत्रवो मित्रवत् सम्भाविताः । ईदृशमाकलनं युद्धोत्पादकमासीत् । पार्श्ववर्तिनो राजानः परस्परमयुध्यन्तेति चिन्तनीयमासीत् । इयं युद्धपरम्परा सर्वेषां हानयेऽभवत् ।

---

१. विराटपर्वणि ४८.६.८ ।
२. उद्योग० १५६.७ क्षत्रियाणां व्याधिमरणं शय्यामरणं वा निन्दितमेव । भीष्मपर्वणि १२२.२६-३१
३. कर्णपर्वणि ३०,३३,५५,५६
४. विराटपर्वणि ३३.४७-५०; ६३.३-४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्थशास्त्रयुगे विविधानि युद्धोपकरणानि बभूवुः । प्रथमं तावदस्त्रशस्त्राणां वर्गीकरणं दर्शनीयम् ।

स्थिरयन्त्राणि—सर्वतोभद्र-जामदग्न्य-बहुमुख-विश्वासघाती-संघाटी - यानक-पर्जन्य-कार्धबाहूर्ध्वबाहवश्च ।

चलयन्त्राणि—पाञ्चालिक-देवदण्ड-सूकरिका-मुसल-यष्टि-हस्तिवारक-तालवृन्त-मुद्गर-गदा-स्पृक्तला-कुद्दाल-शतघ्नी-त्रिशूल-चक्रादीनि ।

हलमुखानि—शक्ति-प्रास-कुन्त-हाटक-भिन्दिपाल-शूल-तोमर-वराहकर्ण-कर्षण- त्रासिकादीनि ।

धनूंषि—कार्मुक-कोदण्ड-द्रुणादीनि ।
खड्गाः—निस्त्रिंश-मण्डलाग्रासि-यष्टयः ।
क्षुरकल्पानि—परशु-कुठार-पट्टिश-खनित्र-कुद्दाल-चक्रकाण्डच्छेदनानि ।
आयुधानि—यन्त्रपाषाण-गोष्पणपाषाण-मुष्टिबाण-रोचनीदृषदादीनि ।
वर्मावरणैश्च शरीरस्य विविधाङ्गानि रक्षणीयानि आसन् ।

अर्थशास्त्रयुगात् युद्धप्रकरणे दुर्गविधानस्य महत्त्वमवर्धत । राज्यसीमान्ते राजधान्यामटव्यां मरुभूमौ, पर्वते, जलप्रदेशे च शत्रूणामाक्रमणस्य निवारणाय दुर्गरचना कृता । दुर्गे स्थित एव राजा शत्रोर्विनाशं कर्त्तुमचेष्टत ।

कौटिल्यानुसारं त्रिविधं युद्धमासीत्—प्रकाशं कूटं तूष्णीकं च । प्रकाशं युद्धं प्रकाशे एव निर्दिष्टे देशे काले च बभूव । कूटं युद्धं कपटमयमभवत् । तत्रासाधुव्यवहारेण शत्रवो विनाशिताः । तूष्णीकयुद्धे विपक्षी सेनापतिर्मन्त्रबलेन स्वपक्षे नीतः । क्वचित्तीक्ष्णपुरुषाः शत्रुविनाशाय नियुज्यन्ते स्म । ते विषप्रयोगेण शत्रून् मारयन्ति स्म । दुर्गविजयाय कौटिल्यः पञ्चोपायान् निर्दिशति । तद्यथा—उपजापः, अपसर्पः, वामनः, पर्युपासनमवमर्दश्च । उपजापेन विपक्षे परस्परवैमनस्यमुत्पादितम् । अपसर्पेण गूढपुरुषा नियुक्ताः । वामनेन विपक्षिणः स्वपक्षे धृताः । पर्युपासनं तु शत्रोरुपरि परित आक्रमणम् । अवमर्दस्तु साक्षादाक्रमणमेव । अग्नियोगेन दुर्गाः प्रदाहिताः ।

कौटिल्यो विजयिनां राज्ञां कर्तव्यं निर्दिशति । तथा हि—

चरित्रमकृतं धर्म्यं कृतं चान्यैः प्रवर्तयेत् ।
प्रवर्तयेन्न चाधर्म्यं कृतं चान्यैर्निवर्तयेत् ॥

कौटिल्यानुसारं विजयाय ज्योतिर्विदां नाक्षत्रिकशुभाशुभं नापेक्षणीयम् । स्वप्रयत्नैः सफलता भवति, न तु ग्रहनक्षत्रादिकैः ।

भारतीयसैन्यबलस्योत्कर्ष ऐतिहासिकयुगे 'अलक्षेन्द्रस्य' आक्रमणावसरे प्रमाणितः । बहवो वन्यजातीनां सेनाः स्वतन्त्रतां रक्षितुं प्राणपणेनाचेष्टन्त । ईदृशीषु जातिषु प्रथम-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मश्वका आसन् । तैः सह युध्यमानोऽलक्षेन्द्रः क्षतविक्षतो बभूव । ते सर्वेऽश्वकाः समरे मारिताः । पञ्चनदप्रदेशस्य बन्दीभूताः सैनिका अलक्षेन्द्रस्य सेनायां सम्मिलिता न बभूवुः । ते सर्वे शनकैः पलायितुमचेष्टन्त । अपरेद्युर्विफला एव ते मारिताः । महाराजेन पौरवेणा-लक्षेन्द्रस्य महायुद्धमभवत् । स प्रार्थितोऽपि कदापि अलक्षेन्द्रस्याधिपत्यं नैच्छत्, अपितु युद्धमेव दातुमियेष ।

मौर्ययुगे राजकीययुद्धसमारम्भे नौसेनायाः महत्त्वं सविशेषमभवत् । युद्धस्थले हस्ति-नामुपयोग आधुनिकटैङ्कवत् कृतः । चन्द्रगुप्तस्य मौर्यस्य सेनायां ९,००० हस्तिनः समा-युक्ताः बभूवुः । सेनायाः शासनार्थं षट् समितय आयोजिता आसन् । ताः सेनायाः विवि-धाङ्गानां सुव्यवस्थां चक्रुः । तदानीन्तनधनूंषि पुरुषवत् प्रलम्बानि बभूवुः । द्वन्द्वयुद्धं प्रायोऽसिना कृतम् ।

युद्धकालेऽपि प्रजाः स्वकर्मणि शान्तमनसा व्यापृता बभूवुः । कृषका युद्धभूमेः समीप-मपि शान्तमनसः कृषिं कुर्वन्ति स्म । शत्रुभूमेः प्रदाहनं वृक्षाणां छेदनं वा निषिद्धमासीत् ।[1]

युद्धं प्रति विरागस्य भावना महाराजस्याशोकस्य मनसि समवर्धत । तेनोल्लिखितम्— तदस्ति अनुशोचनं देवानां प्रियस्य विजित्य कलिङ्गान् । अविजितं हि विजितं यत् तत्र वधो वा मरणं वा अपवाहो वा जनस्य । इच्छति हि देवानां प्रियः सर्वभूतानामक्षतिं संयमं समचर्यां मार्दवम् । एष च मुख्यमतो विजयो देवानां प्रियस्य यो धर्मविजयः । गाढा सा भवति प्रीतिर्धर्मविजये । ये पुत्राः प्रपौत्रा मे सन्तु ते नवविजयं मा विजेतव्यं मन्येरन् । तमेव विजयं मन्यन्तां यो धर्मविजयः । स ऐहलौकिकपारलौकिकः । सर्वा च निरतिर्भवतु या श्रमरतिः ।[2]

परवर्तियुगे भारतीयसैन्यव्यवस्थायां शैथिल्यमजायत । सैनिकानां जीवनविन्यासो विलासपूर्णोऽभवत् । सेनया सह राजदाराणां नायिकानां वेश्यानां मदिराघटवाहकानां च निर्याणमभवत् । मार्गे स्थाने स्थाने सन्निवेशकाले पुष्पावचय-वनविहार-जलक्रीडा-गोष्ठी-मधुपान-प्रणयालापादयो निर्दिष्टाः ।[3] सेनायाः परिमाणं बृहदासीत् । हर्षस्य सेनायां प्रारम्भकाले ५००० हस्तिनः २०,००० अश्ववाराः, ५०,००० पदातयश्च बभूवुः । पश्चादश्ववाराणां संख्या १००,००० हस्तिनां संख्या ६०,००० बभूवतुः । रथसेनानां प्रचलनं गुप्तयुगादेव लुप्तप्रायमेव ।

युद्धानि त्रिविधानि बभूवुः—भारतीयानां राज्ञां पारस्परिकं युद्धम्, भारतीयानां राज्ञां वैदेशिकैः आक्रमणकारिभिः सह युद्धम्, बृहत्तरभारते उपनिदेशस्थापनार्थं युद्धं च । पारस्परिकं युद्धं भारतस्य प्रथमद्विविधैर्युद्धैर्भारतस्य प्रायशो जर्जरत्वमेव घटितम् । पारस्परिकं युद्धं भारतस्य

1. Ancient India P. 31-32
२. अशोकस्य त्रयोदशशिलालेखात् ।
३. शिशुपालवधे ५-१० सर्गतः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विनाशायाभूत् । न क्वचित् शास्त्रेष्वपि पारस्परिकयुद्धानां निषेधो विद्यते । वैदेशिका-
क्रमणकारिभिः सह योद्धुं भारतीयानां संघाः क्वचिदेव घटिताः । कतिपयभारतीयनृपा
वैदेशिकैः सह सन्धिं कृत्वा भारतस्य स्वातन्त्र्यविनाशाय उद्युक्ता इति निर्घृणप्रसङ्ग
इतिहासप्रमाणित एव ।

कल्हणानुसारं कुटिलनीतेः प्रवर्तनेन शत्रुभूतं राजानं सचिवा विपत्तिग्रस्तं कुर्वन्ति
स्म । स्वनासिकाकर्णादिकं छित्वा सिकतासिन्धोः सचिवो ललितादित्यं समागत्य प्रोवाच-
अस्माकं राजा तु भवता सह मे सन्धि-प्रस्तावं श्रुत्वा मम दुर्गतिं कृतवानिति । ललिता
दित्यस्तमनुसरन् सेनया सह मरुभूमौ यदा निपतितस्तदा तेन सचिवेन स्वीयं दुश्चेष्टि-
तमुद्घाटितम् ।[1] आवश्यकतानुसारं ग्रामीणा ब्राह्मणाः कृषकाश्च युयुत्सवो बभूवुः ।[2] युद्ध-
काले ग्रामाणां दुर्दशा बभूव—

भारोढिपीडितग्राम्याक्रन्दः क्षान्तिचरूपमाम् । राजत० ८.२५१२

दशमशताब्दे कन्दर्पेणौषधतैललिप्ता बाणाः प्रयुक्ताः ।[3] सेना तु महती बभूव ।
ललितादित्यस्य सेनायां केवलं कर्णोरथाः सपादं लक्षमासीत् ।[4]

न्यायव्यवस्था

वैदिकधारणानुसारं दण्डव्यवस्थायाः प्रथमाधिष्ठाता वरुणो वर्तते । वरुणस्य चरा विश्वमखिलं पर्यालोचयन्तः पापकारिणः दण्डाधानाय चिन्वन्ति । स्वयं वरुणो मानवानां सदसतोः परीक्षकः पापिनः दण्डयति । वरुणोऽनवधानेन पापं कुर्वतो जनान् क्षमते ।

उपर्युक्तविवरणेन वैदिकानां राज्ञां न्यायव्यवस्था परिचीयते । राजानो वरुणसमा दण्डविधानं कुर्वन्ति स्म । वैदिकयुगे सभापि न्यायकर्मणि व्यापृता बभूव । ग्रामेषु ग्राम्यवादिनो न्यायं कृतवन्तः । प्रश्नविवाका न्यायं कर्तुमधिकृताः ।

न्याय-व्यवस्थाया वैदिकप्रक्रिया सरला बभूव । साक्षिणां महत्त्वमल्पमेवासीत् । शपथमात्रेण निर्दोषत्वं प्रमापितमासीत् । क्वचिदाशुदण्डविधानमपि प्रचलितमासीत् । तथा हि—चौरा अधमर्णाश्च निगडिता एव बाधिताः । चौर्याभियुक्तास्तप्तलोहखण्डं गृहीत्वा यदि न दग्धास्तर्हि ते निर्दोषा इति सम्मतम् ।

वैदिकयुगे दण्डविधानं कठोरमभवत् । तथा हि प्रजानां मेषाणां हन्ता वृकश्चाश्वः

---

१. राजत० ४.२७७–२९३ ।

२. राजत० ८.२५१८ ।

३. राजत० ७.९८२–९८४ । [illegible]

४. राजत० ४.४०७ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पित्रान्वीकृतः। राज्ञो विद्रोहिणः पुरोहिता मृत्युदण्डभागिनो बभूवुः। चौरास्तु प्राण- वियुक्ताः कृताः। तथापि क्वचित् 'अपराधो मया कृतः' इति कथनमात्रेण पापस्य सम्मार्जनं भवतीति सम्मतम्।[1]

महाभारतानुसारं ब्राह्मणाः प्रजानामाचारपद्धतिं व्यवस्थापयन्। आचारपद्धतेश्- च्युता जना राज्ञा दण्डनीया आसन्। मृत्युदण्डो विरल आसीत्। चतुर्विधा दण्डाः ख्याताः--उद्वेजनं (शरीराय कष्टकरम्) बन्धनं विरूपकरणं वधश्च। पुरोहितशरणं गत्वा यदि पापी कथयेत्—नाहं पापं पुनः करिष्यामीति तदा स मुक्तोऽभवत्। वानप्रस्था ब्राह्मणा वाऽपराधिनो राजदण्डभागिनो बभूवुः। स्वबन्धवः सम्बन्धिनो वा राज्ञा दण्डनीया इति विधानमासीत्। न्यायपद्धतौ सर्वे समानमाना बभूवुः। न्यायव्यवस्थायाः तदा- नीन्तं स्वरूपमधोलिखितश्लोकैः परिचीयते--

कार्येष्वधिकृताः सम्यक्कुर्वन्तो वा नृपानुगाः।
आत्मानं पुरतः कृत्वा यान्त्यधः सहपार्थिवाः॥
ततः साक्षीबलं साधु द्वैधवादकृतं भवेत्।
असाक्षिकमनाथं वा परीक्ष्यं तद्विशेषतः॥
अपराधानुरूपं च दण्डं पापेषु धारयेत्।
वियोजयेद्धनैः ऋद्धानधनानथ बन्धनैः॥
कामकारेण दण्डे तु यः कुर्यादविचक्षणः।
स इहाकीर्तिसंयुक्तो मृतो नरकमृच्छति॥
न परस्य प्रवादेन परेषां दण्डमर्पयेत्।
आगमानुगमं कृत्वा बध्नीयान्मोक्षयीत वा॥

शान्ति० ८५ अध्यायतः

न्यायाधिकारे श्रेष्ठामात्या नियुक्ता आसन्। न्यायालये साक्षिणां सत्यप्रवणतायै धार्मि- कानुशासनं प्रस्तावितम्। तथा हि—

पृष्टो हि साक्षी यः साक्ष्यं जानानोऽप्यन्यथा वदेत्।
स पूर्वानात्मनः सप्त कुले हन्यात्तथापरान्॥
यश्च कार्यार्थतत्त्वज्ञो जानानोऽपि न भाषते।
सोऽपि तेनैव पापेन लिप्यते नात्र संशयः॥ आदि० ७.३-४

न्यायकर्मणि क्षिप्रकारिता स्पृहणीयासीत् न्यायाधिकारे नियुक्ता जनाः प्रतिदिनं यथा- कालं धर्मासनमधिष्ठाय निर्णयं कुर्वन्त्विति विधानमासीत्। अलसाः राजानो नृगवद्दण्ड- नीया इति सम्मतम्।[2]

---

१. शतपथब्राह्मणे २.५.२.२०।
२. रामायणे उत्तरकाण्डे ५३ सर्गतः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बौद्धसाहित्यानुसारं तदानीन्तनन्यायकर्म सरलं सहजं च प्रतिभाति । वादी प्रतिवादी च राज्ञः समक्षं वादं प्रतिवादं च क्रमशः प्रस्तावयन्ति स्म । राजा स्वयमपि स्वसन्देहनिवारणाय तौ प्रश्नानपृच्छत् । मिथ्यावादी तु क्वचिदन्धीकृतः । तस्य जिह्वा वा छिन्ना । जनपदेषु ग्राममुख्यः साधारणन्यायं कृतवान् । न्यायाधिकारेणाधर्मं कुर्वतो जनान् राजा दण्डयति स्म ।[1] राज्ञः पुरोहिताः सेनापतयश्च क्वचित् न्यायाधिकारे नियुक्ता बभूवुः । बन्दिनां जीवनं कठोरमभूत् । तेषां शारीरिकदण्डाय कण्टकजटितः प्रतोदः प्रयुक्तः ।

मौर्ययुगस्य न्यायव्यवस्थायाः कठोरत्वं विदितचरमेव । मिथ्यावादिनां साक्षिणामङ्गानि छेदितानि । सन्दिग्धस्थले जलपरीक्षया सत्यासत्यं विविक्तम् । प्रायोऽपराधिनः स्वापराधं स्वीकुर्वन्ति स्म । राजापि न्यायकर्म समाहितवान् ।

महाराजोऽशोको न्यायाधीशान् सभादिशत्—सर्वे मनुष्याः प्रजा मम । पश्यत हि यूयमिदं सुविहिता अपि नीतिरियम् । एकः पुरुषोऽप्यस्ति यो बन्धनं वा परिक्लेशं वा प्राप्नोति, तद्भवति अकस्मात् तेन बन्धनान्तिकम् । अन्यच्च, बहुजनो दवीयो दुःखीयति । ततः एष्टव्यं युष्माभिः किमिति मध्यं प्रतिपादयेम इति । एभिस्तु जातैर्न सम्प्रतिपद्यते ईर्ष्ययाश्रमेण नैष्ठुर्येण त्वरयानावृत्त्यालस्येन तन्द्रया । एवं कुर्वन्तः स्त, उद्गच्छत । संचरितव्यं, व्रजितव्यं, एतव्यं वा । एवमेव यत् पश्यथ यूयं तेन वक्तव्यम्—"आज्ञां न पश्यथ एवं च एवं च देवानां प्रियस्यानुशिष्टिः ।' एतस्मै अर्थाय इयं लिपिर्लिखिता इह येन नगरव्यवहारकाः शाश्वतं समयं युज्येरन् ।[2]

ईसवीशतकस्य प्रारम्भिकयुगे प्रतिभूप्रदानेन कस्यचिद्बन्दिनो विमोचनं स्वल्पकालिकमभवत् ।[3] पुनः बन्दिनि प्रत्यावर्तिते स प्रतिभूः स्वतन्त्रोऽभवत् ।

राजकीयोत्सवकाले बन्दिनां बन्धनविमुक्तिरायोजिता ।

गुप्तसम्राजां शासने दण्डव्यवस्था प्रायः मृदुर्बभूव । मृत्युदण्डो विरलोऽभवत् । अङ्गच्छेदनमेव महत्तमो दण्डो बभूव । दाण्डिकाः, चौरोद्धरणिकाः, दण्डपाशिकाश्च राजदण्डं प्रावर्तयन् । स्वयं राजापि धर्मासनाधिकरणेऽधिष्ठितः सन् न्यायमकरोत् ।

ह्वेनसांगानुसारमभियुक्तानामपराधनिर्णयाय क्वचिद् बहुविधा दिव्यपरीक्षाः कृताः । तथा हि—जलपरीक्षा, अग्निपरीक्षा, तुलापरीक्षा, विषपरीक्षा च ।

सूत्रस्मृतिग्रन्थेषु प्रतिपादितो न्यायविधिः भारते शाश्वतं प्रावर्तत । तेषु मनुस्मृतिः सर्वव्यापिनी बभूव । मनुस्मृतौ वैज्ञानिकविधिना विवादविषयाः पर्यालोचिताः । तथा हि—

---

१. गामणीचण्डजातके २५७ ।

२. कलिङ्गशिलालेखात् ।

३. सौन्दरनन्दे ११.६० । स्कन्दपुराणानुसारं यमद्वितीया-दिवसे बन्दिनो भगिनीमिलितुमुन्मुक्ताः । वैष्णवखण्डे ११.६० ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विवादास्तात्रदष्टादश विधाः—ऋणादानम्, निक्षेपः, अस्वामिविक्रयः, सम्भूयसमुत्थानम्, दत्तस्यानपकर्म, वेदनादानम्, संविद्व्यतिक्रमः, क्रयविक्रयानुशयः, स्वामिपालविवादः, सीमाविवादः, वाक्पारुष्यम्, दण्डपारुष्यम्, स्तेयम्, साहसम्, स्त्रीसंग्रहणम्, स्त्रीपुंधर्मः, विभागः, द्यूतसमाह्वयः च । एतेभ्यो व्यतिरिक्ता विषया प्रकीर्णकोटौ गणिताः ।

सूचकाः स्तोभकाश्चापराधिनां विवरणं सम्प्रधारयितुं प्रयुक्ताः । मनुप्रणीतो न्यायमार्गे निपुण एव । तथा हि

व्यवहारान्दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ॥
तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम् ।
विनीतवेषाभरणः पश्येत्कार्याणि कार्यिणाम् ॥
यस्मिन्देशे निशीदन्ति विप्रा वेदविदस्त्रयः ।
राज्ञश्चाधिकृतो विद्वान् ब्रह्मणस्तां सभां विदुः ॥
यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च ।
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः ॥
पादोऽधर्मस्य कर्तारं पादः साक्षिणमृच्छति ।
पादः सभासदः सर्वान्पादो राजानमृच्छति ॥
धर्मासनमधिष्ठाय संवीताङ्गः समाहितः ।
प्रणम्य लोकपालेभ्यः कार्यदर्शनमारभेत ॥
वाह्यैर्विभावयेल्लिङ्गैर्भावमन्तर्गतं नृणाम् ।
स्वरवर्णेङ्गिताकारैश्चक्षुषा चेष्टितेन च ॥
जातिजानपदान्धर्माञ्श्रेणीधर्मांश्च धर्मवित् ।
समीक्ष्य कुलधर्मांश्च स्वधर्मं प्रतिपादयेत् ॥
सत्यमर्थं च संपश्येदात्मानमथ साक्षिणः ।
देशं रूपं च कालं च व्यवहारविधौ स्थितः ॥
गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयोनयः ।
अर्थ्युक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि ॥
नार्थसम्बन्धिनो नाप्ता न सहाया न वैरिणः ।
न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः ॥
स्त्रीणां साक्ष्यं स्त्रियः कुर्युर्द्विजानां सदृशा द्विजाः ।
शूद्राश्च सन्तः शूद्राणामन्त्यानामन्त्ययोनयः ॥
बहुत्वं परिगृह्णीयात् साक्षिद्वैधे नराधिपः ।
समेषु तु गुणोत्कृष्टान्गुणिद्वैधे द्विजोत्तमान् ॥
CC-0. Nepal Sanskrit Academy, Kathmandu Collection
सत्यं साक्ष्ये ब्रुवन्साक्षी लोकानाप्नोति पुष्कलान् ।

इह चानुत्तमां कीर्ति वागेषा ब्रह्मपूजिता ।।
जन्मप्रभृति यत्किञ्चित्पुण्यं भद्र त्वया कृतम् ।
तत्ते सर्वं शुनो गच्छेद्यदि ब्रूयास्त्वमन्यथा ।।
यमिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति च ।
न चार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः ।।
कौटसाक्ष्यं तु कुर्वाणांस्त्रीन् वर्णान्धार्मिको नृपः ।
प्रवासयेद्दण्डयित्वा ब्राह्मणं तु विवासयेत् ।।
वाग्दण्डं प्रथमं कुर्यात् धिग्दण्डं तदनन्तरम् ।
तृतीयं धर्मदण्डं तु वधदण्डमतः परम् ।। अष्टमाध्यायतः

दण्डस्याभिनव-विधयः प्रायः सदैव प्रकल्पिताः । तथा हि—कश्मीराणां राजा उच्चलस्तु भ्रष्टाचारान् कायस्थानधोविधिभिः सोपहासं दण्डितवान्—

स कार्यवेषं हास्याय सभायं चारणोचितम् ।
अकारयद् भूतमिश्चं धावनं डोम्बयोधवत् ।। राजत० ८.९४
स प्रांशुर्गेष्टितश्मश्रुरुष्णीषेणोत्फलन् पुनः ।
शूलहस्तः सजानूरुः केषामासीन्न हास्यकृत् ।। ८.९५
स शीर्षदर्शनं साम्यवादगेश्याविटान्वितम् ।
प्रियगेश्यं कं चिदग्ने नृत्तवाद्यमकारयत् ।। ८.९६
बध्वान्यं शकटे नग्नं क्षुरत्नूनार्धमस्तकम् ।
अकारयत् सटान्यस्तचीनपिष्टच्छटाङ्कितम् ।। ८.९७

राजकीय आयः

राजकीय आयः प्रथमं कृषिपशुपालनादिभिः समभवत् । अर्थशास्त्रानुसारं बहवोऽध्यक्षाः कृषिकर्मणे, पशुसंवर्धनाय च नियुक्ता आसन् ।

ऋग्वेदानुसारं राजा प्रजाभ्यो वलिमग्रहीत् । बलिग्रहणप्रथा परवर्तियुगेऽपि प्रायः सदैव प्रचलिताऽभवत् । समृद्धिशालिभ्यो राजा विशेषधनं प्राप्तवान् । भागधुगितिराजपुरुषः प्रजानामुत्पादितवस्तुभ्यो राजभागमगृह्णात् । प्रजानामश्वेषु गोषु च राजभागः समवर्त्तत । संग्रहीता राजकीयायस्य संग्रहाय नियुक्तः । शत्रुविजयो महाधनप्राप्तिद्वारमभवत् ।

महाभा[illegible]गणनामकुर्वन् । शुल्कोपजीविनस्तदा प्रजाभ्यः शुल्कमगृह्णन् । आकरलवणशुल्कतरादिभ्य आयमार्गेभ्यः समागतस्यायस्य शोधनममात्यैः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कृतम् । शिल्पिभ्यो व्यापारिभ्यश्च पर्याप्तं धनं कररूपेण प्राप्तम् । महाभारते करनिर्धारण-सिद्धान्ताः प्रकल्पिताः—

संवेक्ष्य तु तथा राज्ञा प्रणेयाः सततं कराः ।
नोच्छिन्द्यादात्मनो मूलं परेषां चापि तृष्णया ॥
ईहाद्वाराणि संरुध्य राजा संप्रीतदर्शनः ।
प्रद्विषन्ति परिख्यातं राजानमतिखादिनम् ॥ शान्ति० ८६.१८-१९

आयद्वाराणि तु—

बलिषष्ठेन शुल्केन दण्डेनाथापराधिनाम् ।
शास्त्रानीतेन लिप्सेथा वेतनेन धनागमम् ॥ शान्ति० ७२.१०

राजकीयकोशे रत्नादिकं स्वर्णमुद्राश्च संगृहीतानि । कोष्ठागारेऽन्नवस्त्रकाष्ठादीनि संगृहीतानि ।

दिग्विजयेन राजसूययज्ञोपहारैश्च राजकोशस्य वृद्धिः संजाता । युद्धार्थं यज्ञार्थं वा राजा स्वप्रजाभ्यो यथेच्छं धनं बलादपि अगृह्णात् ।

मौर्ययुगे राजकीयायो ग्रामेभ्यो भागग्रहणेन, बलिसङ्ग्रहेणाभवत् । भूमेरुत्पादनस्य षष्ठांशो भागोऽभवत् । नागरिकेभ्यो जन्ममरणकालिक करेण राजकीय आयो बभूव । आपणेभ्यो विक्रयशुल्कः संगृहीतः । प्रजाभ्य उपहाररूपाः पशुपक्षिणः कौतुकागाराय प्राप्ताः ।

गुप्तयुगे प्रमातारः क्षेत्राणां मापं कुर्वन्ति स्म, न्यायकरणिकाश्च भूमिकरविवादानां निर्णयं कृतवन्तः । ध्रुवाधिकरणो भूमिकरविभागस्याध्यक्षोऽभवत् । अक्षपटलिकाः महाक्ष-पटलिकाः, करणिकाश्च भूमिसम्बन्धिलेखानां निर्माणं सङ्ग्रहं च कुर्वन्ति स्म । शौल्किकाः शुल्कस्य, गौल्मिका वनोत्पत्तेरायस्याध्यक्षा बभूवुः । भाण्डागाराधिकृतो राजकीयायस्य सर्वोच्चपदाधिकारी बभूव । दण्डरूपेण सामन्तानामुपहारेण च बहुलो राजकीयायः सम-भवत् । वाकाटकनृपाणामायः शाद्वलात्, चर्मणः, दग्धकाष्ठात्, आकरात्, मद्यात्, गूढनिधेः, निक्षेपात्, दुग्धात्, पुष्पात्, पशोश्च बभूव ।

भूमेर्योग्यतामनुमाय भूमिकरस्य मात्रा क्वचिन्निर्णीता । तथा हि चोलवंशी नृपः कुलो-त्तुङ्गः उत्तमभूमिमधिकृतत्योत्पत्तेः तृतीयांशं मध्यमभूमिमधिकृत्य च पंचमांशं करं गृहीत-वान् । कतिपये राजानस्तीर्थयात्रिभ्यः करं गृहीतवन्तः । द्वादशशताब्दे सिद्धराजोऽह्लिल-वाडस्य राजा सोमनाथस्य तीर्थयात्रिभ्यः करं गृहीतवान् । कतिपये राजानो विवाहोपनय-नादीनि करसाधनानि कृत्वा समृद्धिशालिनो भवितुमकामयन्त । निगूढं स्वामिरहितं च धनं प्रायः सदैव राज्ञ एवाभवत् ।

सूत्रस्मृत्यनुसारं भूमिकरः भूम्युत्पत्तेः $\frac{1}{6}$, $\frac{1}{8}$, $\frac{1}{12}$ वा, पशुकरः पशुधनस्य $\frac{1}{50}$ बभूव । वृक्षमांसमधुघृतसुगन्धिरसौषधिपुष्पमूलफलपत्रशाकतृणचर्मवंशादिभ्यः षष्ठांशो राजकर-रूपेण गृहीतः । विक्रेयवस्तूनां मूल्यस्य $\frac{1}{20}$ भागो राजकीयशुल्करूपेण गृहीतः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्थशास्त्रानुसारं सन्निधाता कोशगृहस्य, पण्यगृहस्य, कोष्ठागारस्य, कुप्यगृहस्य च निर्माणं कारितवान् । स रत्नादीनां परीक्षणं कारयित्वा तेषां सङ्ग्रहमकरोत् । समाहर्ता दुर्ग-राष्ट्राकर-सेतु-वन-व्रज-व्यापार-मार्गादिभ्यः प्राप्तमायं संगृहीतवान् । राज्ये सर्वत्र राजकीयायस्य संग्राहका नियुक्ताः । यदि तेषां दोषेण क्वचिद्राजकीयस्यायस्य हानिर्जाता तर्हि ते शीघ्रं दण्डार्हाः स्युः । आयवर्धकाः कर्मचारिणः पुरस्करणीयाः स्युः । अर्थशास्त्रानुसारं प्रजानामभ्युदयेनैव राजकीयायस्य संवर्धनं साधु ।[1]

कतिपयनृपाणामायः कुत्सितोपायैरभवत् । कश्मीराणां राजा हर्षो मन्दिर-लुण्ठनैस्तेषां मूर्तीनां धातोः विक्रयेण चायः कृतः । सर्वाणि मन्दिराणि सर्वामूर्तयश्चैतदर्थं तेन विध्वस्तानि । अन्येऽपि बहवो राजानः सूर्यस्य बुद्धस्य च ताम्रादिनिर्मितमूर्तीनां भञ्जनं कृत्वा विक्रयेणायं कृतवन्तः ।[2]

राजकीयो व्ययः

राजकीयो व्ययः प्रायः सदैव प्रधानरूपेण राजपदप्रतिष्ठार्थं बभूव । सैन्यरक्षणार्थं युद्धार्थं शासनकार्यार्थं च शाश्वतरूपेण राजकीयायस्याधिकांशो विनियोजितः । राजसभासंरक्षार्थं महद्व्ययितं राजभिः ।

राजकोशस्य पर्याप्तं धनं राजकुटुम्बस्य कृते वैदिकयुगे विसृष्टमासीत् । तदा न्यायाधीशेभ्यो गुप्तचरेभ्यश्च व्ययः कृतः । राजानऋषिभ्यो धनं दत्तवन्तः । प्रजायाः संरक्षणार्थं पोषणार्थं च राजधनमुपयोजितम् । राज्यस्य समृद्ध्यर्थं राजकीययज्ञविधानेषु बहुधनं व्ययितम् ।

वैदिकयुगतः पश्चात् राजाश्रितानां जनानां स्पष्टोल्लेखाः प्राचीनसाहित्ये वर्तन्ते । तथा हि—विद्वांसः, ऋषयः, मुनयः, साधवः, दीनाः, अनाथाः, भिक्षुकाश्च राजभिः परिपालनीयेति समाम्नातम् । महाभारतानुसारं व्यय आयस्यार्धादधिको न भवेत् । राजा कृषकेभ्य ऋणमदात् । सेनार्थं वेतनव्ययस्तत्रासीदधिक एव ।[3] महाभारतानुसारमादर्शविधानंमधोलिखितमासीत्—

> हरेत् तद् द्रविणं राजन् धार्मिकः पृथिवीपतिः ।
> ततः प्रीणयते लोकं न शोकं तद्विधं नृपः ॥

---

१. प्रजासमृद्धिश्चरित्रानुग्रहश्चोरनिग्रहो युक्तप्रतिषेधः सस्यसम्पत् पण्यबाहुल्यमुपसर्गप्रमोक्षः परिहारक्षयो हिरण्योपायनमिति कोशवृद्धिः । अर्थशास्त्रे २.८ ।

२. राजत० ७.१०९०–१०९५;७.६९६ ।

३. गौतमे १०.४२; महाभारते सभापर्वणि ५.४८.१२७; विराटपर्वणि ६५.१७ शान्तिपर्वणि ४२.११-१२; मनो ९.२०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ेशस्य अन्ति-
अशोक:
महा-

असाधुभ्योऽर्थमादाय साधुभ्यो यः प्रयच्छति ।
आत्मानं संक्रमं कृत्वा कृत्स्नधर्मविदेव सः ॥ शान्ति० १३४.६-

महाभारतयुगे राजभी राजमार्गाणां प्रपाणां त्रिपणानां च व्यवस्था कृता । प्रजानां स्वास्थ्यसंवर्धनाय राजान ओपधीनां संग्रहं कारयन्ति स्म, कुशलवैद्यान् नियोजयन्ति स्म च । प्रजानां मनोरञ्जनार्थं नटनर्तकमल्लादयो नियुक्ताः । व्यापारस्य संवर्धनाय योजनानि प्रकल्पयितुं राजकोशात्पर्याप्तं धनं व्ययितम् । महाभारतानुसारं राजभृतौ मृतानां जनानां स्त्रियो राजवृत्तिभिः पालिता आसन् । पंगुमूकान्ध-बन्धुहीनाङ्गहीनप्रव्रजितानां राजा तेषां पितृवत्पालनमकरोत् ।[1]

अर्थशास्त्रानुसारं राजकार्यस्य वैविध्यं प्रागेव प्रदर्शितम् । सर्वेषां महत्त्वपूर्णविभागानामध्यक्षास्तेषां बहवः कर्मचारिणश्च राजकोशात् वेतनं प्राप्नुवन्ति स्म । रिक्तस्थानेषु जनोपनिवेशनाय राजा पर्याप्तं व्ययमकरोत् । महाराजाशोकस्य राजकीयव्ययैर्ब्राह्मणश्रमणानां पोषणं क्षेत्राणां सेचनं महापथानां निर्माणं नगररक्षणमौषधालयानां सञ्चालनं संस्कृतिसंवर्धनञ्च व्यवस्थीयन्ते स्म । परवर्तियुगेऽपि बहवो राजानस्तादृशेषूपक्रमेषु धनव्ययं चक्रुः । राष्ट्रियविकासाय राजभिः कर्मान्तिका नियुक्ताः । ते रचनात्मकैर्निर्माणात्मकैश्चायोजनै राष्ट्रं धन-धान्य-सम्पन्नं कृतवन्तः । ख्रीष्टाब्दतः पूर्वं प्रथमशताब्दे महाराजस्य खारवेलस्य राजकीयव्ययस्य वृत्तं शिलालेखे उत्कीर्णम् । तद्यथा—राजधान्या नवीकरणं युद्धं प्रणालीनिर्माणं प्रजारञ्जनार्थं समाजनृत्यसङ्गीतादीनामायोजनं साधुसतामाश्रयणं गुहानिर्माणं दानं देवालयनिर्माणं च

गुप्तवंशीयानां सम्राजां धनं ब्राह्मणानां विद्यार्थिनां धार्मिकसंस्थानां पोषणार्थं सत्रदानादीनां प्रवर्तनार्थं तडागमन्दिरमूर्तीनां निर्माणार्थं च विनियोजितम् । बहवः कलाकाराः कवयश्च राजकीयाश्रयं प्राप्य स्वप्रतिभायाः चरमविकासं कृतवन्तः । हर्षवर्धनस्य राजकीयव्ययस्य चत्वारो विभागा आसन् । प्रथमभागेन राजकीयपूजोपासनादयो राष्ट्रस्य संवधनार्थं बभूवुः, द्वितीयेन राजकर्मचारिणां वेतनं प्रदत्तम्, तृतीयेन विद्वद्भ्यो पुरस्काराः प्रदत्ताः, चतुर्थेन च धार्मिकसम्प्रदायेभ्यो दानं दत्तम् । अपरं च वैविध्यपूर्णमासीत् राष्ट्राभ्युदयायोजनम् । तथा हि—राजकोशैः महापथेषु औषधालयानां व्यवस्था, यात्रिभ्यः दीनहीनेभ्यश्च भोजनवस्त्रादिदानम्, विद्वत्परिषत्सु विजयिभ्यः पण्डितेभ्यः पुरस्कारप्रदानम्, षष्ठे वर्षे प्रयागमहोत्सवे सर्वस्वदानं च व्यवस्थापितानि । शिक्षाप्रसाराय हर्षेण भूयिष्ठो व्ययः कृतः ।

अन्येषामपि बहूनां राज्ञां दानधर्मेष्टापूर्तयः महाव्ययपरा बभूवुः । कश्मीरराजानां सत्रेषु बहूनां लोकानां प्रतिदिनं भोजनस्य सततव्यवस्थाभवत् । कश्मीराणां राजमहिष्या वाक्पुष्टादेव्या सत्रेषु आकल्हणयुगमसंख्यानामनाथनां भोजनं प्राप्यते स्म ।[2] तत्रत्यराजा

१. सभा॰वीण ५.११३ ।
२. राजत० २.५८ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जयसिंहः प्रजानां परिपालनार्थं तासां पितृभ्योऽपि अधिक आसीत् ।[1]

वैदेशिकी नीतिः

अस्मिन्प्रकरणे भारतस्य विविधभागानां राज्ञां परस्परं सम्बन्धस्तेषां च भारताद्बहिः राजभिः सह सम्बन्धश्च निरूपणीयो । प्रथमं तवद् व्यापारमधिकृत्य प्राचीनकालतो राज्ञां वैदेशिकनीतिर्व्यवस्थापिता । सर्वे राजानः स्वदेशाद्वस्तूनां निर्यताय परदेशेभ्यो वस्तूनामायाताय च सुव्यवस्थां चक्रुः । तत्सर्वं सिन्धुसभ्यतायुगात् समारब्धमिति प्रमीयते ।

वैदिकयुगाद दिग्विजयद्वारा भारतस्य सर्वेषां राज्यानामेकसूत्रे ग्रथनं यथाकालं बभूव ।

वैदेशिकनीतौ चरदूतप्रणिधीनां च महत्त्वमासीत् । दूतद्वारा परराष्ट्रेषु सन्देशाः प्रेषिताः, तेभ्यः उत्तरं प्रत्युत्तरं च प्राप्तम् । चराः प्रणिधयश्च गुप्तरूपेण परराष्ट्रस्य वृत्तान्तान् प्राप्य स्वामिने न्यवेदयन् । युद्धकाले तेषां कार्याणि महत्त्व-पूर्णानि बभूवुः । परराष्ट्राणां दुर्बलीकरणमपि तेषां गुप्तचराणां कार्यमासीत् ।

वैदेशिकनीतिपथेन भारतीया राजानः स्वदेशस्य स्वतन्त्रतामक्षुण्णां कर्तुं यथाकालं समुद्यता बभूवुः । तथा हि पश्चिमोत्तरप्रदेशस्य राजा शशिगुप्तो वैक्ट्रियाप्रदेशस्य पारसीकस्य राज्ञोऽलक्षेन्द्रविरोधे सहायीभूतः ।[2]

ऐतिहासिकयुगे मौर्यस्य चन्द्रगुप्तस्य ग्रीकराजेन सिल्यूकसेन सह सन्धिः सुविदित एव । सिल्यूकसः स्वकन्यां राज्यभागं च चन्द्रगुप्ताय प्रदाय सन्धिं दृढीकृतवान् ।[3] चन्द्रगुप्तोऽपि ५०० हस्तिनः सिल्यूकसाय प्रदत्तवान् । विदेशिनां सौख्यं विधातुं सुव्यवस्था कृता मौर्यराजैः । सिल्यूकसस्य प्रतिनिधिदूतो मेगस्थनीजश्चन्द्रगुप्तसभायां प्रतिष्ठितः । सीरियाप्रदेशस्य राजा डीमाकस इति ख्यातं प्रतिनिधिदूतं बिन्दुसारसभां समलमकरोत् । बिन्दुसारस्य ग्रीकदार्शनिकेषु महती रुचिरासीत् । इदमेवोद्दिश्य एम्बोलस इति ख्यातो दार्शनिकस्तस्य सभासद् बभूव ।

अशोकः परराष्ट्रैः सह मैत्रीभावस्य प्रवर्तनार्थं सविशेषं प्रायतत । भारतस्य चोळ-पाण्ड्यताम्रपर्णीप्रदेशानां राजभिः सह भारताद् बहिः सीरियाप्रदेशस्यान्तिओकसेन, मिस-

---

१. राजत० ८.२४०५–२४०७ । महाराज उच्चलस्तु रोगिभ्यो निदानं वृत्तिहीनेभ्यो जीविकां च प्रायच्छत । राजत० ८.७५ । अवन्तिवर्मा तु महादानशीलोऽभवत् । ५ १६-१८ ।

२. Cambridge History of India Vol I p. 350

३. परवर्तियुगे कश्मीरको महाराजः कलशः नोळपुरस्य राजतनयां परिणीय स्वशक्तिं दृढीचकारेति कीर्तिराजस्य तनयां स च नोळपुरप्रभोः ।
लब्ध्वा भुवनमत्याख्यां [illegible] ॥ राजत० ५.५८२ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रस्य टालेमीद्वितीयेन, अफ्रीकमहाद्वीपस्य काईरीनस्य मगजेन, मेसीडोनियाप्रदेशस्य अन्तिगोनसेन, इपिरसप्रदेशस्यालक्षेन्द्रेण सह मैत्रीपूर्णसद्भावनाः सम्प्रतिष्ठापिताः। अशोकः सर्वेभ्यो राजभ्यः शान्तिमयप्रगतिपथस्य सन्देशं प्रेषितवान्। तेषां राज्येषु अशोकसाहाय्येनाभ्युदयायोजनानि परिणतफलानि संजातानि। अयं धर्मविजयो दिग्विजस्य स्थानेऽशोकेन स्वीकृतः।

परवर्तियुगेऽपि बहवो राजानोऽशोकपथस्यानुसरणं कृतवन्तः। ग्रीकराजानां दूता भारते समागताः। रोमकराजेभ्यश्चीनकराजेभ्यश्च भारतीया राजानो बहुमूल्यमुपहारं प्रेषितवन्तः।

वैवाहिकसम्बन्धेन राज्ञां परस्परसम्प्रतिष्ठाधानस्य नीतिः प्रचलितासीत्। गुप्तराजानां शक्तिर्लिच्छविराजवंशेन सह वैवाहिकसम्बन्धेन संवर्धिता। समुद्रगुप्तः शककुशनादिभ्यो राजभ्यः कन्योपायनं प्राप्तवान्। गुप्तानां महासान्धिविग्रहिकः सचिवः परराष्ट्राणां गतिविधिः सन्तोलनाय बभूव। राजदूतानां परम्परा पूर्ववत् सन्तता बभूव।

खीष्टाब्दस्य पश्चात् सप्तमे शतके हर्षवर्धनस्य चीनकदेशराजैः सह दौत्यसम्बन्ध आसीत्। तस्मिन्युगे चालुक्यवंशस्य पुलकेशिनो राजसभायां पारसीकराजदूताः समागताः।

खीष्टस्य पश्चात् द्वितीयशतकादारभ्य भारतीयविजेतॄणां प्रवृत्तिः वृहत्तरभारताभिमुखी बभूव। ततः प्रभृति आपञ्चमशतकं मलयकम्बोडिया-अन्नम-सुमात्रा-जावा-बालि-बोर्नियोप्रदेशेषु भारतीयानां राज्यानि प्रतिष्ठापितानि। इण्डोचाइनाप्रदेशे चम्पा-कम्बुजोपनिवेशौ संस्थापितौ। खीष्टतः पञ्चदशशतकपर्यन्तं बृहत्तरभारते भारतीयानां प्रभावोऽविद्यत। एतेषु देशेषु शैलेन्द्राणां श्रीविजयानां च राज्यं समभवत्।

भारतस्य कतिपयराजानो भारताद् बहिः एशियामहाद्वीपस्य पश्चिमे भागे विजयं चक्रुः। तद्यथा गजसिंहो विजयसातत्यं सम्प्रधारयन्नेव गजनी इति ख्यातां पुरीं संस्थापयामास।[१]

गणतन्त्राणि राज्यानि

गणतन्त्रराज्यानां शासनं प्रजातन्त्रात्मकमभवत्। खीष्टस्य प्राक् सप्तशताब्दादारभ्य खीष्टस्य पश्चात् चतुर्थशताब्दपर्यन्तं गणतन्त्राणां विशेषाभ्युदयोऽभूत्। भारतस्योत्तरपूर्वे उत्तरपश्चिमे च भागे गणराज्यानां प्रायशः सत्ता बभूव। पंचनदप्रदेशे सिन्धुदेशे च वृकदामणि-पार्श्व-काम्बोजानां गणाः संस्थापिताः। खीष्टतः प्राक् पंचमे शताब्दे त्रिगर्तषष्ठानां गणराज्यं पाणिनिनोल्लिखितम्। ततः पश्चात् जयपुरस्य समीपस्थमर्जुनायनं गणराज्यं

---

१. Tod's Rajasthan Vol.II p. 222

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

खीष्टस्य पश्चात् चतुर्थशताब्दपर्यन्तमासीत् । यौधेयानां गणराज्यं पंचनदप्रदेशे उत्तरप्रदेशे च विस्तृतमासीत् । पंचनदप्रदेशस्य केन्द्रभागे मद्राणां गणराज्यमभवत् । मद्रा मालवा क्षुद्रकाश्चेति गणराज्याधिष्ठिता अलक्षेन्द्रस्य विरोधं युद्धस्थले कृतवन्तः ।

अलक्षेन्द्रस्याक्रमणकाले अगेसिनाइनां सिवीनां च गणराज्ये बभूवतुः । प्रायः समकालिकमेवाम्बष्ठानां गणराज्यं तत्रासीत् ।

द्वारिकायां महाभारतानुसारमन्धकवृष्णीनां गणराज्यसंघोऽभवत् । कृष्णः प्राचीनयुगे तस्य गणराज्यस्य प्रधान आसीत् ।

उत्तरप्रदेशस्य पूर्वभागेषु विहारस्योत्तरभागेषु ण भग्ग-बुली-कोलिय-मोरियाणि लघुगणराज्यानि बभूवुः । तत्रैव शाक्यानां मल्लानां लिच्छवीनां विदेहानां च गणराज्यानि बभूवुः । एतानि गणराज्यानि गौतमबुद्धस्य समकालिकान्येवासन् ।

गणतन्त्राणां शासनं सभासदां समित्या कृतम् । समितेः प्रधानकेन्द्रं राजधान्यामेवासीत् । सभासदः प्रजानां सुखशान्तिसमृद्ध्यर्थं कर्मचारिणां नियुक्तिं कुर्वन्ति स्म । नगराणां ग्रामाणां च शासनं स्थानीयपंचायतैः कृतम् । बृहद्गणराज्येषु राजधान्यां केन्द्रीयसमितिः प्रतिष्ठिता बभूव । तेषां विविधप्रदेषु शासनकर्म स्थानीयसमितिभिरायोजितम् । गणराज्यसमितिषु सदस्यानां सङ्ख्या क्वचित् ७००० पर्यन्ता बभूव । एताः समितयो युद्धार्थं सेनापतेर्निर्वाचनं चक्रुः, सन्धिविग्रहनिर्णयमकुर्वंश्च । राष्ट्रस्याभ्युदयायोजनस्य समस्यास्ताभिरेव समाहिताः ।

प्रत्येकस्य गणस्यैकोऽध्यक्षोऽभवत् । स स्वगणस्य मन्त्रिमण्डलस्य प्रधानोऽभवत् । मन्त्रिणां सङ्ख्याऽऽवश्यकतानुसारं त्रिंशतिपर्यन्ता बभूव । मन्त्रिणां निर्वाचनं समित्या कृतम् । परराष्ट्र-कोष-न्याय-दण्ड-कर-व्यापरोद्योगादिषु प्रत्येकस्य विभागस्य मन्त्री बभूव । मन्त्रिणामध्यक्षत्वे तेषां विभागानां कर्मचारिणः कर्म कुर्वन्ति स्म ।

भारतीयेतिहासे गणराज्यानां स्थानं महत्त्वपूर्णं प्रतिभाति ।[1] गणराज्येषु विकसिता शासनपद्धतिः प्राचीनयुगे राष्ट्रस्य सर्वतोमुखोन्नतये बभूव । अर्थशास्त्रानुसारं 'सङ्घा हि संहतत्वादधृष्याः परेषाम्' । तद्गणराज्यसंघविषयकं सत्यम् । गणराज्यसङ्घैः अलक्षेन्द्रस्याक्रमणावरोधः साफल्येन कृत इति गणानां देशप्रेम, जातिप्रेम, स्वातन्त्र्यं च निदर्शयति ।

---

१. गणतन्त्रराज्यस्य माहात्म्यं विज्ञापयन् टामस पेन महोदयः कथयति—
Individuals themselves each in his own pereonal and sovereign right, entered into a compact, with each other to produce a government, and this is the only mode in which government have a right to arise, and the only principle on which they have a right to exist.
Gallery of Famous American Writers p. 4

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुराज्यादर्शः

पुरा भारते आदर्शरामराज्यस्य या कल्पना कृता सा यशस्करस्य सुशासनेन प्रत्यक्षमनुभूतेति कल्हणेनादर्शीकृता राजव्यवस्था—

अचौराभूत्तथा भूमिर्यथा रात्रौ वणिक्पथाः ।
अतिष्ठन् विवृतद्वारा मार्गाश्चाविघ्निताध्वगाः ॥
प्रत्यक्षेवापरे तस्मिन्नासीत् सर्वापहारिणाम् ।
कृष्यध्यक्षत्वमुत्सृज्य कृत्यं नान्यन्नियोगिनाम् ॥
ग्राम्याः कृषिपराधीना नापश्यन्राजमन्दिरम् ।
विप्राः स्वाध्यायसंसक्ता नाकुर्वञ्शस्त्रधारणम् ॥
न विप्रगुरवः साम गायन्तो मदिरां पपुः ।
न तापसाः पुत्रदारसम्युधान्यान्यढौकयन् ॥
न मूर्खगुरवो मत्स्यापूपयागविधायिनः ।
चक्रिरे स्वकृतैर्ग्रन्थैस्तर्कागमपरीक्षणम् ॥
नादृश्यन्त च गेहिन्यो गुरुदीक्षोत्थदेवताः ।
कुर्वाणा भर्तृशीलश्रीनिषेधं मूर्धधूननैः ॥
कार्तान्तिको भिषक्सभ्यो गुरुर्मन्त्री पुरोहितः ।
दूतः स्थेयो लेखको वा न तदाभूदपण्डितः ॥ राजत० ६.७-१३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दार्शनिकप्रवृत्तयः

इह जगति जीवनकाले सुखलाभाय कथं व्यवहर्तव्यमिति मानवाः स्वज्ञानानुरूपमेव निर्धारयन्ति । पंचभूतमये भौतिकजगति पशूनामप्यैन्द्रियकसुखलाभः सम्भवति । विज्ञानजनितेन नैसर्गिकैनैश्वर्येण सूक्ष्माण्यैन्द्रियकसुखानि मानवेभ्यः सुलभानि भवन्ति । रसवृत्त्या काव्यकलाशिल्पादीनामानन्दः प्राप्यते । एतेभ्यः परः परमानन्दो योगैरध्यात्मज्ञानैश्च लभ्यते । योगस्याध्यात्मज्ञानस्य च भूमिका दर्शनेन निर्मीयते । किं तद्दर्शनम् ?

जगतो यदाध्यात्मिकमाधिभौतिकं वा स्वरूपं तस्य ज्ञानमेव दर्शनम् । तस्य ज्ञानस्य प्राप्तेः प्रक्रियापि दर्शनमेव । दर्शनस्य प्रकाशे मानवः स्वजीवनोद्देश्यं कर्तव्यपथं च विचिनुते । यत् किंचिद्विज्ञानं विवेचयति तदेव संकलय्य दर्शनमुपसंहरति ।[1]

दर्शनस्य प्रथमालोकः सिन्धुसभ्यताया योगिमूर्त्या प्रमीयते । योगी समाधिस्थो वर्तते ।

वैदिकदर्शनम्

आत्मविषयकः प्रथमो मन्त्र ऋग्वेदे पठ्यते—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ १.६४.२०

मन्त्रेणानेन व्यज्यते यदात्मा भोगपरायणो वर्तते परमात्मा च द्रष्टा भवति । अपरं च—

सतः बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ॥ १०.१२९.४

प्रकृतिर्ब्रह्मणः परिधानमित्यनेन मनीषिणां ब्रह्मसम्बन्धि-विचारणा प्रतीयते ।
वैदिकविचारणायां 'पुरुषः' 'एकदेवः' वा स्थूलप्रकृतेः परो मतः । एतदेवाधिकृत्य ऋषिणा प्रोक्तम्—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्ति अग्नि यमं मातरिश्वानमाहुः ॥ १.१६४.४६

1. Science sorts out whlie philosophy sums up. Radhakrishnan, Indian Philosophy, Vol. I, p. 176.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकस्मात् सतो बहुनामात्मिका वृत्तिर्विकासपथे प्रवर्तिता । एकपुरुषस्तामधीक्षत इति प्रमीयत अधोलिखितमन्त्रेण—

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।

यो अस्याध्यक्ष परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद ।। १०.१२९.७

स एव हिरण्यगर्भः—आत्मदा, बलदा, सत्यधर्मेति प्रतीतिः ।[1] ऋग्वेदेऽमृतत्वस्य समीहासीत् । तद्यथा—

जातवेदो यशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्याम् । ५.४.१०

मरणानन्तरं पितृभिः सह मिलनमभवदथवा पुनर्जन्म बभूवेति ऋषिभिः परिणमितम् । परवर्तिवैदिकयुगे मुक्तेः कल्पना सम्यक् स्पष्टीकृता । तथा हि—विद्यया तदारोहन्ति यत्र कामाः परागताः ।[2] अमृतान्मृत्युः निवर्तते ।[3]

उपनिषद्दर्शनम्

वैदिककाले दार्शनिकानामपरं नाम विश्ववित् प्रतिभासते । तेषां रहस्यगोष्ठीं वर्णयन् कविः प्राह—

मन्त्रयन्ते दिवोऽमुष्य पृष्ठे विश्वविदो वाचमविश्वविन्नाम् । ऋ० ९.९.१०

अथर्ववेदे आत्मनो ब्रह्मणश्च सम्यग्विवेचनं प्रारब्धम् । तस्मादेव ब्रह्मणः स्कम्भाद् वा तपः ऋतं व्रतं श्रद्धा सत्यं वायुः चन्द्रमाः भूमिरन्तरिक्षं द्यौश्च प्रवर्तितम् । स्कम्भेऽस्मिन् सदसतोरन्तः स्यात् । तत्रैवामरता मरणशीलता वा विद्यते ।[4] स एव स्कम्भ आत्मा वा यक्षो वा शरीरे निवसतीति व्याख्यातम् । तद्यथा—

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।

तस्मिन्यद्यक्षमात्मन्वत्तद्वै ब्रह्मविदो विदुः ।। १०.८.४३

ब्रह्माधिकृत्याथर्ववेदे निरूपितम्—

शतं सहस्रमयुतं न्यर्बुदमसंख्येयं स्वमस्मिन्निविष्टम् । १०.८.२४

त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी ।

त्वं जीर्णो दण्डेन वञ्चसि त्वं जातो भवसि विश्वतोमुखः । १०.८. २७

---

१. ऋग्वेदे १.१२१ ।

२. शतपथब्राह्मणे १० ५.४.१६ ।

३. श० ब्रा० १०.२.६.१९ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

४. अथर्ववेदे १०.७ ।

पूर्णात्पूर्णमुदंचति पूर्णं पूर्णेन सिच्यते ।
उतो तदद्य विद्याम यतस्तत् परिषिच्यते ॥ १०.८.२९

अथर्ववेदानुसारं तु मरणानन्तरं स्त्रीपुत्रादिभिः सहात्मनो मिलनं भवति ।[१]

निष्कामकर्मयोगस्य प्रथमप्रतिष्ठाथर्ववेदे वर्तते । तदनुसारमात्मा (ब्रह्म) अकामो भवति ।[२]

उपनिषद्दर्शनम्

उपनिषद्युगे पराविद्या ब्रह्मविद्या वा सम्प्रतिष्ठिता बभूव । तद्यथा—ऐन्द्रियकसुखानुरक्तो जन इन्द्रियग्राह्याणि वस्तूनि प्राप्नोति भुनक्ति च, तथैवेन्द्रियेभ्यः परेणात्मना परमात्मनो ब्रह्मणो वा ग्रहणं भोगश्च क्रियेते । तत् ब्रह्म ज्ञेयम् ।

"सर्वं खल्विदं ब्रह्म । मनोमयः, प्राणशरीरः, भारूपः, सत्यसंकल्पः, आकाशात्मा, सर्वकर्मा, सर्वकामः, सर्वगन्धः, सर्वरसः, सर्वमिदमभ्यात्तोऽवाक्यनादरः एष म आत्मान्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः । एतद्ब्रह्म ।"[३] ब्रह्मैव सम्भावयितव्यम् । तत्कथम्—इतः प्रेत्याभिसम्भवितास्मीति । अस्मै प्रयोजनाय साधनं विहितम्—

क्रतुमयः पुरुषः । यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति ।[४]

ब्रह्मणो ज्ञानेन ध्यानेन च ब्रह्ममयत्वं सिध्यति । तस्मिन् सिद्धे केवलं ब्रह्मानन्द एवानुभूयते । तदा सर्वे सांसारिकव्यवहारा निष्प्रयोजनाः भवन्ति ।[५]

मरणोत्तरविधानम्

मरणानन्तरे काले यदि ब्रह्ममयत्वं न सिध्यति तर्हि नवशरीरं प्राप्यते । तद्यथा—तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति' एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वाऽन्यमाक्रममाक्रम्यात्मानमुपसंहरति । तद्यथा पेशस्कारी पेशसो मात्रामुपादायान्यन्नवतरं कल्याणतरं रूपं तनुते एवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वान्येषां वा भूतानाम् ।[६]

---

१. अथर्व० ६. १२०.३ ।
२. अथर्व० १०.८.४४ ।
३. छा. उ. ३.१४.१-४ ।
४. छान्दोग्योपनिषदि ३.१४.१-४
५. बृहदारण्यके ४.३.२२.३२ ।
६. बृहदारण्यके ४.४.३-४ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपरं च—निष्कामस्य पुरुषस्य पुनर्जन्म न विद्यते। स ब्रह्मैव सन् ब्रह्माप्येति। तथा हि—

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥

पुनर्जन्मसिद्धान्तः प्रतिष्ठितः—

काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति। यत्क्रतुर्भवति तत्कर्म कुरुते। यत्कर्म कुरुते तदभिसम्पद्यते।[१]

सृष्टिसमारम्भः

छान्दोग्योपनिषदि सृष्टिकथा विद्यते। तदनुसारं प्रथमं 'सत्' आसीदेकमेवाद्वितीयम्। सतः सृष्टिपरम्परारब्धा। सतः तेजः, तेजस आपः, अद्भ्यः अन्नमिति। अन्नमयं मनः आपोमयः प्राणः तेजोमयी वागिति।[२] अन्यत्र—आत्मा एवेदमग्रे आसीत् एकाकी। स द्वितीयमैच्छत्। स इममेवात्मानं द्वेधापातयत्ततः पतिश्च पत्नी चाभवताम्। ततो मनुष्या अजायन्त। पश्चादात्मन एव यदिदं किंच मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत।[३] आत्मन एव सर्वे देवाः सर्वे वर्णाः सृष्टाः।[४]

उपनिषद्युगस्य पश्चात् भारतीयदर्शनस्य द्वे प्रमुखशाखे प्रवृत्ते, वैदिकी अवैदिकी च। अनयोः प्रथमा वेदान् प्रमाणरूपेण गृह्णाति, द्वितीया च वेदानामुपेक्षां क्वचित् कुरुते। वैदिकशाखायाः षडुपशाखाः—न्यायः, वैशेषिकम्, सांख्यः, योगः, मीमांसा, वेदान्तश्च सन्ति। अवैदिकशाखाश्चार्वाकबौद्धजैनाश्च वर्तन्ते।

चार्वाकान्परित्यज्य सर्वेऽपि भारतीयदार्शनिका मरणानन्तरं मोक्षस्वर्गपुनर्जन्मगतीः विश्वसन्ति। मोक्षस्य स्वर्गस्य च प्राप्तये उपायांस्ते विभावयन्ति। जैनबौद्धदर्शनेषूपनिषदां प्रभावो वरीवर्ति। उपनिषद्वत् ज्ञानमेव सोपानं कृत्वा तपसा समाधिना चाभ्युदयकरणं सर्वोच्चकर्तव्यमिति जैनैर्बौद्धैश्च विशदीकृतम्।

षड्दर्शनम्

प्रमाणं ज्ञानं च

उपरिदृष्टदर्शनपद्धतौ सत्यासत्ययोः स्वरूपं निर्णेतव्यम्। वस्तूनां सत्यस्वरूपस्य ज्ञानं प्रमा।[५] तत्करणं प्रमाणम्। प्रमाणानां न्यायदर्शनानुसारं चतुर्विभागाः भवन्ति—प्रत्य-

१. बृहदारण्यके ४.४.६–७।
२. छान्दोग्योपनिषदि ६.२–५।
३. बृहदारण्यके १.४.२, ३, ४।
४. [illegible] १.४.११।
५. तद्वति तत्प्रकारकोऽनुभवः प्रमा। यथा रजते इदं रजतमिति ज्ञानम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्षम्, अनुमानम्, उपमानम्, शब्दश्च । प्रायः सर्वेषु भारतीयदर्शनेषु प्रमाणानां प्राधान्यं सकलपदार्थव्यवस्थापकत्वेन विद्यते, तथापि न्यायदर्शने प्रमाणानां विशेषाग्रहः ।[1]

प्रत्यक्षं तावत्—इन्द्रियाणामर्थैः सन्निकर्षमपेक्षते । अनेन सन्निकर्षेण ज्ञानं भवति । तद् ज्ञानं नामविरहितं (निर्विकल्पकं) भ्रमभिन्नम्, व्यवसायात्मकं (सविकल्पकं) च भवति ।[2] तत्र प्रत्यक्षज्ञानानां तालिका स्पष्टीकरणाय—



तेषु योगजं प्रत्यक्षं योगिनामेव गम्यम् । तदतीन्द्रियविषयाणामेव भवति ।

अनुमानं प्रत्यक्षपूर्वकं भवति । तत् त्रिविधम्—पूर्ववत्, शेषवत्, सामान्यतो दृष्टं च । अनुमानाय परामर्शः—व्याप्तिः लिङ्गं (हेतुः) चापेक्षितः । तर्हि साधनमेवानुमानं तेनोत्पन्नं ज्ञानमनुमितिः । अनुमितिगमनप्रक्रिया तु परामर्शः । अस्मिन् प्रसङ्गे न्यायस्य पंचावयवाः—प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनं च विद्यन्ते ।[3]

---

१. वात्स्यायनानुसारं प्रमाणैरर्थपरीक्षणं न्यायः ।

२. इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ।

३. पंचावयवेभ्यः पक्षसपक्षविपक्षाणामपेक्षा वर्तते । पक्षे साध्यस्यास्तित्वविषयकः सन्देहः । सपक्षे साध्यास्तित्वं सिद्धमेव नित्यदर्शनत्वात्, विपक्षे साध्यं न विद्यते तर्हि हेतुः नास्ति । पक्षः पर्वतः, सपक्षः महानसम्, विपक्षः जलाशयः । पर्वते धूमो वर्तते किन्तु तत्राग्निरस्ति नास्ति वा सन्देहः । महानसे धूमो वर्तते ततोऽग्निरपि नित्यं दृश्यते धूमेन सह । अस्मिन्नन्वयव्याप्तिर्ज्ञायते । जलाशयेऽग्निर्नास्ति ततः धूमो नास्ति । तत्र व्यतिरेकव्याप्तिरनुमेया ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

प्रतिज्ञा—पर्वतो वह्निमान् ।

हेतुः—धूमात् ।

उदाहरणम्—यत्र यत्र धूमः तत्र तत्र वह्निः, अथवा यो यो धूमवान् स स वह्निमान् ।[१] यथा महानसः ।

उपनयः—वह्निव्याप्यधूमवानयं पर्वतः ।

निगमनम्—तस्माद्वह्निमान्पर्वतः ।

इदं सामान्यतो दृष्टमनुमानम् ।

पूर्ववदनुमानप्रक्रियायां पूर्वं (कारणं) दृष्ट्वा तस्य कार्यमनुमीयते । यथा मेघोन्नतिविशेषेण वृष्टयनुमानम् । शेषः कार्यम्, तल्लिङ्गकमनुमानं शेषवत् । यथा नदीवृद्ध्या वृष्टयनुमानम् ।

प्रत्यक्षेण केवलं वर्तमानं वस्तु ज्ञायते । अनुमानेन सदसत् सर्वं ज्ञायते । तथा हि वात्स्यायनः :—त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते । भविष्यतीत्यनुमीयते, भवतीति चाभूदिति च, असच्च खल्वतीतमनागतं चेति ।

प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् ।[२] गोसदृशत्वेन गवयज्ञानमुपमानेन भवति ।

आप्तोपदेशः शब्दः । यथा वेदवचनम् । आप्तस्तु यथार्थवक्ता ।

सांख्या उपमानप्रमाणं न स्वीकुर्वन्ति । यथा गौस्तथा गवय इत्यपि अनुमानमेव । न्यायदर्शने मनसा प्रस्तुतं ज्ञानमात्मन एव भवति, किन्तु सांख्यदर्शने ज्ञानं बुद्धिव्यापार एव । पुरुषे तु बुद्धिकृतज्ञानं केवलं प्रतिबिम्बितमेव भवति । सांख्यस्याप्तवचनपरिधौ वेदेतिहासस्मृत्यादिभिः सह कपिलवचनमपि गृहीतम् । योगदर्शने सांख्यप्रमाणानि सम्मतान्येव । किन्तु तत्र बुद्धिगृहीतज्ञानं सम्यङ् न सम्मतम्, बुद्धेः प्रकृतित्वात् । सत्यस्य ज्ञानं योगदर्शने योगेनैव सम्भाव्यम् ।

पूर्वमीमांसकैरादौ त्रीणि प्रमाणानि—प्रत्यक्षानुमानशब्दा इति स्वीकृतम् । परवर्तियुगे कुमारिलस्तु उपमानार्थापत्त्यनुपलब्धीनां प्रामाण्यं साधितवान् ।[३] प्रभाकरेणानुलब्धेः प्रमाणत्वं खण्डितम् । योगजज्ञानस्य मीमांसायां ग्रहणं नास्ति । यन्नैयायिका योगप्रवणा वा योगेन जानन्ति तत् सर्वमाप्तवचनेन तत्र प्रमाणितमेव ।

वेदानुसारं श्रुतिः प्रत्यक्षमेव । पुराणेतिहासस्मृतयश्चानुमानम् । त्रीणि षड् वा प्रमाणानि वेदान्तिभिः स्वीकृतानि ।[४] वेदान्तानुसारं प्रकृतिस्तर्कैर्ज्ञेया भवतु नाम, किन्तु ब्रह्म-

---

१. व्याप्तिनिदर्शनमिदम् ।

२. प्रसिद्धस्य पूर्वज्ञातस्य गवादेः साधर्म्यात् सादृश्यात् साध्यस्य गवादिपदवाच्यत्वस्य साधनं सिद्धिः ।

३. अर्थादापद्यते—पीनो देवदत्तो दिवा न भुंक्ते अतएव रात्रौ भुंक्ते इति अर्थापत्तिः । यदि क्वचिद् घटो न विद्यते तर्हि घटाभावोऽनुपलब्धिप्रमाणेन प्रतीतो भवतीति मीमांसकाः ।

४. वैष्णववेदान्तिनः त्रीणि प्रमाणानि प्रत्यक्षानुमानशब्दाख्यानि [illegible] रास्तु व्यवहारे भाट्टनयेनापराणि त्रीण्यपि स्वीकुर्वन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्ञानं तु शास्त्रेणैव सिध्यति। शङ्कारानुसारं तर्कोऽविद्या। तर्केण ब्रह्म न ज्ञातव्यम्। अनुभवेन ब्रह्म ज्ञातं भवति। अविद्याग्रस्तः पुरुषो ब्रह्म जगदिव पश्यति।

प्रमेयाणि

न्यायदर्शने—आत्मा, शरीरम्, इन्द्रियम्, अर्थः, बुद्धिः, मनः, प्रवृत्तिः, दोषः, प्रेत्यभावः, फलं, दुःखम्, अपवर्गश्च प्रमेयम्।[1] वैशेषिकदर्शने—द्रव्यम्,[2] गुणः, कर्म, सामान्यम्, विशेषः, समवायः, अभावश्च प्रमेयम्। सांख्ये पुरुषः प्रकृतिश्च ज्ञेयौ वर्तेते।[3] पूर्वमीमांसायां द्रव्यम्, गुणः, कर्म, सामान्यम्, परतन्त्रता, शक्तिः, सादृश्यम्, संख्या च प्रमेयम्। रामानुजस्य विशिष्टाद्वैते द्रव्यमद्रव्यं च प्रमेयमिति सम्मतम्। सर्वेषां दर्शनानां प्रमेयेषु—आत्मा, मनः, मोक्षश्च सविशेषं प्रतिभान्ति।

आत्मपुरुषजीवादयः

न्यायदर्शनेऽनुमानेनात्मनोऽस्तित्वं प्रमाणीकृतम्। वेदवचनैस्तदनुमोदितं च। केषाञ्चिन्मते आत्मा मानसप्रत्यक्षगम्यो भवति। जिज्ञासा ज्ञानं चात्मन एव भवति[4], स एवात्मास्माकं जीवनविन्यासस्य संयोजकः।

ये तु स्वभाववादिनः शरीरमेव ज्ञानाधिष्ठानं मन्यन्ते तेषां समक्षमात्मविरहिते मृते शरीरे ज्ञानस्याभावेन आत्मनो ज्ञानाधिष्ठानत्वमिति प्रमाणितम्। अपरं च—इन्द्रियाणि साधनानि। कार्यं कर्तुं न केवलं साधनानि समर्थानि, अपितु कर्ता साधनैः कार्याणि करोति। अत एव कथितम्—

आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्॥ भाषापरिच्छेदे ४७
शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः।
तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः॥ तत्रैव ४८
मनोऽपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत्।

आत्मा धर्मस्याधर्मस्य चाश्रयः। अतो देहान्तरप्राप्तौ पूर्वजन्मनां धर्माधर्माणां फलानि

---

१. पंचभूतानां गुणाः—गन्धादयः अर्थ इति। मनस्तु इन्द्रियैः पुरस्कृतं ज्ञानमात्मने प्रयच्छति। वाचः बुद्धेः, शरीरस्य च व्यापाराः प्रवृत्तयः। दोषास्तु प्रवृत्तीनामुत्पादकाः। मरणानन्तरं जन्मग्रहणमेव प्रेत्यभावः। फलं तु सुखदुःखसंवेदनम् बाधनालक्षणं दुःखम्।

२. द्रव्यं तु पंचभूतानि, कालः, दिक्, आत्मा, मनश्च। गुणानां संख्यादौ १७—रूपम्, रसः, गन्धः, स्पर्शः, संख्या, परिमाणः, पृथक्त्वम्, संयोगः, विभागः, परत्वापरत्वे, बुद्धिः, सुख-दुःखे, इच्छा, द्वेषः, प्रयत्नश्च। कर्माणि—उत्क्षेपणम्, अवक्षेपणम्, आकुंचनम्, प्रसारणम्, गमनं च। अनेकव्यक्तिषु सामान्यतः प्राप्यं लक्षणं सामान्यमेव। विशेषेण एकः परमाणुरपरस्मात् भिन्नः। अनेन विशेषेण विशिष्टमिदं वैशेषिकं दर्शनम्। अवयवावयविनां गुणगुणिनां सम्बन्धः समवायः।

३. प्रकृतेः क्रमशः विकाराः—महत्, अहंकारः, मनः, पंचज्ञानेन्द्रियपंचकर्मेन्द्रियपंचतन्मात्राः, महाभूतानि च सन्ति। सांख्ये तत्त्वानि पञ्चविंशतिः सन्ति।

४. इच्छा-द्वेष-प्रयत्न-सुख-दुःख-ज्ञानान्यात्मनो लिङ्गम्। न्यायसूत्रे ३.१०।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भोग्यानि भवन्ति । 'अहं जाने', 'अहं करोमी' ति सम्बन्धेनात्मनः प्रत्यक्षं भवति । अयमात्माऽहंकारस्याश्रय इत्यनेन ज्ञायते । आत्मायं मानसप्रत्यक्षविषयः । अन्यैरिन्द्रियैरात्मा न ज्ञेयः ।

आत्मायं विभुः—परम-महत्परिमाणवान् । बुद्धि-दुःख-सुखेच्छादय आत्मनश्चतुर्दश गुणाः ।

आत्मनः समकक्ष एव सांख्ययोगयोः पुरुषः । सांख्ये पुरुषस्यास्तित्वं प्रमाणयता प्रोक्तम्—

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥ ६७

अयं शरीरसंघातः पुरुषाय भवति । अयं त्रिगुणरहितो विवेकी च । स पुरुषो यत्किंच जगत्यां वर्तते तस्य भोक्ता । तस्य प्रवृत्तिर्मोक्षाय भवति । त्रिगुणात्मप्रकृतेः पाशैर्बद्धः पुरुष एव जीवः । जीवस्य अहंकारेन्द्रियादयः साधनानि । मरणानन्तरं जीवो लिंगशरीरेण[1] सह प्रभवति पुनर्जन्मने । लिंगशरीरे सत्त्वगुणप्राधान्यात् मुक्तिः प्राप्यते ।

मीमांसायामात्मनोऽस्तित्वस्य सिद्धिः शब्दप्रमाणेन भवति । वेदानुसारं मरणानन्तरं पुण्यकर्मफलं प्राप्यते । तत्फलमात्मनैव प्राप्यते । अध्यक्षः सन्नात्मा शरीरस्य संचालनं करोति । आत्मनः शक्त्यैव शरीरशक्तिर्भवति । प्रत्येकस्य शरीरस्यात्मा भिन्न एव । आत्मा ज्ञाता ज्ञेयश्चास्ति ।

अद्वैतवेदान्तस्यात्मा चिद्रूपः । न्यायदर्शने आत्मा बुद्धेरधिष्ठानं किन्तु वेदान्ते ज्ञानमेवात्मा । ईदृश आत्मा चैतन्यम्, अपरं चात्मानन्दरूपः । अहं रूपेणाकर्ता भवति । आत्मा स्वयंसिद्धो न प्रमाणमपेक्षते ।

अज्ञानोपहित आत्मा जीवो भवति । जीवः कर्ता भोक्ता च भवति । स्थूलशरीरसमायुक्तो जीवो ज्ञानेन्द्रियैः कर्मेन्द्रियैः पंचप्राणैः मनसा बुद्धया च समन्वितो भवति । शरीरैः कृतैः कर्मभिरात्मा बद्धो भवति । अन्तःकरणोपहितो जीवः साक्षीति कथ्यते ।

रामानुजानुसारमीश्वरो जीवं तस्य कृतकर्मानुरूपं नवकर्मणि प्रवर्तयति । ईश्वरः कर्मफलं ददाति । भोगविलासैर्जीवस्य बन्धनं तथा तपसा तत्त्वज्ञानेन च मोक्षो भवति ।

मनः

न्यायानुसारं 'साक्षात्कार-प्रक्रियायां सुखादीनां करणं मन उच्यते' । मनसोऽणुत्वं निर्विवादमेव, यतः एकस्मिन्काले मन एकमेव ज्ञानं साधयति ।[2] सर्वे विषया मनसो ज्ञानपरिधौ समायान्ति । प्रत्येकस्यात्मन एकं मनो भवति ।

---

१. लिङ्गशरीरे बुद्धयहंकारमनइन्द्रियतन्मात्रादीनां बीजं भवति ।

२. अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहेष्यते । न्यायसिद्धान्तमुक्तावली ८५ । तथापि स्वतीव्रगत्या ज्ञानपरम्परां साधयति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परमात्मा, ब्रह्म, ईश्वरश्च

ईश्वरस्य स्थानं प्रारम्भिकन्यायदर्शने स्पष्टतो न स्वीकृतम्। परवर्तिकाले न्याये ईश्वरः संसारस्य कर्तेति। ततः परं न्यायस्य आत्मनः द्वे रूपे—परमात्मा, जीवात्मेति चानुमते। परमात्मात्मनोऽतिशयो जीवात्मा न्यूनतरश्च सम्मतः। तद्यथा—जीवात्मनो ज्ञानं सीमितं परमात्मा सर्वज्ञश्च। परमात्मनि द्वेषो नास्ति, किन्तु तस्मिन्निच्छा शुभा वर्तते। जीवात्मा तु द्वेषस्याशुभेच्छायाश्चाधिष्ठानं भवति। जीवात्मानोऽसंख्याः।

ईश्वरो जीवस्य पुण्यपापात्मकसंस्काराणां प्रवर्तयितेति नैयायिका मन्यन्ते। ईश्वरोऽदृष्टस्याध्यक्षः। स कर्मफलप्रदश्चिन्मयश्च। ईश्वरो सच्चिदानन्दस्वरूपो भवति। धर्मो ज्ञानं चेश्वरस्य विशेषगुणौ स्तः। ईश्वरस्तु सृष्टिं प्रति पितृवत् सतर्कः सचेष्टश्च वर्तते। स प्रकृतिविकासं प्रतनोति। एतदर्थं प्रकृत्या सहेश्वरः सदैव संगमितः। स सत्त्वगुणसम्पन्नः सदैव स्वकार्यपरायणो वर्तते।

सांख्यदर्शने प्रथमतरमीश्वरस्य धारणा स्पष्टतो नासीत्, परवर्तियुगे ईश्वरोऽनुसंहितः। तदनुसारं प्रकृतिपाशेभ्यो मुक्तः पुरुष ईश्वरस्य तादात्म्यं लभते।

प्रारम्भिकमीमांसायामीश्वरस्य स्थानं नासीत्। परवर्तियुगे तत्रापि ईश्वरोऽन्विष्टः। ईश्वरस्य प्रीत्यर्थं तदा यज्ञो निर्धारितः। सेश्वरसांख्यवत् सेश्वरमीमांसा विकसिता।

ब्रह्मणः सम्प्रज्ञानं प्रधानतो वेदान्तस्य वैशिष्ट्यमस्ति। हृदयस्थं ब्रह्म विज्ञानमयं सूर्यमण्डले स्थितं ब्रह्म हिरण्मयं भवति। आकाशो ब्रह्म, प्राणाः ब्रह्म, आत्मनो ज्योतिरपि ब्रह्म।

शंकरानुसारमद्वैतविशिष्टं ब्रह्मास्ति। ब्रह्मणो वर्णनं तस्य वर्णनस्यावबोधनं च कर्तुं ब्रह्मज्ञा एव समर्थाः।

शङ्करानुसारमीश्वरस्तु सगुण ब्रह्म। ईश्वरस्य सत्ता केवलं व्यवहारतो भवति न तु पारमार्थतः। ईश्वरो ब्रह्मसूत्रानुसारं जगतः कर्त्ता भवति। स व्यक्तिगतात्मनां समाहार एव। सशरीर आत्मा जीवो देही वा भवति। जीवानां समाहारो विराट् वैश्वानरो वा भवति। आत्मैव लिङ्गशरीरेण समायुक्तो लिङ्गी तैजसो वा भवति। तैजसानां समाहारो हिरण्यगर्भः सूत्रात्मा वा भवति। कारणशरीरैः समन्वित आत्मा प्राज्ञ इत्यभिधीयते। प्राज्ञानां समाहारस्तु ईश्वरः।

ईश्वरो माययोपहितः। तत्त्वतो जगद् ब्रह्मणो भिन्नं नास्ति। ब्रह्म तत्त्वमस्ति, जगत् तस्य प्रतिभासः। जगत् मायैव। विवर्तेन ब्रह्मैव जगद्रूपं प्रतीयते। यथा रज्जौ सर्पभ्रमो वर्तते। जगतोऽधिष्ठानं तथैव ब्रह्मास्ति यथा मायात्मकसर्पस्याधिष्ठानं रज्जुरेव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ईश्वरजीवयोरन्तरं स्वल्पमेव। ईश्वरः सर्वज्ञः सर्वव्यापी सर्वशक्तिमानस्ति। जीवो-

ऽल्पज्ञोऽशक्तश्चास्ति । तदेव ब्रह्म मायोपहितमीश्वरः, अविद्ययोपहितञ्च जीवो भवति । ईश्वरस्य बन्धनं नास्ति । जीवा अनेके, ईश्वरस्तु एक एव ।

रामानुजाचार्यानुसारमीश्वरो जगत उपादानकारणमस्ति । स सर्वविधैश्वर्यैः समापन्नः, पूर्णः, ज्ञानशक्तिकरुणाभिः समायुक्तो भवति । ईश्वरभक्त्या मुक्तिर्लभ्यते । ईश्वरस्याभिव्यक्तिर्जीवरूपेण भवति । अस्यां स्थितौ जीवा ईश्वरस्य शरीराणि भवन्ति । विकासावस्थायामीश्वरस्य पंच स्वरूपाणि सन्ति—अर्चा विभवो व्यूहः परोऽन्तर्यामी च । अर्चारूपं मूर्तिरेव । विभवव्यूहौ अवताराणामेव रूपं स्तः रामकृष्णादीनां बलदेवप्रद्युम्नादीनां च । पररूपे ईश्वरो भगवानेव, लक्ष्मीस्तस्य पत्नी अन्तर्यामी सर्वेषां हृद्देशे वर्तते ।

मोक्षः, मुक्तिः, निर्वाणञ्च

न्यायानुसारं दुःखस्यात्यन्तविमोक्ष एवापवर्गः[1] । दुःखानां भोगाय शरीरमपेक्ष्यते । स्वकृतपापपुण्यादीनां कर्मणां फलभोगायात्मनः शरीरेण सम्बन्धो जायते । तादृशानां कर्मणामभावे पुनर्जन्म न विद्यते ।[2] इयमेवात्मनो मुक्तावस्था । तदात्माऽनुभवविहीनो भवति । मुक्तात्मनः शाश्वतानन्द आध्यात्मिक एव । शरीरवतामात्मनामानन्द आधिभौतिको भवति ।

मुक्तये ज्ञानमेवापेक्षितम् । ज्ञेयविषयास्तु—प्रमाणप्रमेयादयः ।[3] तत्त्वज्ञानानन्तरं मिथ्याज्ञानं विनश्यति । ततो रागद्वेषौ नश्यतः । ततो धर्माधर्मप्रवृत्तयो नश्यन्ति । परिणामस्वरूपं जन्मासम्भवं भवति । तदा न सन्ति दुःखानि । दुःखानामत्यन्ताभावो मोक्षः । वैशेषिकेऽपि द्रव्यगुणादीनां पदार्थानां तत्त्वज्ञानात् निःश्रेयससिद्धिरिति सम्मतम् ।

सांख्यानुसारं पुरुषस्य बन्धनं मोक्षो वा वस्तुतो न भवति । सांख्यकारिकानुसारम्—

तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥
रूपैः सप्तभिरेवं बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥
एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥
तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम् ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः ॥
दृष्टा मयेत्युपेक्षक एको दृष्टाऽहमित्युपरमत्यन्या ।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥

---

१. दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ।

२. मुक्तेरनन्तरमपि पुनर्जन्मनः सम्भावनेति भागवते ५.१.१६ विभावितम् ।

३. प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्यग्ज्ञानाधिगमात् धर्मादीनामकरणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवत् धृतशरीरः ॥ ६२-६७

अनेन प्रकारेण जीवनकालेऽपि मुक्तिः प्राप्यते । मरणानन्तरं तु जीवन्मुक्तः कैवल्यं (पूर्णमोक्षं) अश्नुते ।[1]

योगानुसारं सम्यग्दर्शनेन प्रकृतिपाशेभ्यः पुरुषस्य मुक्तिः सम्भवति । प्रकृतेः चित्त-तत्त्वं पुरुषं बध्नाति । चित्तवृत्तेर्निरोधायाष्टाङ्गिको योगमार्गः संसाधनीयः । यावत्कालं चित्तं कार्यपरं भवति तावदेव पुरुषः संसारी भवति, अन्यथा पुरुषाय संसारस्यास्तित्व-मपि न विद्यते ।

समाधिसम्पन्नो योगी कर्मक्षयमारभते । त्रिविधानि कर्माणि–प्रारब्धानि, संचितानि, आगामीनि च भवन्ति । ईश्वरभक्त्या समाजसेवया चागामिकर्मभ्यो निवृत्तिर्भवति । मुक्ति-मार्गे कर्माण्येव बन्धनानि ।

मीमांसायां प्रारम्भिकयुगे मुक्तेः कल्पना स्पष्टा नासीत् । तदा यज्ञादिभिः स्वर्गगति-रेवाभीष्टमितिसम्मतमासीत् । परिवर्तियुगे प्रभाकरो धर्माधर्मविरहितस्यात्मनो मोक्षगतिं निर्दिशति स्म । तत्रापि मोक्षाय शमदमब्रह्मचर्यादिनात्मज्ञानप्राप्तिरेव साधनं स्वीकृतम् । मीमांसानुसारं मोक्षावस्थायामात्मा शुद्धरूपे वर्त्तते, निर्द्वन्द्वश्च भवति ।

वेदान्तानुसारं ब्रह्मनिष्ठो मोक्षं लभते । तद्यथा जीवन्मुक्ता विदेहमुक्ताश्च ब्रह्मनिष्ठा भवन्ति । यदा जीवनकाले व्यावहारिकदृष्टिर्न वर्तते तर्हि जीवन्मुक्तस्य दृष्टिः पारमार्थिकी भवति । मोक्षावस्थायामात्मा पारमार्थिकः, कूटस्थो नित्यः, आकाशवत् सर्वव्यापी सर्व-विक्रियारहितो नित्यतृप्तो निरवयवः स्वयंज्योतिस्वभावो भवति । जीवन्मुक्तः सर्वं ब्रह्म-वत्पश्यति । मुक्तः सन्नात्मा ब्रह्मणा तादात्म्यं लभते ।

रामानुजाचार्यस्य विशिष्टाद्वैते भक्तिर्मुक्तये प्रधानसाधनं समाज्ञाता । ते एव भक्ता भवितुमर्हन्ति ये निष्कामकर्मयोगेन हृदयस्य परिशोधनं कृत्वा भगवतोऽन्तर्यामिस्वरूपं विभावयन्ति । भक्तेः सम्पूर्णतैव मुक्तिः । तद्यथा भक्तेश्चरमसोपानं प्रपत्तिः । प्रपत्तिस्तु भगवति विलीनत्वमेव । आत्मनः स्वतन्त्रसत्ता मुक्तावस्थायामपि वर्तते । मुक्तात्मा सर्वज्ञः सन् सदैवेश्वरानुभूतिं करोति । मुक्तात्माऽणुरूपो भवति । ब्रह्म तु सर्वव्यापी विभुरेव । एतदेव तयोरन्तरम् । सृष्टि-व्यापारे मुक्तात्मन कर्तृत्वं नास्ति ।

ब्रह्मलोकेऽसंख्या मुक्तात्मानो विद्यन्ते । ते विशुद्धसत्त्वमयाः सन्ति । सत्त्वैरेव ते निज-विचारस्येच्छायाश्च स्वरूपं विदधति । भक्तिमार्गेण मुक्ता आत्मानो भक्तौ रता भवन्ति । ध्यानोपासनादिभिर्मुक्ता आत्मान ऐकान्तिकाः केवलिनो भवन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. वैष्णववेदान्तिनो जीवन्मुक्तिं न मन्यन्ते ।

सृष्टेः रहस्यम्

न्यायानुसारमीश्वरः सृष्टिरचनां करोति। संसारे सर्वं दुःखमेव वर्तते। तर्हि किन्निमित्तं सृष्टेः रचना कृतेश्वरेण? नैयायिकाः सृष्टिविधाने दयामेव पश्यन्ति भगवत ईश्वरस्य। मानवः संसारेऽदृष्टस्य क्षयं कर्तुमेवावसरं प्राप्नोति। अनेन प्रकारेण स कर्मबन्धनात् मुक्तो मोक्षं प्राप्नुयादिति सृष्टेरायोजनमभ्युदयायैव भवति।

वैशेषिकदर्शनानुसारं प्रलयकाले जगतः सर्वेषां वस्तूनां परमाणुरूपं भवति। पश्चात् प्राणिनामात्मानोऽदृष्टेन (धर्माधर्माभ्यां) समन्विता निस्पन्दास्तिष्ठन्ति। प्रलयायोजनमादिदेवस्य कृपां निदर्शयति। यतः प्रलयानन्तरं जन्म-मरण-बन्धन-विमुक्ताः काले-काले प्राणिनो विश्रामं लभन्ते।

विश्रान्तियुगस्यान्तोऽपि समायाति यदा पुनरादिदेवः प्राणिनामभ्युदयायैव तेषां शरीरधारणमभिप्रैति। तदा परमाणुषु गतिर्जायते। तेषां संघटनं समारभ्यते। परमाणूनां समाहारक्रमेण पंचभूतानां साधारणरूपं प्रादुर्भवति। अग्नेः पृथिव्याश्च परमाणुभिर्हिरण्यगर्भ उत्पद्यते। आदिदेवः पश्चात् ब्रह्म विश्वं चोत्पादयति। ब्रह्मण एव प्रजापतयो देवाः पितरः ऋषयश्चत्वारो वर्णा अदृष्टानुसारं जन्मानि गृह्णन्ति।

सांख्यानुसारं प्रकृतौ बौद्धिकानामाधिभौतिकानां च तत्त्वानां समन्वयो वर्तते। अत एव प्रकृतेर्बुद्धेरहंकारस्य मनसो ज्ञानेन्द्रियाणां पंचभूतानां चोत्पत्तिर्भवति।

प्रकृतेः सृष्टिस्त्रिगुणात्मिका भवति। तत्र सत्त्वगुणेन चैतन्यस्यानन्दस्य प्रकाशस्य सत्यस्य चाभिव्यक्तिर्भवति। रजसा दुःखस्य कार्यपरताया भोगविलासस्य चाभिव्यक्तिर्भवति। तमसा कार्यपरताया निरोधो मोहस्यावरणस्य च सृष्टिर्भवति। तमोगुणेनाज्ञानमालस्यं च जायेते। त्रयाणां गुणानां कार्याणि क्रमशः प्रकाशः प्रवृत्तिर्नियमनं च भवन्ति। प्रकृतेरुत्पद्यमानेषु वस्तुषु परस्परमन्तरं तेषां गुणानां मात्रानुसारि वर्तते।

प्रकृतेः प्रथमविकासो महान् बुद्धिश्च भवति। बुद्धिः धर्मज्ञानवैराग्यैश्वर्यादिभावनानां कारिका भवति। बुद्धेरहंकारतत्त्वं जायते। अहंकारेणास्मिताया बोधो भवति। अहंकारेण पुरुषः प्रकृतेः क्रियमाणानि कार्याणि स्वीकरोति। तद्यथा—

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्ताहमिति मन्यते॥ गीतयां ३.२७

अहंकारात् पञ्चज्ञानेन्द्रियाणां पंचकर्मेन्द्रियाणां पंचतन्मात्राणां मनसश्च प्रादुर्भावो भवति। तन्मात्राभ्यः पंचभूतानि प्रवर्तन्ते।

प्रकृतेर्विकासो विलयश्च क्रमानुसारमनादिकालादेवानन्तकालपर्यन्तं भवतः। विकासक्रमेणैव विलयोऽपि तत्त्वानां भवति। योगदर्शनानुसारं सृष्टेर्विकासविलयक्रमः प्रायः सांख्यवद् वर्तते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मीमांसानुसारं सृष्टिरनादिरनन्ता च वर्तते । अस्याः कोऽपि रचयिता नास्ति ।

वैष्णववेदान्तानुसारं ब्रह्मण एव जगतः सृष्टिर्भवति । ब्रह्म एव सृष्टेरुपादानकारणं निमित्तकारणं च भवति । जगदिदं ब्रह्मणो लीलायै वर्तते । प्रलयकालेऽपि जगतः स्थितिर-व्यक्तरूपेण भवति ।

शाङ्करवेदान्तानुसारं जगतः प्रादुर्भाव ईश्वरादेव भवति । तद्यथा—ईश्वरादाकाशः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथ्वी सम्भवन्ति । प्रलयकाले सर्वाणि भूतानि स्वकारणे विलीयन्ते । अन्ततो ईश्वरे आकाशो विलीयते ।

पशवः पादपा देवाः सर्वे सात्मका इति शङ्करः निर्दिशति । सर्वेषामात्मनां ब्रह्मण उत्पत्तिस्तथैव भवति यथाऽग्नेः स्फुलिङ्गा जायन्ते । मुक्तावस्थायामात्मानः पुनर्ब्रह्मणि विलीयन्ते ।

रामानुजानुसारं प्रलयकाले ब्रह्मणः कारणावस्था, सृष्टेः समारम्भे च कार्यावस्था भवति । रामानुजस्य मतेन सृष्टेः समारम्भोऽध्यासः, माया, विवर्त एव वा नास्ति । सृष्टिर्ब्रह्मणः परिणमनमेव । सृष्टिविन्यासे ब्रह्मणा सहेश्वरो जीवश्च जगदपि सदितिप्रमा-णितं रामानुजेन । अनेन प्रकारेण शंकरस्य मायावादो रामानुजेन निराकृतः ।

परमाणुवादः

परमाणुवादस्य विशेषचर्चा वैशेषिकदर्शने वर्तते । तद्यथा—ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते । ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते । त्रिभिः द्व्यणुकैः त्र्यणुकम् । एवं चतुरणुकादिक्रमेण महती पृथ्वी, महत्य आपो महत्तेजो महान्वायुरुत्पद्यते । एवमुत्पन्नस्य कार्यद्रव्यस्य संजिहीर्षावशात् परमाणुषु क्रिया जायते । क्रियया परमाणुद्वय-विभागे सति द्व्यणुकनाशो भवति । ततस्त्र्यणुकनाशः, ततः चतुरणुकस्येत्येवं महापृथि-व्यादिनाशः ।

जैनबौद्धदर्शनयोरपि क्वचित् परमाणुवादः सम्मत एव ।

प्रवृत्तिविवेचनम्

तत्त्वज्ञानेन यदा कश्चित् पुरुषः समष्टिमयी भावनां करोति, तदा तस्य सत्प्रवृत्ति-र्जायते, मिथ्याज्ञानेनासत्प्रवृत्तयश्च सम्भवन्ति । तत्त्वज्ञानाय मननं निदिध्यासनं स्वाध्या-यश्चापेक्षितानि । मिथ्याज्ञानेन 'रागद्वेषादिभिर्बद्धः पुरुषः सुखप्राप्तये दुःखनिवारणाय च यत्कर्म कुरुते तत् तस्य पुनर्जन्मबन्धनायैव भवति ।

वैशेषिकदर्शनानुसारमहिंसाश्रद्धा-भूतहितत्व-सत्यवचनास्तेय-ब्रह्मचर्यानुपधाभावशुद्धि-क्रोधवर्जनाभिषेचन-शुचिद्रव्यसेवन-देवभक्त्युपवासाप्रमादाः परिपालनीया इति कर्तव्यम् । योगद्वारात्मसंयमो जायते । तत्त्वज्ञानेन मानवः स्वार्थबुद्धेः स्वार्थपरतायाश्च मुक्तो भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सांख्यानुसारमहं पुरुषोऽस्मीत्यनुसंधेयम् । सत्त्वेन मानव ऋषित्वं समुपैति । ज्ञानपथे सर्वेषामधिकारः सम्मतः । शूद्रोऽपि ज्ञानेन मुक्तिं लब्धुं समर्थः ।

जीवनस्य सर्वाः प्रवृत्तयो यज्ञा एवेति मीमांसामतम् । अभ्युदयो नित्यनैमित्तिककर्मसम्पादनेन भवतोति प्रमाणितं तत्र । मोक्षोऽपि सुलभोऽनेन पथेति धारणासीत् ।

वेदान्तसूत्रे संन्यासकर्मयोगयोरावश्यकता प्रतिपादिता । शङ्करस्तु सरलविधिनाष्टाङ्गिकयोगमार्गेण ब्रह्मज्ञानं सर्वेभ्यो वर्णेभ्यः सुलभमिति शिक्षितवान् । ईश्वरोपासनया पापानां क्षयः, ऐश्वर्याणां प्राप्तिः, पश्चात् मुक्तिः सम्भवन्ति ।

जीवस्य पतनमविद्ययाकर्मणा च भवति । विद्यया चाविद्याया नाशो भवतीति रामानुजः प्रतिपादितवान् । विद्या तु सर्वेषां मौलिकतत्त्वरूपेणेश्वरग्रहणमिति । ईश्वरोपासनया पापनिवृत्तिस्स्यादिति रामनुज उपादिशत् । निष्कामकर्म बन्धनाय न भवति, अपितु तेन सत्त्ववृद्धिर्जायत इति तस्य मतम् । तदनुसारं भक्त्यापि ईश्वरस्य ज्ञानं सम्भवति । यदा भक्तिर्निष्पन्ना जायते, आत्मनः परमात्मना सह तादात्म्यमनुभूयते । आत्मन एवेश्वराय समर्पणं प्रपत्तिरिति कथ्यते प्रपत्त्या मुक्तिः सम्भाव्यते ।

सत्कार्यवादः

सत्कार्यवादः सांख्यदर्शनस्य वैशिष्ट्यम् । तदनुसारं कारणे कार्यं प्रागेव वर्तते । तद्यथा मृत्तिकायां घटः प्रागेवासीत् । तदधिकृत्य प्रोक्तम्—

असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥ सांख्यका० ९

तदेव व्याख्याद्वारेण—"इह लोकेऽसत्करणं नास्ति यथा—सिकताभ्यस्तैलोत्पत्तिः । इह लोके यो येनार्थी स तदुपादानग्रहणं करोति, दध्यर्थी क्षीरस्य न तु जलस्य ग्रहणं करोति । सर्वस्य सर्वत्र सम्भवो नास्ति । यथा—सुवर्णस्य रजतादौ । इह कुलालः शक्तो मृद्दण्डचीवररज्जुनीरादिकरणोपकरणं वा शक्यमेव घटं मृत्पिण्डादुत्पादयति । कारणं यल्लक्षणं तल्लक्षणमेव कार्यमपि, यथा—यवेभ्यो यवाः व्रीहिभ्यो व्रीहयः । यद्यऽसत् कार्यं स्यात् ततः कोद्रवेभ्यः शालयः स्युः । न च सन्तोति । तस्मात् सत् कार्यम् ।"

न्यायदर्शनेऽसत्कार्यवादः सन्धारितः । सत्कार्यवादस्य विरोधिमतं न्यायसङ्गतमेव । तथा हि—यदि कारणे कार्यस्य प्रागेवास्तित्वं वर्तते तर्हि किन्निमित्तं कार्यं क्रियते । कारणस्यास्तित्वं प्राग्भवति पश्चात् कार्यमुत्पद्यते तद्यथा प्रथमं बीजं पश्चात् वृक्षो जायते ।

वेदान्ते सांख्यसम्मतः सत्कार्यवादस्स्वीकृतः । तदनुसारम्, उत्पत्तेः प्रागेव घटादयो विद्यमानाः सन्ति, किन्तु ते आवृतत्वान्नोपलब्धाः । कार्यं तावन्मात्रमावरणैरज्ञेयं भवति यावन्मात्रं तस्य कर्ता न विद्यते । यद्यपि कारणे कार्यं विद्यते,तथापि सहकारिताशक्तिमपे-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्षते कार्यस्याविर्भावः । तिले तैलं वर्तते । तत्तैलं तिलस्य पेषणेनाविर्भवति । पेषणमेवात्र सहकारिताशक्तिः ।

जैनदर्शनम्

जैनदर्शनानुसारं—सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः । एतेषु सम्यग्दर्शनं तु तत्त्वार्थश्रद्धानमेव । ततः तत्त्वार्थो ज्ञेयः । तत्त्वज्ञानाय जैनदर्शने द्वे प्रमाणे स्तः—प्रत्यक्षं परोक्षं च ।

प्रमाणानि

प्रत्यक्षं ज्ञानं त्रिविधं—अवधि मनःपर्ययं केवलं च । अवधिप्रत्यक्षं दिव्यदृष्ट्या सम्भवति । मनःपर्ययेणापरेषां मानसिकभावा ज्ञायन्ते । केवलप्रत्यक्षं तु सर्वज्ञत्वमेव । परोक्षप्रमाणं द्विविधं भवति—मतिः श्रुतं च । मतिप्रमाणमिन्द्रियाणां मनसश्च योगेन जायते । स्मृत्या पूर्वज्ञानस्य स्मरणं भवति । स्मृतिरेव संज्ञा भवति यदि तस्या उत्पत्तिः समानवस्तुनो दर्शनेन भवति । चिन्ताऽभिनिबोधश्च नैयायिकानामनुमानमेव । श्रुतज्ञानं द्विविधम्—अक्षरात्मकमनक्षरात्मकं च । पुस्तकेभ्यः प्राप्तं ज्ञानमक्षरात्मकं भवति । अनक्षरात्मकं ज्ञानमनुमानेन लभ्यते ।

स्याद्वादः

उपर्युक्तप्रमाणैः कस्यापि वस्तुनो यः स्वभावः परिचीयते, तस्य निरूपणाय स्याद्वादो विकसितः । ततो वस्तुस्वभावज्ञानाय सप्तविधानि वाक्यानि निर्दिष्टानि—(१) स्यादस्ति, (२) स्यान्नास्ति, (३) स्यादस्ति नास्ति, (४) स्यादवक्तव्यः, (५) स्यादस्ति अवक्तव्यः, (६) स्यान्नास्ति अवक्तव्यः (७) स्यादस्ति नास्ति अवक्तव्यः ।

प्रमाणैस्तत्त्वानामधिगमो भवति । तत्त्वानि सप्त सन्ति—जीवः, अजीवः, आस्रवः, बन्धः, संवरः, निर्जरा, मोक्षश्च । जीवस्तु वैदिकदर्शनस्यात्मनः समकक्षो वर्तते । जीवा द्विविधाः—संसारिणो मुक्ताश्च । तत्र व्यवहारदृष्ट्या संसारिणो निश्चयनयेन मुक्ताश्च ज्ञेयाः ।

जीवः

जीव उपयोगमयो[1]ऽमूर्तिः कर्ता स्वदेहपरिमाणः ।
भोक्ता संसारस्थः सिद्धः स विस्रसोर्ध्वगतिः ।।

जीवस्येयं परिभाषाऽभिनवैव प्रवर्तते । सर्वाणि वैदिकान्यवैदिकानि वा दर्शनानि जीवविषयकमतमेतद् भिन्नमेव धारयन्ति ।

---

१. उपयोगस्तु ज्ञानदर्शने ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'जीवस्येन्द्रियाणि बलमायुः श्वासोच्छ्वासौ च व्यावहारिकदृष्ट्या भवन्ति । निश्चयनयतः जीवस्य चेतना भवति । कर्मबन्धनेन जीवो मूर्तरूपं प्राप्नोति । कर्मानुसारं जीवः सुखदुःखं भुनक्ति । पंचभूतरूपेण जीव एकेन्द्रियो भवति । चरजीवाः द्वीन्द्रियाः, त्रीन्द्रियाः, चतुरिन्द्रियाश्च भवन्ति । पंचेन्द्रिया एव जीवाः समनस्का भवन्ति' इत्येतानि जीवस्य वैशिष्ट्यानि ।

निश्चयात्मकदृष्ट्या चेतनायुक्तो जीवः शुद्धज्ञानदर्शनविशिष्टो भवति । तस्मिन् वर्णरसगन्धादयो न वर्तन्ते । सुखदुःखान्यपि जीवस्य न भवन्ति ।

मुक्तजीवो निष्कर्मा भवति । तस्याष्टगुणा विद्यन्ते—सम्यक्त्वं ज्ञानं दर्शनं वीर्यं सूक्ष्मता अवगाहनम्, अगुरुलघुत्वम् अव्याबाधत्वं च । मुक्तजीवानां विशिष्टो लोक एव भवति । तत्र ते नित्या निर्जरास्तिष्ठन्ति ।

अजीवः

अजीवः षड्विधो भवति । तद्यथा—

> अजीवः पुनः ज्ञेयः पुद्गलो धर्मोऽधर्म आकाशः ।
> कालः पुद्गलो मूर्तो रूपादिगुणोऽमूर्तयः शेषास्तु ॥

पुद्गलस्तु भौतिकतत्त्वसमो भवति । पुद्गलस्य पर्यायाः—शब्दो बन्धः सूक्ष्मः स्थूलः संस्थानं[1] भेदः तमः छाया उद्योतः आतपश्च भवन्ति । पुद्गलो रूपरसादिविशिष्टो भवति । पुद्गलानां जीवानां च गमनसहकारी धर्मो भवति, यथा जलं मत्स्यानां तरणाय भवति । अधर्मो जीवानां पुद्गलानां च स्थानसहकारी भवति, यथा पथिकेभ्यः विश्रमाय छाया भवति । आकाशे जीवादयोऽवकाशं लभन्ते ।

कालस्तु द्रव्यपरिवर्तरूपः परिणामादिलक्ष्यः ।

जीवानामजीवानां च सप्त विशेषाः—आस्रवो बन्धनं संवरः निर्जरा मोक्षः पुण्यं पापं च भवन्ति । जीवा अजीवाः सप्तविशेषाश्च जैनदर्शनस्य नव तत्त्वानि प्रतिष्ठितानि । आस्रवेण कर्मणां भावानां च जीवेन सह समागमो भवति । आस्रवः इत्थं जीवस्य संस्काराय भवति । बन्धेन जीवः कर्मणा बध्यते । आस्रवस्याभावः संवरः । संवरस्य संसिद्धये—व्रतसमितिगुप्तिधर्मानुप्रेक्षापरीषहजयचारित्राणां पालनं निर्दिष्टम् । निर्जरया जीवः कर्मबन्धनान्मुच्यते । ततो मोक्षः । स्वकीयैः शुभैरशुभैर्वा भावैः जीवः पापस्वभावः पुण्यस्वभावो वा भवति ।

मोक्षः

यदा जीव उपर्युक्तनवतत्त्वानि प्रति श्रद्धां लभते तदा तस्य सम्यग्ज्ञानप्रक्रियाऽऽरभते ।

---

१. आकारप्रकारः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्यग्ज्ञानेन जीवस्य संशयविमोहविभ्रमाणां क्षयो भवति ।[1] तदा चारित्रेणाशुभाद्विनिवृत्तिः शुभे प्रवृत्तिर्जायते। व्रतसमितिगुप्तय एव चारित्राणि। सम्यक् चारित्रेण कर्मबन्धनं प्रहीयते, कर्मणोऽवरोधश्च भवति । अयमेव मोक्षः । तथा हि—

सम्यग्दर्शनं ज्ञानं चरणं मोक्षस्य कारणं जानीहि ।
व्यवहारात् निश्चयतः तत्त्रितयमयो निज आत्मा ।।
मा मुह्यत मा रज्यत मा द्विष्यतेष्टानिष्टार्थेषु ।
स्थिरमिच्छथ यदि चित्तं विचित्रध्यानप्रसिद्ध्यै ।।
आत्मात्मनि रत इदमेव परं भवति ध्यानम् ।

जैनदर्शनानुसारं मुक्तात्मा 'ईश्वरः' इति कथ्यते ।

बौद्धदर्शनम्

निर्वाणपथगामिनो बौद्धास्तु प्रज्ञप्तिमात्र एवात्मेति मन्यन्ते । अतस्तेनात्मवादिनोऽनीश्वरवादिनश्च वैदिकनयेन प्रतीयन्ते । तद्यथा—रथस्तु न कोऽपि स्वतन्त्रः पदार्थः । स तु केवलं शब्दमात्र एव चक्राश्वादीनां सम्भारः । तथैव रूपवेदनाविज्ञानसंज्ञासंस्काराणां पंचस्कन्धानां समाहार एवात्मा प्रतीतः ।[2] तस्य पंचस्कन्धसंघस्य पुनर्जन्म भवति। एतेषां प्रत्येकस्य स्वीयमौलिकतत्त्वे विलयनमेव महानिर्वाणम् ।

उपर्युक्तसिद्धान्तो बौद्धानां प्रतीत्यसमुत्पादमुपजीवति ।

अत्र प्रतीत्य (कारणानामेकत्रत्वेन) समुत्पादः (कस्यापि वस्तुन उत्पत्तिः) इति हेतु-फल-परम्परा ग्रहणीया । अनेन सिद्धान्तेन ज्ञायते यन्न किमपि शाश्वतम्, सर्वे धर्माः क्षणिका हेतुप्रत्ययजनिताश्च । तदनुसारं भवचक्रं प्रचलति । भवचक्रस्य द्वादशाङ्गानि—अविद्या, संस्कारः, विज्ञानम्, नामरूपम्, षडायतनम्, स्पर्शः, वेदना, तृष्णा, उपादानम्, भवः, जातिः, जरामरणं च ।[3] एतेषां प्रथमौ द्वौ पूर्वजन्मनः, अन्तिमे द्वे भाविजन्मनः,

---

१. संशयविमोहविभ्रमास्तु समाहारेण समारोपाः । तेषु भ्रान्तिरेव विमोहः । सन्देह एव संशयः । ज्ञानस्यास्पष्टत्वं विभ्रमः ।

२. इन्द्रियाणि तेषां विषयाश्च रूपम् । वेदना सुखदुःखादीनां भावना । विज्ञानमहंभावः, इन्द्रियैः प्राप्तं ज्ञानं च भवति । संज्ञा नामैव । संस्कारा मानसिकप्रवृत्तयः ।

३. अविद्या पूर्वजन्मनः क्लेशदशा । संस्कारः पूर्वजन्मनः कर्मावस्थापापपुण्यादयः । विज्ञानं प्रतिसन्धि-स्कन्धः, जन्मग्रहणकाले कुक्षिगतं नामरूपादीनां पंचस्कन्धानां विज्ञानमेव । नामरूपं विज्ञानक्षणाद् षडायतनोत्पत्तिपर्यन्तावस्था । षडायतनं स्पर्शात् पूर्वं पंचस्कन्धाः । स्पर्शः सुखदुःखादिविवेचनपर्यन्तावस्था । वेदना मैथुनरागसमुदाचारपर्यन्तावस्था । तृष्णा भोगमैथुनकामिनां पुद्गलानामवस्था । उपादानं चतुर्विधक्लेशसमुदाचारावस्था पुद्गलस्य । कर्मावस्था भवः । जातिः पुनः प्रतिसन्धिः । जरामरणं जातेः प्रभृति वेदनापर्यन्तावस्था ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शेषाण्यष्टौ वर्तमानजन्मनः शरीरस्यैव विद्यन्ते। एतानि द्वादशाङ्गानि त्रिविधाः—क्लेशः कर्म, वस्तु च। अविद्यातृष्णोपादानानि क्लेशस्वभावानि। संस्कारभवौ कर्मस्वभावौ। शेषाणि तु वस्तुस्वभावानि, क्लेशकर्मणोरधिष्ठानत्वात्।

निर्वाणम्

बौद्धदर्शने निर्वाणं वैदिकदर्शनस्य मोक्षस्थानीयं वर्तते। निर्वाणं तु परमः क्षेमः, तृष्णाक्षयः दुःखस्यान्तकरः, मृत्योर्जय एव वर्तते। यथाग्निर्निर्वापितः सन्नदृश्यो भवति तथैव निर्वाणं प्राप्य पुरुषस्यास्तित्वं किंचिदपि कुत्रापि न वर्तते।

रागस्य प्रहाणेन निर्वाणं प्राप्यते। तदा कामसुखानि न विद्यन्ते। निर्वाणपथगामिनां कृते चत्वारि 'आर्यसत्यानि' सन्धारितानि। तद्यथा—दुःखम्, दुःखस्य समुदयः, दुःखस्य निरोधः, निरोधायाष्टाङ्गिकमार्गश्च। अष्टाङ्गिकमार्गो दृष्टिसंकल्पवाक्कर्मान्ताजीविका-व्यायामस्मृतिसमाधीनां सम्यक्त्वमेव। समाधिर्योगपरो भवति।

तत्र निर्वाणं द्विविधं मतम्—सोपधिशेषं निरुपधिशेषं च भवति। तयोः प्रथमं जीवनन्मुक्तस्यावस्था भवति, अपरं च मरणानन्तरमेव जायते। परवर्तियुगेऽप्रतिष्ठितं निर्वाणं सम्मतम्। तदनुसारं बोधिसत्त्वाः महाकरुणया प्रेरिताः सन्तः शून्यतां न प्रतिपद्यन्ते यद्यपि ते सर्वथा योग्या भवन्ति।

चत्वारि प्रस्थानानि

परवर्तियुगे बौद्धदर्शनस्य चत्वारि प्रस्थानानि वैभाषिकसौत्रान्तिकयोगाचारमाध्य-मिकानि जातानि। एतेषु प्रथमे द्वे हीनयानस्य, शेषे द्वे महायानस्य शाखाः सन्ति।[1] एतेषां परस्परभेदः जगतः सत्तामधिकृत्य मतवैविध्यानुसारं समुदभवत्। तथाहि वैभाषिका बाह्यजगतः सत्तां प्रत्यक्षेणैव मन्यन्ते। सौत्रान्तिका जगतः सत्तामनुमानेन मन्यन्ते। जगतः सत्तां मन्यन्ते अतएव वैभाषिकाः सौत्रान्तिकाश्च सर्वास्तिवादिन इति संज्ञिताः। योगा-चारास्तु बाह्यजगतः सत्तां न मन्यन्ते। ते चित्तं (विज्ञानम्) एव सत् मन्यन्ते। अतएव ते विज्ञानवादिनः। शून्यवादिनां नयेन जगत् विज्ञानं च असत्ये। शून्यमेव केवलं सत्। ते शून्यवादिनो माध्यमिका सर्ववैनाशिका इति संज्ञिताः। गौतमबुद्धात् क्रमशः ३००, ४००, ५०० वर्षाणि पश्चात् वैभाषिकस्य, सौत्रान्तिकस्य माध्यमिकस्य च प्रस्थानं प्रावर्तत। समारम्भः खीष्टाब्दतः पश्चात् तृतीयशतकेऽभूत्।

प्रमाण-व्यवस्था

बौद्धदर्शने प्रमाणं द्विविधम्—प्रत्यक्षमनुमानं च। तदनुसारमर्थाकारस्य विशदाभत्व-

---

१. हीनयानं बौद्धधर्मदर्शनयोः प्रथमः रश्मिः प्रायशो व्यक्तिगताभ्युदयाय गौतमबुद्धस्य मूलशिक्षानुरूपं विकसितम्। परवर्तियुगे महायानं तदानीन्तनविविधदर्शनैः प्रभावितं बहुजनसुखाय बहुजनहिताय भिक्षूणां व्यक्तित्वं विकासयितुं प्रादुरभवत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मेव प्रत्यक्षम्, लिंगेनार्थस्यास्फुटज्ञानमनुमानं च । अग्नौ सन्निहिते सति तस्य ज्ञानं प्रत्यक्षं दूरे सति धूमलिंगेन तस्य ज्ञानमनुमानम् । तद्विकल्पबलेन सिध्यति । प्रथममिन्द्रियाश्रितं ज्ञानं प्रत्यक्षं भवति पश्चात् द्वितीये क्षणे मानसप्रत्यक्षं जायते । तद्यथा चक्षुर्व्यापार उपरते मनोविज्ञानमेव प्रत्यक्षम् ।

योगिप्रत्यक्षं योगिनामेव भवति । योगिनो भूतमनागतं च वर्त्तमानवत् पश्यन्ति । योगिप्रत्यक्षमलौकिकयोगजसन्निकर्षेण जायते । तन्निर्विकल्पकं शुद्धमेव भवति ।

स्वभाववादः

वस्तुतः स्वभाववादस्य दार्शनिकत्वं नास्ति । स्वभाववादे गहनचिन्तनस्य सम्यगभाव एव । स्वभाववादः केवलं वर्त्तमानमपेक्षते । तत्र भूतभविष्ययोर्विचारणा नास्ति । अस्यां स्थितौ वादेऽस्मिन् आत्मा, परलोकः[1], कर्मफलम्, मुक्तिः, पापपुण्ये, ईश्वरः, देवाः—सर्वाण्येव मिथ्येति सम्मतम्। प्रत्यक्षमेव केवलं प्रमाणं तेषां बोधगभ्यम् । अस्य लोकस्यैव सत्ताया ग्रहणात् स्वभाववादो लोकायत इति संज्ञितः । स्वभाववादस्य प्रमुखाचार्यश्चार्वाकोऽभवत्। तस्य नाम्ना स्वभाववादश्चार्वाकदर्शनमिति ख्यातम् ।

स्वभाववादिनः प्रत्यक्षेण चत्वारि भूतानि--पृथ्वीं जलमग्निं वायुं च मन्यन्ते । तेभ्यः सर्वं जगत् प्रस्फुटितम् ।[2] बुद्धिरेभिः भूतैः निर्मिता । शरीरे बुद्धेः प्राधान्यम् । आत्मा तु नास्त्येव ।

दार्शनिकानां व्यक्तित्वम्

ऋषिभिः प्रवर्तितमेव भारतीयदर्शनं वेदमूलम् । देवानुप्राणितमेव तेषामृषीणां व्यक्तित्वमभवत् । परवर्तिवैदिकयुगे द्विविधा दार्शनिका बभूवुः—गृहस्थाः संन्यासिनश्च । कतिपयदार्शनिका गृहस्थाः—अजातशत्रुजनकादयः राजानः, आरुणियाज्ञवल्क्योषस्तिचाक्रायणादयो ब्राह्मणा बभूवुः ।

---

१. इहैव स्वर्गनरकानुभवस्य विद्यमानत्वात् यो वा सुखभुक् स एव स्वर्गस्थः, यो वा क्लेशभुक् स एव नरकस्थ इति प्रत्यक्षदृश्यस्वर्गनरकरूपफलस्य परोक्षस्थितिर्नहि कल्पयितुमुचिता ।
आनन्दगिरिः शङ्करविजये पृ० ११२

२. एतस्य निदर्शनमश्वघोषविरचिते बुद्धचरिते ६.५५–६२ सम्यक् कृतम् । तथा हि—
कः कण्टकस्य प्रकरोति तैक्ष्ण्यं विचित्रभावं मृगपक्षिणां च ।
स्वभावतः सर्वमिदं प्रवृत्तं न कामकारोऽस्ति कुतः प्रयत्नः ॥ ९.६२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपनिषत्कालतः प्रभृति दर्शनस्योद्भावकाः प्रायशः वानप्रस्थाः संन्यासिनश्च बभूवुः। गृहस्थाश्रमस्य बन्धनानि दर्शनोद्दिष्टस्य मोक्षस्य मार्गे बाधा इति सम्मतम्। अतएव दर्शनिकानां वसतय ऋषीणामाश्रमेषु भिक्षूणां विहारेषु च बभूवुः। ऋषिजीवनं तु ब्रह्मचर्यमेव।

परवर्तियुगे शङ्कराचार्येण दर्शनाय प्रवृत्तिकामानां चत्वारि लक्षणानि निर्दिष्टानि। तद्यथा—जिज्ञासा, निष्कामता, यमनियमपरायणता, मोक्षप्राप्तयेऽभिलाषश्च। शङ्करस्य व्यक्तित्वमेवोच्चादर्शं प्रतिष्ठापयति। तस्य प्रतिभाया अलौकिकत्वं सुविदितमेव। अष्टवर्षदेशीय एव स वेदेषु निष्णातो बभूव। बाल्ये स प्रव्रजितः कर्मयोगी बभूव। समग्रभारतमेव स्वकार्यक्षेत्रं विधाय सर्वत्र वेदान्तस्याद्वैतचिन्तनस्य धारां प्रवाहितवान्। तस्य दिग्विजयेनाद्वैतस्य सर्वत्र प्रभविष्णुता वरीवर्ति।

शङ्करोऽद्वैतसिद्धान्तानां प्रतिपादनाय बहून् ग्रन्थानरचयत्। समग्रं भारतमद्वैतं कर्त्तुमेवास्य चतुर्दिग्भागेषु विश्वविद्यालयानां स्थापनां कृतवांश्च। पूजाविधिषु स पशुबलिं नरबलिं च निषेधितवान्। शङ्करस्य प्रायशो द्विशताब्दं पश्चात् रामानुजो विशिष्टाद्वैतस्योन्नायकोऽभवत्। स तु यतिराज एवाभवत्। स दक्षिणभारते वैष्णवदर्शनस्य प्रचारमकरोत्।

एतेषां दार्शनिकानां व्यक्तित्वनिदर्शनेन स्पष्टमेव प्रतिभाति यत् भारतीयदर्शनं विदुषामेव बुद्धेर्जिह्वाया वा केवलं विषयो नाभूत्। तेषां जीवनमेव दर्शनावगाहनेन विशुद्धं परिपूतं चाभवत्। तेषां कर्मण्यता समग्रराष्ट्रे प्रोज्ज्वलतां विधातुमेवासीत्।

जैनदर्शनस्य सर्वोच्चोन्नायको महावीर आदौ राजकुमारोऽभवत्। स प्रव्रजित एव द्वादशवर्षाणि तपोऽतत्यत केवली च बभूव। केवली तु सर्वज्ञ एव। त्रिंशद्वर्षपर्यन्तं स तदानीन्तनसमाजस्य समक्षमुच्चदर्शनतत्त्वं प्रतिष्ठापयितुमनिशं प्रायतत। स्वानुयायिनां संघं विधाय महावीरस्तस्य संचलनाय सुव्यवस्थां व्यधात्।

महावीरस्य व्यक्तित्वेऽपूर्वोत्साहोऽद्भुतशक्तिश्च प्रतीयेते। आजीवनं स पर्यटन्नेवाहिंसासत्यापरिग्रहादीनां शाश्वतं सन्देशं नगरेषु ग्रामेषु वनवसतिषु च प्रचारितवान्। परवर्तिदर्शनप्रचारकाणां समक्षं सदैव महावीरस्यादर्शं आसीत्।

बौद्धदर्शनस्य प्रथमप्रवर्तको गौतमबुद्धो महान् विचारकोऽभवत्। सत्यस्यानुसन्धानाय लौकिकविभूतीनां परित्यागः कर्तव्य एवेति तस्य मतं जीवनविन्यासे सुप्रतिष्ठितम्। स स्वयमेव तपसा योगेन मननेन निदिध्यासनेन च निर्वाणपथं प्राप्तवान्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गौतमस्य व्यक्तित्वे ऋजुतायाः सौष्ठवं व्यराजत। नासीत् किंचिदपि रहस्यं तस्य व्यक्तित्वे। तस्योदारता सच्चरित्रं सहानुभूतिश्च सर्वेषां मनसि तं प्रति श्रद्धां जनया-

मासुः। तस्य व्यक्तित्वेन या क्षान्तिः शान्तिरभिजातीयता च प्रकटिताः तासामेवाकर्षण-गुणैस्तदानीन्तनसमाजः प्रभावितः।

लोकसेवा एव गौतमस्य परमो धर्मः। तस्य दयानिर्झरिणी दुःखार्तानां परितर्पणाय प्रस्रविता बभूव। दार्शनिकतया सहाचार्यत्वस्य संगतिः साधारणजनसमाजस्य नेतृत्वं च गौतमस्य वैशिष्ट्यं प्रदर्शयतः।

दर्शनस्यादिग्रन्था वेदा एवोपलभ्यन्ते। वेदस्तु पारम्पर्येण समागतानां ऋग्यजुः-सामाथर्वसंहितानाम्, ऐतरेयशतपथादीनां ब्राह्मणानाम्, आरण्यकानाम्, उपनिषदां च संज्ञा।

परवर्तियुगस्य महाभारते बहुविधानां वैदिकावैदिकानां दर्शनसम्प्रदायानां विवरणं प्राप्यते। महाभारतस्य भीमपर्वणः भगवद्गीता संगृहीता। भारतीयसंस्कृतौ लोक-जीवन-दर्शनस्य यो विशेषप्रभावः परिलक्ष्यते तस्य चमत्कारः प्रायशो गीताश्रित एव।

षड्दर्शनेषु न्याय एव प्रथमः। तत्र न्यायसूत्रं गौतमप्रणीतमादिग्रन्थः। वात्स्यायनो न्यायभाष्यमिति ख्यातां न्यासूत्रस्य टीकां रचितवान्। परवर्तियुगे वाचस्पतेर्न्यायितात्पर्य-टीकायां न्यायस्य सनातनपरम्परा विशदीभूता। वहवस्तत्र न्यायग्रन्थकाराः पूर्वग्रन्थानां टीकाकारिणो बभूवुः। अन्ये तु न्यायस्याभिनवप्रवृत्तीनां व्याख्यातारोऽभवन्। ख्रीष्टतः पश्चात् द्वादशे शतके मिथिलायां नव्यन्यायस्य समारम्भोऽभवत्। नव्यन्यायस्य प्रथमो ग्रन्थतत्त्वचिन्तामणिः प्राप्यते। परवर्तियुगे बहव आचार्याश्चिन्तामणिमधिकृत्य टीका-ग्रन्थानरचयन्। ख्रीष्टतः पश्चात् सप्तदशशतकेऽन्नंभट्टः प्राच्यन्यायस्य नव्यन्यायस्य चैक-मुखीं प्रवृत्तिं विधातुं तर्कसङ्ग्रहं दीपिकां च विरचितवान्।

वैशेषिकसूत्राणां रचयिता कणादः कश्यपो वास्ति। पश्चात् प्रशस्तपादेन पदार्थधर्म-संग्रहे वैशेषिकदर्शनं सम्यक् सिद्धान्तितम्। परवर्तियुगे चन्द्रेण दशपदार्थशास्त्रं भास्करेण तर्ककौमुदी विश्वनाथेन भाषापरिच्छेदः रचितानि।

सांख्यस्य प्रथमो ग्रन्थ ईश्वरकृष्णस्य सांख्यकारिकास्ति। गौडपादेन वाचस्पतिना च कारिकाणां टीका रचिताः। परवर्तियुगे ख्रीष्टतः पश्चात् चतुर्दशशतके सांख्यप्रवचनसूत्रं लिखितम्। प्रवचनसूत्रस्य बहवष्टीकाकारा बभूवुः।

योगदर्शनस्यादिग्रन्थः पतञ्जलेर्योगसूत्रमेव। व्यासेन योगसूत्राणां भाष्यं कृतम्। ख्रीष्टतः पश्चात् नवमशतके व्यासभाष्यमधिकृत्य तत्त्ववैशारदीं टीकां वाचस्पतिमिश्रोऽरचयत् भोजस्तु राजमार्तण्डमेकादशशतकेऽरचयत्।

पूर्वमीमांसाया आदिग्रन्थो जैमिनेर्मीमांसासूत्रं वर्तते। शबरो मीमांसासूत्रस्य टीकां प्रणीतवान्। ख्रीष्टतः पश्चात् सप्तमे शतके कुमारिलः पूर्वग्रन्थानधिकृत्य श्लोकवार्तिकं तन्त्रवार्तिकं च रचितवान्। परिवर्तियुगे तेषां ग्रन्थानां टीका रचिताः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपनिषद एव वेदान्तस्य प्रथमग्रन्थाः। ख्रीष्टाब्दतः प्रागेव बादरायणेन व्यासेन वा वेदान्तसूत्रमुपनिषदां ब्रह्मविद्यामधिकृत्य लिखितम्। परवर्तियुगेऽद्वैतवेदान्तस्य प्रतिष्ठां कुर्वन् शङ्कराचार्य उपनिषदां गीताया वेदान्तसूत्रस्य च भाष्यं प्रणीतवान्।[१] शङ्करस्यान्यौ ग्रन्थौ विवेकचूडामणिः, उपदेशसाहस्री च वेदान्तपरौ। तदानीन्तनोऽन्यः आचार्यः सुरेश्वरो वार्तिकं नैष्कर्म्यसिद्धिं चारचयत्। आनन्दगिरेर्न्यायनिर्णयः समकालिक एव।

शङ्करस्य वेदान्तसूत्रभाष्यमधिकृत्य पद्मपादेन पंचपादिकायाः वाचस्पतिमिश्रेण च भामत्याः प्रणयनं कृतम्। पारम्पर्येणोपर्युक्तग्रन्थानां टीका विविधाचार्यैः प्रणीताः। ख्रीष्टतः पश्चात् चतुर्दशशतके माधवाचार्येण पंचदशी जीवन्मुक्तिविवेकश्च रचितौ।

ख्रीष्टतः पश्चात् द्वादशशतकस्यान्तिमे भागे श्रीहर्षेण खण्डनखण्डखाद्यमद्वैतसिद्धान्तानां तार्किकप्रतिष्ठां विधातुं प्रणीतम्। ग्रन्थोऽयं योगाचारबौद्धदर्शनेन प्रभावितो वर्तते। खण्डनखण्डखाद्यस्य चित्सुखीया टीका चित्सुखेन प्रणीता। तन्मतमेव प्रतिपादयता तेन तत्त्वदीपिका रचिता। परवर्तियुगेऽद्वैतवेदान्तस्य बहवो ग्रन्थाः प्रणीताः।[२] योगवासिष्ठस्य अध्यात्मरामायणस्य चाद्वैतसिद्धान्तानां लोकप्रचारार्थं प्रणयनं कृतम्।

विशिष्टाद्वैतस्य प्राथमिकसुप्रतिष्ठा रामानुजेन ब्रह्मसूत्रस्य श्रीभाष्ये कृता। रामानुजस्यापरे वेदान्तपरा ग्रन्था गीताभाष्यं वेदार्थसंग्रहो वेदान्तसारो वेदान्तदीपश्च सन्ति।

बौद्धदर्शनस्य प्राचीनतमो ग्रन्थोऽभिधर्म इति ख्यातः।[३] अभिधर्मे मूलरूपेण गौतमबुद्धस्य दार्शनिकविचाराः सङ्गृहीताः। परवर्तियुगस्य दार्शनिकविचाराणां प्रथमः संग्रहो मिलिन्दप्रश्न इति ख्यातो नागसेनेन कृतः। ख्रीष्टतः पश्चात् चतुर्थे शतके बुद्धघोषेण विसुद्धिमग्गो रचितः।

परवर्तिबौद्धदर्शनस्य साहित्यं प्रायः सम्प्रदायानुसारं विकसितं दृश्यते। तत्र सर्वास्तिवादिनां सप्त ग्रन्थाः प्रधानाः—कात्यायनीपुत्रस्य ज्ञानप्रस्थानम्, शारिपुत्रस्य संगीतिपर्यायः, वसुमित्रस्य प्रकरणवादः, देवशर्मणः विज्ञानकायः, वसुमित्रस्य धातुकायः, यशोमित्रस्य धर्मस्कन्धः, मौद्गल्यायनस्य प्रज्ञप्तिशास्त्रं च। ज्ञानप्रस्थानस्य टीका महाविभाषेति ख्याता। वसुबन्धोरभिधर्मकोशो सर्वास्तिवादिनां प्रमुखः ग्रन्थः।

सौत्रान्तिकसम्प्रदायस्य प्रवर्तकः कुमारलातः कल्पनामण्डितिकायां सौत्रान्तिकसिद्धा-

---

१. इमे त्रयो ग्रन्थाः समासतः प्रस्थानत्रयीति ख्याताः। शङ्करात् प्रागेव गौडपादो माण्डूक्यकारिकाया भर्तृहरिश्च वाक्यपदीयस्य रचनां कृतवन्तौ। इमौ ग्रंथौ बौद्ध दर्शनैः प्रभावितौ स्तः।

२. तद्यथा रामाचार्यस्य तरङ्गिणी, ब्रह्मानंदस्य गौडब्रह्मानंदीयं गुरुचंद्रिका वा; धर्मराजस्य वेदांतपरिभाषा, अद्वैतानंदस्य ब्रह्मविद्याभरणम्, गोविन्दानन्दस्य रत्नप्रभा, सदानन्दस्य वेदान्तसारः, प्रकाशानंदस्य सिद्धांतमुक्तावली, सदानंदस्याद्वैतब्रह्मसिद्धिः लक्ष्मीधरस्याद्वैतमकरंदश्च।

३. अभिधर्म इति धम्मसंगणि-विभङ्ग-कथावत्थु-पुग्गलपञ्ञत्ति-धातुकथा-यमक-पट्ठान इति सप्तग्रंथानां समासतः नाम।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

न्तान् निरूपितवान्। तस्य शिष्यः श्रीलाभः सौत्रान्तिकविभाषां रचितवान् । यशोमित्रोऽभिधर्मस्य स्फुटार्थेति टीकां लिखितवान् ।

योगाचारसम्प्रदायस्य बहवो ग्रन्थाः सन्ति । तत्र मैत्रेयनाथस्य महायानसूत्रालङ्कारः, धर्मधर्मताविभङ्गः, महायानोत्तरतन्त्रम्, मध्यान्तविभङ्गः, अभिसमयालङ्कारकारिकाश्च प्रथमं सन्ति । परवर्तियुगे दिङ्नागरचिताः प्रमाणसमुच्चयवृत्ति-न्यायप्रवेश-हेतुचक्रनिर्णय-प्रमाणशास्त्र-न्यायप्रवेशादयः प्रमुखा ग्रन्थाः ।

शून्यवादस्य प्रतिष्ठां नागार्जुनो माध्यमिककारिका-युक्तिषष्टिका-प्रमाण-विध्वंसनोपायकौशल्य-विग्रहव्यावर्तिनी-सुहृल्लेख-चतुःस्तवैर्ग्रन्थैः कृतवान् । परवर्तियुगे आर्यदेवचन्द्रकीर्तिशान्तिदेवशान्तरक्षितादयः शून्यवादविषयकान् बहून् ग्रन्थान् रचितवन्तः ।

जैनदर्शनस्यादिग्रन्थाः द्वादशाङ्गानि चतुर्दशपूर्वाश्च सन्ति । आचार्यपरम्परया तेषां ज्ञानमन्तिमयुगे भद्रबाहुना प्राप्तम् । भद्रबाहोः पश्चात् भागशः एव तेषां ज्ञानमवशिष्टम् । खीष्टाब्दस्य प्रारम्भिकयुगे आचार्यधरसेनोऽभिनवसाहित्यिकपरम्परायाः प्रतिष्ठां प्राच्यदर्शनानुरूपामेवाकारयत् । तस्य शिष्यौ भूतबलिः पुष्पदन्तश्च षट्खण्डागम इति ख्यातं सूत्रग्रन्थं रचितवन्तौ । तयोः समकालिको गुणधारः कसायपाहुडं गाथाबद्धं चकार । कषायपाहुडस्य टीका ६००० श्लोकबद्धा यतिवृषभेण रचिता । उपर्युक्तग्रन्थानां बह्वष्टीकाः परवर्तियुगे रचिताः ।

जैनदर्शनस्य स्वतन्त्रग्रन्थकारः कुन्दकुन्दाचार्यः खीष्टस्य पश्चात् प्रथमशतके समयसार-प्रवचनसार-पंचास्तिकायानां रचनां कृतवान् । तृतीयशतके उमास्वामिना तत्त्वार्थसूत्रे जैनदर्शनस्य सूक्ष्मविवेचनं कृतम् । तत्त्वार्थसूत्रस्य बह्व्यः टीका वर्तन्ते ।

स्वामी समन्तभद्र आप्तमीमांसायां स्याद्वादस्य विवेचनं कृतवान् । अकलङ्कदेवेन जैनन्यायस्य चत्वारो ग्रन्थाः—सिद्धिविनिश्चयः, न्यायविनिश्चयः, लघीयस्त्रयम्, प्रमाणसंग्रहश्च प्रणीताः । परिवर्तियुगे माणिक्यनन्दी न्यायस्य परीक्षामुखमिति सूत्रग्रन्थं रचितवान् । तस्य टीका प्रभाचन्द्रेण प्रमेयकमलमार्तण्ड इति नाम्नो रचिता । एतेषु ग्रन्थेषु दिगम्बरसम्प्रदायदर्शनं निरूपितम् ।[1]

श्वेताम्बरसम्प्रदायस्य मूलग्रन्थानां संख्या चतुरशीतिः । तेषु प्रथमं द्वादशाङ्गानि बभूवुः । द्वादशाङ्गेष्वधुना केवलमेकादश एव लभ्यन्ते । अङ्गग्रन्थैः सम्बद्धान्युपाङ्गानि बभूवुः । एषु ग्रन्थेषु जैनदर्शनसिद्धान्ताः विकीर्णा एव वर्तन्ते । परिवर्तियुगे सिद्धसेनस्य न्यायावतारः, हरिभद्रस्य षड्दर्शनसमुच्चयः तथा मेरुतुङ्गस्य षड्दर्शनविचारः सन्ति ।

●

१. अपरे च जैनदर्शनग्रंथाः—गुणभद्रस्यात्मानुशासनम्, अमितचंद्रस्य तत्त्वार्थसारः पुरुषार्थसिद्ध्युपायः नेमिचंद्रस्य द्रव्यसंग्रहः, त्रिलोकसारः, देवसूरेः प्रमाणनयतत्त्वालोकालङ्कारः, मल्लिषेणस्य स्याद्वादमंजरी, सकलकीर्तेश्च तत्त्वार्थदीपिकाः दिगम्बरसम्प्रदायपराः सन्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धार्मिकप्रवृत्तयः

अस्मिन् ब्रह्माण्डे यत्किञ्चिदपि विद्यते तस्य सर्वोत्तमोपयोगः केन प्रकारेण कर्तव्य इति धर्मशास्त्रस्य प्रमुखविचारविषयः। धर्मशास्त्रानुसारं मानवजीवनमेकान्तं नास्ति। पूर्वमपि जीवनमासीत्, प्रायशः पश्चादपि जीवनं भविष्यति। अस्यां स्थितौ वर्त्तमानजीवने तथा व्यवहर्तव्यं येन भाविजीवनेऽपि सुखं भवेत्। ततो मुक्तिर्नाम मरणानन्तरं सर्वोच्चाभ्युदयः। यदि स्वप्रयत्नैः सा कदाचिन्न लब्धा भवेत्तर्हि येन केन प्रकारेण स्वर्गसुखाय यत्नः करणीयः। अथवा संसारे पुनर्जन्मनि पुनरपि स्वाभ्युदयात्मकस्थितीनां शाश्वतीकरणाय वर्त्तमानजीवने उपायः करणीय इति विपश्चितां मतम्। तदधिकृत्य धर्मस्य परिभाषा कृता—यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।

धर्मस्य परिधिः स्वरूपं च

वैदिकधर्मानुसारं सृष्टेः रचयिता विद्यते। तत्र सृष्टिविधाने देवासुरमानवपशुपक्षिवृक्षलतानदीसमुद्रसूर्यनक्षत्रादीनि वर्तन्ते। सर्वेषां रक्षा प्रतिष्ठा वा येन नैसर्गिकविधानेन भवति तद् ऋतम्। ऋतमेवाधिदैविको धर्मः। निसर्गस्याङ्गभूतो मानवोऽपि ऋतेन रक्षितः। तद्यथा ऋतेन पारस्परिकपोषणं सम्भवति, तथैव मानवधर्मेण सर्वेषां कल्याणमायोजितम्। तथाहि महाभारते—

धारणाद्धर्ममित्याहुः धर्मो धारयते प्रजाः॥ कर्ण० ४९.५०
एष धर्मो महायोगो दानं भूतदया तथा॥
ब्रह्मचर्यं तथा सत्यमनुक्रोशो धृतिः क्षमा।
सनातनस्य धर्मस्य मूलमेतत्सनातनम्॥ आश्व० ९४.३१
महाभारते आश्वमेधिकपर्वणि ९१. ३३–३४

अशोकेन धर्मस्य सर्वजनहिताय स्वरूपं परिभाषितम्। तदनुसारम्—'धर्मः साधुः। कियान् तु धर्म इति। अपास्रवो बहुकल्याणं दया दानं सत्यं शोचम्'।[1] मनुः धर्मस्वरूपं निर्णीतवान्—

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥ २.१२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. अशोकस्य द्वितीयस्तम्भलेखात्।

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥ ६.९२

भारतीयधर्मस्य परिधौ मानवजीवनस्य सर्वासु अवस्थासु कर्तव्याकर्तव्यस्य विवेचनं वर्तते । मरणानन्तरमपि सुगतिः केन प्रकारेण भविष्यतीति तत्र विचारणीयम् । जीवन-विन्यासस्य विविधपक्षेषु—संस्काराश्रमवर्णव्यवस्थाभोजनपानकलाशिल्पोद्योगादिषु कीदृशी प्रवृत्तिः समीचीनेति धर्मप्रकरणम् । राजनीतिकजीवनमधिकृत्य सुष्ठु भणितं यत् धर्मो राजराजः । लौकिकजीवने त्रिवर्गे धर्मः परमं स्थानं भजते । धर्मानुसारिणौ अर्थकामौ भवेतामिति मनुमतम्—

'परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ ।' ४.१७६

अथ किम् महाभारतानुसारं तु

शरीरस्यापि नाशेन धर्म एव विशिष्यते । आदि० २०५.१७

धर्मस्यापरिहार्यत्वम्

मरणानन्तरं केवलं धर्माधर्मौ पुरुषेण सह गच्छत इति भारतीया धारणा धर्मस्यापरिहार्यत्वं स्थापयति ।[1] पुरा भारता इहलोकात् परलोकमधिकतरं महत्त्वपूर्णं मन्यन्ते स्म । तथा हि व्यासः—

तैस्तच्छरीरमुत्सृष्टं धर्म एकोऽनुगच्छति ।
तस्माद्धर्मः सहायश्च सेवितव्यः सदा नृभिः ॥
प्राणी धर्मसमायुक्तो गच्छेत्स्वर्गगतिं पराम् ॥ अनु० १११.१४

धर्मपद्धतौ चरन्तो नरा इहलोके ऐश्वर्यं प्राप्नुयुर्न वा, किन्तु परलोके तेभ्यः स्वर्गीयमैश्वर्यं सुनिश्चितमेवेति लोकधारणा बभूव ।

धर्मस्य परिवृत्तिः वैचित्र्यं च

धर्मानुसारं मानवताया अभ्युदयाय बहवः सिद्धान्ताः शाश्वतीकृताः । ते एव धर्मस्य सनातनत्वं द्योतयन्ति, किन्तु धार्मिकविधीनां कर्मकाण्डादीनां च युगे युगेऽभिनवस्वरूपं प्रदर्शितम्—

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे । अन्ये कलियुगे नृणां युगह्रासानुरूपतः ॥
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते । द्वापरे यज्ञमेवाहुः दानमेकं कलौ युगे ॥
मनुस्मृतौ १.८५-८६

न सर्वेषां धर्मग्रन्थानामैकमत्यं वर्तते—

---

१. तद्यथा मनुः—
एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः । ८.१७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वेदा विभिन्ना स्मृतयो विभिन्ना नासौ मुनिर्यस्य मतं न भिन्नम् ।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ॥

धर्मसंगमः

भारतीयो धर्मो महानद इव बहूनां धर्मधाराणां संगमनेन वैपुल्यमवाप । प्राचीनतमस्यार्यधर्मस्य मूलाधारा ऋग्वेदे स्थापिताः । ततः परमार्येतरधर्माणां संगमात् पौराणिको धर्मः समजायत ।

धर्मपरिधौ क्वचिद् विरोधितत्त्वानामपि समाहारो भवेदिति महाभारते व्याख्यातम्—

स एव धर्मः सोऽधर्मो देशकाले प्रतिष्ठितः ।
आदानमनृतं हिंसा धर्मो ह्यावस्थिकः स्मृतः ॥ शान्तिपर्वणि ३६.११

आर्येतरधर्माः

आर्येतराणां धर्मस्य प्रथमस्वरूपं सिंधुसभ्यताया अवशेषैः परिचीयते । तत्र शिवोपासका मूर्तिमपूजयन् । नागवृक्षपशुजलादीनां पूजा प्रावर्तत । पूजानिमित्तं सम्भवतः बलिस्समर्पितः । शरीरस्य स्वच्छतायै स्नानविधेर्लोकप्रियत्वं सातिशयमासीत् । पूजाकर्मकाण्डादयः सङ्गीतनृत्यवाद्यादिभिः समञ्जसिताः ।

सिन्धुसभ्यतायां मातृरूपेण काचन देवी पूजिता । सा तु प्रकृतिरेवादिशक्तेः प्रतीकं प्रतिभाति । तत्र मातृदेव्या असंख्यमूर्तयो लभ्यन्ते । वैदिकधर्मे मातृदेव्याः समकक्षा अदितिः पृथिवी चास्ताम् । पौराणिकधर्मे चण्डी, दुर्गा, भवानी वा मातृदेव्यः पूजनीया अभिमताः ।

सिन्धुसभ्यतायां सस्योद्भवकारिणीं देवीं जनाः पूजयन्ति स्म । एकस्यां मुद्रायां नारीगर्भात् वृक्षकस्योत्पत्तिरङ्किता वर्तते । तत् पृथिवीदेव्या अङ्कनं प्रतिभाति । अधुनापि ग्रामदेव्याः पूजा ग्रामेषु सर्वत्र प्रचलति ।

शिवोपासनाय शिवः त्रिमुखोऽपि कल्पितः । शिवो योगीति सम्भावितः । स मुद्रासु हिंस्रपशुभिः चित्रकगण्डकमहिषमृगादिभिः परिवृतो वर्तते । मुद्रासु योगीश्वरः, ऊर्ध्वलिङ्गः (लकुलीशः) विरूपाक्षश्च शिवोऽङ्कितः । शिवलिङ्गान्यपि तत्र सन्ति । मूर्तिपूजा तदा प्रचलति स्म ।

सिन्धुसभ्यतायां किन्नराणां कल्पनासीदिति विविधपशुमानवानां रुण्डमुण्डयोर्वैचित्र्यपूर्णसंयोगेन स्पष्टमेव ।

सिन्धुसभ्यतायामन्त्येष्टिक्रिया प्रावर्तत । भूगर्भे शवा निधापिता । तत्र शवैः सह

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पात्राणि, वस्त्राभूषणानि, प्रसाधनसामग्रश्च स्थापितानि । कतिपयशवाः काष्ठपेटिकासु निवेश्य भूगर्भे निगूहिताः । एतैर्विधानैस्तत्रत्यानां पूर्वजान् प्रति श्रद्धा प्रकटति ।

अन्येऽपि बहव आर्येतरधर्मा बभूवुः । ऋग्वेदानुसारं वृत्र आर्येतराणां जातीनां देवोऽभवत् । तस्मिन्युगे कृष्णो धर्मसंरक्षक एवार्येतरधर्मस्योन्नायकोऽभवत् । असुरेषु दानश्रद्धादीनां विधानं नासीत् । वैदिकयज्ञानां प्रचलनमपि तत्र नाभवत् । ते प्रेतानां परलोकविजयार्थं तेषां शवं सुगन्धितद्रव्यैः अलङ्कारैः वस्त्रैश्च प्रसाधयन्ति स्म ।[1] महाभारतानुसारं देवासुरराक्षसब्राह्मणादीनां धर्मा विभिन्ना एवाभवन् ।[2] राक्षसा अपक्वमांसादा बभूवुः ।[3]

आर्येतरधर्मः पूजाप्रधानः आसीत् । पूजार्थं पशुबलिः पुष्पोपहारश्च प्रचलितौ । शक्तेरावाहनं कृत्वा तस्याः प्रतिष्ठा मूर्तिगृहवृक्षचित्रादिषु प्रतीकद्वारा कृता । पश्चादतिथिरूपेण तस्याः स्वागतं सम्पादितम् । प्रतीकस्य स्नानं तस्योपरि पत्रपुष्पाक्षतानां विकिरणं तस्मै सुस्वादुभोजनसमर्पणं वस्त्राभूषणादिभिरलंकरणं चन्दनलेपनं सिन्दूरलेपनं च कृतानि । पश्चात् प्रार्थनाध्यानादिभिर्भक्तस्य तल्लीनताभूत् । द्राविडेषु हनुमन्तमपूजयन् । पूजाविधानं प्रचलितमासीत् । क्वचित् नरबलिरपि देव्याः परितुष्टये कृता ।[4]

पौराणिकयुगे यक्षराक्षसभूतपिशाचसर्पवेतालादीनां पूजा प्रावर्तत ।[5] विष्णुपुराणे गोपानां गिरियज्ञः गोयज्ञश्च वैदिकेन्द्रयज्ञस्थानीयौ प्रचलताम् । तत्र दधिपायसमांसादिभिः पर्वताय बलिरदीयत ।[6]

वैदिकधर्मः

वैदिकधर्मस्य वैशिष्ट्यं यज्ञविधानमेव । तस्मादेव धर्मकामाधिगमो बभूव । तत्र यज्ञैर्देवानां परितोषः कृतः । साधारणतो देवाः प्रकृतेरैश्वर्यशालिन्यः शक्तयोऽथवा पुराणपुरुषाः पितरो नेतारो वा बभूवुः । सर्वेषामेव तेषां न केवलं व्यावहारिकस्वरूपं समादृतम्, अपि तु तेषामाध्यात्मिकस्वरूपस्य शाश्वतरूपेण प्रतिष्ठा कृता । आध्यात्मिकस्वरूपदर्शनं श्रद्धामपेक्षते । व्यञ्जनयाऽपि क्वचिदाध्यात्मिकस्वरूपस्य ज्ञानं भवति । तद्यथा सूर्यो लौकिकस्वरूपेण जगत् प्रकाशयति, आध्यात्मिकस्वरूपेण च मानवानां बुद्धिं स्फोरयति । आध्या-

---

१. छन्दोग्योपनिषदि ८.८.५ ।

२. आदिपर्वणि १५७.७; सभाप० ६८.७२ ।

३. ऋग्वेदे १०.८७.१९ ।

४. धोनसाखजातके ३५३।

५. पद्मपुराणे उत्तरखण्डे २८० अध्यायतः।

६. विष्णुपुराणे ५.१०.३८–४६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त्मिकं स्वरूपं दिव्यत्वं प्रतिष्ठापयति । भारताः काले काले असंख्यवस्तुषु दिव्यत्वस्य दर्शनं चक्रुः । परिणामतः सर्वेषामेव तेषां देवत्वं प्रतिपादितम् ।

देवानामाचारव्यवहारादयः मानवैः ग्रहणीया इति मनीषिणां मतम् । इत्थं धर्मसंस्थाने देवानामादर्शचरितस्य कल्पना महत्त्वपूर्णा वर्तते ।

देवप्रतिष्ठा

देवाः शक्तिशालिनः । कतिपयदेवाः प्रकृतिशक्तीनां नियन्त्रणं कुर्वन्ति । ते सर्वेषां प्राणिनामधिपतयः । साधारणतः सर्वे देवा लोकोपकारिणः, सत्यपरायणाः, ऋजवश्च सन्ति । ते सच्चरित्राणां जनानां मित्राणि सन्ति, पापान् दण्डयन्ति च । वैदिककल्पनानुसारं देवानां मानवैः सहातिशयसामीप्यमासीत् । तद्यथाग्निं प्रति कविर्निवेदयति—

स नः पितेव सूनवेऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ॥ ऋग्वेदे १.१.९

इन्द्रो युद्धस्य देवोऽभवत् । तस्य साह्येन युद्धे मानवा विजयमिच्छन्ति स्म । तथा हि ऋग्वेदे—

यस्मान्नृते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव योऽच्युतच्युत्स जनास इन्द्रः ॥ २.१२.९

इन्द्रोऽसुराणां हन्ता प्रसिद्ध एव ।

वरुणः सर्वेषां देवानां पोषकोऽभवत् । स ऋतं प्रवर्तयति । मानवताया कल्याणं विदधाति च । तथा हि ऋग्वेदे—

उत यो मानुषेष्वा यशश्चक्रे असाम्या । १.२५.१५
यूयं पात स्वस्तिभिः सदा नः ॥ ७.८६.८

अश्विनोर्लोकोपकारिता विश्रुता वर्तते । मानवलोके, देवलोके वा यत्र कुत्रचित् साहाय्यस्यावश्यकता भवति तत्राश्विनौ समागच्छतः । तद्यथा ऋग्वेदे

युवं च्यवानं जरसोऽमुमुक्तं नि पेदव ऊहथुराशुमश्वम् ।
नि रंहसस्तमसः स्पर्तमत्रिं नि जाहुषं शिथिरे धातमन्तः । ७. ७१. ६

विष्णोर्लोकः सुप्रसिद्ध एव मरणानन्तरमाश्रयः । तत्र देवोपासकानां मानवानां जीवनं रमणीयं भवति । लोकोपकाराय विष्णोः उरुक्रमत्वं कविभिः प्रशंसितम् । तथाहि—ऋग्वेदे

तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥ १.१५४.५

अपरं च—एको विममे त्रिभिरित्पदेभिः ॥ १.१५४.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परवर्तियुगे सम्प्रतिष्ठिता सरस्वती ऋग्वेदे वाजिनीवती, पावका सूनृतानां दात्रीति विभाविता बभूव । तद्यथा—

महो अर्णः सरस्वती प्रचेतयति केतुना धियो विश्वा वि राजति । १.३.१२

सरस्वती नः सुभगा मयस्करत् । १.८९.३

ऐतरेयब्राह्मणानुसारम्—विष्णुः देवानां परमः ।[1]

वैदिकयुगेऽधोलिखिताः प्रमुखा देवाः प्रतिष्ठिताः सन्ति—

स्वर्लोकस्य देवाः—द्यौः, वरुणः, मित्रः, सूर्यः, सविता, विष्णुः, पूषा, अश्विनौ, उषाः, चन्द्रः, रात्रिः । एते द्युस्थानाः ।

भुवो लोकस्य देवाः—इन्द्रः, अपां नपात्, वायुः, पर्जन्यः, आपः, रुद्रः, मरुतः । ऐते मध्यमस्थानाः, अन्तरिक्षस्थाना वा ।

भूलोकस्य देवाः—अग्निः, सोमः, नद्यः, पृथ्वी, समुद्रः । एते पृथ्वीस्थानाः ।

लघुदेवाः—ऋभवः, गन्धर्वाः, अप्सरसः, वृक्षः, वास्तोष्पतिः, क्षेत्रपतिः, सीता, युद्धोपकरणानि, पशवः, वनपर्वतादीनामधिष्ठातारः ।

कर्तृदेवाः—धाता, विधाता, त्राता, नेता, त्वष्टा ।

परवर्तियुगे प्रजापतिः स्रष्टा बभूव । हिरण्यगर्भः सर्वेषां प्राणिनामधिपतिः । अदितिरादित्यानां द्वादशानां माता बन्धनविमुक्तकारिणी देवी वर्तते । अदितेर्व्यापकस्वरूपं प्रकल्पितम् । तथा हि ऋग्वेदे—

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ॥ १.८९.१०

देवाः प्रायशो मानवरूपाः कल्पिताः । तेषां हस्तपादादीनां कल्पना व्यञ्जनया प्रसिद्धा । तथाहि सूर्यस्य रश्मयः तस्य कराः । अग्नेः ज्वाला तस्य जिह्वा । कतिपयदेवानां विशेषगुणा वर्तन्ते । तद्यथा—इन्द्रस्य युद्धकौशलमग्नेः बृहस्पतेश्च पौरोहित्यं सवितुराचार्यत्वं च ।

यज्ञः

देवानां प्रीत्यर्थं यज्ञद्वारा तेभ्य उपहारः प्रादीयत । यत्किञ्चिदपि मानवो भुनक्ति तदेव देवेभ्योऽपि भोज्यमिति कल्पनासीत् । देवेभ्यो दधिघृतान्नादीनि समर्पितानि । सोमो देवानां प्रियपेयमभवत् । देवानां कृते पशुबलिः प्रावर्तत ।

यज्ञाः साधारणतो द्विविधा मताः—नित्याः, नैमित्तिकाश्च । नित्ययज्ञाः गृहस्थानां पंच महायज्ञा एव । नैमित्तिकयज्ञाः पुरोहितानां साहाय्येन सोद्देश्यं सम्पादिताः । तेषा-

---

[1]. ऐ. ब्रा. १.१ [illegible] निदर्शनीयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुद्देश्यानां परिधौ लौकिकाः पारलौकिकाश्च प्रायः सर्वे लाभाः सिद्धयश्च समाविष्टा भवन्ति । इदमेव यज्ञस्य लोकप्रियत्वस्य प्रधानकारणम् ।

भारते यज्ञानां लोपो नाभवत् कदापि । दशमशताब्द्यां जयसिंहस्य कश्मीरे अथवा मध्ययुगे राजस्थानस्य नृपाणां बह्वो यज्ञा विश्रुता एव ।

यज्ञनाम्नो बौद्धधर्मेऽपि ग्रहणं बभूव । तद्यथा त्रिशरणयज्ञः, शिक्षापदयज्ञः, समाधियज्ञः, प्रज्ञायज्ञः ।[1]

मरणोत्तरविधानम् ।

वैदिकयुगे मानवानां मरणानन्तरं पितृरूपेण यमलोकवासोऽभिमतः । यमलोक एव स्वर्गः । तत्र सर्वं सुखकरम् । तथाहि---ऋग्वेदे

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।

कामस्य यत्राप्ताः कामास्तत्र मामभृतं कृधीन्द्रायेन्द्रो परिस्रव ॥ ९.१०९.११

स्वर्गे मानवा मर्त्यलोके सम्पादितानां यज्ञानामिष्टापूर्तानां दानादीनां फलं प्राप्नुवन्ति । तत्र पितृकृते पुत्रपौत्रादिभिः प्रदत्तानि वस्तूनि भोग्यानि भवन्ति ।[2]

पापानां कृते नरकदुःखमेव भजनीयम् । तथाहि ऋग्वेदे---

इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्रविध्यतम् ।
यथा नातः पुनरेकश्चनोदयत्तद्वामस्तु सहसे मन्युमच्छवः ॥ ७.१०४.२

मरणानन्तरं मानवः स्वकर्मानुरूपं लोकं प्राप्नोति, अन्यथामृतत्वं लभते । पुनर्जन्मनः सम्भावनासीत्तत्र निश्चप्रचम् ।

वैदिकयुगे शवः प्रायशो दग्धः । क्वचित् शवस्य निखननमपि प्रचलितमासीत् ।

उपनिषद्धर्मः

उपनिषद्युगे धर्मस्य त्रयः स्कन्धाः समुपस्थापिताः—(१) यज्ञः, अध्ययनम्, दानं च (२) नैष्ठिकब्रह्मचर्यम् (३) तपश्च । यज्ञस्य महत्त्वं नाधिकमभवत् । यद्यपि यज्ञेन स्वर्गप्राप्तिः तदापि सम्मतासीत्, किन्तु स्वर्गच्युतिभयं दर्शयित्वामृतपदं मोक्षपदमेव तपसा श्रद्धया च समीहितम् । तद्यथा मुण्डकोपनिषदि ।

इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः ।
नाकस्य पृष्ठे ते सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति ॥ १.२.१०

---

१. दीघनिकायस्य कुटदन्तसुत्ते ।
२. ऋग्वेदे १०.१.४८ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा ।। १.२.११

ब्रह्मचर्येण ब्रह्मनिष्ठता प्राप्येति धर्म उपनिषदाम् । ब्रह्मचर्यस्य सम्यक् परिपालनाय वानप्रस्थसंन्यासयोर्योजनं कृतम् । ब्रह्मचर्यं सोपानमेव ब्रह्मलोके गमनाय । एतदर्थं जीवनमेव यज्ञः । तथा हि—पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशतिवर्षाणि तत्प्रातःसवनं । अथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यन्दिनं सवनम् । अथ यान्यष्टाचत्वारिंशद्वर्षाणि तृतीयसवनम् ।[1]

अतएव ब्रह्म एव ज्ञेयम् । विद्वान् ब्रह्मज्ञानेनामरपदं लभते । ब्रह्मज्ञानेन सर्वेभ्यो दुःखेभ्यो मुच्यते च ।[2]

ज्ञानमात्रेण ज्ञानिषु कतिपयवैशिष्ट्यानि जायन्ते । तद्यथा—प्राणव्यानसमाना दीनां वायूनां दार्शनिकस्वरूपज्ञानेन पुरुषः तेजस्वी, अन्नादः, श्रीमान्, यशस्वी, ब्रह्मवर्चस्वी, कीर्तिमान्, ओजस्वी, सुन्दरः, प्रख्यातश्च भवति ।[3] अनेन विधानेन मानवानामुदात्तप्रवृत्तयः सम्भृताः ।

छान्दोग्यानुसारं हृदयमेव स्वर्गः । तथा हि—स वा एष आत्मा हृदि । तस्यैतदेव निरुक्तं हृदयमिति तस्माद्धृदयमहरहर्वा एवंवित्स्वर्गं लोकमेति । तद्यथा हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढा ।[4]

सर्वसाधारणेभ्यो धर्मस्तदासीत्—ऋतं, सत्यं, तपः, दमः, शमः, अग्निहोत्रं, स्वाध्यायप्रवचनादीनि । तदा हि मनीषिणः कामनासीत्—यशोजनेऽसानि । श्रेयावस्यसोऽसानि । तं त्वा भग प्रविशानि । स मा भग प्रविश । धातः प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व ।[5]

उपनिषत्सु जीवनविन्यासस्य शुद्धिः निर्दशिता । तद्यथा भोजनपानादीनां शुद्धये प्रकल्पितं यत् मनःप्राणवाचां स्वरूपं क्रमशः अन्नजलतेजोभिर्निष्पन्नम् ।[6] अपरं च—आहारशुद्धौ सत्त्वशुद्धिः, सत्त्वशुद्धौ ध्रुवा स्मृतिः ।[7] मानवस्य भावनायाः संस्कारो वस्तूनां दिव्यत्वंप्रतिपादनेन सम्यग्भवति । तथाहि श्वेताश्वतरे

१. छान्दोग्ये ३.१६ ।
२. बृहदारण्यके ४.३.१४ ।
शतपथब्राह्मणे ११.४.४१; ३.१०.९.१६ ।
३. छान्दोग्ये ३.१३ ।
४. छान्दोग्ये ८.३ ।
५. तैत्तिरीयशिक्षावल्ल्याम् ९.१ ।
६. तैत्तिरीयशिक्षावल्ल्याम् ४.३ ।
७. छान्दोग्ये ६.५.१-४ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यो देवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश ।
य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमः ॥ २.१७

मनोभावोऽयं विश्वं प्रति सौहार्दं जनयति ।

महाभारतीयो धर्मः

धर्मस्य दश पत्न्यः सम्मता महाभारतानुसारम्—

कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया तथा ।
बुद्धिर्लज्जा मतिश्चैव पत्न्यो धर्मस्य ता दश ॥ आदि० ६०.४

तस्मिन्युगे धर्मस्य किञ्चिदभिनवस्वरूपं विकसितम् । तत्र वैदिकयज्ञस्य समर्थनं प्राप्यते, किन्तु यज्ञादधिकतरं महत्त्वं तेषां विधानानां सम्मतम्, यैः समाजस्याभ्युदयः सम्भावितः । शान्तिपर्वणि स्पष्टं प्रचारितम्—धर्मेण विधृताः प्रजाः ।[1] एतदनुसृत्य क्वचिल्लोकनायकानां पूजा समारभ्यत । तथा हि—

यथार्चयन्ति चादित्यमुद्यन्तं ब्रह्मवादिनः ।
तथा संवरणं पार्थ ब्राह्मणावरजाः प्रजाः ॥ आदि० १६०.१८

अभिनवप्रवृत्तयः

महाभारते पापस्यापाकरणं पुण्येन भवतीति प्रतिपादितम् । पुण्यं तु तपसा यज्ञेन च भवति । यज्ञस्तु मनसो वाचः कर्मणश्चेति त्रिविधः ।[2] तीर्थयात्राया महत्त्वमपि यज्ञादधिकतरमभिमतम् । साधारणतो यज्ञसम्पादनाय विपुलसामग्री प्रयुक्तासीत् । दरिद्रास्तु यज्ञं सम्पादयितुमसमर्था बभूवः । सर्वेभ्यो वर्णेभ्य आश्रमेभ्यश्च तीर्थयात्रा समानीकृता । भारतस्य सर्वेषु भागेषु तीर्थानि सम्भावितानि ।

भावस्य नैर्मल्यं धार्मिकदृष्ट्या सविशेषं मतम् । तपस्तु मनसा वाचा बुद्ध्या वा पापस्याकरणम्; न तु शरीरशोषणमेव तपः ।[3]

देवप्रतिष्ठा

देवा महाभारतेऽपि मानवतायाः सान्निध्ये प्रतिभान्ति । तपसा सदेहं स्वर्गगमनं साधारणमभवत् । अर्जुनो देवेभ्योऽस्त्रशस्त्रादिभिः सह नृत्यकलामपि शिक्षितवान् ।

---

१. शान्तिपर्वणि ११०.११; आदि० ७४.६ ।

२. उद्योगपर्वणि ४३ अध्यायतः ; हिंसात्मकयज्ञस्य विरोधः कृतः । बीजयज्ञः, चिन्तायज्ञः, स्पर्शयज्ञः, ध्यानयज्ञः—सर्वे पशुहिंसात्मकयज्ञादुत्तमतराः मताः । आश्वमेधिकपर्वणि ९४, ९५ अध्यायतः ।

३. वनपर्वणि १९९.९४–९७।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दमयन्त्याः स्वयंवरे देवाः समागताः। बृहस्पतिर्देवानां मानवानां च सर्वेषां पुरोहितोऽभवत्।[१] नारदः स्वर्गे मर्त्यलोके च निर्बाधरूपेण पर्यटनं चकार। महादेवोऽपि स्वयमेवार्जुनेन सहायुध्यत्। स्वर्गो हिमालयेऽवस्थित इति धारणासीत्।[२]

देवतायतनानां पर्वतानां च पूजा समारभ्यत।[३]

देवानां व्यक्तित्वेन भारतस्य विविधवर्गीया निवासिनः सामाजिकसंस्थाने सूत्रिता बभूवुः। तद्यथा शिवोपासका एकत्र देवासुरनागपिशाचयातुधानादयः सन्ति।[४] तथैव विष्णोरुपासका मनुष्यकिन्नरयक्षगन्धर्वराक्षसदेवदानवादयः सन्ति। विष्णुः सर्वेषामधीश्वरः।[५]

देवानां मानवरूपेणावतारः विशेषतो महाभारतीया कल्पना प्रतिभाति। रामकृष्णौ मानवताया रक्षायै सर्वेषामभ्युदयाय च कार्यपरायणौ बभूवतुः। तावीश्वरस्य प्रतिनिधी मतौ सर्वत्र पूजितौ च।

महाभारतयुगे काली, दुर्गा, त्रिभुवनेश्वरी वा नारायणस्यातिशयप्रिया देवी प्रतिष्ठापिता। सा विषमपरिस्थितौ दुर्गे वा ग्रस्तान् जनान् सर्वत्र रक्षतीति धारणासीत्। स्तोत्रैस्तस्याः स्मरणं कृतम्।

देवेतराणां प्रतिष्ठा

महाभारतयुगे देवेतराणां गन्धर्वनागयक्षराक्षसभूतादीनां सार्वजनिकपूजाविधानं प्रचलितम्।[६] अनेन प्रकारेणार्येतराणां जातीनामार्यजातिभिः सह सङ्गमो बभूव। भूतयज्ञेऽपि यक्षराक्षसादीनां परितोषोऽभवत्।

सामाजिकसंश्लिष्टता

महाभारतेऽन्नदानस्य जलदानस्य च महिमा समवर्धत। इष्टापूर्तस्य वैशिष्ट्यं शाश्वतरूपेण स्वीकृतम्।[७] अपरं च सर्वेषां वर्णाश्रमधर्मानुकूलं कर्तव्यपालनमावश्यकं विहितम्। स्वकर्म घृणितमपि न त्याज्यमिति विधानं सामाजिकसुव्यवस्थायै बभूव।

मानवताया अभ्युदयार्थं समीचीनानि विधानानि कृतानि। तद्यथा—भीतस्य शरणार्थिनश्च रक्षामकुर्वतः पुरुषस्य देशे वर्षा यथाकालं न भवति। रक्ष्यस्य पुरुषस्य रक्षाम-

---

१. आश्वमेधिकपर्वणि ५ अध्याये।
२. आदिपर्वणि ११६.८; वनपर्वणि १५९.२२; ११५.१९ शान्तिपर्वणि ३२८.६।
३. आदिप० ६४.४०; २१२.६।
४. आश्वमेधिकपर्वणि ८.३-६।
५. तत्रैव ४३.१४।
६. अनुशासनपर्वणि ९७ अध्यायतः।
७. अनुशासनपर्वणि ६४.२,४,६।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कुर्वतः सन्ततिर्जन्मकाले म्रियते, तस्य पितरः सम्मानिता न भवन्ति पितृलोके। स स्वयं स्वर्गाद् भ्रश्यति।[1] मित्रद्रोहिणः कृतघ्नाश्च घोरनरकदुःखमुपयान्ति।[2]

आचार-प्रतिष्ठा

महाभारतानुसारमाचारस्तु यज्ञादधिकतरः पुण्यदायको वर्तते। तथाहि—

यो यजेदपरिश्रान्तो मासि मासि शतं समाः।
न क्रुध्येद्यश्च सर्वस्य तयोरक्रोधनोऽधिकः॥ आदि० ७४.६

अपरं च शान्तनुः तिर्यग्योनेः प्राणिनामपि पिता बभूवेति तत्र प्रतिपादितम्।[3]

युद्धमपि यज्ञवत् सम्प्रतिष्ठितमासीद् धार्मिकदृष्टचा। युद्धे मृता जनाः स्वर्गं प्राप्नुवन्तीति धारणा बभूव।[4]

स्वकर्मणां विकत्थनं लोकप्रतिष्ठायै मा भवत्विति विज्ञापयितुं महाभारते स्पष्टमेव निर्णीतं यत् दानं, यज्ञोऽध्ययनं व्रतं वा यदि मानपूर्वकं कृतं तर्हि तदेव न केवलं विफलं भवत्यपितु विनाशमपि करोति। तथा हि—

तपश्च दानं च शमो दमश्च ह्रीरार्जवं सर्वभूतानुकम्पा।
नश्यन्ति मानेन तमोऽभिभूताः पुंसः सदैवेति वदन्ति सन्तः॥ आदि० ८५.२२

यज्ञस्य तदनुरूपमभिनवस्वरूपं परिकल्पितमासीत्। तथा हि—

आरम्भयज्ञाः क्षत्राश्च हविर्यज्ञा विशः स्मृताः।
परिचारयज्ञाः शूद्राश्च जपयज्ञा द्विजातयः॥ शान्ति० २३७.१२

कौटुम्बिकसुश्लिष्टता

कौटुम्बिकसुश्लिष्टतायाः सर्वोच्चादर्शो महाभारते स्थाने स्थाने चित्रितः। तथा हि—

मातापित्रोर्गुरूणां च पूजा बहुमता मम।
इह युक्तो नरो लोकान्यशश्च महदश्नुते॥ शान्तिपर्वणि १०९.३
येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः।
प्रीणाति मातरं येन पृथिवी तेन पूजिता॥ अनुशासनपर्वणि ७.२५

पापनिवृत्तिः

पापान्निवृत्तिः तपसा, कर्मणा, दानेन च भाविता। पापादीदृशी निवृत्तिः तेषां सम्भाविता ये भविष्ये पापं न कुर्वन्ति स्म। आत्मशोधनाय यज्ञादृते व्रतोपवासदानादीनां विधानं प्रचलितम्। पशुपक्षिणां हत्याया वृक्षच्छेदनस्य च पापान्निवृत्तये त्रिदिवसान् वायुभक्षणं

---

१. वनपर्वणि १९६.२०–२२।
२. शान्तिपर्वणि १६७.२०।
३. आदिप० ९४[illegible]।
४. सभा० ११,६२–६४।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वकुकर्मप्रकाशनं च विहिते ।[1] राजा चेद्दण्डनीयान् पुरुषान् न दण्डयति तर्हि तस्य शुद्धये अहर्निशमुपवासः प्रकल्पितः ।

मरणोत्तरविधानम्

महाभारतानुसारं पुण्येन स्वर्गो लभ्यः । मरणानन्तरं स्वकर्मानुसारं त्रिविधा गतिः सम्भाविता—मनुष्यजन्म, स्वर्गवासः, तिर्यग्योनिश्च । पशुयोनिः कामक्रोधादिभिः सम्भाविता । ज्ञानेन ब्रह्मलोकप्राप्तिर्निर्दिष्टा । तत्र ब्रह्मणि लय एव गतिः । तपसा स्वर्गगमनं दानेन भोगप्राप्तिर्ज्ञानेन मोक्षः तीर्थस्नानेन पापक्षयश्च सम्भवन्ति । शुभकर्मणा देवत्वमशुभैश्च नारकीयजीवनं शुभाशुभैः पशुपक्षियोनिगमनं सर्वसम्मतमासीत् ।

स्वर्गाच्च्युतिः कथं भवतीति महाभारते सम्यग्व्याख्यातम्—

ज्ञातिः सुहृत्स्वजनो यो यथेह क्षीणे वित्ते त्यज्यते मानवैर्हि ।
तथा तत्र क्षीणपुण्यं मनुष्यं त्यजन्ति सद्यः सेश्वरा देवसंघाः ॥ आदि० ८५.२

कर्मफलम्

पूर्वजीवनस्य कर्मणां विपाकः परजन्मनि यथाकालं भवति । कर्म तु बीजमिव वर्त्तमानजीवनेऽङ्कुरितं वृद्धञ्च भूत्वा फलं ददाति, अन्यथा चिरात् परजन्मनि फलदं भवति । महाभारते स्वर्गनरकदायिनां कर्मणां संग्रहणं स्पष्टं कृतम् ।[2] अतिशयपुण्यकारिणः सदेहा एव देवैः स्वर्गं नीयन्ते । युधिष्ठिर इन्द्रेण सह स्वर्गमगच्छत् ।

पुनर्जन्म कथं भवतीति महाभारते निरूपितम्—

अस्रं रेतः पुष्पफलानुपृक्तमन्वेति तद्वै पुरुषेण सृष्टम् ।
स वै तस्या रज आपद्यते वै स गर्भभूतः समुपैति तत्र ॥ आदि० ८५.१०

गोब्राह्मणानां पूजा तु महाभारतयुगेऽक्षयफलप्रदा मता ।[3] शरीरस्य सौभगाय ज्ञानप्राप्तये च चान्द्रव्रतविधानमक्रियत ।[4]

इन्द्रस्य महाभारतयुगे माहात्म्यं क्षीणमभवत् । स तु परदारगामीति निरूपितः । महर्षिणा विपुलेन तस्य भर्त्सना कृता—देवा मनुष्याश्च तव पूजां न चिरं करिष्यन्ति ।[5] विपुलस्य वाक्यमिदं सत्यमभवत् ।

वरशापौ

महाभारतयुगे वरशापयोः प्रचलनं सातिशयमासीत् । देवगन्धर्वाप्सरोमहर्षिब्राह्मण-

१. शान्तिपर्वणि ३५ अध्यायतः ।
२. स्वर्गारोहणपर्वणि ३.१३.१४ ।
३. वनपर्वणि २००.६७ ।
४. अनुशासनपर्वणि ४१.२० ।
५. आश्वमेधिकपर्वणि ८.३—६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तपस्विजना पतिव्रताः स्त्रियश्च वरशापयोः प्रदाने समर्था इति धारणा बभूव । तपसा भक्त्या च वरोऽनादरेण च महतां शापो लब्धः । इहलोकेऽपि देवानां वराः सद्यः फलदायिनो बभूवुः ।

मानवधर्मः

चतुर्वर्ग-स्थापना

मन्वनुसारं वर्णाश्रमव्यवस्थानुबद्धं भारतीयजीवनं चतुर्वर्गं समुद्दिश्य विलसति । चतुर्वर्गसोपानेन भारतीया संस्कृतिः सम्यक्तया सर्वोच्चशिखरं समारोहति । एतेषु नैकः उपेक्षणीयः । तथाहि—

धर्मार्थावुच्यते श्रेयः कामार्थौ धर्म एव च ।
अर्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थितिः ॥ मनु० २.२२४

अपरं च—मनुना देशधर्मः, कुलधर्मः, पाषण्डधर्मः, गणधर्मश्च निर्दिष्टाः ।[१] धर्मस्य सनातनस्वरूपं मनुस्मृतौ संगृहीतम् ।

सामाजिकसुश्लिष्टता

धर्मविधानैर्मनुः सामाजिकसुश्लिष्टतां प्रत्यपादयत् । तथा हि—वृद्धानां सेवया विद्या, आयुः, यशः, बलं च वर्धन्ते । तत्राभिवादनप्रत्यभिवादन-कुशलक्षेमप्रश्न-परस्परसम्बोधन-मार्गदान-ज्यैष्ठ्यादिसम्बन्धिनो नियमा निर्दिशिताः ।[२] परोपकारस्तु सद्यः फलप्रदो निरूपितः । तथा हि—

वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥ ४.२२९

कौटुम्बिकसुश्लिष्टता

कुटुम्बे न कश्चिन्निरादरणीय इति मनुना प्रतिपादितम् । तत्र केनापि सह विवादोऽपि वर्जितः । एवं कुर्वन् जनः पापात्प्रमुच्यते ।[३] मातापित्रोराचार्यस्य च प्रियं च सेवां च कर्तुं विधानमुक्त्वा मनुः प्रोक्तवान्—

आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः ।
माता पृथिव्या मूर्तिस्तु भ्राता स्वो मूर्तिरात्मनः ॥ २.२२६
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥ २.२२८

---

१. मनुस्मृतौ १.११८ ।
२. तत्रैव २.१२२—१३८ ।
३. तत्रैव ४.१८०[illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

त एव हि त्रयो लोकास्त एव त्रय आश्रमाः ।
त एव हि त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः ॥ २·२३०
सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥ २२.२४

मनुना स्पष्टं निर्दिष्टम्—यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः । स कुटुम्बे बधूनां कन्यकानां च सुशोभनं स्थानं प्रत्यपादयत् ।[1]

यज्ञविधानम्

देवयज्ञप्रकरणे मनुना अग्नि-सोम-विश्वेदेव-धन्वन्तरि-कुहू-द्यावापृथिव्यनुमतिदेवताभ्यो गृह्याग्नौ हवनं विहितम् । तेन इन्द्रवरुणादिभ्यो लक्ष्मीभद्रकालीवनस्पतिभ्यश्च बलिसमर्पणं समादिष्टम् । सर्वेषां चराचराणां दृश्यादृश्यानां च कृते भरण-पोषणयोजनं मनुना बलिवैश्वदेवविधानेन कृतम् ।[2]

स्वर्गनरकौ

एकविंशतिनरकाः राज्ञो दानस्य ग्रहीतुरेव निर्दिष्टाः । तेषु तामिस्रान्धतामिस्र-महारौरव-महावीचि-सम्प्रतापन-लोहशंक्वसिपत्रवनादयः प्रमुखाः ।[3] विविधैर्दानैः रमणीयानां स्वर्गलोकानां प्राप्तिः निर्दिष्टा ।[4] विष्णुपुराणानुसारं तु पापपुण्ये हि नरकस्वर्गसंज्ञे स्तः ।[5]

व्यावहारिकसौष्ठवम्

मनुर्मानवसमाजमभ्युत्थानशीलं कर्तु मियेष । इदमुद्दिश्य मनुकृतानि विधानानि द्रष्टव्यानि । तथा हि—ब्राह्मे मुहूर्ते उत्तिष्ठेत् । आमरणं धनाय यतितव्यम् । धनं दुर्लभं नास्ति । अपरिचितेन सह यात्रां न कुर्यात् । पवित्रस्थानसमीपं कचवरं न कुर्यात् । शुष्कवरविवादो न कुर्यात् । दोषान् प्रति कदाप्याक्षेपं न कुर्यात् । द्वेषदम्भमानक्रोधक्रौर्याणि परित्याज्यानि । शरीराङ्गैश्चपलैर्मा भवितव्यम् । कुलपद्धतिं न त्यजेत् । लघुजनानां तिरस्कारमुपेक्षेत । सज्जनानां मध्ये शुद्धः परिचयो दातव्यः ।[6]

स्वातन्त्र्यप्रेम

मनुर्धार्मिकदृष्टचा स्वातन्त्र्यप्रेमादिशति । तद्यथा—

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद्विद्यात् समासेन लक्षणं सुखदुःखयोः ॥

---

१. मनुस्मृतौ ३.५१—६२ ।
२. तत्रैव ३.८४—९२ ।
३. तत्रैव ४.८७—९० ।
४. तत्रैव ४.२२९—२३३ ।
५. विष्णु० २.६.४४ ।
६. मनुस्मृतौ ४.९२—१६१, १७७, १७८—१९१, ५.१८, २५५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः ।
तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत् ॥ ४.१६०–१६१

पौराणिको धर्मः

पौराणिकधर्मस्य प्रवृत्तिर्द्विविधा वर्तते—सर्वजनीना साम्प्रदायिकी च । प्रथमं सर्वजनीनाः प्रवृत्तयो विविच्यन्ते । पौराणिको धर्मः प्रायशस्तान्त्रिक एव ।[1]

अनुष्ठानानि मान्यताश्च

भक्तिः

पौराणिकधर्मे भक्तेः प्राधान्यमासीत् । भक्तिस्तु त्रिविधा—मानसी वाचिकी कायिकी च । वेदार्थविमर्शो ध्यानधारणापूर्वकं मानसभक्तिः । मन्त्रजपवेदपाठादयो वाचिकभक्तिः । व्रतोपवासादयः कायिकभक्तिः । भक्तेरन्यान्यपि त्रीणि स्वरूपाणि—लौकिकी, वैदिकी, आध्यात्मिकी च सन्ति ।

घृतदुग्धरत्नदीपचंदनमालाधूपसुवर्णहारनृत्यसंगीतवाद्यभोज्यादिभिः पूजा लौकिकभक्तिः । वैदिकमन्त्रैः जपो यज्ञो वेदादीनां स्वाध्यायश्च वैदिकभक्तिः । आध्यात्मिकभक्तिर्द्विविधा—साङ्ख्यजा, योगजा च । प्रकृतिपुरुषयोर्विवेचनं साङ्ख्यजभक्तिः । योगाभ्यासपरं ध्यानं योगजभक्तिः ।[2] उद्देश्यमधिकृत्य भक्तिस्त्रिविधा–सात्त्विकी, राजसी तामसी च । सात्त्विकी भक्तिर्मोक्षेच्छया भवति । राजसी भक्तिर्विषयसिद्धये प्रभवति । अहङ्कारार्थमाडम्बराय वेर्ष्यया समुत्थिता भवति तामसी भक्तिः ।[3]

भगवतः परितोषाय वैरमपि साधनं मतम् । तथा हि भागवतानुसारम्—

यथा वैरानुबन्धेन मर्त्यस्तन्मयतामियात् ।
न तथा भक्तियोगेन इति मे निश्चिता मतिः ॥ ७.१.२६

भागवतधर्मस्य प्रभावेणाहिंसायाः सम्यक प्रचारोऽभवत् । तदनुसृत्य वैदिकयज्ञे पशुहिंसा स्थाने घृतपशुः पिष्टपशुर्वावधारित इति प्रकटितं कल्हणेन । तेन कश्मीरराजो मेघवाहनो वर्णितः—

तस्य राज्ये जिनस्येव मारविद्वेषिणः प्रभोः ।
क्रतौ घृतपशुः पिष्टपशुर्भूतबलावभूत् ॥ राजत० ३.७

१. तन्त्रस्य स्वरूपं भागवते ११.३. ४७-५४ स्पष्टीकृतम्
२. पद्मपुराणे सृष्टिखण्डे १५ अध्यायतः
३. पद्मपु० उत्तरखण्डे १२६ अध्यायतः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्रतानि

पौराणिकयुगे व्रतविधेर्विस्तारः सातिशयो वर्तते । तद्यथा भीमद्वादशीव्रते—उपवासः, विष्णुपूजनं, कृष्णमहादेवगणेशादीनां गंधपुष्पधूपादिभिः पूजनं, मस्तके कलशोत्पतज्जलधाराधारणं हवनं रुद्राध्यायपाठः, विष्णुसामगायनं च समन्वितानि । कतिपयव्रतेषु विशिष्टजीवनविन्यासविधिः सम्भावितः । तद्यथा—अहिंसाव्रते मांसभोजनपरित्यागः । प्रीतिव्रते आषाढमासादारभ्य चतुर्मासं तैलाभ्यंजननिषेधः ।[१]

व्रतानां बहुविधोपयोगिता सम्भाविता । तथा हि—आदित्यशयनव्रतेन पापानि प्रनष्टानि । तस्य कीर्तनमात्रेण माहात्म्यश्रवणेन चेन्द्रस्य प्रियो भवति । चन्द्रव्रतेन सौन्दर्यमारोग्यं च लभ्येते । चन्द्रमसो नामकीर्तनेनोत्तमा बुद्धिर्जायते, विष्णुलोके स्थानं च प्राप्यते ।[२]

व्रतानामुपर्युक्तवर्णनेन स्पष्टं प्रतिभाति यत् पौराणिकयुगे यज्ञानां स्थानं व्रतैरंशतोऽवश्यमेव गृहीतम्, यतस्तेषामनुष्ठानेन बहुविधा ऐहलौकिकाः पारलौकिकाश्चाभ्युदयाः सम्भाविताः । तेषां विधानं प्रायशः सर्वेभ्यो वर्णेभ्यो वर्गेभ्यश्चाक्रियत ।

सर्वव्रतेषु सत्यस्य, ब्रह्मचर्यस्याहिंसाया अन्नदानस्य शुद्धभावस्य नित्यतात्मतायाश्चावश्यकता भागवते प्रतिपादिता ।[३]

जपः

पौराणिकयुगे जपस्य महिमा संवर्धितः । तद्यथा—गायत्रीजपे आपादमस्तकं शरीरस्य चतुर्विंशतिस्थाने गायत्रीमन्त्रस्य प्रत्येकाक्षरस्य न्यासेन ब्रह्मलोकः प्राप्यते । बहवो मन्त्रा जपाय निर्दिष्टाः । तद्यथा—यजुर्मन्त्रः, विष्णुमन्त्रः, माहेश्वरमहामन्त्रः, देवीमन्त्रः, सूर्यमन्त्रः, गणेशमन्त्रः ।[४] जपेन पापविनाशनं प्रकल्पितम् । सूर्यमन्त्रजपेन सन्तानविद्याधनादो प्राप्यन्ते ।[५] अन्ये जपमन्त्रा गङ्गागीतारामादिविषयकाः सन्ति । तथा हि राममन्त्रः—

> **रामाय रामभद्राय रामचन्द्राय वेधसे ।**
> **रघुनाथाय नाथाय सीतायाः पतये नमः ॥**[६]

दिव्यसत्तानां पूजा

प्रथमं तावद् वृक्षपूजा । स्नानस्य पश्चात् पिप्पलवृक्षस्पर्शेन सर्वेभ्यः पापेभ्यो मुक्तिर्भवति । अश्वत्थवृक्षदर्शनेन पापनाशः, स्पर्शेन लक्ष्मीप्राप्तिः, परिक्रमयायुर्वर्धनम्, हविष्य-

---

१. पद्मपुराणे सृष्टिखण्डे २० अध्यायतः । तत्रैवान्यव्रतानि—रुद्रनीलगौरीशिवसौम्यसौभाग्यसारस्वतसामवीरसूर्यविष्णुशीलदीप्तिदृढब्रह्मकल्पवृक्षधनप्रदसुगतभानुवैनायकसौरत्र्यम्बकादीनि वर्णितानि ।

२. तत्रैव २४ अध्यायतः ।

३. भागवते ८,१६,४७—५९

४–५. पद्मपुराणे सृष्टिखण्डस्य ४३ अध्यायतः ।

६. विस्तृतविवरणाय पद्मपुराणस्योत्तरखण्डे २८१ अध्यायो द्रष्टव्यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुग्धनैवेद्यपुष्पधूपदीपादीनामर्पणेनावश्यमेव स्वर्गे स्थानं लभ्यते। आमलकं परितः पंचाषदधिकत्रिशतहस्तायामभूमिः कुरुक्षेत्रवत् समादृता। तुलसी स्वयं विष्णुनारोपितेति धारणा बभूव। तस्याः सेवया गुरुब्राह्मणदेवतीर्थादीनां सेवनमनायासेन भवति।[१]

देवालयेषु दीपदानेन देवमूर्तिभ्यो वस्त्रदानेन धार्मिकभवनानां निर्माणालङ्करणनवीकरणस्वच्छीकरणैश्च बहुविधानां लौकिकपारलौकिकानामभ्युदयानां समुत्पत्तिः सम्भाविता। देवमूर्तीनां प्रतिष्ठाया अतिशयमहत्त्वं सम्प्रकीर्तितम्।[२]

गोब्राह्मणपूजा

पुराणानुसारं वेदाग्निगोब्राह्मणेभ्यो जगतः प्रादुर्भावोऽभवत्। गौः सर्वेषां देवानां प्रतीकरूपेण सम्मानिता। तस्या विविधांगेषु विविधदेवानां वासः प्रकल्पितः। तद्यथा मुखे वेदः, शृङ्गयोः शङ्करविष्णू च। गवां प्रणामपूर्वकं प्रदक्षिणा, प्रातःकाले स्पर्शः, गोमन्त्रजपः, गोधूलिस्नानं गोदानं च स्वर्गमुक्तिपापनिवृत्त्यर्थं च समाज्ञातानि।[३]

ब्राह्मणस्तु देवानामपि देवोऽभिमतः। स धर्ममूर्तिः, मोक्षप्रदाता च। ब्राह्मणस्य परितोषेण विष्णोः परितुष्टिर्भवति। शरीरे तस्य विष्णुर्वसति। ब्राह्मणपूजनेन आयुर्यशोविद्याधनादीनां वृद्धिर्जायते। इयं प्रतिष्ठा केवलमाचारपरायणेभ्यो लोकेभ्यो भवति नान्येभ्यः।[४]

नदीसेवनम्

नदीनां पुण्यप्रभावः समाम्नातः। तासु गङ्गा सर्वोत्तमा। गङ्गायाः स्नानं तस्यास्तटे पितृभ्यः पिण्डदानं तर्पणं च गङ्गाजलदर्शनं गङ्गातटे वासो गङ्गाया नामकीर्तनं जले प्राणविसर्जनं वायुसेवनं तस्यामस्थिविसर्जनं सर्वाण्येव स्वर्गाय, मुक्तये, पापनिवृत्तये वा बभूवुः। गंगासेवनेन मानवेषूदात्तप्रवृत्तीनामुदयो भवति।[५] अपरा नद्यः—गण्डकी, वेत्रवती, साभ्रमती च समादरणीयाः।

गंगाया जलं पातुं दिग्देशेभ्यो राजानः प्रयागात्तस्य प्राप्तिमकुर्वन्। तदा जलपात्रे कश्मीरराजस्य जयापीडस्य मुद्राङ्किता। अयमधिकारस्तेन राज्ञा सङ्गमभूमौ लक्षाश्वानां ब्राह्मणेभ्यो दानेन सम्प्रातः।

तीर्थानि

तीर्थानां सङ्ख्या पौराणिकयुगे वर्धिता। सर्वा नद्यः सर्वे पर्वताः जलाशयाश्च तीर्थमेव। सर्वेषां तीर्थानां देवो विष्णुः। यज्ञभूमिः, श्राद्धभूमिः, यज्ञः, अग्निहोत्रम्, स्वाध्याय-

---

१–२. पद्मपुराणे सृष्टिखण्डे ५७–५९ अध्यायतः।

३. पद्मपुराणे सृष्टिखण्डे ४५ अध्यायतः।

४. तत्रैव ४३ अध्यायतः।

५. पद्मपुराणे सृष्टिखण्डे ६० अध्यायतः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मन्दिरम्, गोशाला, सोमयाजिनो ब्राह्मणस्यावासः, पवित्रोपवनं, पिप्पलपर्कटीवटवृक्षाः, मातापित्रोः स्थानम्, पुराणपाठस्थानम्, आचार्यकुलम्, सतीनां गृहाणि, सुयोग्यपुत्रस्य स्थानम्—सर्वाण्येव तीर्थानि सम्मतानि। तीर्थेषु वासः, स्नानं दानं च पुण्यप्रदानि सन्ति।[१] भागवते विद्वांसोऽपि तीर्थानीति प्रतिपादितम्—

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः॥
नाग्निर्न सूर्यो न च चन्द्रतारका न भूर्जलं खं श्वसनोऽथ वाङ्मनः।
उपासिता भेदकृतो हरन्त्यघं विपश्चितो घ्नन्ति मुहूर्तसेवया॥ १०.८४.११-१२

भारतदेशस्यैक्यविधाने तीर्थानां महत्त्वमनुत्तममेव वरीवर्ति।

दानम्

सत्पात्रेभ्यो दानेन विष्णुरपि प्रसन्नो भवति। प्रसन्नो भूत्वा स दातुः कामनां पूरयतीति धारणासीत्। दानप्रभावेण बुद्धिशक्तिधनगुणादयोऽभ्युदिताः। अदाता रोगी भवति। सुखस्य स्वर्गमोक्षयोश्च प्राप्तिर्दानेन सम्भाव्यन्ते। तीर्थेषु यज्ञेषु च दानस्य महाफलं जायते।[२] अन्नदानं श्रेष्ठमेव। अन्नमेवामृतमिति धारणातोऽन्नदानं प्राणदानम्।[३] पद्मपुराणानुसारं दानभावं विष्णुः सत्यं करोति—

यादृशेनापि भावेन मामुद्दिश्य ददाति यः।
तादृशं तस्य वै भावं सत्यमेव करोम्यहम्॥

मालाधारणम्

धार्मिकविधिषु रुद्राक्षमालाधारणमावश्यकमेव। रुद्राक्षमालास्पर्शेन स्वर्गसुखं तस्य धारणेन मोक्षश्च सम्भावितौ।[४] तुलसीमालाया वैष्णवधर्मे विशेषमहत्त्वं प्रकल्पितम्।[५]

पुराणकथाः

पुराणकथानां श्रवणं वैदिककालतः प्रचलितमासीत्। पौराणिकयुगे तेषां श्रवणेन पापेभ्यो निवृत्तिः, वैभवानां प्राप्तिः, गतिः, आरोग्यम्, प्रतिदिनं स्वातन्त्र्यं च सम्भावितानि।[६] गीताकथा तु विष्णुमयी मता। तस्याः श्लोकपादाभ्यासेनापि मुक्तिः प्राप्यते।[७]

---

१. पद्मपुराणे सृष्टिखण्डे ३६ अध्यायतः।
२. पद्म० सृष्टिख० ३९-४० अध्यायतः।
३. तत्रैव ६४ अध्यायतः।
४. पद्मपुराणे सृष्टिखण्डे ५८ अध्यायतः।
५. तत्रैव पातालखण्डे ७९ अध्यायतः।
६. पद्मपुराणे पातालखण्डे रामकथोपसंहारप्रसङ्गात्।
७ तत्रैवोत्तरखण्डे १७१ अध्यायतः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीमद्भागवतं विष्णोः साक्षाद्वाङ्मयी मूर्तिरेव । तस्य सप्ताहश्रवणेन सर्वाणि पापानि प्रणश्यन्ति । भागवतस्य श्लोकार्धस्यापि नित्यपाठेन राजसूयाश्वमेधयोः फलं प्रकल्पितम् । अन्येषामपि पुराणानां प्रायस्तादृशं महत्त्वं निर्दशितम् ।[1] तथा हि भागवते ध्रुवचरितमधिकृत्य प्रोक्तम्—

धन्यं यशस्यमायुष्यं पुण्यं स्वस्त्ययनं महत् ।
स्वर्ग्यं ध्रौव्यं सौमनस्यं प्रशस्यमघमर्षणम् ॥ ४.१२.४५
श्रावयेच्छ्रद्दधानानां तीर्थपादपदाश्रयः ।
नेच्छंस्तत्रात्मनाऽऽत्मानं सन्तुष्ट इति सिध्यति ॥ ४.१२.५०

ईदृशी मान्यता कथासाहित्यस्याद्यावधिलोकप्रियतायाः प्रधानकारणम् ।

धर्मप्रचारस्य योजना महती बभूव । तथा हि भागवते—

धर्मं ग्राहयितुं प्रायः प्रवक्तारश्च देहिनाम् ।
आचरन्त्यनुमोदन्ते क्रियमाणं स्तुवन्ति च ॥ १२.१०.२९

देवप्रतिष्ठा

त्रिदेवाः

पौराणिकयुगे ब्रह्मा, विष्णुः, महादेवश्च सर्वश्रेष्ठा त्रिदेवाः सम्मानिताः । ते सृष्टेरुद्भवस्य पालनस्य प्रलयस्य चादिकारणं मन्यन्ते । त्रिष्वपि मोक्षप्रदानस्य शक्तिर्विद्यते । इदमेव तेषां प्रमुखवैशिष्ट्यमस्ति ।

त्रिदेवानामेकत्वं पुरस्कृतम् । तथा हि विष्णुपुराणानुसारं भगवान् ब्रह्मरूपेण विश्वं रचयति, विष्णुरूपेण पालयति, शिवरूपेण संहारयति च । वायुपुराणानुसारं शिवः विष्णुं प्रति प्रोक्तवान्—सुकृतिनस्तव जपं कृत्वा मयि लीना भवन्ति । त्वं प्रकृतिः, अहं पुरुषः । त्वं मेऽर्धशरीरं तथैवाहं तवार्धशरीरम् । अहं तव हृदये त्वं च मम हृदये स्थितः ।[2] भागवतेऽपि तेषामेकत्वं प्रतिपादितम् । तथा हि—

तस्मिन् ब्रह्मण्यद्वितीये केवले परमात्मनि ।
ब्रह्मरुद्रौ च भूतानि भेदेनाज्ञोऽनुपश्यति ॥ ४.७.५२
त्रयाणामेकभावानां यो न पश्यति वै भिदाम् ।
सर्वभूतात्मनां ब्रह्मन् स शान्तिमधिगच्छति ॥ ४.७.५४

पुराणेषु त्रयाणां देवानां परस्परं सौहार्दमेकत्वं च निष्कृष्टम् । सुष्ठु मतं पद्मपुराणस्येदृशम्—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. पद्म० उत्तरख० १६० अध्यायतः ।
२. वायुपुराणे २५.११-३० ।

एकमूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः ।
त्रयाणामन्तरं नास्ति गुणभेदाः प्रकीर्तिताः ॥ भूमिखण्डे ७१.२०

अन्ये देवाः

पौराणिकयुगे शिवपरिवारः समाज्ञातः । गणेशस्कन्दौ शिवस्य पुत्रौ सम्मानितौ। गणेशस्याग्रपूजा विहिता । सर्वे देवा अपि गणेशस्याग्रपूजां कुर्वन्तीति निर्दिष्टम् । पुष्पफलमूलमोदकदधिघृतधूपदीपादिभिः वाद्यसङ्गत्या च गणेशो निषेवितः । [१]

सूर्यो ब्रह्मणः स्वरूपमेवाभिमतः । तस्याराधनया मोक्षोऽपि सम्भाव्यते स्म । सूर्यपूजया शरीरसौख्यं प्रकल्पितम् । सूर्यपूजायै मन्त्रपाठो नैवेद्यं फलमर्घ्यं कदलीपत्रं रक्तचन्दनं च समर्पितानि । [२]

लक्ष्मीः

विष्णोः पत्नीति लक्ष्मीः पौराणिकयुगे सविशेषं महत्त्वमभजत । विष्णुलोके लक्ष्मीसहितो नारायणो वसतीति मान्यतासीत् । लक्ष्मीरादिभूता त्रिगुणमयी परमेश्वरी सर्वेषां कृते बभूव । तद्यथा नारीषु सौन्दर्यशीलसदाचारसौभाग्यरूपेण लक्ष्मीः प्रतिष्ठिता । वेदास्तेषां सर्वाणि ज्ञेयतत्त्वानि च लक्ष्मीरूपाणि सन्ति । सर्वे देवा लक्ष्म्या अनुग्रहेण शक्तिमन्तः सन्ति ।

दुर्गा

दुर्गा तु विष्णोर्योगनिद्रा महामाया वा विभाविता। दुर्गाया अपराणि नामानि—आर्या, वेदगर्भा, अम्बिका, भद्रा, भद्रकाली, क्षेमदा, भाग्यदा च तस्या वैशिष्ट्यानि प्रकटयन्ति । तस्याः पूजायै सुरामांसादीनामपि विधानमासीत् । [४]

भूतिकान्तिसन्नतिक्षान्तिरूपेणापि दुर्गा ध्यायते स्म । तस्याः प्रत्यक्षरूपाणि—आकाशपृथिवीधृतिलज्जापुष्ट्युषस एव । जगतः सर्वाः शक्तयो दुर्गायाः प्रतिनिधीभूताः । [५]

अधिष्ठातारो देवाः

अधिष्ठातॄणां देवानां सङ्ख्या पुराणेषु सातिशयं समवर्धत । तथाहि वेद-वेदान्तमन्त्रतन्त्रपुराणशास्त्रादयः, गङ्गादयो नद्यः, पुष्करादयो जलाशयाः, सर्वाणि क्षेत्राणि, सर्वाणि वनानि, भक्तिज्ञानवैराग्यादयो देवरूपेण सन्धार्यन्ते स्म । [६]

---

१. पद्मपुराणे सृष्टिखण्डे ६१ अध्यायतः ।
२. तत्रैव ७५-७६ अध्यायतः ।
३. तत्रैवोत्तरखण्डे २५५-२५६ अध्यायतः ।
४. विष्णुपुराणे ५.१.७०-८६ ।
५. विष्णुपुराणे ५.१.७०–८६ ।
६ पद्मपुराणे उत्तरखण्डे १८९, १९० अध्यायतः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मानवानां सांनिध्यम्

मानवलोकोऽभीक्ष्णं देवानां कार्यक्षेत्रमेव वर्तते। पुष्करतीर्थस्य प्रतिष्ठा स्वयं ब्रह्मणा कृता। स देवसिद्धब्रह्मर्षिभिः सह यदा कदा भूतले विराजमानो भवति। देवानां पुत्रा अपि कतिपयमानवा बभूवुः। अत्रिर्ब्रह्मणः पुत्रोऽस्ति।[1] अपरं च––भगवान् स्वयं मानवानां पथप्रदर्शनं करोति, धर्ममुपदिशति, उपासकस्य चाण्डालस्य गृहे वसति, जनानां धर्म-परीक्षां करोति च।[2] मानवैः सह देवानां वार्तालापो भवति। भवतामुपकारार्थं स्वयम् उपस्थिता वयमिति देवाः कथयन्ति। चाण्डालरूपे समागत्य स्वयं विष्णुः भक्तस्य कृशरं चौर्यवृत्त्या खादति। अन्ततः तस्य समक्षं साक्षादाविर्भूय तं भक्तं स्वविमानेन विष्णुलोकं नयति।[3]

देवानां लौकिकव्यवहारो मानवोचितः प्रतिभाति। तेषां कुटुम्बानि प्रसिद्धानि सन्ति। तद्यथा शिवस्य स्त्रीपुत्रादय सन्ति। ब्रह्मणः पुत्रो नारदो विदित एव।

विष्णोरवताराः

विष्णुः स्वयमवताररूपेण मानवलोके आत्मानं सृजति। तत्र दश प्रमुखावताराः—वराह-मत्स्य-कूर्म-नृसिंह-वामन-परशुराम-रामकृष्ण-बुद्ध-कल्कयः पञ्चदशान्येऽवताराः–सनक-सनन्दन-सनातन-सनत्कुमार-नारद-नरनारायण-कपिल-दत्तात्रेय-यज्ञ-ऋषभ-पृथु-धन्वन्तरि-मोहिनी—व्यास-बलरामाः। भागवतानुसारं भगवतोऽसङ्ख्या अवतारा बभूवुः। सर्वेऽवतारा मानवतायाः कल्याणाय धर्मसंस्थापनार्थाय च प्रादुर्भूताः।

लोककल्याणम्

कौटुम्बिकसामाजिकसुश्लिष्टता

आत्मनः सद्व्यवहारेण सर्वेषां परितोषोऽपि लोकविजयस्य साधनमेव। यदि कोऽप्यपमानं कुर्यात्तर्हि तूष्णींभावेन तत्सहेतेति धर्मशिक्षा।[4] प्राणिनः प्रति दया, शत्रुमित्रयोः समत्वं च प्रेतयोनेरात्मनः परित्राणाय निर्दिष्टे।[5] मानवान् परितः सौहार्दपूर्णसन्नियोगस्य सृष्ट्ये विधानमिदं समर्थमभवत्।

दरिद्रता कलहप्रिया इति सत्यमेव। दारिद्र्यकारणानि परुषभाषणमसत्यं सन्ध्याशयन-मन्तःकरणस्य मलिनत्वं च निरूपितानि।[6] एतेषां दुर्वृत्तीनां परित्यागो लोककल्याणाय समभवत्। तद्यथा समर्थितमपि विष्णुपुराणे—

---

१. पद्मपुराणे सृष्टिखण्डे २७, ३५ अध्यायतः।
२. तत्रैव ४७, ५० अध्यायतः।
३. तत्रैव ८२ अध्यायतः।
४. पद्मपुराणे सृष्टिखण्डे १५ अध्यायतः।
५. तत्रैव २६ अध्यायतः।
६. पद्मपुराणे उत्तरखण्डे २६० अध्यायतः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यथात्मनि च पुत्रे च सर्वभूतेषु यस्तथा ।
हितकामो हरिस्तेन सर्वथा तोष्यते सुखम् ॥ ३.८.१७
परदारपरद्रव्यपरहिंसासु यो रतिम् ।
न करोति पुमान् भूप तोष्यते तेन केशवः ॥ ३.८.१४

लोककल्याणाय पूर्तानामतिशयं माहात्म्यं विद्यते । पूर्तविधानेन जलाशयकूपोपवनमन्दिरादीनां निर्मातारो लोके परलोके च परमाभ्युदयस्याधिकारिणोऽभिमताः ।[1] लोकोपकारायान्यान्यपि कार्याणि स्वर्गप्रदानि भवन्ति । तद्यथा—वृक्षारोपणं सेतुरचनं प्रपाव्यवस्थापनं गोचरप्रदानं च ।

लोकहितकारिकर्मणामपरित्यागेन दैवीनां शक्तीनां समुद्भवः सम्मतः ।[2] एतत्समेकपदे विष्णुपुराणेन प्रमाणितम् । तथा हि—

प्राणिनामुपकाराय यथैवेह परत्र च ।
कर्मणा मनसा वाचा तदेव मतिमान् भजेत् ॥ ३.१३.४५

एतदेव समर्थितं कल्हणेन—

कायस्यास्य परित्यागादनन्या जन्तवो यदि ।
सुखिनः स्युरसौ भ्रातर्वणिज्या ज्यायसी न किम् ॥ राजत० ८.२२३६

धर्मस्य सुग्राह्यत्वम्

पौराणिको धर्मः सर्वजनग्राह्यो विकसितः । तदनुसारं धनिका निर्धनाः, उच्चवर्णा नीचवर्णा वा सर्वेऽपि धर्मपथेन स्वकल्याणं कर्त्तुं समर्थाः बभूवुः । महाभारतस्य नकुलोपाख्यानानुसारं युधिष्ठिरस्याश्वमेधादपि कुरुक्षेत्रनिवासिन उञ्छवृत्तिधारिणो ब्राह्मणस्य सक्तुदानं विशेषतरमासीत् । पद्मपुराणानुसारं कामनापरित्यागेनापि सर्वेषां व्रतानां पालनं भवति । क्रोधत्यागेन तीर्थसेवनं जायते । दया तु जपसमा । उपवास एवोत्तमं तपः । परदाराणां त्यागो महायज्ञ ।[3] चाण्डालाः शूद्राश्च पवित्रेण धार्मिकेण च जीवनविन्यासेन मुनिपदमारोढुं समर्थाः ।[4] तदेव ब्रह्मपुराणेऽपि समर्थितम् ।[5]

पूर्तविधाने दरिद्राणां कूपनिर्माणं धनिकानां जलाशयनिर्माणमिव पुण्यप्रदं मतम् ।

---

१. पद्मपुराणे सृष्टिखण्डे २४ अध्यायतः । भागवतानुसारं पूर्तादयो भगवत आराधनस्य साधनमस्ति । १०.५२.४०
२. भागवते १०.७.१३
३.४. पद्मपुराणे सृष्टिखण्डे ५० अध्यायतः ।
५. श्वपाकोऽपि च मद्भक्तः सम्यक् श्रद्धासमन्वितः ।
प्राप्नोत्यभिमतां सिद्धिमन्येषां तत्र का कथा ॥ १७८.१८६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

धर्मेण स्वास्थ्यसंवर्धनम्

पद्मपुराणे प्रतिदिनं दुग्धदधिघृतादीनां भोजनस्य महत्त्वं वर्णितम्। अगम्यं भोजनं खादतः पुरुषस्य शरीरमपावनं संजातम्।[१] स्वास्थ्य-संवर्धनायैवापराण्यपि विधानानि वर्तन्ते। तथा-हि—आर्द्रपादो न शयीत, आर्द्रपादो भुञ्जीत, तमसि भोजनं शयनं वा न कुर्वीत।[२] आमलकसेवनेन पापान्मुक्तिरायुर्वर्धनं धर्मसंचयो दारिद्र्यहरणं च सम्भाव्यन्ते।[३] आमलकस्य सेवनमाधुनिकयुगे विज्ञानानुसारं लाभप्रदमभिमतम्। तुलसीपत्रस्य धार्मिकमहत्त्वं तदेवानुसरति।

अलौकिकविधानानि

धर्मस्यालौकिकविधानानि प्रत्यक्षाणि न भवति, किन्तु तेषां मान्यता समाजे वर्तते। तेषु प्रथमं तावत् कर्मफलमेव।

कर्मफलम्

कर्मण इह जन्मनि फलं साक्षात् वर्त्तते, किन्तु मरणानन्तरमपि कतिपयकर्माणि कर्तारमनुबध्नन्तीति धर्मकल्पना। अपरजन्मनि तेषां कर्मणां फलं भुज्यते। कर्मानुरूपमेव पुनर्जन्म भवति। तद्यथा—

पुमान्न देवो न नरो न पशुर्न च पादपः।
शरीराकृतिभेदास्तु भूपैते कर्मयोनयः॥

विष्णुपुराणे २.१३.९८

कर्मणा जायते जन्तुः कर्मणैव विलीयते।
सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते॥
किमिन्द्रेणेह भूतानां स्वस्वकर्मानुवर्तिनाम्।
अनीशेनान्यथा कर्तुं स्वभावविहितं नृणाम्॥

भागवते १०.२४.१३,१५

भागवतानुसारं सर्वे कर्मपरा भवन्तु। तथा हि—

केचित् कुर्वन्ति कर्माणि कामैरहतचेतसः।
त्यजन्तः प्रकृतीर्दैवीर्यथाहं लोकसङ्ग्रहम्॥

भागवते १०.८०.३०

मरणोत्तरविधानम्

पुराणानुसारं मुक्तिः सुलभतरा बभूव। तथा हि—गङ्गायां यदि प्राणविसर्जनं जायते

---

१. पद्मपुराणे सृष्टिखण्डे ५९ अध्यायतः।

२. तत्रैव ४६.५३।

३. तत्रैव ५८ अध्यायतः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तर्हि न पुनः स्तन्यपानमपेक्षितं भवति ।[1] मरणोत्तरगतिर्मरणकालिकबुद्धयनुरूपेति निर्धारितम् । सा सुबुद्धिः पुण्योदयेन सम्भवति ।[2]

पापिनस्तु नरकभोगानन्तरं क्रमशः स्थावरकृमिजलचरपक्षिपशुमनुष्यदेवादीनां योनिषु जन्म गृहीत्वा अन्ततो मुमुक्षवो भवन्ति ।[3] समाजं पापाद्विरतं कर्तुं धार्मिकं विधातुं च नरकस्य भयकल्पना स्वर्गस्य मनोहारिता च सोत्कर्षपरा ।

वैष्णवधर्मः

विष्णुस्तु वैदिककालीनो लोकहितपरायणो वैदिकदेवः परवर्तियुगेऽवतारद्वारेण मानवताया विशेषं सांनिध्यं प्राप्तवान् । तद्यथा गीतानुसारम्—

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

गीतायां वेदवादस्य, संन्यासस्य, यज्ञविधानस्य च हेयत्वं प्रतिपादितम् । निष्कामबुद्धया भगवदर्पणाय कर्तव्यपालनं तु कर्मयोगः । गीतानुसारं कर्मयोगः सर्वश्रेष्ठो धर्मः ।

विष्णोर्व्यक्तित्वम्

पुराणानुसारं विष्णुः सर्वोच्चोदात्तानां गुणानामधिष्ठानमस्ति । स तु सर्वशक्तिमान्, सर्वव्यापी, सर्वज्ञः, उपकारपरायणः, परमपावनः, पुण्यस्वरूपः, महाकान्तः, यज्ञवल्लभः, शिवः, सर्वाश्रयः, शान्तः, पुरुषार्थस्वरूपो वर्तते ।[4] भागवते विष्णुना स्वयं प्रोक्तम्—

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ॥ ९.४.६३

इन्द्रस्य स्तवनेन विष्णोर्माहात्म्यं भागवते निवेदितम्[5]—

नमस्तुभ्यं भगवते पुरुषाय महात्मने ।
स्वच्छन्दोपात्तदेहाय विशुद्धज्ञानमूर्तये ।
सर्वस्मै सर्वबीजाय सर्वभूतात्मने नमः ॥ १०.२७.९-१०

वैष्णवस्य व्यक्तित्वम्

विष्णोर्व्यक्तित्वस्यानुरूपं वैष्णवानां व्यक्तित्वं विकसितं भवति । तथा हि—सर्वेषां प्राणिनामात्मरूपेण भगवान् तिष्ठति । अत एव सर्वे प्राणिनः समादरणीयाः । कस्यचिदप्यनादरेण विष्णोरनादरो जायते । तद्यथा भागवते प्रोक्तम्—

१-२. पद्मपुराणे सृष्टिखण्डे ४७ अध्यायतः ।

३. विष्णुपुराणे द्वितीयांशे ६.३२ ।

४. पद्मपुराणे भूमिखण्डे ९८ अध्यायतः ।

५. अस्मिन् प्रसङ्गे कृष्ण एव विष्णुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अथ मां सर्वभूतेषु भूतात्मानं कृतालयम् ।
अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा ॥ ३.२९.२७

मानवो भागवतानुसारं श्रद्धासम्पन्नः, भक्तः, विनीतः, अनसूयः, भूतेषु कृतमैत्रः, शुश्रूषाभिरतश्च भवेत्[1] । वैष्णवस्तु काममर्थं च वर्गं परित्यजेत् । कामानामुदयः पतनाय भवति । तद्यथा—

इन्द्रियाणि मनः प्राण आत्मा धर्मो धृतिर्मतिः ।
ह्रीः श्रीस्तेजः स्मृतिः सत्यं यस्य नश्यन्ति जन्मना ॥
विमुञ्चति यदा कामान् मानवो मनसि स्थितान् ।
तर्ह्येव पुण्डरीकाक्ष भगवत्त्वाय कल्पते ॥ ७.१०.८–९

गृहस्थोऽपि वैष्णवो गृहदारादिषु कदापि संसक्तो मा भवतु । तस्य लोकोपकारत्वं हि सर्वोच्चाराधनम् । तद्यथा—

तप्यन्ते लोकतापेन साधवः प्रायशो जनाः ।
परमाराधनं तद्धि पुरुषस्याखिलात्मनः ॥ ८.७.४४

वैष्णवस्य समग्रो जीवनविन्यासो भगवते समर्पितो भवति । तस्य समदृष्टिः सर्वत्र वर्तते । सर्वं प्रति तस्य भगवद्भावना वर्तते ।

वैष्णवी भावना

विष्णुरेव देवासुरयक्षराक्षसमनुष्याग्निजलरूपरसकालादीनां पारमार्थिकरूपेण तिष्ठतीति वैष्णवी भावना । विष्णुः सर्वेषां कर्मणां भोक्ता तेषां सामग्री फलं च भवति । विष्णोर्भक्तो मनसि करोति—भगवान् मम स्वरूपेणैव जगद्रूपेण तिष्ठति । अहमेव सर्वस्मिन् वर्ते । सर्वं मयि वर्तते । अहमेव परमपुरुषः ।[2]

आराधनम्

आराधने ध्यानस्य स्थानं प्रथमं विद्यते । तद् द्विविधं—निराकारं साकारं च । साकारध्यानस्य प्रथमा रीतिरुपनिषत्सु वर्णिता । तद्यथा—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥

निराकारं ध्यानं ज्ञानेन सम्भवति । योगिन एव तत्कर्तुं क्षमाः । निराकारस्यापि विष्णोः कार्याणि कर्माणि च विभावितानि । तद्यथा—वेदास्तस्य वाणी । निराकारस्व-

---

१. भागवते ३.३२. ४१–४२।

२. विष्णुपुराणे १.१९.६७–७३, ८१, ८५, ८६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रूपस्य ध्यानेन परमपदप्राप्तिर्भवति। साकारध्यानाय सर्वं विश्वं विष्णोर्वासनया वासितं मन्यते। विश्वमिदं विष्णौ वर्तते। विष्णो रूपं मानवाकारमभिमतम्। साकारध्यानेन विष्णुलोको लभ्यते।

पूजायाः कृते विष्णोर्मूर्त्तिः सिंहासने स्थाप्यते। तदा षोडशोपचारविधिना क्रमशः पूजा क्रियते।[1] षोडशोपचारः पुरुषसूक्तस्य ऋग्भिः प्रारभ्यते। षोडशोपचारस्य पश्चात् गरुडाङ्के मूर्तिं शाययित्वा विष्णुनामकीर्तनं हवनं च क्रियेते। विष्णोः परितोषाय स्तोत्राणि गीतवाद्यादीनि च प्रस्तूयन्ते। भगवतो मूर्तेरभ्यङ्गस्य, उन्मर्दनस्य, दर्पणदर्शनस्य, दन्तधावनस्यापि प्रक्रिया भवति। पूजाकाले भक्तः क्वचिन्नर्तनशीलो भवति।

भगवतः पूजायाः पंचाङ्गानि—अभिगमनमुपादानं योगः स्वाध्यायः इज्या च निर्णीतानि। देवस्थानस्य स्वच्छीकरणं निर्माल्यस्य दूरीकरणं चाभिगमनम्, पूजार्थं चन्दनपुष्पादीनां संग्रहणमुपादानम्, आत्मन्येव भगवतो दर्शनं योगः, वैष्णवमन्त्राणां जपः स्वाध्यायः, यथार्थविधिनार्चनमिज्या च भवन्ति। आभिः पञ्चपूजाभिः क्रमशः सार्ष्टिसामीप्यसालोक्यसायुज्यसारूप्या मुक्तयः प्राप्यन्ते।[2] पूजान्तेऽधोलिखितमन्त्रपुरस्सरं दण्डवद्विधिना भगवन्तं प्रति प्रणामाभिव्यक्तिः क्रियते—

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया।
दासोऽहमिति मां मत्वा क्षमस्व मधुसूदन।

विष्णोश्चरणोदकं पीयते।

विष्णुविषयकमन्त्राणां जपेनापि पूजा सम्पादिता। तद्यथा षोडशाक्षरमन्त्रः—गोपीजनवल्लभचरणान् शरणं प्रपद्ये। दशाक्षरमन्त्रः—नमो गोपीजनवल्लभाभ्याम्। अष्टाक्षरमन्त्रः—ओ३म्, नमो नारायणाय। द्वादशाक्षरमन्त्रः—ओ३म्, नमो भगवते वासुदेवाय। विष्णुगायत्री—ओ३म् नारायणाय विद्महे वासुदेवाय धीमहि। तन्नो विष्णुः प्रचोदयात्। एषां मन्त्राणां जपेन लौकिकपारलौकिकानां लाभाः संचिताः।[3] विष्णोर्विविधावताराणां नामकीर्तनेन सर्वपापेभ्यो मुक्तिर्भवति। संकीर्तनाय विष्णोः सहस्रनामानि स्तोत्रे सङ्कलितानि। ततः परं महासूत्रम्—'रामरामेति रामेति रमे रामे मनोरमे' प्रकल्पितम्।

वैष्णवधर्मे सम्मतानां विविधदेवानां पूजायै बहूनि स्तोत्राणि विरचितानि। स्तोत्राणां महिमा भागवतवचने निगदितः। तद्यथा—

---

१. षोडशोपचाराः—आवाहनम्, आसनम्, अर्घ्यम्, पाद्यम्, आचमनीयम्, स्नानीयम्, वस्त्रम्, यज्ञोपवीतम्, गन्धः, पुष्पम्, अक्षतः, धूपः, दीपः, नैवेद्यम्, ताम्बूलम्, नमस्कारश्च।

२. पद्मपुराणे पातालखण्डे ७९ अध्यायतः।

३. पद्मपुराणे पातालखण्डे ८१ अध्यायतः, नारदपुराणे पूर्वभागे ७० अध्यायतः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विन्दते पुरुषोऽमुष्माद्यद्यदिच्छत्यसत्वरम् ।
मद्गीतगीतात्सुप्रीताच्छ्रेयसामेकवल्लभात् ॥
इदं यः कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः ।
शृणुयाच्छ्रावयेन्मर्त्यो मुच्यते कर्मबन्धनैः ॥ ४.२४.७७-७८

भागवतस्याजामिलप्रकरणेन ज्ञायते यत्—

अयं हि कृतनिर्वेशो जन्मकोटयंहसामपि ।
यद् व्याजहार विवशो नाम स्वस्त्ययनं हरेः ॥ ६.२.७

वैष्णवधर्मेऽदेवानां पूजा परित्यक्ता । किन्तु विशेषप्रयोजनान्युद्दिश्य तेषां पूजापि समोहिता । तद्यथा—सौन्दर्याय गन्धर्वाणाम्, बाधानिवारणाय यक्षाणाम्, अभिचाराय निर्ऋतीनां च पूजा कार्या ।[1]

दक्षिणभारते 'आलवाराः' इति ख्याता ऋषयः, नाथमुनिः, यामुनाचार्यः, रामानुजाचार्यः वैष्णवधर्मस्य प्रचारका बभूवुः । उत्तरभारते रामानन्दः, तस्य रैदासपद्मावतीप्रभृतयः शिष्याः, तुलसीमलूकदासादयोऽनुयायिनश्च वैष्णवधर्मस्य सर्वत्र प्रचारं कृतवन्तः । अन्येऽपि बहवः कवयः पुराणकाराश्च वैष्णवधर्मप्रचारका बभूवुः ।

शैवधर्मः

प्राचीनतमोऽयं शैवधर्मः प्रथमं सिन्धुसभ्यतावशेषैः परिचीयते । सिन्धुसभ्यतायाः शिवः ऋग्वेदे वर्णितस्य रुद्रस्य किञ्चित्समकक्ष एव । रुद्रस्तु पशुप इति वैदिकधारणा ।[2] संहारकोऽयं रुद्रः स्वभावतः सर्वेषां कल्याणार्थिनामार्याणां स्तुत्योऽभवत् । यजुर्वेदस्य शतरुद्रिये वर्णितो रुद्र आर्येतराणां शिवस्य प्रायशः सारूप्यं भजते । अथर्ववेदे महादेवो व्रात्यानामधिष्ठाता बभूव ।[3] श्वेताश्वतरोपनिषदि रुद्रः शिवः गीताया विष्णुवत्, उपनिषदां ब्रह्मवद्वाऽनन्यतमो देवो वर्णितः । स देवानामादिप्रभवः । तस्मादेव हिरण्यगर्भस्योत्पत्तिः समाम्नाता । तथाहि—

ततः परं ब्रह्म परं बृहन्तं यथा निकायं सर्वभूतेषु गूढम् ।
विश्वस्यैकं परिवेष्टितारमीशं तं ज्ञात्वामृता भवन्ति ॥ ३.७

महाभारतानुसारं शिवः—सर्वभूतमहेश्वरः, सर्वेश्वरः, कल्याणकारी, परमकारणः, सर्वव्यापकश्चास्ति । हिमालये कृष्णोऽर्जुनश्च तस्य स्तुतिं कुरुतः । एभिः प्रकरणैः स्पष्टं प्रतिभाति यत् तस्मिन्युगे शिवः परमपूज्योऽभवत् ।[4]

१. भागवते ३.१०.२४-२८ ।
२. ऋग्वेदे १.११४.९ ।
३. अथर्ववेदे १५.५.१—७ ।
४. अनुशासनपर्वणि १४ अध्यायतः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पौराणिकयुगे शिवस्य महिमा सातिशयः समवर्धत । स परमो योगी ऐश्वर्येण देवान्, बलेनासुरान्, ज्ञानेन ऋषीनतिशेते ।[1] तस्याष्टरूपाणि—पंचतत्त्वानि, सूर्यः, चन्द्रः, दीक्षितो ब्राह्मणश्च विश्वात्मकान्येव वर्तन्ते ।

शिवस्य लोकरक्षकरूपं विषपानेन प्रसिद्धम् ।आत्मारामोऽपि शिवो लोकरक्षायै शिवया सह विचरति ।[२]

माहेश्वरयोगः

शिवस्य योगपथो माहेश्वर इति विदितः । माहेश्वरयोगे—प्राणायाम-ध्यानप्रत्याहारधारणास्मरणानां वैशिष्ट्यं वर्तते । अनेन योगेन नैर्मल्यं भवति । प्राणायामेन दोषाणां प्रत्याहारेण विषयाणां ध्यानेनानीश्वरगुणानां प्रवृत्तयोऽपाकृताः ।[3] लिङ्गपुराणे शिवलिंग-पूजा प्रतिपादिता ।[४]

शैवतन्त्रम्

शैवतन्त्रे पशुः पशुपतिः पाशश्चेति त्रयः पदार्थाः समाम्नाताः । तेषु पशुः जीवः एव, पशुपतिः शिवः, पाशस्तु जीवस्य मोहात्मकं बन्धनम् । बन्धनाद्विमुक्तये चत्वारः पादाः—विद्या, योगः, क्रिया, चर्या च सन्ति। विद्यया ज्ञानावबोधो जायते। योगेन मोक्षो भवति । चर्यया शुद्धाचारस्य ग्रहणं निषिद्धाचारस्य त्यागश्च भवतः । दीक्षाविधिः क्रियेति कथ्यते । क्रियापादेन दीक्षितस्याभ्युदयाय मन्त्रसन्ध्यापूजाजपहोमादयो विहिताः ।

पाशुपतसम्प्रदायः

पाशुपतसम्प्रदायस्यादिप्रवर्तकः शिवस्यावतारः 'लकुली' इति मन्यते । तस्य प्रमुख-ग्रन्थः पञ्चाध्यायी पञ्चार्थविद्या वा वर्तते । पञ्चार्थाः—कार्यं कारणं योगः विधिः दुःखान्तश्च सन्ति । कार्यं त्रिविधम्—विद्या कला पशुश्च भवति । कारणेन सृष्टेः पोषणं प्रलयश्च भवतः । आदिकारणं शिव एव । योगेन पशुः पशुपतिना सम्बद्धो भवति । धर्मार्थ-साधको व्यापारो विधिः द्विविधः—व्रतं द्वारं च । भस्मस्नानं भस्मशय्या उपहारः[५] जपः

---

१. वायुपुराणे २७ अध्यायतः ।
२. भागवते ४.२४.१८ ।
३. वायुपुराणे १०.७१–६४ ।
४. लिङ्गपुराणे ३० अध्यायतः ।
५. उपहारः—हसितं गीतं नृत्यं हुडुक्कारः नमस्कारः जपश्च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रदक्षिणा च व्रतम् । क्राथनं स्पन्दनं मण्डनं शृङ्गारणमवितत्करणमवितद्भाषणं दुःखान्तश्च द्वारम् । योगेनालौकिकसिद्धीनां प्राप्तिरपि दुःखान्त एव ।

कापालः कालामुखश्च सम्प्रदायौ

कापाले कालामुखे च शिवस्य भैरवरूपं समादृतम् । भैरवस्य पत्नी चण्डिकाऽपि निषेवणीया । सा मुण्डमालां धारयति । तदर्थं मद्येन सह नरबलिर्दीयते ।

कापालिका हस्ते कपालं लौहदण्डं च धारयन्ति । कपाले नररक्तं मद्यं वा इष्यते । कापालिकानां केन्द्रं श्रीशैलमासीत् ।

कालामुखास्तु प्रायशः कापालिका इव सिद्धान्तदृष्ट्या भवन्ति । ऐहलौकिकानां पारलौकिकानां च सिद्धये तेषां षट् साधनानि—कपाले भोजनं चिताभस्मस्नानं भस्मभक्षणं गदाधारणं मद्यपात्ररक्षणं मद्यपात्रे स्थितस्य देवस्य पूजनं च सन्ति । कालामुखेषु महाव्रतिकास्तु घोरा एव ।

काश्मीरः शैवसम्प्रदायः

काश्मीरशैवसम्प्रदायानुसारं सृष्टिरीश्वरस्य विश्वात्मकं रूपं भवति । शिवः सृष्टेरुद्भावयिताऽस्ति । शिव उपादानं विनाऽपि सृष्टेः रचनां करोति ।

अस्मिन्सम्प्रदाये मानवस्याज्ञानं मलमायाकर्मभिः समुत्पादितं मन्यन्ते । नादमाध्यमेन मलमायाकर्मणां प्रभावो जायते । नादस्तु शिवस्य शक्तिरेव । तस्याः सहचारिण्योऽम्बा, ज्येष्ठा, रौद्री, वामा च भवन्ति ।

मोक्षाय मलमायाकर्मणां प्रभावेभ्यो निवृत्तिरपेक्षिता भवति । शिवेन साक्षात्कारः तादात्म्यं च मुक्तिर्भवति ।

वीरशैवसम्प्रदायः

वीरशैवसम्प्रदाये शिवः चराचराणां धारणाय केवलं स्थलं भवति । शिवस्य शक्त्या क्षोभः संजायते । अनेन क्षोभेण स्थलस्य द्वौ भागौ—लिङ्गस्थलमङ्गस्थलं च भवतः । लिङ्गस्थलं शिवो भवति । अङ्गस्थलं तु जीवात्मा । शिवः स्वशक्त्या आराध्यो भवति । जीवस्तु स्वभक्त्याराधको जायते । भक्त्या पुनरपि लिङ्गस्थलाङ्गस्थलयोरेकीकरणं सम्भवति । तदेव मुक्तिः । वीरसम्प्रदायस्यानुयायिनो ब्राह्मणा लिङ्गायताः । तेषामनुयायिनोऽपि लिङ्गायताः सन्ति । ते मांसमदिरादीनां सेवनं न कुर्वन्ति । लिंगायतानां दीक्षामन्त्रः 'ओऽम् नमः शिवाय' इति भवति । दीक्षायाः पश्चात् लिङ्गायता यज्ञोपवीतस्थाने लिङ्गस्य मूर्ति धारयन्ति । कन्यकानामपि दीक्षा भवति ।

CC-0 Nepal Sanskrit Academy, Kathmandu Collection

शाक्तसम्प्रदायः

शक्तेर्वर्णनमथर्ववेदे विद्यते । तद्यथा—

एषा सनत्नी सनमेव जातैषा पुराणी परि सर्वं बभूव ।
मही देव्युषसो विभाती सैकेनैकेन मिषता विचष्टे ॥ १०.८.३०

शाक्तसम्प्रदायस्य मूलं सिन्धुसभ्यतायाः मातृदेव्याः पूजायां वर्तते । वैदिकसाहित्येऽदितिः पृथिवी च देव्यौ प्रायश आदिशक्तिरूपिण्यौ प्रतिष्ठिते । शैवसम्प्रदाये शक्तिः शिवस्य पत्नी एव । शिवस्य सर्वे पराक्रमाः शक्तिदेव्याः साहाय्येन सम्भाव्यन्ते ।

शाक्तसम्प्रदायस्य तन्त्रसाहित्ये शक्तिः—आनन्दभैरवी, त्रिपुरसुन्दरी, ललिता इति ख्यातास्ति । शिवस्तु महाभैरवः, आनन्दभैरवो वा । शिवशक्त्योः सामरस्यं सृष्टेः समारम्भः । तत्रानन्दभैरवी सृष्टेरुत्पादने, आनन्दभैरवस्तु तस्याः संहारे प्रमुखरूपेण संलग्नो । आत्मनः मोक्षलाभाय त्रिपुरसुन्दर्या सह तादात्म्यं शाक्तानां सर्वोच्चसिद्धिः ।

शाक्तास्तु द्विविधाः—कौलिकाः समयिनश्च । तेषु कौलिकाः पंचमकारभोगिनो वस्तुतो घोराः ।[1] तेषामैन्द्रियकसुखानि घृणास्पदम् । समयिनस्तु पवित्रात्मानः प्रतीकमात्रेणाराधकाः सन्ति ।

सर्वेषु भारतीयसम्प्रदायेषु तन्त्रस्य प्रतिष्ठा बभूव ।[2]

गाणपत्यसम्प्रदायः

गाणपत्यसम्प्रदायस्यानुयायिनो गणपतिं सर्वोच्चदेवं मन्यन्ते । तस्मादेव सृष्टेरुद्भवं ते प्रतिपादयन्ति । गणपतिरयं वैदिककालतः प्रायः सदैवाराधितः । तथा हि वेदे मरुतां गणस्याधिपतिरूपः स वर्तते । महाभारते स विनायकरूपेण सम्प्रतिष्ठितः । क्वचित्तेषां विनायकानां विघ्नकारिणी प्रवृत्तिरपि निर्दशिता । गणपतेरुपासका बाहौ गणपतेर्मुखदन्तादीनां मुद्रणं तप्तलौहखण्डेन कारयन्ति । कतिपयगाणपत्या आचारदृष्ट्या कौलिका इव व्यवहरन्ति । मदिराणां मदिराक्षीणां च सेवनं तेषां परा प्रीतिरासीत् ।

आधुनिकयुगेऽपि सर्वेषु धार्मिकविधिषु गणपतेः प्रथमपूजा गाणपत्यसम्प्रदायस्य कस्मिंश्चिद्युगेऽतिशयलोकप्रियत्वं प्रतिपादयति ।

सौरसम्प्रदायः

वैदिकयुगात् सूर्यस्य विविधनामभी रूपैश्च सम्बद्धा स्तुतिः प्रचरति । सूर्यः सविता

१. शाक्तानां पूजादिषु गुरूणां मदिराणां [illegible] निर्दिष्टम् । राजत० ५.५२३
२. बौद्धधर्मे जैनधर्मे च परवर्तियुगे तान्त्रिकाः समुद्भूताः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाचार्यरूपेण मानवतायाः सर्वोच्चोन्नायकोऽभिमतः । द्वादशरूपैरादित्यः सूर्यो वा प्रमुखदेवानामुद्भवः प्रकल्पितः ।[१] सूर्यश्चराचरस्यात्मा एव ।[२] अपरं च आदित्यो ब्रह्मेति तैत्तिरीये निर्दशितम् ।[३] सूर्यो जगतः माता, पिता, गुरुश्चाभिमतः ।[४]

प्रायशो विष्णुवत् सूर्यस्य पूजा विहिता । सूर्यनमस्कारोऽर्घ्यदानं च सूर्यपूजानिमित्तं सम्पाद्येते । आदित्यव्रते सूर्योदयादारम्य सूर्यास्तपर्यन्तं सूर्योन्मुखो भूत्वाराधको मन्त्राणां स्तोत्राणां च जपं करोति ।

सौरसम्प्रदायानुयायिनो ललाटे रक्तचन्दनेन सूर्याकृतिं रचयन्ति । रक्तकुसुमानां मालां धारयन्ति, उदयोन्मुखं सूर्यं ब्रह्मरूपेण, मध्याह्नसूर्यमीश्वररूपेण, अस्तोन्मुखं सूर्यं च विष्णुरूपेण पूजयन्ति ।

सौरसम्प्रदायस्य पुराऽतिशयलोकप्रियता बभूव । हर्षादयो बहवो राजानः सूर्योपासका बभूवुः । सूर्योपासनाय मन्दिराणि निर्मितानि । तेषु कलिङ्गप्रदेशस्य कोणार्कमन्दिरं खीष्टतः पश्चात् त्रयोदशशताब्दे निर्मितम् । तन्मन्दिरमधुनापि कलाकृतेरनुपममादर्शं समक्षीक्रियते ।

मूर्तिपूजा

भारते मूर्तिपूजा वैदिकेतरधर्मानुयायिनां रीतिः पौराणिकयुगे सुप्रचलिता बभूव । तथापि मूर्तिपूजा वैदिकधर्मेण सम्यक् परिपोषिता बभूव । समृद्धिशालिनो जना राजानश्चासंख्यानि मन्दिराणि मूर्तीश्च निर्मापितवन्तः । तदाश्रित्य मूर्तिकलाया वास्तुकलायाश्च भूयान् विकासः संजातः ।

धार्मिकसहिष्णुता

धार्मिकसहिष्णुतायाः प्रथममुदाहरणं महाभारते राजते—

धर्मं यो बाधते धर्मो न स धर्मः कुधर्म तत् ।
अविरोधात् तु यो धर्मः स धर्मः सत्यविक्रम ॥ वनपर्वणि १३१.१०

बौद्धधर्मस्य प्रवर्तकस्य गोतमस्य विविधसम्प्रदायान् प्रति सम्मानभावनासीत् ।[५]

---

१. ब्रह्मपुराणे ३० अध्यायतः ।
२. ऋग्वेदे १.११५.१
३. तैत्तिरीयोपनिषदि ३.१.१ ।
४. ब्रह्मपुराणे २८ अध्यायतः ।
५. महावग्गे १.७.५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जैनधर्मे रामकृष्णादीनां महापुरुषाणां श्लाघ्यमहापुरुषश्रेण्यां समादरो बभूव। जैनसम्प्रदाये कालान्तरे वैष्णववर्गः समुद्भूतः।

पौराणिकधर्माणां पारस्परिकसहिष्णुता शङ्कराचार्येण सविशेषं समायोजिता। स स्वयं षण्मतस्थापनाचार्यः सन् शैववैष्णवसौरशाक्तगाणपत्यकालिकसम्प्रदायानां सहास्तित्वं सम्भावितवान्।

सहिष्णुताया मूलाधारः

सहिष्णुताया मूलाधाररूपेण विदुषां सा धारणा वर्तते ययेदं शाश्वतसत्यं सन्धारितम्-

एकं सद्विप्रा बहुधा वदन्ति। एकं नियानं बहवो रथासः।

एतदधिकृत्य भागवते प्रोक्तम्—

सर्व एव यजन्ति त्वां सर्वदेवमयेश्वरम्
येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो॥
यथाद्रिप्रभवा नद्यः पर्जन्यापूरिताः प्रभो
विशन्ति सर्वतः सिन्धुं तद्वत्त्वां गतयोऽन्ततः॥ १०.४०.९,१०

पृथिव्याः सहिष्णुताथर्ववेदे निदर्शिता—

जनं बिभ्रती बहुधा विवाचसं नाना धर्माणं पृथिवी यथौकसाम्। १२.१.४५

सर्वेषां भारतीयधर्माणां भित्तिमूलं प्राणिमात्रेषु दयां विश्वबन्धुत्वं सत्यमहिंसामाचारशुद्धिं च प्रथममवलम्बते, तेषु सर्वेषु समानरूपेण महापुरुषाणां प्रतिष्ठा कृता, व्रतोपवासैश्च शारीरिकशुद्धिः मानसिकपवित्रता च प्रकल्पिते। न कोऽपि धर्मो घृणां वैषम्यं वा पुरस्करोति। अस्यां स्थितौ स्थाने एव पद्मपुराणे निर्दिष्टम्—

स्वधर्ममपि चावेक्ष्य परधर्मं न दूषयेत्। सृष्टिखण्डे १९.३३२

एक एवेश्वरः सर्वेषां पितेति सिद्धान्तेन, अथवा स्वस्मादन्यत्र किञ्चनेति मतेन सर्वेषां धर्माणां साहचर्यं समाज्ञातमेव। कालिदासेन स्पष्टीकृतमेव

विष्णोर्हरस्तस्य हरिः कदाचित् वेधास्तयोस्तावपि धातुराद्यौ। कुमार० ७.४४

प्रायशः सर्वेषु धर्मेषु विविधधर्माणामुच्चतमशिक्षा आत्मसात्कृताः। पौराणिकधर्मे गौतमोऽवताररूपेण गृहीतः। जैनबौद्धादर्शानुरूपं पौराणिकधर्मेऽपि मांसभोजनस्य हिंसायज्ञस्य च परित्यागो व्यधीयत।

भारतीया राजानः प्रायः स्वयं धार्मिकसहिष्णुतायाः पुरस्कर्तार आसन्। चन्द्रगुप्तमौर्यहर्षकुमारपालादयः सर्वान् धर्मान् प्रति श्रद्धापरायणा बभूवुः। तेषां प्रजापि यथा राजा तथा प्रजेति सिद्धान्तेन धार्मिकसहिष्णुतां व्यवहृतवती। अशोकस्य मानवधर्मः सुविदितः। स सर्वेषां धर्माणां सुप्रतिष्ठामिच्छेत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारतीया गृहस्थाः सर्वान् धार्मिकसम्प्रदायान् प्रायशः समाद्रियन्त । ब्राह्मणाः प्रायशः ससंघं गौतमबुद्धं निमन्त्रितवन्तः, आतिथ्यं कृत्वा च बुद्धोपदेशं श्रुतवन्तः । जैनसाधूनां समाजे समादरोऽभवत् । अत एव ब्राह्मणजैनबौद्धाचार्याणामेकत्र वसतिः पुरा प्रायः बभूव । अधुनापि मथुरा-वाराणसी-साँची-भिलसा-एलूरादिषु स्थानेषु धार्मिकसंस्थानामैक्यभावना कलाकृतिभिः पुरस्क्रियते ।

पौराणिकयुगे ब्रह्मणो विष्णोर्महेशस्य च एकत्र पूजा समीहिता । एकस्मिन्नेव मन्दिरेऽगणितदेवतानां मूर्तयो राजन्ते । अद्यावधि तासां देवतानामनुयायिनस्तत्र सहयोगेनाराधनपूजादिकं कुर्वन्ति ।

कश्मीरदेशे धार्मिकसहिष्णुतायाः सर्वोच्चविकासः संजातः । एतत्समर्थितं कल्हणेन—

तीर्थे मन्मथजित्खगध्वजदृढाजयोर्जिताचार्यके
साधाराभरणं क्रियापरिणतिस्वर्णातपत्रं प्रभोः ।
भात्येकस्य शिखाहिफूत्कृतिवलद्गङ्गाब्जरेणूपमम्
केशान्तस्थितमेघपार्श्वगतडित्पिण्डाभमन्यस्य च ॥ ८.२३६९

कल्हणानुसारं कश्मीरस्य राजाशोको जैनोऽभवत् । किन्तु तेन तपसा शङ्करः परितोषितः । तत्रैव महाराजो ललितादित्यः विहार-चैत्य-स्तूप-मन्दिराणि निर्माय शाश्वतं यशो लेभे ।[1]

बौद्धधर्मः

गौतमस्य धर्मो द्विविधः—गृहस्थानां कृते, भिक्षूणां कृते च समवर्धत । गृहस्थधर्म आचारप्रधानः भिक्षुधर्मोऽन्तःशुद्धिप्रधानश्च बभूवतुः । भिक्षुधर्मे योगमार्गेण निर्वाणप्राप्तिर्निर्दिष्टा । गृहस्थधर्मेण समाजे सदाचारस्य प्रतिष्ठा सर्वत्र शान्तिश्च समीहिते ।

बौद्धधर्मेऽपि वैदिकधर्मवत् कर्मफलं, पुनर्जन्म, मोक्षश्च सम्मतानि । मोक्षाय (निर्वाणाय) गौतमोऽष्टाङ्गिकमार्गं प्रस्तुतवान् । निर्वाणाय स कामानां परित्यागं विशेषमहत्त्वपूर्णं व्यधात् । तत्र यज्ञानां महत्त्वं नास्तीति गौतमस्य मुख्यप्रतिज्ञा ।

तृष्णात्यागः

स्वव्यक्तित्वस्य विकासाय मानवो बाह्यवस्तूनि नापेक्षते । तस्मै प्रयोजनाय ज्ञानप्रकाशेन चित्तवृत्तीनां शोधनमावश्यकम् । आधिभौतिकीनां सिद्धीनां भोगविलासानां च पाशाः पुनर्जन्मबन्धं संयोजयन्ति । ते पाशाः दुःखकारणानि भवन्ति ।

---

१. राजत० १.१०२, १०७; ४.१८८-२०० ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कर्मण्यता

गृहस्थान् गौतमः कर्मण्यान् भवितुमुपादिशत् । गौतमानुसारमालस्यस्य भयङ्कर-फलानि भवन्ति । अलसाः शीघ्रं निर्धना भवन्ति । आलस्यं तु सम्पत्तिनाशस्य द्वारम् । कर्मण्यताया अपूर्वा प्रशस्तिः धम्मपदे विद्यते । तद्यथा—

यो च वस्ससतं जीवे कुसीतो हीनवीरियो ।
एकाहं जीवितं सेय्यो विरियमारभतो दल्हं ॥ ८.१३

तदनुसृत्य सुत्तनिपाते धम्मिकसुत्ते प्रोक्तम्—

धम्मेन मातापितरो भरेय्य पयोजये धम्मिकं सोवणिज्जं ।
एतं गिही वत्तयं अप्पमत्तो सयंपभे नाम उपेति देवेऽति ॥ २९

सामाजिकसुश्लिष्टता

बौद्धधर्मानुसारं प्रतिनिधिरूपेण मातापितरौ पूर्वदिशा, गुरुः दक्षिणदिशा, पत्नी पश्चिमदिशा, बन्धु-बान्धवाः उत्तरदिशा, भृत्याः पातालदिशा, साधवः आकाशदिशा सन्ति । सर्वान् प्रतिनिधीन् प्रति सुशीलव्यवहारः तेषां पूजा भवति । सर्वेषामभ्युदयाय सुखाय च प्रयत्नः करणीयः । अनेन प्रकारेण कुटुम्बे समाजे च सौमनस्यं प्रसारितम् ।[1] तदनुसृत्य धम्मपदे निर्दिष्टम्—

यो पाणमतिपातेति मुसावादं च भासति
लोके अदिन्नं आदियति परदारं च गच्छति ॥
सुरामेरयपानं च यो नरो अनुयुंजति ।
इधेव मेसो लोकस्मिं मूलं खनति अत्तनो ॥ १८.१२-१३

मानवीयगौरवस्य मानदण्डो गौतमेन सुष्ठु निर्धारितः—

यम्हि सच्चं च धम्मो च अहिंसा सञ्ञमो दमो ।
स वे वन्तमलो धीरो थेरो इति पवुच्चति ॥ धम्मपदे १९.६

त्रिविधयानः

यानस्तु पन्थाः । स त्रिविधः भवति—हीनयानः, प्रत्येकबुद्धयानः, महायानश्च । हीनयानानुसारं श्रावका व्यक्तिगताभ्युदयाय यतन्ते । साधकास्तु श्रावका एव निर्वाण-

---

१. बुद्धचर्यायां सिगालोवादसुत्ते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पथगामिनः चतुर्विधाः—स्रोतआपन्ना, सकृदागामिनः, अनागामिनः, अर्हन्तश्च क्रमशः प्रगता भवन्ति । श्रावकोऽर्हन्भूत्वा निर्वाणं लभते ।

प्रत्येकबुद्धयानः तेषां महात्मनां भवति ये गुरुं विना निर्वाणपथज्ञानं कृत्वा बोधिं प्राप्नुवन्ति । केवलं स्वकीयं कल्याणं स कुरुते नान्येषाम् ।

महायानस्तु बोधिसत्त्वयानः सर्वेषां प्राणिनां कल्याणाय भवति । बोधिसत्त्वः सन् पुरुषो लोककल्याणस्यावसरं प्राप्नोति । चरितं तस्य विशेषरूपेणोदारं करुणामयं च भवति ।

महायानेन साधको महाकरुणया सर्वेषां प्राणिनां निर्वाणाय प्रयत्नं करोति । साधकस्य बोधिप्रस्थानचित्तस्यावस्थानन्तरं दानं शीलं प्रज्ञा वीर्यं क्षान्तिः ध्यानं च षट्पारिमिताः व्रतरूपेण धार्यन्ते ।

महायानशाखायां पूजाविधानम्—वन्दनमर्चनं पापदेशनं पुण्यानुमोदनं बुद्धाध्येषणं बुद्धयाचनं बोधिपरिणमनं चास्ति । मूर्तिपूजायाः प्रचलनं च वर्तते । तत्र स्तूपचैत्यादीनां पूजा पत्रपुष्पदीपदानादिभिः क्रियते । तीर्थानि प्रकल्पितानि । तद्यथा—गौतमस्य जन्मभूमिः तस्य बोधिस्थानं धर्मचक्रप्रवर्तनस्थानं महापरिनिर्वाणस्थानं च ।

बौद्धधर्मानुयायिनां गृहस्थानामातिथ्यवृत्तिः, तेषां संघपोषणोत्साहश्च कर्तव्यमिति निर्धारितम् ।

महायानस्य वैशिष्ट्यानि

महायानानुसारं निर्वाणप्राप्तये भिक्षुजीवनस्य स्वीकरणमपेक्षितं नासीत् । गृहस्थोऽपि बोधिसत्त्वो भूत्वा स्वपरोपकारवृत्त्या निर्वाणलाभाय समर्थः । महायाने प्रतिष्ठिते सति कतिपयभिक्षवः कठोरजीवनवृत्तिमसहमाना विवाहं कृत्वा गृहस्था बभूवुः ।

महायाने परोपकारार्थं पापमपि निर्दोषमिति स्वीकृतम् । अनया मान्यतया व्यभिचाराणां विहारे संघे च प्रवेशाय द्वारमनावृतम् । पापमार्जनाय सरलविधानान्यपि प्रस्तुतानि । निःसन्देहमेवानेनायोजनेन भिक्षूणामपि पापवृत्तयः समिद्धाः ।

महायानानुसारं तत्रागणितबुद्धा बभूवुः । तद्यथा विष्णोरवताराः पौराणिकधर्मे समाज्ञातास्तथैव बुद्धानामवताराः यथाकालं षट्, चतुर्विंशतिः, अनन्ताश्च प्रमाणीकृताः । ब्रह्माण्डस्यासंख्येषु लोकेषु गणनाबाह्या बुद्धा बभूवुः ।

ब्राह्मणधर्मवत् महायाने बौद्धधर्मे स्वर्गस्य कल्पना वर्तते । तत्र सुखावतीति ख्याते स्वर्गे महर्षयो वसन्ति । अस्य लोकस्याधिपतिरमिताभः सूर्यरूपेण राजते । तस्य नामकीर्तनमात्रेण पापिनामपि सुगतिर्भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कतिपयबोधिसत्त्वानां मञ्जुश्रीमैत्रेयावलोकितेश्वरादीनां लोकोपकारिता विख्यातैव। ते मानवान् सत्पथे प्रवर्तयन्ति, मृतात्मनः स्वर्गं गमयन्ति, निर्वाणाय सर्वानेव प्राणिनः प्रोत्साहयन्ति च।

ब्रह्मविष्णुशिवकालीप्रमुखाः देवताः परवर्तियुगे उपास्याः सन्ति। अवलोकितेश्वरः विष्णुरेवाभिमतः। सप्तर्षयोऽपि समाज्ञाताः। बौद्धधर्मे सृष्टेर्विकासो वेदान्तानुसारं प्रतिपादितः। तद्यथा—धर्मकायो ब्रह्म, सम्भोगकायः ईश्वर इति। आदिबुद्धोऽवलोकितेश्वरः सम्भोगकायः। तस्मादेव ब्रह्मादयो देवाः प्रादुर्भूताः।

वज्रयानः

वज्रयाने तन्त्रस्य विकासोऽभवत्। अस्मिन् सम्प्रदाये हठयोगस्य वैशिष्ट्यं विद्यते। हठशब्दे ह सूर्य एव दक्षिणनाड्याः, ठ चन्द्र एव वामनाड्याः प्रतीकम्। इमे नाड्यौ क्रमशः पिङ्गलेडे च सुषुम्णां नाडीमभितः वर्तेते। योगिनः सुषुम्णामूर्ध्वमुखीं कर्तुमेत्र साधनां कुर्वन्ति। अनया साधनया कुण्डलिनी जागर्ति। तया सहस्रारचक्रस्थितशिवस्य रसास्वादो गृह्यते। वज्रयाने योगस्य पतनं दृश्यते। तथाहि—तदनुसारं योगसाधने मन्दिरमदिरामदिराक्षीणामुपयोगः समीहितः। वज्रयाने यमनियमादीनामुपेक्षा स्पष्टमेव।

बौद्धधर्मस्य ह्रासः

हीनयाने बौद्धधर्मस्य मूलतत्त्वानि सर्वोपरि सम्मतानि। कालान्तरे महायानयुगे बौद्धधर्मं लोकप्रियं कर्तुमेवाचारविषयकाणि शैथिल्यानि प्रायशः उपेक्षितानि। ईदृशे भिक्षुसमाजे मनीषिणां प्रादुर्भावो नाभवत्। परिणामतः शनैः शनैर्बौद्धाचार्याणां हतप्रभत्वं विदितचरमासीत्। अन्यधर्माणामाचार्यैः सह विवादे स्वभावतस्तेषां पराजयोऽभवत्। तन्त्रसम्प्रदाये कामुकतापूर्णं जीवनं सार्वजनिकधिक्कारणार्हं सञ्जातम्।

बौद्धानां प्रधानप्रतिपक्षिणो वैदिकधर्मावलम्बिनस्तु स्वधर्माणां युगानुरूपत्वं विधातुं सफलं प्रयतन्ते स्म। वैष्णवधर्मे जीवनस्य पवित्रता प्रतिपादिता। सा बौद्धधर्मस्याष्टाङ्गिकमार्गप्रणिहितात् जीवनवैशद्यादधिकतरं प्रभावपूर्णा बभूव। याज्ञिकहिंसाया विरोधोऽपि कृता। अस्यां स्थितौ प्रारम्भिकयुगे महायाने वैष्णवधर्मस्य कतिपयसिद्धान्ताः स्वीकृताः। कालान्तरे महायानो वैष्णवधर्मे विलीनोऽभवत्। वैष्णवधर्मेऽपि गौतमोऽवतार एव प्रमाणीकृता। अनेन विधिना शीघ्रं बौद्धधर्मावलम्बिनां संख्या स्वल्पा बभूव।

भारतीयधर्माणां महानदात् बौद्धधर्मस्य प्रवाहः संजातः। कालान्तरे बौद्धधर्मस्य शाखा विदेशेषु प्रचारिता बभूवुः। अधुनापि तत्र तासां प्रभावो वर्तते। भारतेऽपि बौद्धधर्मः पौराणिकधर्मे विलीनोऽमरो बभूव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जैनधर्मः

सम्प्रदायानुसारं जैनधर्मोऽनादिरनन्तश्चास्ति । सृष्टेरभिनवकल्पे धर्मोपदेशाय तीर्थङ्कर उत्पद्यते । अनेन प्रकारेण चतुर्विंशतितीर्थङ्कराः समुत्पन्नाः । तेषु प्रथम ऋषभ एव, अन्तिमास्त्रयश्च नेमिनाथः, पार्श्वनाथः महावीरश्च बभूवुः ।

पूजा

अस्मिन् धर्मे वैदिकयज्ञा निषिद्धाः । देवानां प्रतिष्ठाऽपि तत्र स्वल्पैव । तर्हि नासीत् देवयज्ञानां देवपूजानां वावसरः जैनधर्मे ।

जैनधर्मे पंचपरमेष्ठिनां पूजा विहिता । पंचपरमेष्ठिनस्तु अर्हन्, सिद्धः, आचार्यः, उपाध्यायः, साधुश्च भवन्ति । जीवन्मुक्तमहात्मानोऽर्हन्तः । तीर्थङ्करा अर्हन्तो भवन्ति । मुक्तपुरुषाः सिद्धाः कथ्यन्ते । आचार्याः साधूनां व्यक्तित्वस्य विकासाय यत ते । उपाध्यायाः शास्त्रपारङ्गताः सन्तः साधूनां शिक्षकाः भवन्ति । मोक्षपथसाधकाः साधवः सन्ति । गृहस्थेभ्यः पूजया सह तीर्थयात्राऽपि विहिता ।

पञ्चपरमेष्ठिनो पूजा निर्धारिता । मूर्तीनां प्रतिष्ठा मन्दिरेषु बभूव । तत्र तीर्थङ्कराणां स्तुतयः, नमस्कारपूर्वकं मूर्तिप्रदक्षिणा च प्रथमं सम्पादिताः । तदनन्तरमभिषेकः जलचन्दनाक्षतपुष्पनैवेद्यदीपधूपफलादिभिः पूजनं च कृते । पूजया शारीरिकशुद्धिर्मोक्षप्राप्तिश्च सम्भाविते । तत्र मानसिकपूजाया विधानमपि बभूव । तीर्थेषु पूजावैशिष्ट्यं प्रदर्शनीयमासीत् ।

व्रतम्

अहिंसा तु सर्वोच्चव्रतमेव । अहिंसाव्रतानुसारं जगतश्चराचराणां दृश्यानां केषाञ्चिदपि प्राणिनां ज्ञाताज्ञातं कृता हानिः परित्याज्या । तद्यथा—रात्रिभोजनत्यागः, जलपानशुद्धिः, घ्राणशुद्धिश्च नियताः । परिग्रहव्रतेनोचितोपायैः नात्यधिकधनसङ्ग्रहस्य मर्यादा स्वीकृता ।[1] जैनानामन्यव्रतानि—अस्तेयसत्यब्रह्मचर्याणि सुविदितानि ।

धर्मलक्षणम्

दशलक्षणोऽयं जैनधर्मः । तत्र क्षमा-मार्दवार्जव-सत्य-शौच-संयम-तपस्त्यागाकिञ्चन्य-ब्रह्मचर्याणि प्रतिष्ठितानि । इमानि लक्षणानि भागवतधर्मे बौद्धधर्मे वा समानरूपेण स्वीकृतानि । धर्मपथे गमनाय त्रयाणां शल्यानामभावोऽपेक्षितः । तत्प्रथमं निदानशल्यं कामानां बाधां प्रस्तौति । मायाशल्यं व्यवहारे कुटिलतामादधाति । मिथ्यात्वशल्येन प्रभावितो जनोऽसत्यमपि सत्यमिति विजानाति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१. अयमेव परिग्रहो मोक्षपथे महान् सम्बाधपर्वतः ।

जगत उपेक्षा

जैनधर्मानुसारं देहोऽयं स्वभावतोऽपवित्र एव । देहस्य सुखाय किमपि करणीयं न विद्यते । अतएव लौकिकविभूतीनामर्जनं संग्रहणं वा न कर्तव्यम् । अस्यां स्थितौ जैनगृहस्थेभ्योऽपि कर्म कर्त्तुं प्रोत्साहनं न विद्यते । निष्कामकर्मयोगस्यादर्शो जैनधर्मे न समाज्ञातः ।

मरणोत्तरविधानम्

मरणानन्तरं ये जीवा निर्वाणं प्राप्नुवन्ति ते सिद्धा भूत्वा विश्वमण्डलस्य शिखरेऽवस्थिता भवन्ति । तेषां लोक ईषत्प्राग्भार इति प्रोक्तः । सिद्धानामात्मानः तस्मिन् लोके ज्ञानदर्शनानन्दमया भवन्ति ।

जैनधर्मेऽपि पौराणिकधर्मसममेव नरकस्य प्रकल्पनं विद्यते । नारकीययातना बहुविधा वर्तन्ते । तद्यथा प्रदाहनं क्रकचेन पाटनं कृमिभिर्भक्षणं च । नरकात् पुनरपि मातुर्गर्भे पतनं भवति ।

तपस्विनो मुनयो यदि निर्वाणं न प्राप्नुवन्ति तर्हि ते देवलोके देवयोनौ समुत्पन्ना भवन्ति । तत्र तेषां शोभा सर्वोत्कृष्टा भवति । सोपवासं प्राणोत्सर्जनं कृत्वा गृहस्थाः स्वर्गे देवेन्द्रपदं प्राप्नुवन्ति । ततोऽवतीर्य भूलोके ते चक्रवर्तिनः सम्राजः भवन्ति । अन्ततः ते संन्यासिनो भूत्वा दीक्षां गृह्णन्ति ।

धर्मग्रन्थाः

वैदिकधर्मस्य प्रवर्तनमृग्वेदादिसंहिताग्रन्थैः भवति । वैदिकयुगे याज्ञिकधर्मस्य विवेचनं ब्राह्मणग्रन्थेषु कृतम् । ततः परमारण्यकेषु, उपनिषत्सु च धर्मस्य पारमार्थिकस्वरूपं व्याख्यातम् । वैदिककालस्य पश्चात् सूत्रस्मृतिग्रन्थेषु वर्णाश्रमयोः सूक्ष्मविवेचनं दृश्यते । महाभारते, पुराणेषु, उपपुराणेषु च वर्णाश्रमधर्मस्य व्यावहारिकं स्वरूपं सविस्तरं वर्णितम् । बहवः तन्त्रग्रन्थाः तदेव वर्णयन्ति ।

बौद्धानामादिधर्मग्रन्थः त्रिपिटकमिति ख्यातम् । त्रिपिटकमाश्रित्य परवर्तियुगे बहवो ग्रन्थाः संस्कृतभाषायां लिखिताः । जैनधर्मस्य प्रारम्भिकस्वरूपमङ्गोपाङ्गशास्त्रेषु विद्यते । ततः परं जैनधर्मस्य विवेचनं पुराणेषु, चरितकाव्येषु, कथासु च कृतं दृश्यते ।

भारतीयधर्मवैशिष्ट्यम्

भारतीयधर्माणामाधारः प्राकृतिको मनोवैज्ञानिको बौद्धिकश्चास्ति । बहूनां लोकानामनवरतचिन्तनानुभवैर्भारतीयधर्मस्य शाश्वतसंस्कारो समजनि । देशेऽस्मिन् सर्वेषु धर्मेषु अध्यात्मतत्त्वं सर्वोच्चं समुपस्थापितम् । तत्र गाम्भीर्यं वरीवर्ति । शान्ति-शृङ्गार-करुणादीनां [illegible] प्रवहति सर्वेषु धर्मेषु । [illegible] लोका इहलोके विशुद्धिं परत्र च मुक्तिं लभन्तामिति योजना महामनीषिणामाचार्याणां प्रतिभासते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिल्पसाधना

शिल्पकलाप्रमाणमादौ प्रकटितं दृश्यते ।[1] तथा हि—चित्रं तु पत्रपुष्पाणां रङ्गेषु, चलितकुसुमानां पत्रपुटेषु, मौक्तिकशुक्तीनां रेखान्यासे च प्राकृतिकमेव । मूर्तरूपं तु जगदेव पाञ्चभौतिकं दृश्यते । नदीप्रवाहेषु शिलाशकलाः प्रायशः मूर्तरूपं धारयन्ति, क्षुद्रजन्तूनां पक्षिणां कीटादीनां च गृहा बहुधा कलाप्रवणतां विभावयन्ति। तत् सर्वं सुमनोहरम् ।

शिल्पमधिकृत्यैतरेयब्राह्मणे प्रोक्तम्—

देवशिल्पान्येतेषां वै शिल्पानामनुकृतीह शिल्पमधिगम्यते ।[2]

चित्रम्

मानवकृतचित्राणां द्विविधं स्वरूपं वर्तते–वनवासिभिः कृतम्, नागरिकैः कृतं च । वनवासिनां चित्रं प्रागैतिहासिकमिति निगद्यते । वनवासिनः प्रकृतेः मनोरमे उत्सङ्गे उपविश्य समक्षमेव सौन्दर्यशालिनीं प्रकृतिच्छविं दृष्ट्वा मनसि प्रोल्लसिताः स्वभावत एव चित्राभ्यासे लीना भवन्ति । पुरा बहुषु स्थानेषु तैः वनवासिभिश्चित्राणि कृतानि, किन्तु कालक्रमेण प्रायशश्चित्राणि विनष्टानि । केवलं स्वल्पान्येव चित्राणि पर्वतगुहासु प्रकृत्यैव सुरक्षितानि प्राप्यन्तेऽधुना ।

वन्यचित्राणि

पर्वतश्रेणीषु कतिपयगुहा वनवासिभिः परिचित्रिताः सन्ति । ईदृशानां चित्राणां चत्वारि केन्द्राणि सन्ति—(१) मिर्जापुरजनपदस्य सोनद्रोणी, (२) मानिकपुरबाँदाजनपदे, (३) रायगढ़जनपदे सिंघनपुरस्य पर्वते काबरापर्वते च, (४) महादेवपर्वते होशङ्गाबादे पचमढीजनपदे च ।

मिर्जापुरजनपदे वन्यानां हस्तिनां पक्षिणां च ग्रहणस्य, नृत्यस्य च चित्रणं वर्त्तमानमेव । क्वचित् मृगादिवन्यपशूनां चित्रणमतीव सुन्दरं प्रतिभाति । तत्र भलदरियागुहायां

---

१. महाभारतानुसारं तु शिल्पानि गणनावाह्यानि सन्ति । विश्वकर्मा तु 'कर्ता शिल्पसहस्राणाम्, वर्तते । आदि० ६०.२७

अभ्यासपाटवेन निष्पादितां लोकोपयोगिनीं निर्मितिं तामधिकृत्य तन्त्रविशर्षं च शिल्पमित्यभिधाय पुरा शिल्पानां संख्या सहस्रपर्यन्ता विनिश्चिता ।

२. ऐतरेयब्राह्मणे ६.५.१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मृगयाक्रमे व्रणितस्य श्रान्तस्य च शूकरस्य पक्षिणां जलसन्तरणस्य च दृश्यचित्रं लभ्यते। विजयगढ़गुहायां कस्यचित् व्याघस्य सिंहस्य च चित्रणं वर्तते। इमानि चित्राणि ख्रीष्टस्य चतुर्थशतकादारभ्य दशमशतकपर्यन्तं निर्मितानि। बाँदाजनपदे सरहतगुहायां त्रिभिरश्ववारैस्त्रयाणामश्वानां वहनं दर्शितम्। मालवागुहायां शकटे उपविष्टः कश्चित् पुरुषो दर्शितः। शकटात् पश्चभागे द्वौ पुरुषौ चित्रितौ प्रथमस्य पुरुषस्य हस्ते धनुर्बाणौ, अपरस्य हस्ते यष्टिश्च वर्तन्ते। कुरियाकुण्डगुहायां हरिणानां मृगयादृश्यं चित्रितम्।

सिंघनपुरगुहासु काबरापर्वतगुहासु च मृगयादृश्यस्य मकर-हरिण-सरटादीनां चित्रणं कृतम्। मानवानामाकृतयो यष्टिसमाभिः पीनरेखाभिर्निर्दर्शिताः। इमानि चित्राणि ख्रीष्टस्य पूर्वमेव निर्मितानि।

पचमढीसमीपं प्रायः पंचाशत् गुहाश्चित्रमयाः कृताः। आसु गुहासु मृगयादृश्यं मधुसंचयदृश्यं समूहयुद्धं पशुचारणं तृणाच्छादितगृहाः पर्णकुटीनिवासिनश्च चित्रद्वारा निर्दर्शितानि। हस्तिनः, चित्रकाः, ऋक्षाः, शूकराः, हरिणाः, मकराश्च तासु चित्रिताः। क्वचित् पालितपशवो बलीवर्दाः, अजाः, कुक्कुराश्च चित्रिताः। तत्रैव 'अपर डोरोथी' गुहायां वानरस्य वंशीवादनं मनोहारि दृश्यमेव चित्रितम्। आसु गुहासु प्राचीनतमानि चित्राणि ख्रीष्टतः ५०० वर्षाणि प्रागेव कृतानि।

मध्यप्रदेशे मन्दसौरनगरस्य परिसरे त्रिंशद्गुफानां भित्तिषु, पटलेषु च गैरिकचित्राणि वर्तन्ते। एतेषु चित्रेषु पशवः, नर्तकाः, गोपालाश्चामरीकृताः। स्वस्तिक-चक्र-सूर्य-सर्वतोभद्राष्टदलकमलादीनि च तत्र चित्रितानि।

उत्कलप्रदेशे संभलपुरस्य हैदराबादप्रदेशे रायचूरस्य तमिलनाडे बिलारीनगरस्य परिसरे तस्मिन् युगे क्षुरणेन चित्राणि कारितानि दृश्यन्ते।

चित्रोपकरणेषु गैरिकं प्रायः प्रयुक्तमेव दृश्यते। चित्रेषु क्वचित् कृष्णवर्णरचना दग्धकाष्ठैः कृता प्रतिभाति।

नागरचित्राणि

नागरचित्रस्य प्रथमं प्रत्यक्षपरिचयः सिन्धुसभ्यतायाश्चित्रैः प्राप्यते। सिन्धुसभ्यतायाश्चित्रशैली पूर्ववर्तिनां कलाकाराणां चिरसाधनाभिः सुविकसिता एव। तस्मिन् युगे चित्रकलाया लोकप्रियत्वं नित्यप्रयुक्तवस्त्रपात्रादीनां चित्रणैः प्रसिध्यति।

सिन्धुसभ्यतायुगे ज्यामितिचित्राणि रेखाचित्राणि वा पत्रपुष्पादीनां ताराणां पशुपक्षिणां चित्राणि च पात्रेषु कृतानि। तत्र पत्रपुष्पादीनां मध्ये मयूरादयः पक्षिणः, मत्स्य-कच्छपादयः जलचराश्च निवेशिताः। प्रायः सर्वे प्राणधारिणः संचरणशीला एव समाकलिताः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिन्धुसभ्यतायुगे चित्रणाय कूर्चिकाया उपयोगोऽभूत् । श्वेत-रक्त-कृष्ण-पीत-हरितादिभी रङ्गैश्चित्राणि निर्मीयन्ते स्म ।

सिन्धुसभ्यतायाः पश्चात् वैदिकयुगे भारतीयचित्रस्य विकासः कथमभवदिति ज्ञातुं तदानीन्तनसाहित्यमेवावलम्ब्यम् । वैदिकयुगस्य महाभारतादियुगस्य वा चित्रावशेषा अलब्धा एव ।[१] चित्रस्य प्रचलनं वैदिकसभ्यतायामासीदिति निम्नलिखितैरुल्लेखैरवगन्तव्यम्—राजसूययज्ञे यजमानस्य राज्ञः तार्प्यवस्त्रे यज्ञरूपाणि कृतानि । गवां कर्णेषु कर्करिदात्रस्थूणादीनामाकृतीनां रचना स्वधित्या कृता ।[२] यज्ञकर्मणि क्वचिदश्वस्य पदं परिलिखितमासीत् ।[३]

परवर्तिचित्रकरणस्योल्लेखा बौद्धसाहित्ये वर्तन्ते । तथा हि उम्मगजातकानुसारं कस्मिश्चित् सुरङ्गे इन्द्रस्य वैभवम्, सुमेरुः, समुद्रः, महाद्वीपाः, हिमालयः, सूर्य-चन्द्र-दिक्पालाः, भुवनानि च चित्रितानि । पात्रेषु बहुविधानि चित्राणि निर्मितानि, मालासु चित्राणि निवेशितानि च ।[४] उत्तरीयेषु पुष्पाणि पशवो वा वर्णिताः ।[५] गृहभित्तिषु नरनारीणां मनोरमचित्राणि रचितानि ।[६] ई० पू० द्वितीयशताब्दे पतञ्जलिना कंसवधस्य, बलिबन्धनस्य च चित्रणमुल्लिखितम् ।[७] अश्वचित्रविलिखनस्योल्लेखः महाभारते वर्तते ।[८]

राजाश्रये नाटचगृहेषु चित्राणि रचितानि ।[९] राजप्रासादेषु राज्ञां राज्ञीनां च चित्राणि निर्मितानि । राजकीयवस्त्राणामलङ्करणं चित्राचार्यैः कृतम् ।

सिन्धुसभ्यतायाः पश्चात् भारतीयचित्रकलाया ऐतिहासिकपरम्परायाः प्रथमं विस्पष्टं

---

1. From the references in the early literature of India dealt with in the preceding chapter, it has been already inferred that painting was a developed form of artistic expression previous even to the rise of Buddhism, and the character of the most ancient frescoes at Ajanta serves to strengthen this supposition. Percy Brown : Indian Painting p. 32.
२. शतपथे ५.३.५.१० अथर्ववेदे ६.१४१.२; १२.४.६ मैत्रायणीसंहितायां ४.२.९ ।
३. शतपथे १३.४.३.४ ।
४. कुसजातके ५३१ ।
५. महावग्गे ५.१०.३; ८.२९ ।
६. चुल्लवग्गे ६.३.२ ।
७. Keith : History of Sanskrit Drama p.28.
८. आरण्यक-पर्वणि २७८.१३ ।
९. नाट्यशास्त्रे २.९०—९१ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वरूपमजन्तागुहाचित्रेषु प्राप्यते ।[1] अजन्ताया नवमी दशमी च गुहे ख्रीष्टत: पूर्वं द्वितीयशतके प्रथमशतके च निर्मिते । अत्र 'छदन्त' जातकस्य कथा चित्रिता । चित्रकलाया द्वितीयं स्वरूपमजन्ताया: शेषासु गुहासु प्राप्यते । तद् गुप्तकालीनमेव । गुप्तकालीनचित्रकलाया अवशेषा मध्यप्रदेशस्य बाघगुहासु, दक्षिणभारतस्य बादामिगुहासु, तंजौरजनपदस्य सित्तनवासलगुहासु, काञ्चीनगरस्य शिवमन्दिरे च प्राप्यन्ते ।

अजन्ता–चित्राणि

अजन्तायाश्चित्रावलीषु पूर्णं जगदेव सन्निविष्टम् । तासु सर्वेषां प्राकृतिकानां मानवीयानां च वस्तूनां सर्वासां स्थितीनां च परिकल्पनं बभूव । मानवीयजीवनस्य चतुर्णां वर्गाणामितिवृत्तानि चित्रेषु समन्वितानि । मोक्षपराणि चित्राणि तत्र प्रामुख्यं भजन्ते ।

अजन्तायाश्चित्रशैली रसभावपूर्णा प्रतिभाति । तद्यथा षोडशगुहायां मरणासन्नाया राजकुमार्याश्चित्रं करुणरसभावसृष्टावद्वितीयमेव । गौतमबुद्धस्य समग्रं जीवनं तत्र निदर्शितम् । सप्तदशगुहायां यशोधरया बुद्धाय राहुलस्य समर्पणं चित्रितम् । तदेव तस्य युगस्याप्रतिमा कथा बभूव, यत: काचित् माता स्वपुत्रस्य बुद्धशरणगमनमेव सर्वोच्चो भाग्योदय इत्यमन्यत ।

गौतमबुद्धस्य पद्मपाणिबोधिसत्त्वक्रमादारभ्य महापरिनिर्वाणपर्यन्ता कथा सविस्तरं द्वितीयगुहायां षोडशगुहायां सप्तदशगुहायां च चित्रिता वर्तते । सप्तदशगुहायां सौन्दरनन्दस्य कथा चित्रता ।

कतिपयचित्राणि मानवताया: समक्षमौदार्यस्यादर्शं प्रतिष्ठापयितुमेव कृतानि । तद्यथा प्रथमगुहायां स्वर्णतुलायां कस्यचिद्राजर्षेर्मांसं कपोततुल्यं तोल्यते । बोधिसत्त्वानां कथानां चित्रणं राष्ट्रियचरित्रस्य विकासाय कृतम् ।[2]

---

१. ई० पू० १३००–१००० युगे नेवासा इति प्रसिद्धे स्थाने मृत्पात्रे हरिणादीनां चित्रणं कृतमित्युत्खननेन सम्प्राप्तम् ।

2. The aim of the Buddhist artist was to visualise the ideals of his creed, to illustrate by pictorial parables all the beautiful sentiments of the Buddhist religion. These were designed to appeal to the higher feelings of the spectator, so that sustained by their supreme charm, the littleness of his own personality vanishes, and he becomes exalted and absorbed. The Buddhist frescoes no doubt attained this object, and by their sheer artistry elevated the individual into the actual realms of the higher beings, thus bringing him to the feet of the Master himself. Percy Brown : Indian Painting P. 8.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अजन्तायाश्चित्रशैली सफला प्रतिभाति । तत्रत्यकलाकारा मानव-जीवनस्य भारतीय-प्रकृतेश्च कुशला अध्येतारो बभूवुः । रससर्जनाय विविधभावान् प्रदर्शयितुमाङ्गिकान् विन्यासान् विलासांश्च नैपुण्येन ते व्यक्तवन्तः । तत्र नाट्यशास्त्रे वर्णिता मुद्राः प्रत्यक्षी-कृता एव । गुहासु चित्ररचना धरातलभागं परित्यज्य प्रायशः सर्वत्रैव कृता । तद्यथा भित्तिषु, स्तम्भेषु, अन्तःपटलेषु च चित्राणि विद्यन्ते । अन्तःपटलचित्राणां सौष्ठवपूर्ण-विनिवेशनं तु महदाश्चर्यमेव ।

अजन्तायाश्चित्राणां रचनायां पादपानां धातूनां च रसाः प्रयुक्ताः । चित्राचार्याश्चित्र-करणात् प्राक् भित्तिं समतलां विधाय वज्रलेपस्यावरणेन योग्यां पृष्ठभूमिं कृतवन्तः । चित्रस्य पूर्वरूपं कृष्णरेखाभिरङ्कितम् । वर्णस्य चयनं भावानुरूपं कृतम् । चित्राचार्याणां तूलिका सर्वत्र सन्तुलिता वर्तते ।

बाघचित्राणि

बाघचित्राणि गुप्तयुगे रचितानि । बाघस्य गुहाभवनानि अजन्ताया गुहानां समचं नात्युत्कृष्टानि प्रतिभान्ति, किन्तु बाघचित्रशैली पूर्णरूपेण विकसिता वर्तते । चित्रेषु परिधिगतलतापत्रचित्रणस्य बाहुल्यमस्ति । लतापत्रादिषु मध्ये क्वचित् पशुपक्षिणां पुरुषाणां वा विचरणं चित्रितम् । स्थानीयदृश्यानि, तत्रत्यादिवासिनां रूपाणि च चित्रेषु प्रायशो वि-निवेशितानि । बाघचित्रेषु सर्वोत्तमं हल्लीसकनृत्यदृश्यमेवावशिष्टं विद्यते ।[1] अस्मिन् चित्रे रासलीलावत् रमणीनां समूहः कस्यचित् पुरुषस्य नेतृत्वे सङ्गीतमयनाटचस्य प्रदर्शनं करोति । क्वचिदेव गौतमबुद्धस्य बोधिसत्त्वानां च चरितगाथा चित्रिता । अन्यत्र हस्ति-नामश्वानां च राजकीययात्राप्रसङ्गे सजीवं चित्रणं कृतम् ।

बादामिगुहाचित्राणि

तत्रत्यवैष्णवगुहायां शिवपार्वतीपरिणयदृश्यं चित्रितम् । आकृतिषु सौकुमार्यं रमणीयं वर्तते ।

सित्तनवासलगुहाचित्राणि

अस्मिन् प्रदेशे जैनसंस्कृतिसम्बद्धा गुहा वर्तन्ते । तत्र नृत्यचित्राणां वैशिष्टयमस्ति । नर्तकीनां हावभावादिकं नृत्यमुद्राश्च प्रदर्शितानि । एकस्यां गुहायामन्तःपटले सरोवरदृश्यं चित्रितम् । तत्र सघनपद्मवनमध्ये हंससारसादयः पक्षिणो मकरमत्स्यादयो जलजन्तवश्च चित्रिताः । एकस्यां गुहायामुच्चपरिवारस्य चित्रणं विद्यते ।

गुप्तयुगे बहुषु राजभवनेषु, चित्रगृहेषु, मन्दिरेषु च चित्रकारैरसङ्ख्यविषयकाणि चित्राणि निर्मितानि । तेषामुल्लेखमात्रमेव फाह्यानह्वेनसांगादीनां यात्रावर्णनेषु प्राप्यते ।

---

१. मण्डलेन च यत्स्त्रीणां नृत्तं हल्लीसकं तु तत् ।
नेता तत्र भवेदेको गोपस्त्रीणां यथा हरिः ॥ कामसूत्र २.१४.२१ टीका

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एलूरायाः कैलाशमन्दिरे भित्तिचित्राणि कृतानि सन्ति। अत्र गरुडासीनस्य विष्णोलक्ष्म्याश्च चित्रणं सर्वोत्कृष्टम्। चित्रशैली तु प्रायशः परवर्तियुगस्याजन्ताचित्रणानुरूपा वर्तते। एषां चित्राणां रचना खीष्टस्य पश्चादष्टमे नवमे च शतकेऽभूत्।

तञ्जौरस्य बृहदीश्वरमन्दिरे चोलराजैर्निर्मापितानि एकादशशतकस्य चित्राणि प्राप्यन्ते। द्वादशशतकस्य चित्रं झाँसीजनपदस्य मदनपुरमन्दिरस्यान्तःपटले निर्मितं दर्शनीयमेव।

दशमशतकादारभ्य द्वादशशतकपर्यन्तं वङ्गप्रदेशे पालराज्ञामाश्रये लघुचित्रकला विकसिता। एकादशशतकादारभ्य षोडशशतकपर्यन्तं पश्चिमचित्रकला गुर्जरप्रदेशे विकसिता। तेषां लघुचित्राणां निदर्शनं हस्तलिखितपुस्तकानां पृष्ठेषु भवति। बौद्धग्रन्थस्य प्रज्ञापारमितायाः प्रतिषु देवानां सर्वोत्कृष्टानि चित्राणि विद्यन्ते।

गुर्जरशैलीचित्राणि ताडपत्रेषु साधारणपत्रेषु वा रचितानि। चित्राणां पृष्ठभूमिका प्रथमं रक्तवर्णा रचिता, परवर्तियुगे नीला स्वर्णाभा वा पृष्ठभूमिका प्रचलिता बभूव। एषु चित्रेषु कोणविशिष्टं मुखं, शुकनासा, उद्भिन्ननेत्रं च विशेषाः सन्ति। अलङ्करणविषयाणां चित्रेषु बाहुल्यं वर्तते। चित्राणि त्रिविधानि सन्ति—जैनसाहित्यविषयकाणि, वैष्णवसाहित्यविषयकाणि, लौकिकचित्राणि च। लौकिकचित्रेषु वसन्तविलासचित्रणं सर्वोत्कृष्टं वर्तते। तदधिकृत्य नवसप्ततिलघुचित्राणि कुण्डलितचित्रपटे रचितानि। अस्मिन् प्रकरणे वसन्तस्य चारुतायाः प्राकृतिकविलासस्य च सौमनस्यं चित्रद्वारा विभावितम्।

चित्रस्य लोकोपयोगिता

वन्यचित्रैर्नागरचित्रैश्च प्रायः सर्वदा मानवानामावासा अलंकृताः। वन्यचित्रैर्दर्शकानां पराक्रमेभ्यः प्रोत्साहनमपि समभवत्। रसिकानां हृदये चित्रदर्शनैः सततं रसनिष्पत्तिरजायतेति निःसन्दिग्धमेव।

सिन्धुसभ्यतायुगे वस्त्रपात्रादिषु चित्रं रचितम्। श्मशानेऽपि शवैः सह निधापितानां पात्रेषु तमालशिरीषादीनां वृक्षाणां चित्रं कृतम्। सिन्धुसभ्यताया लिपिश्चित्रमयी बभूव। लिपिचित्रेषु वृक्षाः, पत्रपुष्पाणि, उत्पतनशीलाः पक्षिणः, सन्तरणपरायणा मत्स्याः पशवश्च वर्तन्ते।

बौद्धसाहित्यानुसारं चित्रस्योपयोगिता नागरिकाणां व्यावहारिकजीवने संवर्धितेति प्रतिभाति। राज्ञो मनोरञ्जनाय चित्रागाराणि बभूवुः। राजकीयरथाः सुचित्रिता बभूवुः। चित्ररचना मनोरंजनाय कृता। साधारणजना अपि गृहभित्तीश्चित्रैरलंकृतवन्तः।

महाभारतानुसारं पताका रञ्जिता बभूवुः। चित्रपटेषु हस्त्यश्वरथादयः निर्मिताः। सभायामासनविधानं क्वचित् पक्षिणां रेखाकृतिं रचयित्वा तदनुसारं कृतम्। तद्यथा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्रौपद्याः स्वयंवरे शिशुमाराकृतिमनुसृत्य जना उपविष्टाः । सौन्दरनंदानुसारं नायिकायाः कपोले चित्रणं तु दम्पत्योर्मनोविनोदाय बभूव ।

अजन्ताचित्रैः धर्मसंवर्धनस्यायोजनं कृतमिति प्रागेव निर्देशितम् । विदेशेषु धर्मप्रसारणाय चित्रस्याभिनवोपयोगः स्वीकृतः । हंसचित्राणि रचितानि । राजप्रासादभित्तिषु राजकीयकुटुम्बस्य सदस्यानां चित्राणि निर्मापितानि । भिक्षुका जैना बौद्धा वा स्वकीयशालाश्चित्रैरलङ्कृतवन्तः । ज्ञानवर्धनार्थं चित्रस्योपयोगिता सदैवाभूत् ।

खीष्टतः पश्चात् सप्तमे शताब्दे पुत्रजन्मकाले धनिनां गृहे षष्ठीदेव्याश्चित्रं रचितम् । हरिद्रायाः पिष्टेन भित्तिषु चित्राणि कारितानि । न केवलं वस्त्रेषु शरीरस्य विविधाङ्गेष्वपि चित्राणां स्थानं शोभनं मतम् । तद्यथा—कपोले कुङ्कुमेन पत्रलता, स्तनयोः कालागुरुणा पत्राणि पुष्पाणि च स्त्रीभी रचितानि । राजप्रासादानां भित्तिचित्रैर्विश्वस्य भौगोलिकदर्शनं कारितम् । विवाहावसरे मृण्मयपात्रे पत्रलतादयो रचिताः ।

विवाहार्थं स्वयंवरकृते नायकनायिकादीनां चित्राणि रचितानीति सुविदितमेव ।

चक्रवर्तिसम्राजामभिषेकावसरे सिंहासने यद् व्याघ्रचर्मास्तृतं तस्मिन् सद्वीपायाः पृथिव्याः चित्रणं कृतम् ।

चित्रशैली

विविधोपयोगानधिकृत्य कलाकाराश्चित्रकलाया विविधशैलीर्विकसितवन्तः । चित्रस्य षडङ्गानि प्रतिष्ठापितानि—

रूपभेदः प्रमाणानि भावलावण्ययोजनम् ।
सादृश्यं वर्णिकाभङ्गः षडेते चित्रमङ्गकम् ॥

तत्र रूपभेदो निरूपणीयवस्तुनः प्रत्मङ्गमध्ययनमेव । प्रमाणं तस्याकारप्रकारज्ञानम् । भावस्तेनाभिव्यज्या रसा भावाश्च सन्ति । लावण्ययोजनेन चित्रे कलात्मकचारुता निवेशिता भवति । सादृश्यं तु सामान्यगुणलक्षणम् । वर्णिकाभङ्गेन रङ्गभरणं भवति ।

पद्मपुराणानुसारं चन्दनादिद्रवोद्भवं चित्रमार्द्रमिति संज्ञितम् । चित्रं तु भूतले, जलेऽम्बरे वा कारितं कृत्रिमैरकृत्रिमैर्वा रङ्गैः ।[1]

चित्रलक्षणमधिकृत्य विविधविषयाणां चित्रणेऽपेक्षितस्य मानादिकस्य रूपवैशिष्ट्यस्य च परिचायकाः सिद्धान्ता विवेचिताः ।[2]

---

१. पद्म० २४.३६, ३७ ।
२. विष्णुधर्मोत्तरपुराणस्य तृतीयभागे ३६-४३ अध्यायाः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चित्रकलायाः विदेशेषु प्रसारः

बौद्धधर्मेण सह भारतीयचित्रकला विदेशेषु प्रसृता । लङ्का-स्याम-ब्रह्मा-नेपाल-खोतान-तिब्बत-जापान-चीनादिषु देशेषु चित्रकला भारतीयशैल्या प्रभाविता । चित्रद्वारा धर्मस्य साक्षात् शिक्षणस्य पद्धतिः प्रचलितासीत् । एतदर्थं कुण्डलचित्राणि प्रयुक्तानि बभूवुः । खीष्टस्य पश्चात् सप्तषष्टितमे वर्षे काश्यपमातङ्गश्चीनमहाराजस्य मिङ्गतीमहोदयस्यानुरोधानुसारं धार्मिकचित्रैः सह चीनमगच्छत् । तस्मात् कालादारभ्य सप्तमशताब्दपर्यन्तमसंख्यानि भारतीयचित्राणि चीने प्रेषितानि । चीनदेशस्य भित्तिचित्रशैली भारतानुरूपैव दृश्यते । भारतीया चित्राचार्या धर्मप्रचाराय चीनं गतवन्तः । जापानस्य होरिउजीमन्दिरस्य चित्राणि अजन्तानुरूपाणि प्रतिभासन्ते ।

पूर्वतुर्किस्तानस्य खोतानप्रदेशे खीष्टस्य प्रारम्भिकयुगे भारतीयचित्रकलायाः प्रसरणं समभवत् । तत्र कौशेयवस्त्रेषु भित्तिषु च चित्राणि अजन्तानुरूपाणि अष्टमशतके निष्पादितानि । दन्दन-उकिलस्थानस्य चित्रं सम्भवतः केनापि अजन्ताचित्रकारेण कृतमिति प्रतिभाति ।

मूर्तिः

भारतीयमूर्तीनां प्रथमपरिचयः सिन्धुसभ्यताया अवशेषैः प्राप्यते । सिन्धु-सभ्यतायुगे विविधशैलीनां मूर्तीनां रचना कृता । तस्मात् कालादारभ्य प्रायशो द्विसहस्रवर्षेषु या मूर्तयो रचितास्तासां केवलमुल्लेख एव साहित्यग्रन्थेषु विद्यते । तासामवशेषा अप्राप्ता एव । मौर्ययुगादेव मूर्तिकलायाः पुनर्दर्शनं भवति ।

सिन्धुसभ्यताया मूर्तयः

सिन्धुसभ्यतायुगे प्रायश्चतुर्विधा मूर्तयो रचिताः—(१) शिलाशकलानां तक्षणेन कृताः (२) धातून् द्रवीकृत्य निर्मितरूपाः (३) अभिघातेन मुद्रिताः (४) मृण्मयाकृतयो हस्तेन रचिताः ।

सुप्रसिद्धैव सिन्धुसभ्यताया ध्यानावस्थितयोगिनो मूर्तिः । सा प्रस्तरस्य मूर्तिः कलाप्रमाणेन लोकोत्तरैव मन्यते । अस्यां मूर्तौ योगिन आङ्गिकविन्यासः, वस्त्रादीनां परिधानं च याथार्थ्येन प्रतिभासेते । मूर्तौ धातूनां प्रतिबन्धनं कृतम् । मूर्तेर्वस्त्रभागेषु त्रिपत्रिकायास्तक्षणं रक्तवर्णेन पूरितम् ।

कलादृष्ट्या सर्वोत्तमैव वर्तते शोणप्रस्तरेण निर्मिता पुरुषस्य मूर्तिः, यस्याः कबन्धभाग

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवावशिष्टः । अस्यां मूर्तौ स्वाभाविकी रूपमुद्रा विभाविता । तत्राङ्गिकसौष्ठवानि कुशलविधिना प्रदर्शितानि । नर्तक्याः कांस्यनिर्मितमूर्तौ नृत्यमुद्रा विन्यस्ताः । तथा हि तत्र नृत्यस्य हावभावाः वर्तन्ते । नर्तकीनां मृण्मयमूर्तयः प्रस्तरमूर्तयश्च प्राप्यन्ते ।

सिन्धुसभ्यताया मूर्तिकलाशैली 'यथार्था' इति विख्याता । मूर्तिभिर्भावाभिव्यञ्जनं तस्मिन्युगे नोद्दिष्टमिति प्रतिभाति । कलानां भावप्रवणता वैदिककवीनां प्रमुखमुद्देश्यं प्रतिभाति । वैदिककाव्येषु प्रायशो याथार्थ्यं परित्यज्य कवयो व्यञ्जनां समाश्रयन्ते ।

वैदिकमूर्तयः

भारतीयकलानां व्यञ्जनाया आदिस्रोतो वैदिकसंस्कृतौ प्रवाहितम् । अत्र कल्पनाया यत् प्राधान्यं विभाव्यते तस्याविर्भाव ऋषीणामलौकिकप्रतिभया सञ्जातः । तथा हि—अग्निः सहस्राक्षः, पुरुषः सहस्रशीर्षः, उषसः रमणीरूपा वा । उपनिषत्सु याथार्थ्यस्य परिधिमुपेत्यैव व्यञ्जनामवलम्ब्य दार्शनिका विश्वमखिलं ब्रह्मैव निरूपितवन्तः । अनेन प्रकारेण विष्णोश्चतुर्भुजत्वं, शिवस्य त्र्यम्बकत्वं सिध्यति ।

वैदिकमूर्तयोऽधुना न प्राप्यन्ते । तेषां साहित्यिकवर्णनमात्रमेव तदानीन्तनकलाप्रगतिं प्रकटयति । तस्मिन् युगे स्वर्णस्य मृत्तिकायाश्च मानवमूर्तयो निर्मिताः ।[1] तैत्तिरीयब्राह्मणानुसारं भारती, इडा, सरस्वती च पूज्या देव्यो मताः । पूजार्थं तासां स्वर्णमयी, मनोहारिणी च प्रतिकृतिः कारिता ।[2]

स्वर्णेनवतरस्यं कल्याणतरस्य रूपस्य विधानं पेशस्कारीभिः कृतम् ।[3]

परवर्तियुगे महाभारते बहुविधमूर्तीनामुल्लेखो विद्यते । विद्यार्थिनां परीक्षार्थं द्रोणाचार्येण शूकरमूर्तिः निर्मापिता । द्रौपदीस्वयंवरे कृत्रिममत्स्यसन्धानं कृतम् । एकलव्यः द्रोणाचार्यस्य मृण्मूर्तिं कृतवान् । युद्धस्य पश्चात् भीमस्य लौहमूर्तिं धृतराष्ट्रः पिष्टवान् । अश्वस्य मृण्मूर्तिः कारिता ।[4] अन्यच्च—

स रुक्मपक्षो निचितस्त्रिगुणो गरुडाकृतिः । आश्व० ९०.३१

ऐतिहासिकमूर्तयः

ऐतिहासिकमूर्तीनां विस्पष्टः समारम्भो मौर्यकालादेव भवति ।[5] मौर्ययुगस्य सर्वोच्चा-

---

१. शतपथब्राह्मणे ७.४.१.१५

२. History of Dharmasastra Part II p. 707

३. बृहदारण्यकोपनिषदि ४.४.४

४. आरण्यकपर्वणि २७८.१३

५. मौर्यकालात् प्राङ् निर्मिता देवी-मूर्तिः लौरियानन्दनगढ़े प्राप्ता । कनिङ्घमानुसारमेतस्या निर्माणं ५००–६०० ई० पू० युगे बभूव । राजगिर-स्थाने ताम्रपत्रेषु तादृशी मातृमूर्तिः प्राप्ताः ।
शैशुनागनन्दयुगस्य (६००–४०० ई० पू०) मूर्तिकला श्रीचक्रेषु निर्मिताभिर्मातृमूर्तिभिः प्रमीयते । एतासु पत्र-पुष्प-पशूनामलङ्करणं विद्यते । तासां विकासः सिन्धु-कला-परम्परागां बभूव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दर्शा अशोकस्तम्भानां शिरोभागे स्थापितासु पशुमूर्तिषु विभाव्यन्ते । तासु सारनाथस्य पशुमूर्तयः सर्वोत्तमाः । अस्य स्तम्भस्य शिखरे धर्मचक्रं निर्मितमासीत् । इदं धर्मचक्रं चतुर्दिग्भागावलोकनपरायणानां चतुर्णां सिंहानामुपरि धृतमासीत् । 'धर्मस्तु लौकिकशक्तिमैश्वर्यं च नियमयति' इति धर्मचक्रस्य सर्वोच्चप्रतिष्ठा द्योतयति । सिंहानामधः पार्श्वभागेषु चतुर्षु दिक्षु क्रमशः सिंहस्य हस्तिनो वृषभस्याश्वस्य च पराक्रमव्यञ्जका मूर्तयो वर्तन्ते। प्रत्येकमूर्त्या सहैवैकं धर्मचक्रं निर्मितम् ।

अशोकयुगस्योपर्युक्तमूर्तिकलायाः सर्वोत्कृष्टत्वं प्रत्यक्षमेव वर्तते । मूर्तिषु स्वाभाविकतया ओजस्वितया सहापूर्व एव योगो दर्शनीयः । ईदृशाः स्तम्भाः दिल्ली-प्रयाग-रामपुरवा-लौरियानन्दनगढ़-साँचीषु विराजन्ते । स्तम्भेषु अशोकस्य मानवोद्बोधकाः सन्देशा उत्कीर्णाः ।

मौर्यकालिकमानवमूर्तीनां परिचयो यक्षाणां प्रतिमाभिरेवावगम्यते । अस्य युगस्य यक्षाणां प्रधानमूर्तयो मथुराजनपदस्य परखमग्रामे, पाटलिपुत्रे च प्राप्यन्ते । कस्याश्चिद् यक्षिण्या मूर्तिः दीदारगंजे प्राप्यते । सर्वा यक्षमूर्तयोऽतिशयविशालाः सन्ति । भावाभिव्यञ्जनस्य प्रायोऽभाव एव तासु मूर्तिषु प्रकटति । बुद्धस्य बोधिसत्त्वानां च परवर्तिमूर्तयो यक्षशैलीमेवानुसृत्य कृताः ।

परवर्तियुगे ख्रीष्टाब्दतो द्विशतकं प्रागेव भरहुत-साँची-स्तूपानां प्राकार-वेदिकादिषु तोरणेषु चासंख्यलघुमूर्तयो निर्मिताः । एतासु तदानीन्तनसामाजिकजीवनस्य दृश्यमुत्कीर्णम् । तथा हि—मनोरञ्जन-समाजोत्सव-युद्ध-हास्यादीनां निदर्शनं कृतम्, जातककथा उत्कीर्णाश्च ।अलङ्करणार्थं पशुपक्षिवृक्षलतादीनां मूर्तीनां देवप्रतिमानां च दृश्यं वर्तते। भरहुतस्य तक्षणे वटवृक्षस्य शरणे कस्यचिदृषेरध्यापनस्य दृश्यमुत्कीर्णम् । ऋषिरयं वेदपाठं सस्वरं कारयतीति स्वराणामङ्गुलिनिर्देशेन ज्ञायते। ब्रह्मचारिणां जटा मुखमुद्रा वेशविन्यासश्च याथार्थ्येनोत्कीर्णाः । अस्य दृश्यस्याधोभागे—दीघतपसि सिसे अनुसासति—इति लिखितम् । मानवमूर्तिषु विशेषमेवाङ्गिकसौष्ठवं साँचीमूर्तिषु दृश्यते । क्वचित् श्रीलक्ष्मीगजलक्ष्मीमातृदेवीनां च मूर्तयः कारिताः ।

साँची-भरहुत-बोधगयादीनां प्राचीनमूर्तिपटलेषु बुद्धचरितप्रकरणेऽपि बुद्धस्य मूर्तिर्न कारिता । तद्यथा बुद्धजन्मदृश्ये बुद्धस्य माता वर्तते, किन्तु बुद्धस्तत्र नास्ति । गृहत्यागदृश्ये अश्वस्तु वृक्षस्याधस्तिष्ठति । देवा अश्वस्य चरणानवलम्बन्ते, तत्रापि बुद्धो न वर्तते। धर्मचक्रप्रवर्तनदृश्ये गौतमस्याभिव्यक्ती रिक्तासनेन धर्मचक्रेण च भवति । एषु दृश्येषु गौतमाभावेऽपि तत्रत्यसन्निवेशस्तस्य व्यक्तित्वेन परिव्याप्तं निष्पादितम् ।

सातवाहन-मूर्तिकला

कृष्णानद्या उपवर्तिप्रदेशे अमरावतीजगय्यपेतनागार्जुनिकोण्डादिषु स्थानेषु स्तूपानां रचना ख्रीष्टाब्दतः प्राक् प्रायः प्रथमशतके कृता । तेषु स्थानेषु प्रस्तरपट्टेषु या मूर्तयो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वर्तन्ते ताः सर्वा अमरावतीकलाकेन्द्रे परिगणिताः । अमरावत्यां साँचीभरहुतादिस्थानेभ्यः सुशोभनतरा भावाभिव्यक्तिमयी सौष्ठवपूर्णा च मूर्तिकला विकसिता । लतावृक्षाणां विशेषतः कमलषण्डानां तक्षणमतिशयमनोरमं प्रतिभासते । क्वचिद् बुद्धस्यापि साक्षात् मूर्तिः वर्तते, किन्तु स प्रायः प्रतीकैरेवाभिव्यक्तः । नागार्जुनिकोण्डे गौतमस्य गृहपरित्यागस्य तक्षणं तस्य युगस्यानुपमा रचना प्रतिभाति । सातवाहनकलायाः प्रभावो गुप्तकलाया उपरि प्रकटति ।

खीष्टाब्दतः प्राक् प्रथमशतकस्य मुद्रा अहिच्छत्रायां प्राप्ताः । तासु मुद्रासु विष्णोः, सूर्यस्य, इन्द्रस्य, पृथिव्याः, फल्गुन्याः, प्रजापतेश्चाकृतयः सन्ति । अस्मिन् युगे विष्णोर्मूर्तीनां विशेषमाहात्म्यमासीत् । विदिशाया गरुडध्वजस्य स्तम्भोऽस्य युगस्य कलात्मकप्रवृत्तीनां स्मारक एवाधुनाऽपि भृशं राजते ।

आन्ध्रवंशिनो राजानो मूर्तिकलाया अभ्युदयाय प्रयत्नशीला बभूवुः । कार्ले-कन्हेरी-भाजादिषु स्थानेषु तेषां शासनकाले गुहा निर्मिताः । तासु गुहासु बहुविधानां मूर्तीनामलङ्करणार्थं प्रतिष्ठा कृता । तद्यथा—चैत्यगृहाणां द्वारेषु स्त्रीपुरुषाणां विशाला मूर्तयो वर्तन्ते । कार्लेचैत्यस्यान्तरभित्तिषु हस्तिनां पूर्णाकारा मूर्तयो रचिताः । हस्तिनामुपरि नृत्यपरायणानां दम्पतीनां कलात्मकं तक्षणं विद्यते । चैत्यानां स्तम्भेषु जानुभ्यां प्रणतानां हस्त्यश्वव्याघ्रचित्रकादीनां मूतर्यो रचिताः । क्वचित्तपस्विनां मूर्तयः कारिताः ।

पाण्डुलेनगुहासु अष्टभुजस्तम्भानामुपरि हस्तिवृषभाश्वादीनां मूर्तयः, कन्हेरीगुहासु सिंहस्तम्भौ, भाजागुहासु देवयात्रादृश्यतक्षणं बेडसागुहासु स्तम्भानामुपरि हस्त्यश्वादीनां मूर्तयः सुप्रसिद्धाः ।

कुशनमूर्तिकला

खीष्टाब्दस्यारम्भिकयुगादेव ब्राह्मणजैनबौद्धादिसंस्कृतीनामुन्नायकानां देवानां मनुष्याणां च मूर्तयो बहुशः प्राप्यन्ते । तासु मूर्तिषु बहुविधशोभनदृश्यानां तक्षणमलङ्करणार्थं दृश्यते । अस्याः कलायाः प्रथमो विकासः पश्चिमोत्तरभारते गान्धारकेन्द्रात् तक्षशिलाकेन्द्रात् तथा उत्तरभारते मथुराकेन्द्रादभवत् ।

गान्धारकलाकेन्द्रम्

तस्मिन्युगे गान्धारप्रदेशे राजकीयसंस्कृतिर्वैदेशिकी ग्रीका वाऽभवत् । तस्मात्कालादारभ्य षट्शतपर्यन्तं अफगानिस्ताने भारतस्य पश्चिमोत्तरप्रान्ते च गान्धारकलायाः प्रसारो बभूव ।

गान्धारकलाया वैशिष्ट्यं मूर्तिषु शारीरिकसौष्ठवमासीत् । तत्राध्यात्मिकभावानां व्यञ्जना सापेक्षतो न्यूनैव । गान्धारे वस्तूनां यथार्थं नयनाभिरामं च स्वरूपं मूर्तिकाराणां लक्ष्यमासीत् । भारतीयमूर्तयस्तु कलाकाराणां प्रतिभाया अभिनवोन्मेषस्य प्रदर्शनाय

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भवन्ति । मूर्तौ याथार्थ्याद् अधिकतरं महिमशालिनी भावानां रसानां चाभिव्यक्तिर्भवति । भारतीया मूर्तिशैली व्यङ्ग्यमुखी वर्तते ।

गान्धारकलाकेन्द्रे प्रथमं ग्रीकमूर्तिकारैर्गौतमबुद्धस्य मूर्तयो रचिताः । प्रस्तरफलकेषु गौतमबुद्धस्य बोधिसत्त्वानां च चरितानि उत्कीर्णानि । तत्र बुद्धस्य श्मश्रु वैदेशिकवेश-विन्यासश्च प्रदर्शिते ।

मथुराकलाकेन्द्रम्

भारतीयमूर्तिशैल्या विकास उत्तरभारते मथुराकेन्द्रादभवत् । मथुरायामपि गौतमस्य बोधिसत्त्वानां मूर्तयो निर्मिताः । ता मूर्तयो गौतमबुद्धस्य व्यक्तित्वानुरूपा भव्या ध्याना-वस्थितमुद्राभिव्यञ्जकाश्च वर्तन्ते । प्रायशो मूर्तयः पूजार्थं रचिताः अतस्ताभिर्मूर्त्तिभि-स्तदानीन्तनसमाजस्य भक्तिभावनाया अभिव्यक्तिर्भवति, अनेन प्रकारेण मूर्तिकलायाः भक्तिस्रोतसि परिशोधनं निष्पन्नम् ।

बुद्धस्य मूर्तिषु महापुरुषलक्षणानि—उष्णीषोर्णालम्बकर्णपाशजालाङ्गुलिहस्तचक्रादीनि विभावितानि ।

मथुराकेन्द्रस्य प्रभावः समग्रोत्तरभारते परिव्याप्नोत् । मथुरायां विनिर्मिता मूर्तयो बहुश आदर्शरूपेण गृहीताः सुदूरस्थानेषु नीत्वा ता मूर्तयस्तत्र स्थापिताः । अधुनापि मथुरा-निर्मितमूर्तयः सारनाथ-कौशाम्बी-श्रावस्ती-साँचीषु वर्तन्ते । तासां मूर्तीनामादर्शमनुकृत्य तेषु स्थानेषु बहवो मूर्तयो रचिताः । सारनाथस्य मथुरा-मूर्त्तिस्तु रक्तप्रस्तरेण निर्मिता । अस्यां मूर्तौ बुद्धस्य वेशविन्यासस्य रेखाङ्कनं कृतम् । बुद्धस्य शिरसः पश्चभागे प्रभामण्डल-द्योतकं प्रस्तरफलकं वर्तते ।

सारनाथकलाकेन्द्रम्

मथुराकलाकेन्द्रस्य मूर्तिषु आङ्गिकविन्यासे सपाटतावर्त्तत । सारनाथकेन्द्रस्य तदानी-न्तनमूर्तिषु अङ्गानां गोलत्वं कोमलता कमनीयता च प्रदर्शितानि । मूर्तिषु हस्तपादयोर्मानं यथार्थं कृतम् । मूर्तिषु वस्त्रतक्षणं पिनद्धविधिना कृतम् । अनेन प्रकारेणाङ्गिकसौष्ठवं प्रत्यक्षमेव भवति । गौतमस्य मूर्तिस्त्रिचीवरैः परिवृता वर्तते ।

बोधिसत्त्वानां वेशविन्यासो गृहस्थानामिव विभाव्यते । क्वचित् जातक-कथानामपि तक्षणं कृतम् । क्षान्तिवादजातकस्य तक्षणं सुमनोहरमेव । गौतमबुद्धस्य जीवनचर्याया अष्ट प्रमुखवृत्तान्ताः सारनाथकलाया वैशिष्ट्यमेव ।[1]

---

१. अष्टवृत्तान्ताः—जन्म मारप्रलोभनं धर्मचक्रप्रवर्तनं, महापरिनिर्वाणं स्वर्गावतरणं पारिलेय्यके वानरेण गौतमस्य पारणाविधानं नाडागिरिहस्तिनो विनयनमेकस्मिन्क्षणे विभिन्नस्थानेषु धर्मोपदेशश्च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सारनाथकलाकेन्द्रस्य विकासोन्मुखप्रवृत्तिः सप्तमशताब्दपर्यन्ता प्राचरत्। पश्चात् तत्रापि कलाशैली स्थिराभवत्।

गुप्तयुगस्य मूर्तिकला

कुशनयुगस्य मूर्तिषु विशालता स्थूलता च प्रभावोत्पत्तये बभूवतुः। गुप्तयुगे सौन्दर्य-सर्जनाय तनुता, सूक्ष्मता, मधुरता च मूर्तिषु सविशेषं विभाव्यन्ते। मूर्तयस्तु रमणीया सरसाश्च प्रतिभान्ति। अस्य युगस्याराध्यदेवाः—तीर्थङ्कराः, बुद्धः, बोधिसत्त्वाः, शिवः, विष्णुश्च बभूवुः। तेषामुच्चत्वानुरूपा मूर्तिकला प्रावर्तत।

चतुर्थशतके उत्तरभारते मथुराकलाकेन्द्रानुरूपं मूर्तयः कसिया-बोधगया-सारनाथा-दिषु स्थानेषु निर्मिताः। अस्य युगस्य सर्वप्रथममूर्तिर्बोधगयायां बोधिसत्त्वस्य प्रतिमा वर्तते। अपरं च त्रिनेत्रशिवस्य कतिपयमूर्तयस्तदानीन्तन्यस्सन्ति। एतासु मूर्तिषु आङ्गिकविन्यासः सुसंयतः सौष्ठवपूर्णश्च निष्पादितः।

सारनाथकलाकेन्द्रम्

सारनाथकलाकेन्द्रस्य मूर्तयो बुद्धस्य बोधिसत्त्वानां कार्तिकेयादिपौराणिकदेवानां च वर्तन्ते। एतासु सर्वासु मूर्तिषु मनोभावानामाध्यात्मिकवृत्तीनां चाभिव्यक्तये नेत्रहस्तपाद-शिरसां मुद्राः विभाविताः। एवमन्तरबाह्ययोरेकरूपतायाः प्रदर्शनं प्रभावमुत्पादयति।

सारनाथस्य धर्मचक्रप्रवर्तकस्य गौतमस्य मूर्तिरस्य वैशिष्टचस्य प्रतिनिधिभूतैव वर्तते। अस्यां मूर्तौ गौतमो ध्यानावस्थितः आसने उपविष्टः। तस्य हस्तौ अभयस्य शान्तेश्च व्यंजनां कुर्वन्तौ एव नाभिप्रदेशादुपरि स्थितौ। तस्य पादौ पद्मासनमुद्रायां वर्तेते। पार्श्वभागे गौतमस्य प्रथमपंचशिष्याः सन्ति। तेषां समक्षं धर्मचक्रप्रवर्तनं क्रियते। सारनाथकलाकेन्द्रस्य प्रभावः सारनाथसंग्रहालयस्य लोकेश्वरशिवस्य मूर्तौ, नागोदजनपदस्य खोहस्थानस्यैकमुख-लिङ्गमूर्तौ, वेसनगरस्य मकरवाहिन्या गङ्गाया मूर्तौ, भूमरायां महिषमर्दिन्या दुर्गायाः शिवस्य च मूर्तौ, देवगढ़स्यानन्तशायिने विष्णोर्मूर्तौ च समाज्ञातः।

वेत्रवतीनद्यास्तटे झाँसीजनपदे गुप्तयुगस्य दशावतारदेवालयस्य द्वारतोरणे लतापत्रा-दीनामलङ्करणस्य, पार्श्वस्तम्भयोः प्रतिहारिणां प्रमथदम्पतीनां मङ्गलकलशादीनां च तक्षणं मनोरममेव। स्तम्भेषु गङ्गा-यमुनयोस्तक्षणं तस्मात्कालादेव विशेषरूपेण प्रचलितम्। मंदिर-भित्तीनां बाह्यतलानामुपरि नरनारायणयोस्तपसः, शेषनागस्योपरि विष्णोः शयनस्य, गजे-न्द्रोद्धारस्य च मनोरमदृश्यानि तष्टानि। देवगढस्य देवक्या वसुदेवाय शिशुसमर्पणम-द्वितीयमेव कृष्णजन्मनः तक्षणं प्रस्तौति। तत्रत्यासु सर्वासु मूर्तिषु आध्यात्मिकता, आङ्गि-कचारुता, भावाभिव्यक्तिश्च लोकोत्तरा एव।

ख्रीष्टाब्दस्य पञ्चमे शतके विदिशापार्श्वे उदयगिरेः पञ्चमगुहायां वराहेण पृथिव्या उद्धरणमुत्कीर्णम्। अतुपमेया तस्य युगस्येयं कलाकृतिरिति निःसंशयमेवोद्घोषितम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अस्मिन् दृश्ये वराहस्य शरीरं मानवसमानं शिवस्तु शूकरवद्विद्यते । वराहस्य वामपादः शेषनागस्य मण्डलेषु स्थितः । वराहस्याङ्गिकविन्यासैस्तस्य स्फूर्तिः कर्मण्यता बलशालिताश्च प्रकटिताः । वराहः स्वदक्षिणदंष्ट्रया नारीरूपिणीं पृथिवीम् उन्नयति । समुद्रस्याभिव्यक्तिर्गुहाया भित्तितले उर्मिमयतरंगितरेखाभिः कृता । वराहस्य वामपार्श्वेऽप्सरसो दक्षिणे चतस्रो देवश्रेणयः—ब्रह्मशिवादयो वर्तन्ते । असुरा ऋषयश्च दर्शका एव तष्टाः । अन्यतो गंगाया यमुनायाश्चावतरणदृश्यमुत्कीर्णम् । नद्यौ वराहस्याभिषेकार्थं कलशहस्ते वर्तते । वरुणदेवोऽपि कलशहस्तो जानुदघ्ने जले तिष्ठति । अनेन मूर्तिदर्शनेन लोककल्याणस्य भावना सञ्जायते । सर्वत्र समरसतायाः सहानुभूतेश्चाभिव्यक्तिर्भवति ।

प्राच्यमूर्तिकला

प्राच्यप्रदेशानां वङ्गादीनां मूर्तिभिराध्यात्मिकभावानामभिव्यक्तिः सम्यक् कृता । तत्र मूर्तीनां स्वरूपं सरसं प्रदर्शितम् । मूर्तीनां विशालत्वं सुविशिष्टमेव प्रतिभाति ।[1] नालन्दायाः सुल्तानगंजस्य च मूर्तयो मथुरा-कलाकेन्द्रस्य परिधाने न्युषिताः प्रदर्शिताः । दहपर्वतिकायां प्राप्तानां गङ्गा-यमुनयोर्मूर्तीनां परिधानं सारनाथस्य कलाकेन्द्रमनुकरोति ।

दाक्षिणात्यमूर्तिकला

गुप्तयुगस्य षष्ठशतके एहोलस्थानस्य शिलाफलकेषु अनन्तविष्णुप्रमुखाणां देवानां मूर्तिषु आङ्गिकसौष्ठवं सन्तुलनं प्रशान्तत्वं च व्यक्तान्येव, किन्तु तत्राध्यात्मिकताया अभिव्यक्तिः प्रायो नैव विद्यते । अङ्गेषु सुकुमारता विनिविष्टा वर्तते । तदानीन्तनीषु कन्हेरी-अजन्तादीनां मूर्तिषु रसभावादीनामभिव्यक्तिर्न भवति । मूर्तिषु बलशालिता प्रधानत्वेन प्रतिभाति, किन्तु तस्याः कोऽपि प्रासङ्गिकगुणो न लक्ष्यते ।

दक्षिणभारते षष्ठशतके बादामी-पारेलादिषु स्थानेषु पूर्ववर्तिनां कार्लीभाजादीनां मूर्तीनां कलाया विकासः परिलक्ष्यते । पारेले शिलापट्टेषु विशालमूर्तीनां तक्षणं कृतम् । मूर्तयो ध्यानमुद्रासु सन्निविष्टाः । ताभ्यो मूर्तिभ्य ओजस्वितायाः समाधेश्च व्यञ्जनं स्पष्टमेव भवति । बादामीगुहासु पारेलवत् मूर्तिभिः शारीरिकसंस्थानं शक्तिर्गरिमा च व्यज्यन्ते । तस्य युगस्य कार्यपरायणता मूर्तिषु विभाव्यते ।

गुप्तयुगस्य मूर्तिकलाया विकासः ख्रीष्टाब्दस्य सप्तमशतकपर्यन्तमेवाभवत् । तस्मात् कालादारभ्य गुप्तकालोचितप्रतिभाया ह्रासः समारब्धः । उत्तरे भारते सारनाथे नालंदायां च मूर्तीनां निर्माणं पूर्ववत् प्रावर्तत । एताभिर्नवीनमूर्तिभिर्जीवनस्य क्रियात्मकशक्तीनामभिव्यक्तिर्न भवति । तासु मूर्तिषु कलात्मकस्पन्दनस्याभावो वर्तते । गुप्तकलाया ह्रासोन्मुखप्रवृत्तीनामाभासः साधारणतः सर्वासु मूर्तिषु प्रत्यक्ष एव । किन्तु तत्रापि क्वचित् कतिपय-

---

१. ईदृश्यो मूर्तयो नालन्दायां सुल्तानगंजे च प्राप्यन्ते । ह्वेनसाङ्गानुसारं नालन्दायां बुद्धस्य २५३ हस्तोच्छ्रायोपेतावर्तत । सल्तानगंजे प्राप्ता मूर्तिः पंचहस्तोच्छ्रायोपेतास्ति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विशिष्टमूर्तयो निर्मिताः सन्ति, याभिर्गुप्तमूर्तिकलाया उत्कृष्टत्वं प्रतिभासते । तद्यथा पहाड़पुरस्य कृष्णलीलाया मूर्तयः सन्ति । अस्यां मूर्तौ राधाकृष्णयोः प्रेमालापः, धेनुकवधश्च रमणीयौ । मालवप्रदेशस्य साँचीस्थानस्यावलोकितेश्वरमूर्तिः सौन्दर्यविशिष्टा वर्तते । दक्षिणभारते ह्रासयुगस्य मूर्तिकलाकेन्द्राणि—एलौरा (वेरूल)—पट्टडकल-औरङ्गाबाद-घारापुरी (एलिफैण्टा) स्थानेषु बभूवुः ।

एलौरास्थानस्य पूर्णाकारमूर्तयोऽतिशयमनोहारिण्य एव । तद्यथा—पार्वतीपरमेश्वराभ्यामध्यासितं कैलासं रावणः दोलायमानं करोतीति दृश्यस्य तक्षणमनुत्तममेवोद्घोषितं कलासमीक्षकैः ।

पल्लवकलाकेन्द्रस्योपर्युक्तयुगस्य मूर्तयः पट्टडकल-महाबलिपुर-काञ्चीपुरादिषु स्थानेषु वर्तन्ते । अस्य केन्द्रस्य वैशिष्ट्यमाङ्गिकतनुता सुकुमारता चास्ति । भावाभिव्यक्तिश्च मूर्तिषु दृश्यन्ते । पट्टडकलस्य विरूपाक्षमन्दिरस्य दार्शनिकाभिव्यक्तिरनुपमैव वर्तते । विरूपाक्षमूर्त्या मानवतायै विश्वात्मकदिव्यतायाः सन्देशः प्रभवति । शिवमन्दिरस्य समक्षं ब्रह्मणो मूर्तिः वर्तते । तस्याः समीपं शिववाहनस्य नन्दिनो मूर्तिरस्ति ।

भारतीयमूर्तिषु ओजस्वितायाः विशालतायाः अध्यवसायितायाश्चाभिव्यक्तेः सर्वोच्चविकास एलिफैण्टा-मूर्तिषु विभाव्यते । तत्रत्यकतिपयमूर्तिषु तपःसमुद्भूतानां शक्तीनां प्रत्यक्षीकरणं भवति । शिवस्य त्रिमूर्तिः, ताण्डवनृत्यमूर्तिः, पार्वतीपरिणयमूर्तिश्च परममनोहारिण्यः प्रभावशालिन्यश्च प्रतिभासन्ते । तत्र मूर्तिकलायाः सोत्कर्षविलासः प्रकटति ।

खीष्टाब्दस्य सप्तमशतके पल्लवकलाकेन्द्रान्तर्गतमहाबलिपुरस्य मूर्तिकला समग्रभारतस्य मूर्तिकलायाः प्रतिनिधिभूता विलसति । कलायाः पूर्ववर्तिनीनां सर्वासामनुभूतीनां प्रेरणानां च समाहारस्तत्रैव विभाव्यते । गङ्गावतरणस्य दृश्यं प्राकृतिकरमणीयताया मध्ये तत्रातिशयं प्रभावोत्पादकमेव । स्वर्गस्य मर्त्यलोकस्य चासंख्यानां लौकिकानां च मनोरमवस्तूनां सङ्ग्रहणं मूर्तिरूपेण तत्र कृतम् । गङ्गायास्तटीदृश्यानि विशेषरमणीयानि तथा नैसर्गिकच्छटासम्पन्नानि प्रतिभान्ति । पशूनां मूर्तयः सजीवा एव । गङ्गावतरणस्य दृश्यमिदं ६५ × २८ वर्गहस्तविस्तृतशिलापट्टके तष्टम् । तपस्विनो भगीरथस्य शरीरं तपसा कार्श्यप्रपन्नमेव । भगीरथेन सह सहानुभूतौ देवाः पशवोऽपि तपसि संलग्ना दर्शिताः । इदं दृश्यं मानवहृदयं तपोमयसाधनायै सहसा प्रोत्साहितं करोति । समन्ततः औदार्यमेव प्रवर्तते ।

महाबलिपुरे उपसमुद्रं पर्वतं तष्ट्वा सप्तमन्दिराणि निर्मितानि । तत्र महिषमण्डपे शेषशायिनो विष्णोर्मूर्त्तिर्वर्तते । पार्श्वे एव महिषासुरेण सह युध्यमानाया दुर्गाया मूर्तिर्वर्तते । कृष्णगुहायां कृष्णस्य गोवर्धनधारणं गोदोहनं च प्रदर्शितम् । अष्टमशतकस्य काञ्चीपुरस्य कैलाशनाथमन्दिरस्य मूर्तयो महाबलिपुरानुरूपा एव ।

परवर्तियुगे खीष्टाब्दस्य नवमशतकादारभ्य भारतीयमूर्तिकलायाः कोऽपि विशिष्ट-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विकासो न गोचरीभवति, यद्यपि प्रायः सदैव सर्वत्र च मूर्तीनां निर्माणमभवत् । मूर्तिनिर्माणस्य षट् प्रधानकेन्द्राणि बभूवुः--उत्कलप्रदेशे (पुरी, भुवनेश्वरः, कोणार्कश्च), बङ्ग-विहारे, बुन्देलखण्डे (खजुराहो), मालवप्रदेशे, गुर्जर-राजस्थानयोः, तामिलप्रदेशे च ।

उत्कलकेन्द्रम्

भुवनेश्वरस्य लिंगराजमन्दिरस्य निर्माणं खीष्टाब्दतो दशमे शतकेऽभवत् । मन्दिरभित्तीनां बाह्यतलेषु पशुपक्षिणां मानवानां च भव्या मूर्तयो निर्मिताः । तत्र हस्त्यश्वहरिणसिंहादयः पूर्णाकाराः क्वचित् सजीवा एव निर्मिताः । मूर्तीनां पार्श्वभूमिर्लतापत्रादीनामलङ्करणैः शोभते । गौरीविमाने पार्वत्या मूर्तिः विविधाभरणैरलंकृता वर्तते । अन्यत्र रामायण-महाभारतादीनां कथादृश्यानि तष्टानि । पाण्डवानां स्वर्गारोहणदृश्यं मनोरमं भाति । जगन्नाथमन्दिरे जगन्नाथस्य कृष्णस्य सुभद्रायाः बलरामस्य च मूर्तयः प्रतिष्ठिताः । तत्रैव रामकृष्णयोश्चरितावली--कालियदमनं गोवर्धनधारणं गोपालनं रामरावणयुद्धं च मूर्तिभिः प्रदर्शिता । भित्तीनामालयेषु वामन-वराह-नृसिंहादीनामवताराणां मूर्तयः प्रतिष्ठिताः । कोणार्कमन्दिरस्य गर्भगृहस्य निम्नभागे हस्तिनां लघुमूर्तयो निर्मिताः । अस्मिन् मन्दिरे प्रधानतोऽर्कस्य (सूर्यस्य) मूर्तिः स्थापिता । मन्दिरस्य निर्माणं चतुर्विंशतिचक्रवतः रथस्योपरि कृता । चक्रेषु सर्वत्र मूर्तीनां लतापत्रादीनां चालङ्करणं विद्यते ।

उपर्युक्तेषु सर्वेषु मन्दिरेषु शृङ्गाराभिनिविष्टानां मूर्तीनामाधिक्यं वर्तते । तत् सर्वमश्लीलमेव ।

बुन्देलखण्डकेन्द्रम्

'खजुराहो'–नामके ग्रामे हिन्दूनां जैनानां च बहूनि मन्दिराणि वर्तन्ते । तत्र कण्डरियामहादेवस्य मन्दिरे निर्मितानां मूर्तीनां कलासौन्दर्यं श्रेष्ठमेव । मन्दिरस्य गर्भगृहे, अन्तराले, महामण्डपे, मण्डपे, अर्धमण्डपे च प्रायः सर्वत्र बाह्यभागे अन्तरभागे वा मूर्तितक्षणकर्म सुशोभनं प्रतिभासते । नात्र किमपि स्थानं तत्रेदृशममूर्तं विद्यते यत्र मूर्त्तिरचना सम्भवेत् । प्रवेशस्थाने कामशास्त्रसम्बद्धानां मूर्तीनां करणं सर्वत्र कामस्य प्रभावं व्यञ्जयति । अस्मात् कामस्थानादुपरि गत्वैव देवदर्शनं दिव्यजीवनं वा प्रत्यक्षं भवति । प्रवेशद्वारस्य तोरणे देवतानां गन्धर्वकिन्नराणां तक्षणं विद्यते । गर्भगृहस्य प्रवेशद्वारे ध्यानावस्थितानां मुनीनां योगिनां च मूतर्यः निवेशिताः । पार्श्वस्तम्भेषु गङ्गायमुनयोर्दर्शनं भवति । स्तम्भानामालयेषु त्रिदेवानां तेषामवताराणां च मूर्तयो वर्तन्ते । क्वचिदप्सरसां किन्नरादीनां नृत्यं प्रदर्शितम् । लक्ष्मणमन्दिरस्यैकस्मिन् तक्षणे आचार्यकुलस्य स्वरूपं तष्टम् । तत्राचार्यं परितः ब्रह्मचारिणो जिज्ञासुमुद्रायामुपविष्टाः, विष्णोस्त्रिमुखचतुर्भुजमूर्तिः निहिता च । अस्य मन्दिरस्य द्वारस्थले समुद्रमन्थनमुत्कीर्णम् । मतङ्गेश्वरमन्दिरस्य समक्षं वराहस्य दंष्ट्रया पृथ्वी समुत्तोलिता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

खजुराहोकलाया मूर्तिकलावैचित्र्यमेकया मूर्त्या द्विभावानां प्रदर्शनेन प्रकटति। क्वचित् मल्लयुद्धस्यान्यत्र मिथुनानामालिङ्गनस्य दृश्यमपूर्वमेव कालान्तरस्य द्विभावानां प्रदर्शनेन सम्भवतः।

राजस्थानकेन्द्रम्

आबूपर्वते खीष्टाब्दतः क्रमश एकादशे त्रयोदशे च शतके विमलशाहेन तेजपालेन च निर्मापिते मन्दिरे तदानीन्तनमूर्तिकलाया भव्य आदर्शः सम्पुटितः। मन्दिरयोः प्रधानतः आदिनाथस्य मूर्तिः स्थापिता। प्रवेशद्वारस्य समीपं दशगजेन्द्राणां मर्मरोत्पलमूर्तयो निर्मिताः। अन्तःपटलेऽपि मनोरमा मानवमूर्तयो निर्मिताः। स्तम्भानामलङ्करणं नरनारीणां मूर्तिभिः कृतम्। मण्डपं परितः द्विपञ्चाशत्कोष्ठेषु जैनदेवानां मूर्तयः निवेशिताः। तीर्थङ्कराणां मूर्तिभिः शान्तिरसो विरागश्च व्यज्येते।

गुर्जरप्रदेशे सोमनाथमन्दिरे शिवादीनां देवानां मूर्तयः सन्ति। एतेषां मूर्तीनां प्रायः ध्वंस एव विधर्मिभिः कृतः। प्राचीनयुगस्य कतिपयावशेषा अधुनापि अवशिष्टाः। तेषु रामायणकथाया दृश्यानि मनोरमाणि वर्तन्ते।

तामिलकेन्द्रम्

दक्षिणभारते राजकीयाश्रयेऽसंख्यानां मन्दिराणां निर्माणमभवत्। तत्र मैसूरराज्ये हलवीदस्य (दोरसमुद्रस्य) मन्दिरं द्वादशे शतके रचितम्। अस्य मन्दिरस्य क्रमशः उपर्युपरि शिलापट्टकेषु २००० हस्तिनां सिंहानामश्ववाराणां पत्रपुष्पलतादीनां च तक्षणं दर्शनीयमेव। उपरिभागे ४६० हस्तायामपट्टके रामस्य लङ्काविजयस्य दृश्यं तष्टम्। सर्वोच्चे भागे स्वर्गस्य पशुपक्षिणां मानवजीवनसम्बन्धिनां दृश्यानि रचितानि। इमानि सर्वाणि दृश्यानि प्रस्तरफलकेषु महाकाव्यवत् प्रतिभासन्ते।

दक्षिणभारते चिदम्बरस्य नटराजमन्दिरं मूर्तिकलायाः प्रथमादर्श एव। तत्र नृत्यमयीनां मूर्तीनां प्राचुर्यं वर्तते। तासां दर्शने निमग्नो रसिकः स्वयमेव शिवनर्तनलीलायां विलीनो भवति। नटराजमन्दिरस्य चतुःषु गोपुरेषु, ततः गर्भगृहपर्यन्तभित्तिषु च नाट्यशास्त्रानुरूपाणां नृत्यभावानां तक्षणं विद्यते। तद्यथा नाट्यशास्त्रस्य ताण्डवलक्षणप्रकरणस्य १०८ करणानां प्रदर्शनं गोपुरे कृतम्। नाट्यशास्त्रस्यानुषङ्गिकश्लोका अपि तत्र उत्कीर्णाः। गोपुराणां निर्माणं चोलवंशीयैः पल्लववंशीयै राजभिः कृतम्।

मृण्मयमूर्तयः

सिन्धुसभ्यतायाः मृण्मयमूर्तयोऽन्योपादानकृतमूर्तिभ्योऽधिकतरा एव। तत्र मृत्तिकायाः सुलभत्वं रूपनिर्माणक्षमत्वं च कारणं प्रतिभाति। मूर्तिकलाया अभ्यासार्थं प्रारम्भे मृण्मयमूर्तीनां रचना कृतेति निश्चितमेव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिन्धुसभ्यताया मृण्मयमूर्तिषु क्रीडनकानां बाहुल्यं वर्तते। तत्र मनुष्याणां देवतानां पशुपक्षिणां फलानां च मूर्तयो वर्तन्ते। नर्तकीनामपि कतिपयमूर्तयः सन्ति। मूर्तिषु वस्त्र-विन्यासोऽलङ्करणं च कृते। साधारणतः क्रीडनकानां रञ्जनमग्नौ पाकात् प्रागेव कृतम्। पाकात् पश्चादपि रञ्जनं कृतम्।

सिन्धुसभ्यतायाः पश्चात् २००० वर्षपर्यन्तं मूर्तिकलाया विकासः कथमभवदिति नाधुनापि सुविनिश्चितम्। अतः परं प्रथमं मौर्ययुगस्य मूर्तयः प्राप्यन्ते। तत्र कतिपय-नारीमूर्तयः सिन्धुपरम्पराया अनुकरणमेव द्योतयन्ति। ख्रीष्टाब्दतः प्राक् द्वितीयशत-कादारभ्य मृण्मयमूर्तीनां निर्माणस्य परम्परा सदैव प्रचलिता। ततो मथुराहिच्छत्रा-कोसम-पटनादिषु स्थानेषु साँचीपरम्पराया बहवो मूर्तयो विद्यन्ते। एषु स्थानेषु प्रधानतो लोकव्यवहारेषु मनोरञ्जन-प्रसाधनादिकर्मसु व्यापृतानां नरनारीणां मूर्तयः प्रायो रचिताः। प्रयागस्य समीपं कोसमस्थानस्य शृङ्गारमयदम्पत्योर्मूर्तिर्भावाभिव्यञ्जिका मनोरमा चास्ति। श्रीदेव्या मूर्तेः सौष्ठवमलङ्करणं च प्रभावोत्पादकमेव। अस्य युगस्य पटना-स्थानस्य हास्यप्रवणानां बालकानां मूर्तयो बहुसंख्यका एव।

कुशनयुगस्य मूर्तयोऽहिच्छत्रायां विद्यन्ते। न ता मूर्तयः कलाप्रमाणेन श्रेष्ठाः।

गुप्तकालस्य मृण्मयमूर्तीनां कला समुन्नता प्रतिभासते। मृण्मयेष्टकासु तत्र मूर्तीनाम-भिनिवेशो वर्तते। भवनानां निर्माणं ताभिरिष्टकाभिः कृतम्। ईदृशानि मन्दिराणि कानपुरप्रदेशे भीतरग्रामे रायपुरप्रदेशे सिरपुरग्रामे च वर्तन्ते। इष्टकानां परिधिषु संल-ग्नानां पत्रपुष्पादीनामलङ्करणं मनोरमं विभाव्यते।

मूर्तीनां लोकोपयोगिता

मूर्तीनां प्रथमोपयोगः सिन्धुसभ्यतायां धार्मिकविधानेषु परिचीयते। सर्वोच्चमूर्तिकला तत्र धर्मप्रवणासु मूर्तिषु विकसितेति निश्चितमेव। अपरं च मूर्तीनामुपयोगः प्रदर्शनार्थं मनोरञ्जनार्थं बालकानां क्रीडनार्थं चाभवत्। कलाभिव्यक्तिर्नर्तकीनां सुन्दरीणां वा मूर्तिषु सविशेषमभवत्।

वैदिकयुगेऽभिचारार्थं कृत्यादीनां नायकनायिकादीनां च मूर्तयः प्रायुज्यन्त। प्रवासे मृतानामग्निहोत्रिणामग्निहोत्रविधाने मानवाकृतिः रचिता।[1] अग्निवेदिकानिर्माणे प्रजापतेः पुरुषरूपा स्वर्णमूर्तिर्न्यस्ता।[2]

महाभारतानुसारं स्वर्णहस्तिनो दाने प्रदत्ताः।[3] अश्वमेधयज्ञेऽग्निचयनाय गरुडाकृती

१. ऐतरेयब्राह्मणे ७.२.२।

२. शतपथब्राह्मणे ७.४.१.१५।

३. शान्तिपर्वणि २९.७३।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

रचिता ।[१] कात्यायनश्रौतसूत्रानुसारं स्वर्णस्य मृत्तिकाया वा मानवाश्ववृषमेषाजादीनां मूर्तयोऽग्निचयनस्य वेदिकायां न्यस्ताः ।[२] आपस्तम्बश्रौतसूत्रानुसारं याज्ञिकप्रक्रियासु यवेन मेषाणां मूर्तयः कृताः ।[३]

उपर्युक्तैर्मूर्तीनां धार्मिकाभिनिवेशैः स्पष्टं भवति यत् प्राचीनयुगे मूर्तिकला मानवानामुच्चतमजीवनादर्शैः सम्बद्धा बभूव ।

पौराणिकयुगेऽपि पुण्यार्थं देवानां पशुपक्षिणां च मूर्तयो दाने विश्राणिताः । तद्यथा मार्गशीर्षमासस्य तृतीयायां शिवस्य धर्मराजस्य च मूर्तयः, फलानां स्वर्णका राजता वा मूर्तयो ब्राह्मणेभ्यः पुण्यार्थमर्पिताः ।[४] शातातपानुसारं शर्करा-तिलघृतादिभिः निर्मिता गावो ब्राह्मणेभ्यो निसृष्टाः ।[५] मरणकाले राजानो मानवानां स्वर्णमूर्तीः प्रददुः ।[६]

महाभारतानुसारं मूर्तीनामुपयोगोऽस्त्राभ्यासार्थमपि कृतः । धनुर्विद्यायाः सार्वजनिकप्रदर्शनार्थं वृक्षस्योपरि गृध्रस्य मूर्तिर्न्यस्ता तस्य शिरो लक्ष्यीकृतं तत्र । लोहशूकरा अपि बाणैर्वेधनार्थं समारोपिताः । वीराणां धनुर्विद्यापरीक्षणार्थं मत्स्यादीनां मूर्तेर्नेत्रं लक्ष्यीकृतम् ।

महाभारतकाले युद्धकाले वीराणां ध्वजेषु विविधपशुपक्षिणां वृक्षाणां वा मूर्तयो न्यस्ताः ।[७] धनुष्पीठे सिंहहस्तिसूर्वंशलभादीनां प्रतिमा उत्कीर्णाः ।[८] ग्रीकविदुषां लेखैः प्रमाणितं भवति यत् दिव्यवीराणां मूर्तयो युद्धस्थले सेनायाः पुरतः प्रोत्साहनार्थं समारोपिताः । युद्धेषु वीराणां पराक्रमगाथास्ताम्रपत्रेषूत्कीर्णाः ।[९]

विवाहयोग्यं वरं वधूं वा प्राप्तुं मूर्तिकलाया उपयोगः समृद्धिशालिनः कुर्वन्ति स्मेति जातककथाभिः प्रतिपादितम् । आदर्शवध्वा मूर्तिं रचयित्वा जनास्तस्याः प्रदर्शनं देशे विदेशे च कारयन्ति स्म ।[१०]

मूर्तिकला राष्ट्रस्य चारित्रिक-विकासाय महाराजेनाशोकेनोपयुक्ता । स स्तम्भानां

१, आश्वमेधिकपर्वणि ८८.३२ ।

२. का. १६.१.३२ ।

३. आ. ८.५.३७ ।

४. मत्स्यपुराणे ९६ अध्यायतः ।

५. शातातपस्मृतौ २.३८-३९ ।

६. तत्रैव ३.३३ ।

७. द्रोणपर्वणि १०५ अध्यायतः, भीष्मपर्वणि ४०.५०,४७.८,५४.९८ ।

८. विराटपर्वणि ४२.२-८

९. Mc Crindle : Ancient India P. 112

१०. उदयजातके ४५८, कुशजातके ५३१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिरोभागे सिंहानां प्रतिष्ठां कारयित्वा तेषामुपरि धर्मचक्रस्य विन्यासेन धर्मस्य सर्वोच्चतां प्रमाणितवान् । परवर्तियुगस्य बहुभी राजभिरशोकस्यादर्शः स्वीकृतः ।

राजप्रासादानां स्तम्भेषु स्त्रीणां मूर्तयोऽलङ्करणार्थं निधापिताः । तासां स्त्रीणां कृते स्तनोत्तरीयस्य परिधानं कृतम् ।[1] राजानः पूर्वजानां मूर्तीः तेषां मन्दिरेषु प्रतिष्ठापितवन्तः ।[2] राजप्रासादेषु मूर्तिगृहं तस्मै प्रयोजनाय बभूव ।

बाणानुसारं राजकीयजलाशयेषु स्वर्णेन निर्मिताः कमलिनीमयूरहस्तिमूर्तयः समारोपिताः । कृत्रिमवृक्षा निर्मिताः । राजकुमारीणां विवाहकाले माङ्गलिकालङ्करणार्थं कच्छप-मकर-नारिकेल-कदली-तमालादीनां मूर्तयो रचिताः ।[3] कृत्रिमकमलिनीमध्ये यन्त्रचक्रवाकमिथुनामि संचरन्ति स्म ।[4]

प्रायः सदैव मूर्तिद्वारा देवानां वीराणां महर्षीणां च चरितगाथाः समाजस्य समक्षं प्रस्तुताः । तद्यथा मन्दिराणां विशालशिलासु रामायणमहाभारतपुराणेतिहासादीनां कथा उत्कीर्णाः । इमा उत्कीर्णाः कथाः प्रत्यक्षदर्शनेन सविशेषं प्रभावोत्पाविका बभूवुः । नृत्यकलादीनां शिक्षणस्यायोजनं चिदम्बरमन्दिरभित्तिमूर्तिभिः कृतमिति प्रागेव निगदितम् ।

मुद्रानिर्माणार्थं मूर्तिकलायाः प्रचलनं सिन्धुसभ्यतायुगात् प्रभृति बभूव ।

कतिपयमूर्तयो लोकरञ्जनार्थमाकाशे निराधारं लम्बिताः । तथा हि राजतरङ्गिण्याम्—

एकमूर्ध्वं नयद्रत्नमधः कर्षत् तथापरम् ।
बुद्ध्वा व्यधान्निरालम्बं स्त्रीराज्ये नृहरिं च सः ॥ ४.१८५

मूर्तिकलाया विदेशेषु प्रसारः

भारतीयधर्मैः सह मूर्तिकलायाः प्रसारो विदेशेषु बभूव । तिब्बत-चीन-जापान-इण्डोनेशिया-पूर्वीद्वीपसमूह-कम्बोडिया-ब्रह्मा-लङ्कादिषु देशेषु प्रायशो वैदिकधर्मस्य बौद्धधर्मस्य चानुयायिनः प्राचीनयुगे भारते निर्मिता मूर्तीः प्रतिष्ठापयामासुः, अथवा भारतीयमूर्तिशैलीमनुसृत्य स्वदेशे मूर्तिकेन्द्राणि संचालितवन्तः । खीष्टस्य प्रथमशतके निर्मिताया लक्ष्म्या हस्तिदन्तमूर्तिः पाम्पिआईनगरे प्राप्तेति सुदूरप्राचीनयुगे भारतीयमूर्तीनां विदेशेषु प्रेषणं प्रमाणयति । गौतमबुद्धस्यैका खीष्टस्य षष्ठशतके निर्मिता कांस्यमूर्तिः योरोपमहाद्वीपस्य स्याकहोल्मनगरस्य समीपे कस्मिंश्चिद्द्वीपे सम्प्राप्ता ।[5] विदेशयात्रिणो भारतीयमूर्तीनां संग्रहमपि कर्तव्यममन्यन्त । ते स्वदेशगमनकाले भारतीमूर्तीर्नयन्ति स्म ।

१. रघुवंशे १६.१७
२. H.C. Ray Chaudhary : Political History of India p. 517
३. कादम्बर्यां पृ० २१६,१८४
४. तत्रैव पृ० १८४
५. एतस्याः प्राप्तिः स्वीडनदेशस्य पुरातत्त्व-संस्थायाः विदुषा विल्हेल्महोल्मक्विस्टमहोदयेन कृता ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वास्तुकला

आत्मरक्षार्थं गृहनिर्माणं मानवसंस्कृतेः प्रारम्भात् समभवत् इति सुनिश्चितम्। तद्यथा—पशुपक्षिणोऽपि स्वाभाविकप्रवृत्त्यैव मनोरमं गृहं रचयन्ति। मानवः सुदूरप्राचीनकालेऽपि मनोरमं गृहं प्राकृतिकैरुपादानैः सहजविधिना रचितवान्। स्वभावतो मानवानां गृहा देशकालोपादानादीनां वैविध्याद् विविधप्रकारा बभूवुः। कतिपयपर्वतप्रदेशवासिनः सिंहानुसरणं कृत्वा गुहामेव गृहशैलीं शोभनाममन्यन्त। वनवासिनस्तु सरलतया काष्ठपर्णादीनां संयोजनेन पर्णकुटीं कृतवन्तः। समतलप्रदेशे मृत्तिकागृहाणां निर्माणं सरलमेवाभवत्। ईदृशानां बहुविधगृहाणां निर्माणशैली शनैः शनैः कलापूर्णाऽभवत्। तदधुनापि वनवासिनां पर्वतगुहासु प्रस्तरयुगस्य चित्राणि प्राप्यन्ते। काष्ठगृहाः, मृत्तिकागृहाश्च कालक्रममक्षममाणानि प्राचीनयुगे एव ध्वस्तानि।

सिन्धुसभ्यताया वास्तूनि

पंचसहस्रवर्षाणि प्राङ्मानवानां गृहाणां सुव्यवस्थितविन्यासः सिन्धुप्रदेशेऽभवदिति तत्रत्यनगरावशेषैः स्पष्टमेव। अस्य नगरस्य निर्माणं पूर्वाकलितसंविदनुसारं कृतम्। विस्तृतराजमार्गाणां संख्या, तेषां दिशः, प्रत्येकायतभागे भवनानां संख्या, तेषां परिधीनां क्षेत्रफलानि—इत्यादीनि नगरस्य स्वास्थ्यरक्षणार्थं कृतानि। नदीजलौघादेषां नगराणां रक्षणार्थं मृत्तिकाभिरिष्टकाभिश्च सेतुबन्धनं कृतम्। नगरयोः पश्चिमपूर्वभागयोः दुर्गरचना कृता। नगरस्यादर्शविधानं परवर्तियुगस्य मौर्यकाले विरचितस्यार्थशास्त्रस्य दुर्गविधाने प्रतिफलितमेव। तत्र परिखा-प्राकार-वप्रद्वाराट्टालक-महापथ-प्रासादकोष्ठागार-सभाचत्वर-वीथी-जलाशयादयोऽर्थशास्त्रादर्शं निष्ठापयन्ति।

सिन्धुसभ्यतायुगे नगराणां सुरक्षार्थं सुदृढप्राकारा विरचिताः। हड़प्पा-नगरे प्राकारस्य विस्तारः पादभागे २६ हस्तमुपरिभागे २३ हस्तं वर्तते। प्राकारस्यायामः ८०० हस्तं वर्तते।

सिन्धुसभ्यताया गृहेषु प्राङ्गणानि बभूवुः। प्राङ्गणं परितः प्रकोष्ठाः स्थिताः। गृहाणां नगरस्य चानपेक्षितजलस्य बहिः प्रवाहणार्थं प्रणालाः प्रणालिकाश्च कृताः। उपसरकं संकरनिचयाः स्थापिताः। प्रत्येकगृहे कूपः, शौचालयः, स्नानागारः, हस्तपादप्रक्षालनकक्षः, भाण्डारम्, पूजास्थानं च बभूवुः।

सिन्धुसभ्यताया गृहाः प्रायो द्विभूमा बभूवुः। सोपानैरुपरिभूमगमनं शक्यमासीत्। गृहाणां भित्तयः ११″×५$\frac{1}{4}$″×२$\frac{1}{4}$″ परिमाणानामिष्टकाभिः पक्वाभिः निर्मिताः। न खलु एशियामहाद्वीपे कुत्रापि परिपक्वेष्टकानां प्रयोगोऽभवत्तदा।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कतिपयविशिष्टगृहरचना अपि वर्तते। तद्यथा—वर्गाकारस्य कस्यचित्कक्षस्य ५२ हस्तायामस्यावलम्बनमायताकारैर्विंशतिस्तम्भैः कृतम्।

वैदिकगृहाः

सिन्धु-सभ्यताया वास्तुकलायाः परम्परा प्रत्यक्षतोऽज्ञातैव वर्तते। साहित्यिकप्रमाणैर्वैदिकयुगे शतद्वारगृहस्य, त्रिभूमगृहस्य, सहस्रस्तम्भसभामण्डपस्य, लौहप्रस्तरादीनां प्रासादस्य च प्रकल्पना प्रसिद्धा। इमानि वास्तूनि प्रायशः समृद्धिशालिनां राज्ञां वा बभूवुः। साधारणजनानां गृहाः काष्ठस्तम्भैः पर्णाच्छादनैश्च निर्मिताः। गृहभित्तयः क्वचित् मृत्तिकया रचिताः।[1]

वैदिकगृहाः साधारणतः सुविस्तृताः सुखदाश्च बभूवुः ; तद्यथा गृहेषु बहवः कक्षाः—अग्निशाला हविर्धानं पत्नीनां सदनं सदः आवसथः च बभूवुः। पशूनां कृते भवनानि निर्मितानि।

रामायणमहाभारतपुराणेतिहासादिभिर्बौद्धजैनसाहित्यैश्च प्राचीनयुगे गृहनिर्माणकलायाः प्रगतिः प्रमाण्यते। तद्यथा रामायणानुसारमयोध्या लङ्का वा सर्वोच्चवास्तुभिः समलङ्कृता बभूव। महाभारतानुसारं मयासुररचितं सभाभवनं वास्तुकलायाः परां काष्ठां द्योतयति। तस्मिन् युगे दैव-मानुषासुर-शैल्यो वर्तन्ते स्म।

मौर्ययुगीनवास्तुकलायाः परिचयः मेगस्थनीजादीनां ग्रीकलेखकानां प्रत्यक्षवर्णनैर्भवति। तदनुसारं मौर्याणां राजधानी पाटलिपुत्रमायामे योजनपर्यन्ता बभूव। मौर्ययुगस्याशोकस्य भवनं वास्तुकलायाः सर्वोच्चादर्शरूपेण गणितम्। भवनमिदं गुप्तयुगपर्यन्तमवश्यमेव विराजमानमासीत्। फाह्यानस्तस्य दर्शनं कृत्वाऽलिखत्—नेदं भवनं मानवरचितम्, अपितु देवैः कृतं प्रतिभाति। अस्य भवनस्यावशेषा आधुनिकयुगे खनिताः। तानधिकृत्य डा० स्पूनरो लिखति—सर्वथा सुरक्षितमिदं दृश्यते। अस्मिन् भवने प्रयुक्ताः काष्ठस्तम्भा अद्युनापि तथा श्लक्ष्णाः पूर्णाश्च सन्ति यथा तेऽशोकयुगे बभूवुः। अस्मिन्युगेऽपि वयमस्माद्भवनात् सुष्ठुतरस्य वास्तोर्निर्माणं कर्तुमसमर्थाः। तदिदं स्वयुगस्यादर्श एव।

प्राचीनयुगस्य नागरिकाणां भवनानां वर्णनं बहुषु काव्येषु प्राप्यते। मानसारादिषु वास्तुशास्त्रग्रन्थेषु गृहरचना-विज्ञानस्य प्रमाणं विद्यते। अनेन प्रमाणेन वास्तुकलाप्रगतिः

---

1. The chief importance of the Vedic period lies in the development of architecture as a science and the invention of types that survive in later Hindu and Buddhist architecture. Rowland ; Art and Architecture p. 24.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिचीयते । तथा हि—प्रथमं ग्रामयोग्या भूमिः चयनीया । यस्यां भूमौ कूपजलं धरातलात् नातिदूरं वर्तते, यत्र छायाप्रदाः पुष्पफलादिसम्पन्ना वृक्षाः संर्वधिता भवितुमर्हन्ति, या भूमिः प्रत्यक्षतो मनोहारिणी वर्तते सा ग्रामावस्थानयोग्या मता । तस्याः भूमेः कर्षणं कृत्वा दिशाविन्दूनां निर्धारणं कृतम् । तत्र प्रधानराजमार्गाः अङ्किताः । राजमार्गाः ग्रामे वायोः संचरणाय समीकृताः । ग्रामस्य प्रदक्षिणार्थं मङ्गलवीथी कृता । विस्तारे प्रधानराजमार्गाः पंचविंशतिहस्तपर्यन्ता निर्मिताः । ग्रामाणां च रचना चत्वारिंशद्विधाः प्रकल्पिताः । तद्यथा-दण्डकवर्गस्य ग्रामः संन्यासिदण्डानुरूपोऽभवत् । तत्र पञ्चपर्यन्ताः समानान्तरराजमार्गाः पूर्वतः पश्चिमे रचिताः, उत्तरतो दक्षिणे लघुविस्तारवन्तस्त्रयः सरका निर्मिताः । उत्तरपूर्वभागे, दक्षिणपश्चिमभागे च द्वौ जलाशयौ खनितौ । पद्माकरवर्गस्य ग्रामः कमलपत्रवत् सन्निवेशितः ! स्वस्तिकवर्गस्य ग्रामः स्वस्तिकवत् प्रसारितो बभूव । पाठशाला धर्मसंस्थाश्च ग्रामाणां कोणभागेषु स्थापिताः ।

बहूनां ग्रामाणां समाहारेण नगररचना प्रकल्पिता । नगरे पण्यवीथिका मन्दिराणि, पथिकगृहाः, पाठशालाश्च यथास्थानं विहितानि । मानसारे नवविधा नाट्यगृहा मञ्चाश्च वर्णिताः ।

वास्तुकलायाः सर्वोच्चविकासः पुरा मानववसतिषु नाधिकमभवत्, अपि तु पितॄणां देवानां च कृते रचितेषु मन्दिरेषु गुहासु वा स्तूप-चैत्य-विहारादिषु बभूवेति निःसन्दिग्धमेव ।

स्तूपः

पूर्वजानां स्मारकरूपेण स्तूपस्य रचना वैदिकयुगे बभूव ।[१] बौद्धधर्मानुसारं स्तूपाः कस्यचिन्महात्मनो निर्वाणस्य सम्यग्यानस्य वा स्मारकाः सन्ति । स्तूपदर्शनेन बुद्धपथानुगमनाय प्रवृत्तिर्जायते । साधारणतः स्तूपा गौतमबुद्धस्य वास्तविकं कृत्रिमं वा अस्थ्यादिशेषं भूमौ सन्निधायायतस्योपरि निर्मिता बुद्धस्य महत्त्वपूर्णजीवनवृत्तस्थले रचिताश्च दृश्यन्ते । परवर्तियुगीनानां बौद्धमतानुयायिनां स्मारकरूपेणापि स्तूपा रचिताः । प्राचीनतमः स्तूपो बस्तीजनपदे कपिलवस्तोः समीपं पिपरावाग्रामे खीष्टतः ५४० वर्षे प्रागेव निर्मितोऽधुनापि वर्तते । एतस्य स्तूपस्य गर्भे प्रस्तरपेटिकायां रक्षितानि मूर्ति-रत्नपुष्प-रत्नपत्र-स्वर्णपत्र-स्वर्णनक्षत्र-त्रिरत्नादीनि स्वर्णपत्रेषु स्वस्तिक-हस्तिसिंह-मातृदेवीमूर्तयश्च शिल्पादर्शं निष्ठापयन्ति ।

अशोकेन ८४०० स्तूपा निर्मिता इति कथा श्रूयते । अशोकेन निर्मितस्य सांचीस्तूपस्य तोरणवेदिकादीनां रचना खीष्टतः प्राक् प्रथमशतके बभूव । स्तूपस्य व्यासः ८१

---

१. शतपथब्राह्मणे १३. ८. १. ५. तथा १३. ८. २. १-२

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हस्तपर्यन्तः आरोहः ५१ हस्तपर्यन्तश्च वर्तते । चतसृषु दिक्षु महाद्वारस्यालङ्करणं मनोहारि प्रतिभाति । द्वाराणां परस्परसम्बन्धनं प्रस्तरवेदिकाभिः कृतम् । वेदिकातः स्तूपस्य मूलपर्यन्तं प्रदक्षिणपथो वर्तते । स्तूपस्य किंचिदुपरि अपरः प्रदक्षिणपथो वर्तते । सोपानमार्गेणाधस्तात् अपरप्रदक्षिणपथो गन्तव्यो भवति । स्तूपस्याण्डस्य शिखरभागे आयताकारा हर्मिका भवति । तोरणेषु वेदिकासु च प्रायः सर्वत्र पशु-पक्षि-देव-यक्ष-गन्धर्व-मानवादीनां मूर्तयस्तेषां बुद्धपूजां द्योतयन्ति ।

सांचीस्थितस्य तृतीये स्तूपे महामोग्गलानस्य सारिपुत्रस्य च भस्मावशेषचयपात्राणां पिधानानामवरतले मस्या म तथा सा ब्राह्मीलिपौ लिखिते । इयं लिपिः ई० पू० पञ्चमशतके विरचिता सती जगति प्राचीनतमेति सम्भाव्यते ।

ख्रीष्टतः प्राक् द्वितीयशतके भरहुतनगरे शुंगानां शासनकाले स्तूपरचना कृता । अधुना तस्य स्तूपस्य कतिपयवेदिका एकं महाद्वारं च कलकत्तानगरस्य पुरातत्त्वसंग्रहालये वर्तन्ते । तत्रापि जातककथानां तक्षणं प्रभावोत्पादकविधिना कृतम् ।

गन्तूरजनपदेऽमरावत्यां ख्रीष्टतः प्राक् द्वितीयशताब्दे प्राक् स्तूपस्य रचना कृता । तस्य स्तूपस्य वेदिकादीनां रचना ख्रीष्टतः पश्चात् तृतीयशताब्दे आन्ध्रराजैः कृता । अस्मिन्युगेऽन्ये स्तूपा जगय्यपेटे नागार्जुनिकोण्डे च रचिताः ।

ख्रीष्टस्य पश्चात् सप्तमशताब्दे सारनाथस्य स्तूपो रचितः ।

चैत्यः

चैत्या बौद्धमतानुयायिनां पूजास्थानं बभूवुः ।[1] चैत्याः प्रायः पर्वतानां कृत्रिमगुहासु स्तूपमनु निर्मिताः । चैत्यानामाभ्यन्तरभाग आयताकारो भवति । तत्र मध्यभागोऽधिकायामसम्पन्नो भवति । मध्यभागस्य पार्श्वभागौ स्तम्भयुक्तौ भवतः । स्तम्भानामन्तभागात् स्तूपस्य प्रदक्षिणपथः प्रारभ्यते ।

बहवश्चैत्या नासिक-भाजा-बेडसा-पीतलाखोरा-कोण्डाणा-कार्लेप्रदेशे प्राप्यन्ते । कार्लेचैत्योऽनुत्तम एव । अस्य रचना ख्रीष्टस्य पश्चात् प्रथमे शतके कृता । तत्र गुहाया विस्तारः ८२ × ३० × ३० हस्तपर्यन्तो वर्तते । मध्यभागमभितः पंचदश स्तम्भा वर्तन्ते । स्तम्भानां शिरोभागे जानुनी निधाय हस्तिनो निर्मिताः । हस्तिनामुपरि द्वौ स्त्रीपुरुषौ वर्तेते । अजन्तागुहासु चत्वारश्चैत्या निर्मिताः सन्ति ।

---

१. वैदिकसंस्कृत्यनुसारं तु
एकवृक्षो हि यो ग्रामे भवेत् पर्णफलान्वितः ।
चैत्यो भवति निर्ज्ञातिरर्चनीयः सुपूजितः ॥ महाभारते आदि० १३८.२५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विहारः

विहाराश्चैत्यस्य समीपे बौद्धभिक्षूणामावासाय निर्मिताः। प्राचीनतमो विहारः खीष्टाब्दतः प्रागेव भाजागुहासु विराजते। तत्र विहारस्य समक्षमलिन्दो वर्तते। अलिन्दस्य पश्चिमदिग्भागे त्रयः कक्षाः सन्ति। कक्षाणां विभागः स्तम्भेन कृतः। स्तम्भानां शिरोभागः कमलपुष्पसदृशः तष्टः। अलिन्दस्य पश्चभागे सभामण्डप इति ख्यातो महाकक्षो वर्तते।

उत्कलप्रदेशे जैनानां बौद्धानां च बहवो विहाराः सन्ति। तत्र खण्डगिरेः अनन्तगुम्फा उदयगिरे रानीगुम्फा, गणेशगुम्फा, जयविजयविहारः सुप्रसिद्धाः। उदयगिरेः हाथीगुम्फायां महाराजखारवेलस्य खीष्टात् प्राक् द्वितीयशताब्दस्य शिलालेखो वर्तते। तत्र कतिपयगुहाः द्विभूमाः सन्ति।

अजन्ताया गुहासु षोडश-सप्तदश-गुहे विहारस्य सर्वोत्कृष्टे स्तः। तत्र स्तम्भानां रचना मनोरमविधिना कृता। तत्र विहारेषु चित्रकल्पना भारतेऽनुपमैव वर्तते।

गुहा-विहाराणां रचना अतीव सौष्ठवपूर्णा प्रतिभाति। गुहासु विविधानां प्राकृतिक-कृत्रिमवस्तूनां तक्षणं प्राक्कलितवास्तुविधानं च यथास्थानं सन्निविष्टम्। तत्र न किंचिदपि बाह्यतो योजितम्। तथापि सर्वत्र सर्वाङ्गपूर्णता आनुरूप्यं चतुरस्रता च प्रतिभासन्ते।

गुहाविहारेभ्यः ऋते पुरा इष्टकविहाराणां प्रचलनं गौतमबुद्धस्य जीवनकालादेवाभवत्। ह्वेनसांगानुसारं सप्तमशताब्दे भारते ५००० विहाराः बभूवुः। तेषु नालन्दाविहारः सर्वश्रेष्ठोऽभवत्। नालन्दाविहारस्य विस्तारः १०५०×५३५ हस्तपर्यन्तक्षेत्रेऽभवत्। अस्मिन् विहारे पुस्तकालयो नवभूमोऽभवत्। कस्यचिद्विहारस्य भित्तिः १३५×४ वर्गहस्ता वर्तते। भित्तीनां निर्माणमिष्टकाभिः कृतम्। इष्टकानां संयोजनं सूक्ष्मविधिना कृतमासीत्। क्वचित् द्वयोरिष्टकयोः संयोजनमदृश्यमेव वर्तते।

मन्दिरम्

सिन्धु-सभ्यता-युगे हड़प्पादिनगरेषु बहूनि मन्दिराणि बभूवुः। ततः प्रभृति भारतस्य विविधभागेषु प्रायः सदैव मन्दिराणां रचना कृता, किन्तु तेषां मन्दिराणां ध्वंसावशेषा अपि नाधुना प्राप्यन्ते। साहित्यिकप्रमाणैः स्पष्टं प्रतिभाति यत् रामायण-महाभारतयुगे मन्दिराणां निर्माणस्य प्रचलनमासीत्। मन्दिरस्य प्रथमावशेषः चित्तौड़गढस्य समीपं प्राप्यते। तस्य मन्दिरस्य निर्माणं खीष्टतः प्राक् चतुर्थे शताब्देऽभवत्। अस्मिन् मन्दिरे सङ्कर्षण-वासुदेवयोः प्रतिष्ठा कृता आसीत्। बरेलीनगरस्य समीपं रामनगरे शिवमन्दिरस्यावशेषः प्राप्तः। तस्य रचना खीष्टाब्दस्य प्रारम्भिकयुगेऽभवत्। खीष्टस्य पश्चात् द्वितीयशताब्दतः भारशिववंशीयानां राज्ञां नागरशैलीमधिकृत्य रचितानां मन्दिराणामवशेषाः प्राप्यन्ते। अस्मात कालादारभ्य मन्दिरद्वारेषु गंगायमुनयोस्तक्षणं प्रारम्यत।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरातनतमं पूर्णाकारमन्दिरं साँचीप्रदेशस्य गुप्तकालीनविष्णुमन्दिरं दृश्यते। तस्य रचना ख्रीष्टस्य पश्चात् चतुर्थशताब्दे कृता। तस्य रूपं प्रायः गुहाविहारसमानं प्रतिभाति। प्रथमं तावत् मण्डपे चत्वारः स्तम्भाः वर्तन्ते। तेषां शिरोभागेऽनुषक्तपृष्ठाः सिंहास्तष्ठाः। गुप्तयुगस्य मन्दिराणि तिगवा[1] - भूमरा[2] - नचनाकूथर[3] - देवगढ[4] - खोह[5] - दहपर्वतिया[6] - भीतरगाँवा[7]दिषु स्थानेषु प्राप्यन्ते। मन्दिराणां बहिर्भित्तिषु ध्वजवस्त्रवाहनादीनि तत्रदेवतायाः परिलक्षणाय निर्मितानि।[8]

गुप्तयुगस्य मन्दिराणां पटलं समतलं भवति। आभ्यन्तरभागे बाह्यभागे च मूर्तीनां तक्षणं क्वचित् वर्तते। द्वारे बहुविधा मूर्तयो वर्तन्ते। गर्भगृहस्य समक्षं स्तम्भैरवलम्बितो लघुमण्डपो भवति। देवगढस्य दशावतारमन्दिरे उपर्युक्तानि सर्वाणि वैशिष्ट्यानि विभाव्यन्ते। मन्दिरमिदं गुप्तयुगस्य वास्तोः सर्वोच्चादर्शं प्रस्तौति।

भीतरगाँवस्य मन्दिरं मृण्निर्मितेष्टकाभिर्विरचितमद्वितीयमेव वर्तते। अस्योच्छ्रायः शङ्क्वाकारः ४६ हस्तं यावद् विद्यते। एतस्य गर्भगृहं मण्डपश्च वर्गाकारो वर्तते। तत्र मूर्तयोऽपि मृत्तिकया कृताः सन्ति। एतस्य रचना तृतीय-चतुर्थशतके बभूव।

गुप्तयुगस्य पश्चात् मन्दिरवास्तोर्द्वेशैल्यौ—उत्तरभारतीया (नागर), दक्षिणभारतीया (द्राविड) च विकसिते। उत्तरभारतीयशैलीमधिकृत्य निर्मितानां मन्दिराणां शीर्षभागः शङ्क्वाकारो भवति। इयं शैली ख्रीष्टस्य पश्चादेकादशशके निर्मितेषु 'खजुराहो' मन्दिरेषु भुवनेश्वरमन्दिरेषु च पूर्णरूपेण विकसिता दृश्यते। दक्षिणभारतीयमन्दिरशैलीमधिकृत्य निर्मितानां मन्दिराणां शीर्षभागोऽनेकभूमः प्रासाद इव भवति। तस्याभोग उपर्युपरि क्रमशः क्षीयमाणः प्रवर्तते। इयं शैली तंजौर-गंगैकोण्डादिषु स्थानेषु रचितानां मन्दिराणां वैशिष्ट्यं निदर्शयति। काचिदभिनवा मन्दिरशैली कश्मीरस्य मार्तण्डमन्दिरे राजस्थानस्याबूपर्वतस्य दिलावरामन्दिरेषु च वर्तते। एषु मन्दिरेषु शिखरस्य स्थाने अण्डो वर्तते।

मध्यप्रदेशे ग्वालियर-(गोपालगिरि-) स्थाने दुर्गस्य परिधौ चतुर्भुजमन्दिरम्, सासबहू-मन्दिरम्, तेली-मन्दिरं च सुप्रसिद्धानि सन्ति। एतानि त्रीणि वैष्णवमन्दिराणि सन्ति।

---

१. जबलपुरसमीपं तिगवाग्रामे विष्णोः मन्दिरं वर्तते।
२. नागोदसमीपं भूमराग्रामे शिवस्य मन्दिरं वर्तते।
३. अजयगढ़समीपं नचनाकूथरग्रामे पार्वत्याः मन्दिरं वर्तते।
४. झाँसीप्रदेशे देवगढे विष्णोः दशावतारमन्दिरं वर्तते।
५. नागोदसमीपं खोहग्रामे शिवमन्दिरं वर्तते।
६. असमप्रदेशस्य दारंगजनपदे दहपर्वतियाग्रामे शिवमन्दिरं वर्तते।
७. उत्तरप्रदेशे कानपुरजनपदे वर्तते।
८. प्रतिमानाटकस्य चतुर्थाङ्के।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्भुजमन्दिरं शिलोच्चयस्य तक्षणं कृत्वा निर्मितम् । तत्र शिलालेखानुसारमेतस्य मन्दिरस्य रचना गुर्जरप्रतिहारराज्ञो रामदेवस्य शासनकाले 'अल्ल' इति ख्यातेन पुरुषेण कृता । सासबहूमन्दिरस्य रचना १०९३ ई० संवत्सरे समारब्धासीत् । मन्दिरस्य शिलापट्टेषु तष्टानां मूर्तीनां रमणीयता दर्शनीया वर्तते । तेलीमन्दिरं द्राविडशैलीमनुसरति ।

द्राविडशैल्याः क्रमिकविकासः पल्लववंशीयैः, चोलवंशीयैश्च राजभिः कृतः । तत्र तंजौरनगरे चोलेन राजराजेन यन्मन्दिरं कारितं तस्य शिखरं १२५ हस्तमुच्चं वर्तते । अस्य मन्दिरस्यालङ्करणायाधस्तादारभ्य शिखरपर्यन्तमसंख्यविधा मूर्तयो रचिताः । परवर्तियुगे मन्दिराणां द्वाराणि गोपुराणीति ख्यातानि महत्त्वपूर्णानि बभूवुः । मन्दिरसमीपं स्तम्भमाश्रित्य मण्डपा रचिताः । मदुरा-श्रीरङ्ग-रामेश्वरादिषु स्थानेषु बहूनि मन्दिराणि वर्तन्ते, येषां मण्डपेषु सहस्राधिकस्तम्भाः पंक्तिषु बद्धाः सन्ति । एलोराप्रदेशस्य कैलाशमन्दिरं परिवर्तियुगीनद्राविडशैल्याः सर्वोत्कृष्टमादर्शं प्रस्तौति । इदं गुहामन्दिरं पर्वतगर्भे निष्पादितम् । खीष्टस्य पश्चात् द्वादशशताब्दे होयसलवंशीयैः राजभिर्मन्दिरनिर्माणस्याभिनवा शैली प्रवर्तिता । तदनुसारं मन्दिराणि ताराकाराणि भवन्ति । अस्याः शैल्याः सर्वोच्चादर्शो दोरसमुद्रस्य मन्दिरे राजते ।

मन्दिराणां प्राचीनकालात् एव नाट्याभिनयार्थमपि समुपयोगोऽभवत् । तेषां प्राङ्गणेषु तत्रत्यदेवानां प्रीत्यर्थं नृत्यादिकमायोजितमासीत् ।

पुरा राजकीयस्थापत्ये सभाभवनस्य माहात्म्यमासीत् । तत्र राजकीयमन्त्रणा मनोरञ्जनादीनि समारब्धानि । महाभारते सभाभवनस्यानुपमाकृतिर्वर्णितैव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विज्ञानम्

विज्ञानस्य शिल्पकलादीनां च साहाय्येन मनुष्यः संसारस्य महत्तममुपयोगमुपभोगञ्च कर्त्तुं समर्थो भवति। मानवसंस्कृतेरादिकालादेव नित्यमेतेषां प्रगत्या सह मानवस्य भोगविलासादीनां परिधिः सुविस्तृतोऽभूत्।

उपभोगपरिधौ वस्तूनां भोज्यत्वमभोज्यत्वं वा ज्ञातुमेव प्रथममायुर्वेदविज्ञानस्य समारम्भः सम्भावनीयः। उपयोगिवस्तूनां वैपुल्यं विधातुमेव कृषिविज्ञानस्य विकासः कृतः। गृहरचनाप्रसाधनकर्मादिकमधिकृत्य साधारणतो गणितस्य सविशेषं ज्यामितेः प्रयोगः समुद्भावितः। प्राकृतिकसृष्टिषु प्रायः यथाप्रमाणतावयवसङ्गतिर्वा वर्तते। मानवकृतिषु सरलतया तस्या नियोजनं कर्त्तुमपि गणितस्यापेक्षासीत्। आयुर्वेदस्य कृषिविज्ञानस्य च सम्यक् प्रगतये वनस्पतिशास्त्रस्य, भौतिकविज्ञानस्य, रसायनशास्त्रस्य भूतत्त्वविद्यायाश्च विकासोऽपेक्षित एव। पुरा दिनस्य, मासस्य, ऋतोः, ग्रहनक्षत्रादीनां च प्रवृत्तिं ज्ञातुमेव ज्योतिषस्याध्ययनं प्रारभ्यत।

गणितम्

गणितविज्ञानस्य प्राचीनतमा प्रगतिः सिन्धुसभ्यताया अवशेषैः प्रथमं परिचीयते। तस्याः सभ्यताया वास्तुनिर्माणे, राजमार्गाणां विन्यासे, वाणिज्यप्रवर्तनाय मानोन्मानादीनामुपकल्पने च गणितविज्ञानस्य प्रयोगोऽभवत्। अपरं च तत्र चित्रकलानिवेशने ज्यामितिकर्म प्रायुज्यत।

वैदिकयुगे यज्ञार्थं वेदिकानां रचनायां ज्यामितेः प्रयोगोऽक्रियत। ख्रीष्टतः प्रागष्टमे शताब्दे बौधायनः शुल्वसूत्रैस्त्रिभुजायतवर्गादीनां रेखागणितस्य सिद्धान्तान् व्याख्यायत। शुल्वसूत्रानुसारं पक्षि-कच्छप-रथचक्र-वृत्त-समत्रिबाहु-त्रिभुजादीनां सदृशाकारा वेदिका निर्मिताः। तस्मिन् युगेऽनेकवर्गसमानस्यैकवर्गस्य, द्वयोर्वर्गयोरन्तरसमानस्यैकवर्गस्य, चतुर्भुजसमानस्य वर्गस्य त्रिभुजसमानस्य वर्गस्य च निर्मिती रेखागणितेन कृता।

गुप्तयुगे दशमिकसंकेतविधिना संख्यानां व्यञ्जनमाविष्कृतम्। सेयं पद्धतिर्जगति सर्वत्र प्रचरति। अस्यां पद्धतौ शून्यस्य प्रयोगेण दशगुणत्वम्, एकतो नवपर्यन्तमङ्कानां स्थानमूल्यं च निर्दिशिते। गणितप्रक्रियासु दशमिकसङ्केतविधेर्लाघवं सुविदितचरमेव। कदाचिदिमं विना गणितविज्ञानस्येयती प्रगतिः न समभविष्यत्। प्रथममरबदेशवासिनः ख्रीष्टतः पश्चात् नवमे शतके दशमिकसङ्केतविधिं भारतेभ्यो ज्ञातवन्तः। द्वादशशतकेऽस्य प्रचारो योरपमहाद्वीपे बभूव। आर्यभटः प्रथममस्योल्लेखं करोति—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकं दश च शतं च सहस्रमयुते तथा प्रयुतम् ।
कोटयर्बुदं च वृन्दं स्थानात्स्थानं दशगुणं स्यात् ॥

आर्यभटस्य प्रादुर्भावः ४९९ ख्रीष्टाब्दे परिलक्षितः । अतएव दशमिकसङ्केतविधेराविर्भावः ख्रीष्टस्य पश्चात् तृतीये चतुर्थे वा शतके बभूव । आर्यभटेन संख्यानां वर्गमूलघनमूलादिज्ञानाय दशमिकसङ्केतविधिः प्रयुक्तः ।

गुप्तयुगस्य गणितदिशायां प्रगतिर्बक्षलिग्रामे केनचित् कृषकेण भूमेरुत्खननक्रियायां प्राप्तेन हस्तलिखितग्रन्थभागेन परिचीयते । अस्मिन् ग्रन्थे साधारणस्तरे भिन्नस्य, वर्गमूलस्य, समान्तरश्रेढ्याः, गुणोत्तरश्रेढ्याश्च विवेचनं विद्यते तथा उच्चस्तरे मिश्रश्रेढीनां योगस्य, युगपदेकघातसमीकरणस्य च व्याख्या वर्तते ।

आर्यभटः ४९९ ख्रीष्टाब्दे पाटलिपुत्रे 'आर्यभटीयम्' लिखितवान् । अस्मिन् ग्रन्थे ज्यामितिप्रकरणे बहुविधवृत्तविशेषाः, 'π' मितिः (३. १४१६), प्रतिलेखीयज्यामितिः च व्याख्याताः । त्रिकोणमितिरपि तदासम्भावितासीत् । बीजगणिते चतुरक्षरसमीकरणस्य विधिः आर्यभटीयस्य गणितपादे प्रवर्तते ।

अङ्कगणिते बीजगणिते च भारते बहुविधा अभिनवप्रवृत्तयः समुद्भाविताः । तासु बह्वो योरपीयदेशेषु प्राचीनकाले एव स्वीकृताः, किन्तु कतिपयाः प्रवृत्तयः तेषु देशेषु स्वतन्त्ररूपेण प्रायः सहस्रवर्षं पश्चादेवाविष्कृता इति योरपीयविदुषां वचनेनावगन्तव्यम्—

There is no question of the superiority of the Hindus over their rivals in the perfection to which they brought science. Not only is Aryabhata superior to Diaphantus (as is shown by his knowledge of the resolution of equations involving several unknown quantities and in a general method of resolving all indeterminate problems of at least the first degree) but he and his successors press hard upon the discoveries of algebraist who lived almost in our own time.

Elphinstone : History of India p. 131.

In the Suryasiddhanta is contained a system of Trigonometry which not only goes far beyond any thing known to the Greeks, but involves theorems, which were not discovered in Europe till two centuries ago.

Elphinstone : History of India p. 129.

Suryasiddhanta contains a rational system of Trigonometry, which differs entirely from the first known in Greece or Arabia,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

In fact, it is founded on a geometrical theorem which was not known to the geometricians of Europe before the time of Vieta, about 200 years ago. And it employes the sines of arcs, a thing unknown to the Greeks, who used the chords of double arcs. The invention of sines has been attributed to the Arabs but it is possible that they may have received this improvement in Trigonometry as well as the numerical characters from India.

Prof. Wallace : Edinburgh Encyclopaedia—Geometry p. 191.

खीष्टस्य पश्चात् सप्तमे शतके ब्रह्मगुप्तोऽङ्कगणित-बीजगणित-रेखागणितादीनां विषयाणां सूक्ष्मतरविवेचनं ब्राह्मस्फुटसिद्धान्ते, खण्डखाद्यके च कृतवान् । ब्राह्मस्फुटस्य गणिताध्याये विविधविषयाणाम्—योग-वियोग-गुणन-भाग-वर्ग-वर्गमूल-घन-घनमूल-भिन्न-प्रयोग-त्रैराशिक-श्रेढीव्यवहार-क्षेत्रव्यवहार-चितिव्यवहार-क्राकचिकव्यवहार-राशिव्यवहार-छायाव्यवहारादीनां विवेचनं वर्तते ।

नवमे शतके महावीराचार्यो गणितसारसंग्रहं रचितवान् । तत्र गणितस्य व्यावहारिकोपयोगिता प्रायः सर्वेषु कार्यक्षेत्रेषु—पाकक्रियायां न्यायपद्धतौ वा निर्दशिता । तत्र ज्यामितिश्रेढीव्यवहारः सुस्पष्टं प्रवर्तते । एकादशे शतके त्रिशतीग्रन्थे चतुरक्षरसमीकरणस्य विवेचनं प्रस्तुतवान् ।

द्वादशशतके भास्कराचार्यो गणितशास्त्रस्य महत्त्वपूर्णग्रन्थं सिद्धान्तशिरोमणिं रचितवान् । अस्य ग्रन्थस्यारम्भिकभागयोर्द्वयोर्नामनी लीलावती, बीजगणितं च स्तः । अनयोर्भागयोर्गणितप्रकरणं सविशेषं वर्तते । लीलावत्यां विविधप्रकाराणामङ्कगणितसम्बन्धिप्रश्नानां सूक्ष्मसमाधानं क्षेत्रफलघनफलादीनां शुद्धविवेचनं च सरलतमविधिना कृतम् । दशमलवविधेः प्रयोगः सरलसमाधानाय विहितः ।

बीजगणितस्य प्रयोगेण भाष्कराचार्यः पुरःसरः प्रतिभाति । एल्फिन्स्टनमहोदयो भास्कराचार्यस्य तादृशं वैशिष्ट्यं समर्थयन्नाह—'In the Edinburgh Review (Vol. XXI p. 372) is a striking history of a problem (to find x so that $ax^2 + b$ shall be a square number). The first step towards a solution is made by Diaphantus. It was extended by Fermat, and sent as a defiance to the English Algebraists in the seventeenth century, but was only carried to its full extent by the celebrated mathematician Euler, who arrives exactly at the point before attained by Bhaskaracarya.

History of India p. 131

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

'A particular solution given by Bhaskaracarya is exactly the same as that hit on by Lord Brounker in 1957; and that the general solution of the same problem was unsuccessfully attempted by Euler and was only accomplished by De La Grange in 1767 A. D.; although it had been as completely given by Brahmagupta.

Colelerook's Hindu Algebra quoted in the Edinburgh Rcview Vol. XIX p. 153.

भास्कराचार्यस्य पुरःसरत्वं प्रतिपादयन् लेथब्रिजमहोदयो लिखति—Bhaskaracarya is said to have discovered a mathematical process very nearly resembling the differential calculus of Modern European mathematicians.

J. R. A. S. Vol. XVII

भास्कराचार्यस्येदृशी प्रतिभां समर्थयन् डा० प्रफुल्लचन्द्ररायमहोदयः लिखति—समयसम्बन्धिज्योतिषत्रुटिः $\frac{१}{३४०००}$ क्षणमिति भास्कराचार्यस्य निष्कर्षः तस्य 'डिफरेंशियल कैलकुलस' रीतेः प्रयोगमेव व्यञ्जयति ।[१]

ज्योतिषम्

वैदिकयुगे प्रारम्भतः एव वर्षस्य, वर्षे द्वादशचान्द्रमासस्य प्रतित्रिवर्षमधिकमासस्य प्रकल्पनमासीत् ।[२] तत्र द्विमासात्मकानामृतूनां परिगणनं बभूव । तथा हि मधुश्च माधवश्च वासन्तिकौ ऋतू, शुक्रश्च शुचिश्च ग्रैष्मौ ऋतू, नभश्च नभस्यश्च वार्षिकौ ऋतू, इषश्चोर्जश्च शारदौ ऋतू, सहश्च सहस्यश्च हैमन्तिकौ ऋतू, तपश्च तपस्यश्च शैशिरौ ऋतू ।[3]

सूर्यस्योत्तरायणा दक्षिणायना च गतिः समाज्ञातासीत् ।[४] सप्तविंशतिनक्षत्राणां विवेचनं वैदिक-सूक्तेषु दृश्यते ।[५] शतपथब्राह्मणानुसारम्—अहोरात्रयोः त्रिंशत् मुहूर्ता भवन्ति । तत्र

---

1. Ray: History of Hindu Chemistry Vol II pp 152--160
२. ऋग्वेदे १. १६४ तथा तैत्तिरीयसंहितायां १.४.१४
३. तैत्तिरीयसंहितायां ४.४.११ । द्वादशमासाः पंचर्तवो हेमन्तशिशिरयोः समासेन । ऐतरेयब्राह्मणेन १.१ तद्धि काव्यमीमांसायामष्टादशाध्याये व्याख्यातम् ।
४. शतपथब्राह्मणे २.१.३
५. ऋग्वेदे ७.७५.५; अथर्ववेदे १९.७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१ मुहूर्त्तः = १५ क्षिप्राणि
१ क्षिप्रम् = १५ एतर्हीणि
१ एतर्हि = १५ इदानीनि
१ इदानीम् = १५ प्राणाः

तस्मिन् युगे कालस्यातिसूक्ष्मगणना विभाव्यते स्म ।

'सूर्यो नोदयति नास्तमेति च' इति विज्ञानं वैदिकयुगे सुप्रमाणितमभवत् ।[१]

वैदिकयुगस्य पश्चात् वेदाङ्गज्योतिषस्य सङ्कलनं कृतम् । तत्र ऋग्वेदज्योतिषम्, यजुर्वेदज्योतिषम्, अथर्ववेदज्योतिषं च वर्तन्ते । लगधमहर्षिणा संगृहीते ऋग्वेदज्योतिषे ३६ कारिकाः, यजुर्वेदज्योतिषे ४९ कारिकाः, अथर्ववेदज्योतिषे १६२ कारिकाश्च सन्ति । अथर्ववेदज्योतिषात् फलितज्योतिषस्य परम्परा प्रारभ्यते । ऋग्वेदज्योतिषे यथार्थमुपयुक्तकालज्ञानाय नक्षत्र-पर्यायनादीनां विधानं प्रवर्तितम् । तत्र गणितज्योतिषस्याभाव एव वर्तते । यजुर्वेदज्योतिषं प्रायः ऋग्वेदसममेव प्रवर्तते । अथर्ववेदज्योतिषे तिथि-नक्षत्र-करण-योग-तारा-चन्द्रादीनां बलाबलस्य विवेचनं सम्यक् कृतम् ।

वैदिकज्योतिषमनुसृत्य परवर्तियुगे पंचसिद्धान्तानाम्—पितामहवसिष्ठरोमकपौलिशसूर्याणां रचना बभूव। एतेषु सिद्धान्तेषु पितामहसिद्धान्ते वेदाङ्गज्योतिषस्य परम्परामनुसृत्य विरचितः । सूर्यचन्द्रमसोर्गणितं वर्तते । अन्येषां ग्रहाणां गणना तत्र नास्ति ।

वसिष्ठसिद्धान्तः (३०० खीष्टाब्दम्) राशीनां लग्नानां च विवेचनं निदर्शयति । तदनुसारं वर्षे ३६५·२५९१ दिवसा भवन्ति । अस्मिन् ग्रंथे सूर्यग्रहणं चन्द्रग्रहणं वा न व्याख्यातम् ।

पौलिशसिद्धान्ते (३८० खीष्टाब्दम्) ग्रहणानां विवेचनं विद्यते ।

रोमकसिद्धान्तः (४०० खीष्टाब्दम्) वैदेशिकप्रभावात् ज्योतिषस्य प्रगतिं निदर्शयति । तत्र मेण्टन-हिप्पार्कसादीनां ग्रीकविदुषां परिगणनरीत्या युगमानस्य दिनमानस्य च स्पष्टीकरणं विद्यते ।

सूर्यसिद्धान्तः सविशेषं लोकप्रियोऽभवत् । तत्र ग्रहणविवेचनस्य गोलीयज्योतिषस्य च विशेषनियमाः विभाविताः दृश्यन्ते । परवर्तियुगे सूर्यसिद्धान्तस्य समादरोऽभवत् ।

ज्योतिषविज्ञानस्य प्रथम ऐतिहासिकाचार्य आर्यभट आसीत् । स त्रयोविंशतिवार्षिक एव ४९९ खीष्टाब्दे 'आर्यभटीयम्' रचितवान् । स सर्वेषां पौरस्त्यपाश्चात्यविदुषां ज्योति-

---

१. ऐतरेयब्राह्मणानुसारम्—एष (सूर्यः) न कदाचनास्तमेति नोदेति । तं यदस्तमेतीति मन्यन्तेऽह्न एव तदन्तमित्वाऽथात्मानं विपर्यस्तेय । अहरेवास्तात्कुरुते रात्रिं परस्तात् । अथ यदेनं प्रातरुदेतीति मन्यन्ते रात्रेरेव तदन्तमित्वा अथात्मानं विपर्यस्यते । अहरेवावस्तात्कुरुते रात्रिं परस्तात् । ३.४४ एतदेव व्याख्यातं विष्णुपुराणे २.८.१५-१६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षविज्ञानपद्धतिं पर्यालोच्य स्वीकयप्रतिभाबलेन समुन्नतशास्त्रं प्रणीतवान् । तस्यानुसन्धान-शैली सम्यङ निष्पन्ना वर्तते । ग्रीकविदुषामपि सिद्धान्तान् स परिशोधितवान् ।

प्रथममार्यभट एव प्रतिपादितवान् यत् पृथ्वी स्वकीयामक्षरेखामवलम्ब्य परिभ्रमति । आर्यभटीयस्य गीतिकापादे—राशिकलांशादीनां सम्बन्धः, आकाशकक्षायाः विस्तारः, पृथ्वीसूर्यचन्द्रादीनां गतिः, व्यासपरिमाणञ्च, ग्रहाणां कान्तिः विक्षेपश्च, तेषां पातमन्दोच्चादीनामवस्थितिः, मन्दपरिधेः, शीघ्रपरिधेश्च परिमाणं च व्याख्यातानि । कालक्रियापादे मासवर्षयुगादीनां पारस्परिकसम्बन्धः, ग्रहाणां मध्यमस्पष्टगतयश्च व्याख्याताः । गोलपादे ग्रहेभ्यःसूर्यस्यान्तरं सूर्यप्रकाशेन तेषामर्धप्रकाशत्वं भूगोलखगोलादिविषयाणां विवेचनं च स्पष्टं वर्तन्ते । अयमार्यभटः समकालीनेभ्यः पूर्ववर्तिभ्यश्च सर्वेभ्यो ज्योतिर्विद्भ्यः शुद्धतरं परिमाणं परिणामं च निर्देशितवानिति तस्य सर्वोत्कृष्टतां व्यञ्जयति ।

आर्यभटस्य प्रायः समकालिक एव वराहमिहिरः पंचसिद्धान्तिकां बृहत्संहितां बृहज्जातकं लघुजातकं च रचितवान् । पंचसिद्धान्तिकायां पूर्वपरिचितपंचसिद्धान्तानां सङ्ग्रहणं कृतं विद्यते । बृहत्संहितायां ग्रहगतिधूमकेतूल्कापातादीनां विषयाणां विवेचनं कृतम् । लघुजातकस्य, बृहत्संहितायाश्चानुवादः 'अलबेरूनी' महोदयेन कृतः ।

ज्योतिषशास्त्रस्य संकलितग्रंथः सूर्यसिद्धान्त इति ख्यातः बहुविधवर्ण्यविषयान् निदर्शयति । तत्र मध्यमाधिकारः, स्पष्टाधिकारः, त्रिप्रश्नाधिकारः, चन्द्रग्रहणाधिकारः, सूर्यग्रहणाधिकारः, परिलेखाधिकारः, ग्रहयुत्यधिकारः, नक्षत्रग्रहयुत्यधिकारः, उदयास्ताधिकारः, शृङ्गोन्नत्यधिकारः, पाताधिकारः, भूगोलाधिकारः ज्योतिषोपनिषदध्यायः, मानाध्यायश्च वर्तन्ते । ग्रंथेऽस्मिन् ख्रीष्टस्य पंचमशतकादारम्य दशमशतकपर्यन्तं ज्योतिषशास्त्रं व्याख्यातम् ।

सप्तमशतके गणकचक्रचूडामणिरिति ख्यातनामा ब्रह्मगुप्तो ब्रह्मस्फुटसिद्धान्तमरचयत् । ब्रह्मस्फुटसिद्धान्ते स पूर्ववर्तिनां कतिपयप्रमुखज्योतिर्विदां ग्रहगणितं संशोधितवान् । पुस्तकेऽस्मिन् गणिताध्यायस्य कुट्टकाध्यायस्य च विशेषमहत्त्वं भजते । चतुर्विंशत्यध्यायेषु यन्त्राध्यायो विशिष्ट एव ।[1] ब्रह्मगुप्तस्य खण्डखाद्यकमार्यभटीयमनुकरोति । ब्रह्मगुप्तस्य ख्यातिः अरबदेशेषु, तुरुष्कदेशेषु च प्राचरत् ।

ख्रीष्टस्य द्वादशशतके भास्करस्य ग्रन्थेषु ज्योतिषशास्त्रस्य पुनरुत्थानमभवत् । भास्करस्य ज्योतिषप्रकरणे—भगणोपपत्तिः, चन्द्रकलाकर्णसाधनं भूभानयनं सूर्यग्रहणगणितं स्पष्टक्रान्तिसाधनं च प्रकारान्तरेण शुद्धतराणि विहितानि । स पृथिव्या गोलत्वमाकर्षणशक्तिं च प्रमाणयन् लिखति—

---

१. यन्त्राध्याये त्रैराशिकगणितस्य वर्णनं महत्त्वपूर्णं दृश्यते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समो यतः स्यात्परिधेः शतांशः पृथ्वी च पृथिवी नितरां तनीयान् ।
नरस्य तत्पृष्ठगतस्य कृत्स्ना समेव तस्य प्रतिभात्यतः सा ॥
आकृष्टशक्तिश्च मही तया यत् स्वस्थं गुरु स्वाभिमुखं स्वशक्त्या ।
आकृष्यते तत् पततीव भाति समे समन्तात् क्व पतत्वियं खे ॥

तदेव पृथिव्या आकर्षणं न्यूटनमहोदयेन षट्शताब्दं पश्चात् विज्ञातम् ।

साप्ताहिकवाराणां कल्पना सर्वप्रथमं भारतेऽभवदिति आङ्ग्लदेशस्य वैज्ञानिकेन ओलिवरलाजमहोदयेन प्रमाणितम् । तेषां नामानि तु ग्रहानुसारीणि सन्ति । पृथ्वीतोऽन्तरक्रमेण ग्रहास्तु चन्द्रः, बुधः, शुक्रः, रविः, मङ्गलः, गुरुः, शनिश्च सन्ति । ग्रहाणामुपरिक्रमेण चतुर्थग्रहानुसारी वारः अपरेद्युर्भवति । तद्यथा शनेः पश्चात् रविरागच्छतीति अन्ततः परिगणय्य संख्येयम् । एतदपि गणितसाध्यमिति निर्दशितमग्रे ।

दिनं च रात्रिश्चाहोरात्रो भवति ।[1] अहोरात्रपदे द्वितीयतृतीययोः समाहारेण होराभवति आंगलभाषाया आवरस्य पर्यायः । अहोरात्रे २४ होरा भवन्ति । एतासु प्रत्येकस्या होराया ग्रहस्वामी भवति । सप्तग्रहाः सप्तहोरासु पर्यन्ति । एकविंशतिहोरासु तेषां त्रिःपर्ययो भवति । द्वाविंशतितमहोरायां प्रथमो ग्रहः, त्रयोविंशतिहोरायां द्वितीयो ग्रहः चतुर्विंशतिहोरायां तृतीयो ग्रहश्चायान्ति । अपरस्मिन् दिवसे चतुर्थो ग्रहः समुपयातीति चतुर्थग्रहानुसारी वारो जायते । स एव ग्रहस्वामी । इयं गणना सूर्यसिद्धान्तानुसारिणी वर्तते।

भारतीयज्योतिषविज्ञानस्य प्राक्तनोत्कर्षो बहुभिर्योरपीयविद्वद्भिरपि प्रमाणितः । तथा हि—

During the eighth and ninth centuries, the Arabs were in astronomy the disciples of Hindus, from whom they borrowed the lunar mansions in their new order, and whose Siddhantas, they frequently worked up and translated in part under the supervision of Indian astronomers themselves whom Khalifas of Baghdad invited to their courts.

Weber : History of Indian Literature p. 525.

The originality of Hindu astronomy is at once established, but it is also produced by intrinsic evidence and although there are some remarkable coincidence between the Hindu and other systems, their methods are their own.

Wilson quoted in Mill's History of India Vol. 1. P. 107.

---

१. होरेत्यऽहोरात्रं विकल्पमेके भवन्ति पूर्वापरवर्णलोपात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

He (Aryabhata) was the man according to Europeans, who first brought to light diurnal revolution of the earth on its axis, and to have known the true theory of the causes of the lunar and solar eclipses and notice the motion of solistial and equinoctial points.

Chamber's Encyclopaedia.

आयुर्वेदः

प्रागैतिहासिककाले सिन्धुसभ्यतायुगे शृङ्गचूर्णशिलाजतुरक्षाकरण्डादीनां प्रयोगेण चिकित्सा कृता । वैदिकसाहित्यस्योल्लेखैस्तदानीन्तनायुर्वेदविज्ञानस्य प्रगतिः परिचीयते । प्रथमं तावत् सर्वेषां महर्षीणां चिरजीवनस्याकांक्षात्युत्कटा प्रतिभाति ।[1] आयुर्वेदस्य महिमा प्राचीयत । अश्विद्वयवरुणरुद्रादयो बहवो देवा वैद्या आसन् ।[2] अश्विद्वयस्य नेत्रचिकित्सा: अस्थिसंयोजनकर्म च प्रसिद्धे । वरुणस्यौषधालयो विशाल आसीत् । तत्र सहस्रभिषजोऽविद्यन्त ।[3] ऋग्वेदयुगे जलचिकित्सायाः सूर्यरश्मिचिकित्सायाश्च प्रचार आसीत् । तथा हि ऋग्वेदे

अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तये ।
अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।
अग्निं च विश्वशम्भुवमापश्च विश्वभेषजीः ॥
आपः पृणीत भेषजं वरूथं तन्वे मम ॥ १.२३.१९-२१
उद्यन्नद्यमित्रमहऽआरोहन्नुत्तरां दिवम् ।
हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥ १.५०.११

बहुविधा ओषधयस्तदा समाज्ञाता बभूवुः । यथा—

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुंचन्त्वंहसः ॥ ऋ० १०.९७.९५

अथर्ववेदानुसारं विविधरोगाणां लक्षण-निदान-चिकित्सादीनां विवेचनं सूक्ष्मरूपेण कृतम् ।[4] विभिन्नरोगाणां निवारणाय विविधद्रव्याणामुपयोगोऽक्रियत । तथा हि—कुष्ठेन तक्मज्वरनाशनं कृतम् ।[5] नितत्नीप्रयोगेण केशवर्धनं कृतम् ।[6] रजनीप्रयोगेण कुष्ठस्य

---

१. यजुर्वेदे ३६.२४, ईशोपनिषदि २ ।
२. ऋग्वेदे १.११६.१६; १.२४.९;२.३३.४,७ ।
३. ऋग्वेदे १.२४.९ ।
४. अथर्ववेदे ९.८.६—६.१७.२१
५. अथर्ववेदे ५.४.१
६. तत्रैव ६.१३७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निदानं कृतम् ।[१] सूर्यस्य रश्मिभिः क्रिमीणां विनाशो भवतीति विज्ञातमासीत् ।[२] कृमीणामाश्रयस्थानानि शरीरस्य विविधाङ्गेषु, वनौषधिषु, च भवन्ति, कृमयः बहुविधा भवन्ति, ते विषमयाः भवन्ति—इत्येते विषया अथर्ववेदे वर्णिताः ।[३] रोहिण्याः प्रयोगेण छिन्नस्यास्थ्नः पुनः संयोजनमक्रियत ।[४] मशकानां विनाशाय कस्यचित् वनस्पतेः प्रयोगः कृतः । अपामार्ग-पिप्पल्यरुन्धतीनामोषधीनामुपयोगो विविधरोगाणां निदानाय कष्टनिवारणार्थं च कृतम् ।[५] तस्मिन् युगे शल्यचिकित्सा समाज्ञातासीत् ।[६]

परवर्तिसाहित्यानुसारं भरद्वाज इति ख्यातः विद्वानायुर्वेदविज्ञानस्य प्रथमाचार्यो बभूव । भरद्वाजस्य शिष्यपरम्परायामायुर्वेदस्य विकासः सञ्जातः । परवर्तियुगे आयुर्वेदज्ञानामपरा परम्परा पुनर्वसुतः प्रारभ्यते । पुनर्वसोः षट् शिष्याः–अग्निवेशः, भेलः, जतूकर्णः, पराशरः, हारीतः, क्षारपाणिश्चासन् । सर्वे शिष्याः स्वतन्त्ररूपेणायुर्वेदशास्त्रस्यानुसन्धानात्मकविवेचनं कृतवन्तः । चरकः तेषां ज्ञाननिबन्धनं प्रतिसंस्कृत्य संहितारूपेण प्रणीतवान् । चरकसंहितायामग्निवेशस्य कर्तृत्वं विशिष्टमेव प्रथितम् ।

चरकसंहिता

चरकसंहिताया विभाजनमष्टस्थानेषु (अध्यायेषु) कृतम् । तत्र सूत्रस्थाने—औषधपथ्य-वैद्यकर्तव्यादीनां वर्णनम्, निदानस्थाने—ज्वररक्तस्राव-कुष्ठ-क्षयादीनां विवेचनम्, विमानस्थाने—रोगाणां परीक्षणं तेषां कृते ओषधिविधानम्, शरीरस्थाने—शरीररचनाविज्ञानम्, इन्द्रियस्थाने—इन्द्रियाणां विकृतेः विवेचनं, वाणीविकारशक्तिक्षयादीनामुल्लेखश्च, चिकित्सास्थाने—रोगाणां निदानम्, स्वास्थ्य-संवर्धनम्, दीर्घजीवनोपायाः, वातरोगज्वरादीनां विश्लेषणं च, कल्पस्थाने—शरीरशोधनेन रोगनिवारणम्, सिद्धिस्थाने—विषमरोगस्य चिकित्सार्थं भैषज्यस्यान्तः क्षेपणं च व्याख्यातानि ।

चरकस्य प्रादुर्भावः सम्भवतः ख्रीष्टाब्दतः प्रागेवासीत् । श्रीप्रफुल्लचन्द्ररायमतानुसारं स बौद्धयुगादपि पूर्वं प्रादुरभवत् ।

उपर्युक्तयुगे आयुर्वेदविज्ञानस्य प्रकामप्रगतिरासीदिति तदानीन्तनसाहित्योल्लेखैः प्रमाणितम् । तथा हि—पशूनामपि शरीराङ्गानां कृन्तने सति चर्म चर्मणा सह, मांसं मासेन सह, स्नायुः स्नायुना सहायोज्यत ।[७] पक्षिचिकित्सापि प्रचलितासीत् ।[८] सर्पदं-

१. अथर्ववेदे १.२३.१
२. तत्रैव २.३२.१
३. तत्रैव २.३१.४–६ ।
४. तत्रैव ४.१२.१ ।
५. तत्रैव ७.५६ ।
६. तत्रैव १.११.५ ।
७. रोहन्तमिगजातके ५०१ ।
८. हंसजातके ५०२ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शस्य चिकित्सा सफलविधिना सम्पादिता । मानसिकचिकित्सायाः प्रचलनमासीत् । मानसिकचिकित्सा ज्ञानौषधिना कृता ।[१] अन्धेभ्यो नेत्रप्रदानस्य विधानेऽन्येषां नेत्रोद्घाटनस्य प्रयोग औषधिसाहाय्येन कृतः ।[२] कृत्रिमनासिकायाः उपयोगो नासिकाविहीना जनाः कुर्वन्ति स्म ।[३] विषस्य प्रभावः वमनैः, घृतगुडमधु भक्ष्यैश्चापाक्रियत ।[४] शर्करामिश्रिताम्ररसैरुदरवायुप्रकोपः शमितः ।[५]

औषधानां मधुरीकरणाय पुष्पैः तेषां भावना कृता । ईदृशानां भावितपुष्पाणां प्रयोगेण रोगाः शमिताः ।[६]

औषधानां निर्माणाय वृक्षेभ्यो मूल-पत्र-पुष्प-रस-लाक्षा-फलानि, पशुभ्यो गोमय-वसा-नाभि-घृत-दुग्ध-मांस-शृङ्गास्थि-रक्तानि, पृथिव्या मृत्तिका-सुधा-गैरिकाञ्जन-धातवः, समुद्रेभ्यः शंखमौक्तिकादीनि, तैलानि च संगृहीतानि ।[७]

कतिपयरोगा औषधानां नस्यकर्मयोगेन दुरीकृताः ।[८] वातरोगः प्रस्वेदप्रवाहेण शमितः ।[९] चिकित्सापद्धतिः स्वल्पव्ययसाध्यासीत् ।

बौद्धयुगस्य सर्वोच्चवैद्यः जोवक इति ख्यातो बभूव । तक्षशिलाविश्वविद्यालये स सप्तवर्षाणि चिकित्साशास्त्रमधीतवान् । तस्य चिकित्साकर्मणोऽद्भुतसाफल्यानि बौद्धसाहित्ये उल्लिखितानि । तथा हि—स शिरोबाधानिवारणाय रोगिणः शिरसि शल्यकर्मप्रयोगेण द्वौ क्रिमी बहिष्कृतवान् । कस्यचित् श्रेष्ठिनः उदरविकारं दूरीकर्त्तुं तेन शल्यकर्मणान्त्राणां यथास्थानमवस्थितिः कारिता । स वैशाली-काशी-साकेतोज्जयिनीप्रदेशेषु गत्वा महाजनानां निदानं कृतवान् ।

जीवकमधिकृत्य कर्स्टनमहोदयेन प्रचारितम्—Jivaka went to the royal palace when, before the door, he met a small boy who was carrying two faggots of wood to his house. Now, as soon as Jivaka saw him, he at once detected the stomach and the intestines through the body of the child, and he then said, "In the book of the plants the tree king (भैषज्यराज) is referred to, which

---

१. कामनीतजातके २२८ ।

२. सिविजातके ४९९ ।

३. असिलक्खणजातके १२६ ।

४. लित्तजातके ९१ ।

५. अब्भन्तरजातके २८१ ।

६. महावग्गे ८.१.३१ ।

७. महावग्गे ६ अध्यायतः ।

८. महावग्गे ६.१३.१ ।

९. महावग्गे ८.१ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

from outside will illuminate the interior (of the body) so that the Viscera within the abdomen may be seen. Are there not bits of this tree in the dead wood carried by this child ?" Jivaka then attempted to find among the bits of wood those which possessed the marvellous powers taking one after the other, and placing each over the abdomen of the child, he obtained no illumination, but at last the two last bits of wood lighted up the interior of the child's body.

Cumston ; An Introduction to the History of medicine.

महाभारतानुसारं पुरा चतुर्विधाः वैद्याः—विष-शल्य-रोग-कृत्याहराश्च बभूवुः ।[1] उन्मादग्रस्तानां चिकित्सा—धूपैः, अंजनयोगैः, नस्यकर्मभिः, भेषजैश्च कृता ।[2]

महाभारतयुगे पशुचिकित्साया विकासोऽभवत् । महाराजाशोको मानवचिकित्सया सह पशुचिकित्सायाः सुव्यवस्थां कारितवान् । स प्रदेशेषु विदेशेषु च ओषधीनामारोपणाय साहाय्यमकरोत् । ग्रीकलेखकैर्भारतीयप्राचीनचिकित्सापद्धतिर्बहुमता ।

अर्थशास्त्रे आशुमृतकपरीक्षाया, वैज्ञानिकविधिश्चर्चितः । तद्यथा निर्देशमात्रम्—विषहतस्य भोजनशेषं पयोभिः परीक्षेत । हृदयादुद्धृत्याग्नौ प्रक्षिप्तं चिटचिटायदिन्द्रधनुर्वर्णं वा विषयुक्तं विद्यात् ।[3] अर्थशास्त्रे बहुविधद्रव्याणां समुपयोगेनाद्भुतकार्यप्रसाधकानि वस्तूनि निर्मातुमुपायाः विद्यन्ते । तथा हि—विद्युत्प्रदग्धोऽङ्गारोऽज्वालो वा विद्युत्प्रदग्धैः काष्ठैः गृहीतश्चानुवासितः कृत्तिकासु भरणीषु वा रौद्रेण कर्मणाभिहुतोऽग्निः प्रणीतश्च निष्प्रतीकारो दहति ।[4] पशुचिकित्सायै बहुविधप्रयोगा अर्थशास्त्रे चर्चिताः सन्तिः । तद्यथा—अश्वानां चिकित्सकाः शरीरह्रासवृद्धिप्रतीकारमृतुविभक्तं चाहारम् ।[5] सर्वेषां पशूनां भोजनव्यवस्था आयुर्वेदानुसारं नियता वर्तते ।

भारते यथा कायचिकित्सायाः प्रवर्तकः परवर्तियुगे चरको बभूव, तथैव शल्यचिकित्सायाः प्रवर्तकः सुश्रुत आसीत । वैद्यानामाचारपद्धतिश्चरकसुश्रुताभ्यां निर्दिष्टा । उपनयनकाले विद्यार्थी गुरुणादिष्टः—सर्वेषां प्राणिनां कुशलं तवाभीष्टं भवतु, प्रतिदिनं रोगिणां निरामयत्वाय सर्वविधप्रयत्नं कुरु । परेषां धनस्य कामनां मा कुरु । वेशादीनामाडम्बरं मा कुरु । मद्यं मा पिब । सर्वथा पापं वर्जनीयम् । आरोग्यसिद्धान्तानां चिन्तनं

१. महाभारते शान्तिपर्वणि ६९.५७ ।
२. तत्रैव १४.३४ ।
३. आशुमृतकपरीक्षाप्रकरणात् ।
४. परघातप्रयोगात् ।
५. अश्वाध्यक्षप्रकरणात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नित्यमेव करणीयम् । आत्मप्रशंसको मा भव । शत्रोरपि प्राप्यं ज्ञानं ग्रहणीयम् । गुरुभिः सह शालीनविधिना व्यवहारं कुरु । अथ शिष्योऽवदत्—तथा करोमीति ।[१]

सुश्रुतो वैद्येभ्यः शास्त्रज्ञत्वं कर्मकुशलत्वं च समानरूपेण महत्त्वपूर्णं मन्यते । तद्यथा सुश्रुतसंहितायाम्—

यस्तु केवलशास्त्रज्ञः कर्मस्वपरिनिष्ठितः ।
स मुह्यत्यातुरं प्राप्य भीरुरिवाहवम् ॥
यस्तु कर्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः ।
स सत्सु पूजां नाप्नोति वधं चर्च्छति राजतः ॥
उभावेतावनिपुणावसमर्थौ स्वकर्मणि ।
अर्धवेदधरावेतावेकपक्षाविव द्विजौ ॥ ३.४८-५०

शिष्यस्य कर्मकुशलत्वं विधातुं समीचीनाभ्यासिकशिक्षा प्रदत्ता । तथा हि—तत्र पुष्पफलालाबूकालिन्दकत्रपुसै (सो) र्वारुककर्कारुकप्रभृतिषु छेद्यविशेषान् दर्शयेत्;उत्कर्तनापकर्तनानि चोपदिशेत्; दृतिबस्तिप्रसेवकप्रभृतिषूदकपंकपूर्णेषु भेदयोग्याम्; सरोम्णि चर्मण्याततते लेख्यस्य; मृतपशुसिरासूत्पलनालेषु च वेध्यस्य; घुणोपहतकाष्ठवेणुनलनालीशुष्कालाबूमुखेष्वेष्यस्य; पनसबिम्बीबिल्वफलमज्जामृतपशुदन्तेष्वाहार्यस्य; मधूच्छिष्टोपलिप्ते शाल्मलीफलके विस्राव्यस्य; सूक्ष्मघनवस्त्रान्तयोर्मृदुचर्मान्तयोश्च सीव्यस्य; पुस्तमयपुरुषाङ्गप्रत्यङ्गविशेषेषु बन्धनयोग्याम्, मृदुषु मांसखण्डेष्वग्निक्षारयोग्याम्, मृदुचर्ममांसपेशीषूत्पलनालेषु च कर्णसन्धिबद्धबन्धयोग्याम्, उदकपूर्णघटपार्श्वस्रोतस्यलाबूमुखादिषु च नेत्रप्रणिधानबस्तिव्रणबस्तिपीडनयोग्यामिति ।[२] अपरं च—

सिरासु शिक्षितो नास्ति चला हि एताः स्वभावतः ।
मत्स्यवत् परिवर्तन्ते तस्माद्यत्नेन ताडयेत् ॥ ८·२०

शल्यचिकित्साया उपयोगो युद्धभूमिषु बभूव । तत्र वैद्यानामुपयोगं निर्दिशन् सुश्रुत आह—

स्कन्धावारे च महति राजगेहादनन्तरम् ।
भवेत्सन्निहितो वैद्यः सर्वोपकरणान्वितः ॥
तत्रस्थमेनं ध्वजवद्यशःख्याति समुच्छ्रितम् ।
उपसर्पन्त्यमोहेन विषशल्यामयार्दिताः ॥ ३४.१२.१३
पन्थानमुदकच्छायां भक्तं यवसमिन्धनम् ।
दूषयन्त्यरयस्तच्च जानीयाच्छोधयेत्तथा ॥

---

१. चरकसंहितायाः विमानस्थाने ८.११—१३ ।

२. सुश्रुतसंहितायाम् ९.३-५ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दोषागन्तुजमृत्युभ्यो रसमन्त्रविशारदौ ।
रक्षेतां नृपतिं नित्यं यत्तौ वद्यपुरोहितौ ॥ ३४.५, ७

ईदृशं राजाश्रयेणायुर्वेद शास्त्रंसमुन्नतं बभूव ।

व्रणितस्य चिकित्सार्थं विशिष्टागारा बभूवुः । तेषु शल्यागारेषु यन्त्रशास्त्रक्षाराग्नि-शलाका-श्रृङ्ग-जलौकालाबू-जाम्बवौष्ठ-पिचु-प्रोत-सूत्र-पत्र-पट्ट-मधु-घृत-वसा-पयः-तैल-तर्पण-कषायालेपन-कल्क-व्यजन-शीतोष्णोदक-कटाहादीनि परिकर्मिणश्च स्निग्धाः स्थिरा बलवन्तश्च ।[1]

शल्यकर्मणेऽसंख्यातानि यन्त्राणि बभूवुः । तथा हि—अस्थिनिष्कर्षणार्थं सिंहमुख-व्याघ्रमुख-वृकमुखादीनि चतुर्विंशति-यन्त्राणि; त्वग्मांस-सिरास्नायुनिर्हरणार्थं संनिग्रहा-निग्रहौ संदंशयन्त्रे, अष्टाविंशतिविधानि शलाकायन्त्राणि च । अपराणि शस्त्राणि—मण्डलाग्र-करपत्र-वृद्धिपत्र-नखशस्त्र-मुद्रिका-उत्पलपत्र-अर्धधार-सूची-कुशपत्र-त्रिकूर्चक-कुठारिका-बडिश-दन्तशङ्कु-आरापत्रादयः शल्यचिकित्सायां प्रयुक्ताः । बहूनि तत्रोप-यन्त्राणि बभूवुः ।[2] तद्यथा—रज्जु-वल्कल-लता-क्षाराग्निभेषजयन्त्रादीनि । व्रणानां सीवनं वेल्लित-गोफणिका-तुन्नसेवनी-ऋजुग्रन्थिविधिभिः कृतम् ।[3] व्रणबन्धनं वैज्ञानिक-विधिना कृतम् । तन्निदर्शयन् सुश्रुत आह—अवध्यमानो दंशमशकतृणकाष्ठोपलपांशु-शीतवातातपप्रभृतिभिर्विशेषैरभिहन्यते व्रणः, विविधवेदनोपद्रुतश्च दुष्टतामुपैति, आलेप-नादीनि चास्य विशोषमुपयान्ति ।[4] व्रणबन्धानानि चतुर्दशविधानि बभूवुः ।

उपकल्पनीय-सम्भार-प्रकरणे सुश्रुतः शल्यागारस्य विन्यासं निरूपितवान् । तत्र मनोरंजनकारिणां गाथा-आख्यायिकेतिहासपुराण-कुशलानां गीतवादित्रोल्लापकानां चोप-स्थितिः प्रकल्पिता । लावकपिंजलशशहरिणगोमृगमातृकादीनामवस्थानमासीत् । ईदृशीषु स्थितिषु रोगिणां परिचर्या सानन्दमभवत् । रोगिणां दृष्टिविलोभनं जनयितुं शोभा समारोपिता ।[5]

गुप्तयुगस्यायुर्वेदस्य प्रगतिर्वाग्भटस्याष्टाङ्गसङ्ग्रहेण परिचीयते ।[6] अस्मिन् ग्रन्थे कायचिकित्सां शल्यकर्म चाधिकृत्य बहवोऽभिनवप्रयोगा वर्तन्ते । तत्र चरकस्य सुश्रुतस्य च संहितयोर्ज्ञानं विशदभाषायां सङ्कलितम् ।

---

१. सुश्रुतसंहितायाम् ३४.२४ ।
२. तत्रैव ८.३–६ ।
३. सुश्रुतसंहितायाम् २५.२० ।
४. सुश्रुतसंहितायाम् १८.२९ ।
५. स्वप्नवासवदत्ते ५.३ ।
६. अपरोऽपि वाग्भटोऽष्टाङ्गहृदयसंहिताया रचयिता बभूव । खीष्टस्य पश्चात् सप्तमशतके तस्य प्रादुर्भावः सम्भावनीयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुप्तयुगस्यायुर्वेदमधिकृत्य रचितः कश्चित् गुप्तलिपौ विरचितो महत्त्वपूर्णग्रन्थः कस्मिंश्चित् स्तूपे तुर्किस्तानप्रदेशे प्राप्तः। ग्रन्थोऽयं ख्रीष्टाब्दे १८९० संवत्सरे कर्नलबावर-महोदयेन क्रीतः। अस्मिन् ग्रन्थे सप्ताध्यायाः सन्ति। ग्रन्थस्य नवनीतकप्रकरणे सर्वेषां प्राचीनायुर्वेदसंहितानां सारः संगृहीतः। तत्र चूर्ण-रस-क्वाथ-तैल-अन्तःप्रक्षेपण-अमृतपेय-लशुनादीनां प्रयोगा व्याख्याताः।

ख्रीष्टस्य पश्चादष्टमे शतके माधवकरः 'रुग्विनिश्चयः' इति ख्यातं ग्रन्थं लिखितवान्। ग्रन्थोऽयं रोगनिदानशास्त्रस्य तदानीन्तनविशिष्टप्रगतिं निदर्शयति। ख्रीष्टस्य पश्चात् १०६० संवत्सरे चक्रपाणिदत्तः चिकित्सासारसङ्ग्रहं रचितवान्। ततः परं मिल्हणः १२२४ संवत्सरे २५०० श्लोकप्रमाणं चिकित्सामृतं लिखितवान्। शार्ङ्गधरसंहितायां पारद-अफ़ेनादीनां चिकित्सोपयोगा निर्दिशिताः। नाडीज्ञानस्य महत्त्वं तत्र व्याख्यातम्।

गुप्तयुगे वृक्षायुर्वेदस्य पशुचिकित्सायाश्च उन्नतिर्बभूव। वराहमिहिरस्य बृहत्संहितायां वृक्षचिकित्साप्रकरणं विद्यते।[1] पालकाप्यो हस्त्यायुर्वेदं रचितवान्। अस्मिन् ग्रन्थे १६० अध्याया हस्तिरोगाणां परीक्षणं निदानं चाधिकृत्य वर्तन्ते। तत्र शल्यचिकित्सायाः प्रकरणं विद्यते। पौराणिकसाहित्ये यत्र तत्र पशुचिकित्साया विवरणं समुदाहृतम्।[2]

भारतीयचिकित्सापद्धतेः सर्वोत्कृष्टता वैदेशिकविद्वद्भिरपि प्रमाणिता। तथा हि—

In modern days European surgery has borrowed the operation of rhinoplasty or the formation of artificial noses from India, where English men became acquainted with the art in the last century.

Macdonell : History of Sanskrit Literature p. 427,

Indian medicine dealt with the whole area of the science. It described the structure of the body; its organs, ligaments, muscles, vessels and tissues. The materia medica of the Hindus embraces a vast collection of drugs belonging to the mineral, vegetable and animal kingdoms, many of which have been adopted by European physicians. Their pharmacy contained ingenious processes of preparation, with elaborate directions for the

---

१. वृक्षायुर्वेदस्य प्रकरणमग्निपुराणे २८१ अध्याये वर्तते।

२. गरुडपुराणे १९७ अध्याये। अग्निपुराणे २८६ अध्याये गजचिकित्सावर्णनं वर्तते। तत्रैव २८७-२८९ अध्याये अश्वचिकित्साया विवेचनं कृतम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

administration and classification of medicines. Much attention was devoted to hygiene, regimen of the body and diet.[१]

From the evidences we have adduced all along there can now be scarcely any question as regards the priority of the Hindus in making mercurial remedies a speciality, and they are entitled to claim originality in respect of the internal administration of metal generally, seeing that Charaka and Susruta, not to speak of the later Tantras eloquent over their virtues.[२]

प्रकीर्णकानि विज्ञानानि

उपर्युक्तविज्ञानविषयाणामध्ययनं बहुविधविज्ञानभेदान् समन्वयतीति निःसन्दिग्धमेव। प्रथमं तावदायुर्वेद एव वनस्पतिविज्ञानं रसायनशास्त्रं भौतिकविज्ञानं मनोविज्ञानं धातुविज्ञानं प्राणिशास्त्रं च समन्वयति। ज्योतिषे भौतिकविज्ञानस्यावश्यकता वर्तते। संस्कृतेः समारम्भादेव भोज्यपदार्थानां विश्लेषणं कृषिकर्म, शस्त्राणां यन्त्राणां प्रयोगश्च धातूनां शोधनं प्रयोगश्च, रंगाणां निर्माणं चित्रणं च प्रसाधनद्रव्यनिर्माणं विज्ञानबलेन निष्पादितानि। अपरं च दार्शनिकाः प्राकृतिकतत्त्वानां गुणपरिभाषादीनां व्याख्यानं कृतवन्तः।

रसायनविज्ञानम्

रसायनविज्ञानस्य व्यावहारिकस्वरूपं सर्वप्रथमं कौटिल्यस्यार्थशास्त्रे व्याख्यातम्। अर्थशास्त्रस्यौपनिषदिकप्रकरणे विषस्योपकल्पनं बहुविधसामग्रीणां संयोजनेन प्रदर्शितम्। तद्यथा—धामार्गवयातुधानमूलं भल्लातकपुष्पचूर्णयुक्तमार्धमासिकः। अर्थशास्त्रस्य प्रलम्भनप्रकरणे बुभुक्षानिवारणस्य द्रव्यस्योपकल्पनं निर्दिशतम्—शिरीषोदुम्बरशमीचूर्णसर्पिषा संहृत्यार्धमासिकः क्षुद्योगः। रसायनदृष्ट्या महत्त्वपूर्णमुपकल्पनमङ्गारस्योपरि गमनाय निर्दिशतम्। तथा हि—पारिभद्रकप्रतिबलावञ्जुलवज्रकदलीमूलकल्केन मण्डूकवसादिग्धेन तैलेनाभ्यक्तपादोऽङ्गारेषु गच्छति।

अर्थशास्त्रे धातुशोधनस्य विविधप्रयोगा वर्तन्ते। तद्यथा—तुत्थोद्गतं गौडिकं काम्बुकं चाक्रवालिकं च रूप्यम्। श्वेतं स्निग्धं मृदु च श्रेष्ठम्। विपर्यये स्फोटनं च

---

1. Sir William Hunter : Imperial Indian Gazetteer 'India' p. 120
2. P. C. Ray : History of Hindu Chemistry, Introduction p. L XII

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुंष्टम् । तत्सीसचतुर्भागेन शोधयेत् । उद्गतचूलिकमच्छं भ्राजिष्णु दधिवर्णं च शुद्धम् ।[१] विविधधातूनां रञ्जनविधिः प्रयुक्तो बभूव । तथा हि—तपनीयमुज्ज्वाल्य रागत्रिभागं दद्यात्, पीतरागं भवति । श्वेततारभागो द्वावेकस्तपनीयस्य मुद्गवर्णं करोति । कालायसस्यार्धभागाभ्यक्तं कृष्णं भवति । प्रतिलेपिना—रसेन द्विगुणाभ्यक्तं तपनीयं शुकपत्रवर्णं भवति । तस्यारम्भे रागविशेषेषु प्रतिवर्णिकां गृह्णीयात् । तीक्ष्णताम्रसंस्कारं च बुद्धयेत् । तस्माद्वज्रमणिमुक्ताप्रवालरूपाणामपनेयिमानं च रूप्यसुवर्णभाण्डबन्धप्रमाणानि चेति ।[२]

अर्थशास्त्रानुसारं कृषिकर्मणि रसायनविद्योपयुक्तासीत् । तथा हि—प्ररूढांश्चाशुष्ककटुमत्स्यांश्च स्नुहीक्षीरेण वापयेत् ।[३]

सुरायाः निष्पादनमपि रसायनमपेक्षते । विविधद्रव्याणां मिश्रणेन सुरोपकल्पिता ।[४]

भारतीयरसायनस्य कश्चिद् विशिष्टाभ्युदयो नागार्जुनस्यानुसन्धानमधिकृत्य प्रवर्तितः । नागार्जुनस्य प्रादुर्भावः संभवतः खीष्टस्य पश्चात् द्वितीये शतकेऽभवत् । नागार्जुनस्य रसरत्नाकरे रासायनिकद्रव्याणां शोधनमारण-रूपपरिवर्तन-द्रव्यपरिवर्त्तनादीन् विषयानधिकृत्य सामग्री वर्तते । तथा हि रसरत्नाकरे—

किमत्र चित्रं यदि पीतगन्धकः पलाशनिर्यासरसेन शोधितः ।
आरण्यकैरुत्पलकैस्तु पाचितः करोति तारं त्रिपुटेन काञ्चनम् ॥
क्षारस्नेहैश्च धान्याम्लै रसकं भावितं बहु ।
ऊर्णा लाक्षा तथा पथ्या भूलता धूमसंयुतम् ॥ १.२,३१

परवर्तियुगे नागार्जुनेन प्रवर्तितस्य विज्ञानस्य परम्परा रसार्णवे रसेन्द्रचूडामणौ रसहृदये रसराजलक्ष्म्यां रसरत्नसमुच्चये च विकसिता ।

क्षारोपकल्पनस्य रीतिः प्रथममर्थशास्त्रेण परिचीयते । परवर्तियुगे सुश्रुतसंहितायामौषधप्रयोगे विविधक्षाराणां निर्माणविधिः प्रभावश्च निर्दशितौ । तथा हि—पानीयस्तु गरगुल्मोदराग्निसङ्गाजीर्णारोचकानाह । शर्कराश्मर्याभ्यन्तरविद्रधिकृमिविषार्शःसूपयुज्यते ।[५]

अग्निचूर्णस्य प्रथमोल्लेखः स्पष्टरूपेण वाल्मीके रामायणे वर्तते । तद्यथा—

अग्निचूर्णमिवाविद्धं भास्वराम्बुमहोरगम् ।
सुरारिविषयं घोरं पातालविषमं सदा ॥ युद्धकाण्डे ४.११९

---

१ २. सुवर्णाध्यक्षप्रकरणात् ।

३. सीताध्यक्षप्रकरणात् ।

४, सुराध्यक्षप्रकरणात् ।

५, सुश्रुतसंहितायाम् ११.८ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाभारतेऽपि 'साग्निः सगुडश्शृङ्गिका' उल्लिखिता ।[1] अग्निचूर्णस्य विशिष्टोपयोगः निर्माणविधिश्च शुक्रनीतौ वर्णितौ ।[2]

भौतिकविज्ञानम्

उपनिषद्युगे देवविद्यायाः नक्षत्रविद्यायाश्चाध्ययनं कृतम् ।[3] ते भौतिकविज्ञानस्य परिधौ समन्विते । दर्शनशास्त्रे पंचतत्त्वानां वैज्ञानिकानुशीलनं कृतम् । तेषां प्राथमिकस्वरूपमणुपरमाणुतः सिद्धमिति पर्यालोचितम् । आकाशादीनां गुणा विभाव्यन्ते स्म । तदधिकृत्य विल्सनमहोदयेन लिखितम्––The Hindus early adopted the doctrine that there is no vacuum in nature but observing that air was excluded under various circumstances from space, they devised, in order to account for the separation of particles, a subtle element or ether by which all interstices, the most minute and inaccessible, were pervaded which modern philosophy intimates some tendency to adopt, as regards the planetary movements and it was to this subtle element that they ascribed the property of conveying sound, in which they were so far right that in vacuo there can be no sound. Air again is said to be possessed of the faculty of touch, that it is the medium through which the contact of the body is effected—ether keeps them apart—air impels them together. Fire or rather light has the property of figure—Mr. Colebrooke renders it of colour. In either case the theory is true, for neither colour nor form is discernible except through the medium of light. Water has the property of taste an affirmation which is perfectly true, for nothing is sensible to the palate until it is dissolved by the natural fluids.[४]

गुप्तयुगे वराहमिहिरः वर्षादायिनां मेघाना वायूनां च लक्षणानि निर्धारितवान् ।[५]

---

१. वनपर्वणि १५.८ ।

२. शु० नी० १०२८—१०४२ ।

३. छान्दोग्योपनिषदि ७.१.२ ।

४. Mill : India vol. II p. 95

५. बृहत्संहितायाम् २१–२८ अध्यायाः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वनस्पतिविज्ञानम्

ऋग्वेदानुसारमोषधीनां वैदिकयुगे पर्यालोचनाय वैद्या अवसरं प्राप्तवन्तः । यतः

यत्रोषधीः समग्मत राजानः समिताविव ।
विप्रः स उच्यते भिषग् रक्षोहामीवचातनः ॥ ऋग्वेदे १०.९७.६

परवर्तियुगे सदैव वनस्पतीनां बहुविधोपयोगितानुसन्धीयते स्म । वनेषूपवनेषु च तेषां मूलपत्रपुष्पफलकाष्ठवल्कलरसादीनां वैज्ञानिकविवेचनेन तेषामुपयोगित्वं हानिकरत्वं वा निर्धारितम् । विलसनमहोदयः प्राचीनभारतीयवनस्पतिविज्ञानमधिकृत्य प्रमाणयति—
They (the Hindus) were very careful observers both of the internal and external properties of plants and furnished, copious lists of the vegetable world, with sensible notices of their uses, and names significant of their peculiarities.[1]

कौटिल्यस्यार्थशास्त्रे सीताध्यक्षप्रकरणे वनस्पतिशास्त्रस्य महत्त्वपूर्णशोधा विविक्ताः सन्ति । गुप्तयुगे वराहमिहिरो बृहत्संहितायामुपवनविद्यामधिकृत्य वैज्ञानिकप्रयोगान् समुदाहृतवान् । ऋतुं विहाय फलदानोपायाः सम्यग्वर्णिताः सन्ति । बृहत्संहिताया वृक्षायुर्वेदप्रकरणे वनस्पतिशास्त्रस्य कश्चिदभिनवोन्मेषः प्रादर्शि ।

प्राणिशास्त्रम्[2]

संस्कृतेः समारम्भात्प्रभृति पशूनामुपयोगिता-विषयेऽनुसन्धानमकारि । भक्षणार्थं पशूनां प्रथमोपयोगः । ततः कतिपयपशवो वाहनसमर्था भवन्ति कृषिकर्मणे वोपयोगिनः सन्ति । मनोरंजनार्थं बहवः पशवः पालिताः शिक्षिताश्च । चिकित्सार्थं पशूनां मांस-रक्त-स्नायु-वसास्थिश्रृङ्गादयः प्रयुक्ताः । पशुचिकित्सायाः समारम्भो वैदिककालतः प्रायः सदैव बभूव । तस्मै प्रयोजनाय पशूनामाहारविहारादयः पर्यालोच्यन्ते स्म ।

जैनसंस्कृतौ एकेन्द्रिय-द्वीन्द्रियादयः प्राणिनः समाज्ञायन्त । वृक्षा अपि सप्राणाः सन्तीति विशदीकृतम् ।

सूक्ष्मप्राणिनामस्तित्वं स्पष्टरूपेण महाभारते निर्धारितम् । तथा हि—

सूक्ष्मयोनीनि भूतानि तर्कगम्यानि कानिचित् ।
पक्ष्मणोऽपि निपातेन तेषां स्यात् स्कन्धपर्ययः ॥ शान्ति० १५.२६

अर्थशास्त्रे सूनाध्यक्षश्वाध्यक्ष-गोऽध्यक्ष-हस्त्यध्यक्षादि-प्रकरणेषु पशुसम्बन्धि-विज्ञा-

---

१. Mill's History of India Vol II p, 97
२. पद्मपुराणानुसारं प्राणिशास्त्रं तु जीवविज्ञानमेव । २४.६३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नस्य प्रगतिः परिचीयते । गुप्तयुगस्य वराहमिहिरस्य बृहत्संहितायां गजाश्वकुक्कुरादीनां शोभनाशोभनलक्षणानां विवेचनं वरीवर्ति ।

धातुशास्त्रम्

नवीनप्रस्तरयुगादेव स्वर्णादिधातव उपायुज्यन्त । तत्र भूगर्भात् सिन्धुगर्भात् पर्वतशिखरात् च बहुमूल्यरत्नमौक्तिकमाणिक्यादीनि समाह्रियन्त । रत्नपरीक्षाप्रकरणमर्थशास्त्रे बृहत्संहितायां च महत्त्वपूर्णमेव । धातुविज्ञानस्य चरमोत्कर्षे दिल्लीनगरस्य गुप्तयुगस्य लौहस्तम्भे वर्तते । अधुनापि तस्मिन् स्तम्भे कश्चिद्विकारो न परिलक्ष्यते । तस्य स्तम्भस्य निर्माणमपि किमपि विस्मयकरं कौशलं प्रकटयति । योरपप्रदेशे विज्ञानबलेन गुप्तयुगस्य सहस्रवर्षं पश्चादपि तादृशो लौहसंस्कारो न जातः ।

यन्त्रविज्ञानम्

ऋग्वेदानुसारं यन्त्रप्रयोगस्य प्रचलनमासीत् । तद्यथा—

सविता यन्त्रैः पृथिवीमरम्णात् १०.१४९.१

वैदिकयुगेऽथर्ववेदानुसारं कृत्या यन्त्रप्रवर्तितासीदिति प्रतिभाति । मूर्तिमयी सा स्वयमेव चलितुं समर्था बभूव । परवर्तियुगे रामायणानुसारं रामसेतोः रचना तन्त्रोद्धृताभिः शिलाभिः कृता । महाभारतयुगे युद्धोपयोगि यन्त्रसूत्रं विरचितम् ।[1] दुर्गेषु यन्त्राणि युद्धार्थं न्यस्तानि । गीताया अधोलिखितश्लोको यन्त्रस्य परिचालनशक्ति निःसन्देहमेव प्रमाणीकरोति—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥

कौटिल्येनार्थशास्त्रे युद्धार्थं बहुविधयन्त्राणामुपयोगो विज्ञापितः । तथा हि॰चक्रयन्त्रं भ्रमणशीलम् आसीत् । स्थितयन्त्रं कस्मिंश्चिदधिष्ठाने स्थिरमभवत् । चलयन्त्राणि इतस्ततः प्रयोगार्थं नीतानि ।[2] मनुस्तु महायन्त्रप्रवर्तनमुपपातकमेव गणयति ।[3]

यन्त्रनिर्माणविधिः न क्वचिदपि स्पष्टं विशदीकृतः । तत्र भारतीयान्धविश्वास एव कारणं यत् लिखनेन तस्य प्रभावो विनश्यति । इदमेव परिलक्ष्य समराङ्गणसूत्रधारे प्रोक्तम्—

---

१. सभापर्वणि ५.१२४
२. आयुधागाराध्यक्षप्रकरणात्
३. मनुस्मृतौ ११.६३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यन्त्राणां घटना नोक्ता गुप्त्यर्थं नाज्ञतावशात् ।
तत्र हेतुरयं ज्ञेयो व्यक्ता नैते फलप्रदाः ॥[1]

सिद्धान्तशिरोमणौ भास्कराचार्येण पारदद्वारा चालितस्य यन्त्रस्य वर्णनं कृतम् ।

विमानविज्ञानम्

भारतीया विमानं रचितवन्तो न वेति सन्दिग्धोऽयं विषयः । साहित्यिकप्रमाणै-र्विमान-रचना प्रमाणितैव वर्तते । रामायणानुसारं रावणस्य राजधान्यां बहवो विमाना आसन् । पुष्पकविमानस्य कथा सुविदितैव । महाभारतानुसारं देवानां विमाना विश्व-कर्मणा रचिताः ।[2] अपरं च—शिशुपालस्य भ्राता शाल्वः सौभविमानं युद्धार्थं प्रयुक्त-वान् ।[3] कालिदासीये रघुवंशे, अभिज्ञानशाकुन्तले च विमानयात्रावर्णनं वास्तविकं प्रतिभासते ।

विमानरचना-विधिः समराङ्गणसूत्रे वर्तते । भरद्वाजेन रचिते वैमानिकशास्त्रे विमानरचना-रीतिवर्तते ।[4] तदनुसृत्य १८९० ख्रीष्टसंवत्सरे मुम्बय्यां विमानो निर्मितः । स विमान आकाशे उदडीयत ।

---

१. समराङ्गणे ३१ अध्यायतः
२. आदिपर्वणि ६६.२९
३. वनपर्वणि १४ अध्यायतः
४. मैसूरनगरस्य एकेडेमी आफ संस्कृतरिसर्च संस्थायाः संचालकेनास्य ग्रन्थस्य हस्तलिखितप्रति-लिपिः प्राप्तेति संवादः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

काव्यसाधना

काव्यरचना क्वचित् स्वान्तःसुखाय भवति, क्वचित् श्रोतॄणामास्वादनाय भवति, क्वचिदपि च देवादीनां स्तवनार्थं भवति।[1] काव्यस्वरूपमुपर्युक्तैः सर्वैः प्रकरणैर्निर्धार्यते।

वर्ण्यविषयाः

नास्ति किंचिदपि जगति यदधिकृत्य कवयः काव्यं कर्तुं न समर्थाः। किन्तु श्रेष्ठकाव्यस्य सर्जनार्थमुदात्तविषयाणां समक्षता तेषां स्वीकरणं चापेक्षितं भवति।

भारतस्य विशालप्रांगणे प्रकृत्या समुपस्थापितानां वस्तूनां—पर्वतनदी-समुद्र-कासार-वन-सूर्य-चन्द्र-नक्षत्र-सायं-प्रातः-रजनी-ऋतूनां च शोभा सर्वातिशायिनी वर्तते। तत्रापि देवर्षिमहामानवानामुदारचारितानि श्रद्धास्पदं प्रभावोत्पादकानि च सन्ति।

ऋग्वेदः

भारते काव्यस्याद्यतमं रूपं खीष्टतः त्रिसहस्रवर्षं प्रागेव रचिते वैदिकसाहित्ये प्रतिभासते। तत्र ऋग्वेदः प्रमुखः श्रेष्ठश्च विद्यते।[2] ऋग्वेदे प्राकृतिकविभूतीनामाध्यात्मिकस्वरूपमधिकृत्य देवभावेन तासां वर्णनं विद्यते। पृथ्वी-सरस्वती-रात्रि-सूर्याग्नि-पर्जन्योषो-मरुदादीनां वर्ण्यविषयाः सन्ति। अन्ये देवाः—इन्द्र-वरुण-विष्णु-रुद्रादयः सन्ति। तेषां पराक्रमा मानवताया अभ्युत्थानाय वर्तन्ते। तद्यथा—इन्द्रस्य वृत्रविजयः, विष्णोः त्रिपदपराक्रमश्च। अश्विनोः परोपकारचरितानि प्रायो वर्णितानि।

महामानवानां चरितानि ऋग्वेदे आकलितानि। प्रायस्ते महाभागा ऋषयो राजानश्च बभूवुः। राज्ञां युद्धानि परमैश्वर्यपदानि बभूवुः। ऋषीणां तपश्चर्या तेषां व्यक्तित्वविकासार्थं बभूव। क्वचित् ऋषीणां राज्ञां च यज्ञकर्माणि वर्णितानि।

---

१. मम्मटानुसारं तु

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥

२. ऋग्वेदविषये रवीन्द्रनाथेन सम्यगुक्तम्—A poetic testament of a people's collective reaction to the wonder and awe of existence. A people of vigorous and unsophisticated imagination awakened at the very dawn of civilisation to a sense of in exhaustible mystery that is implicit in life.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महाभारतं रामायणं च

महाभारते वर्ण्यविषयाणां विपुलत्वं प्रकटति । तथा हि—

धर्मशास्त्रमिदं पुण्यमर्थशास्त्रमिदं परम् ।
मोक्षशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥
धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥
अष्टादशपुराणानि धर्मशास्त्राणि सर्वशः ।
वेदाः साङ्गास्तथैकत्र भारतं चैकतः स्थितम् ॥[1]

सृष्टेरादिकालादेर्यद्वैचित्र्यपूर्णं कथापरम्परया स्मरणीयं च मतं तत्सर्वं खलु महाभारते साररूपेण सन्दृब्धमेव । ग्रन्थोऽयं वर्णाश्रमधर्मपरायणः । सर्वेषु वर्णेषु सर्वेषु आश्रमेषु च यस्या उदारजीवनपद्धतेर्दर्शनं विमर्शनं वा कृतं तस्या व्यावहारिकरूपं कथासूत्रेण महाभारते ग्रथितम् । अस्य महाभारतस्य 'श्रीमद्भगवद्गीता' प्रकरणं विशिष्टमेव । समस्तस्य भारतस्य परवर्तिकविभ्यो ग्रन्थोऽयमुपजीव्यो वर्तते ।

रामायणे रामस्य चरितगाथामाश्रित्य तदानीन्तनराष्ट्रविलसितं प्ररोचितम् । तत्र कौटुम्बिकं सामाजिकं चोत्तरदायित्वं परिवोढुं समुत्सुका ये जनास्तेषां कृते कल्याणसर्वस्वमेव परिपूरितम् । रामचरिते शाश्वतरूपेणादर्शः समारोपितः । रामस्य परिवारो जगतः संक्षिप्तस्वरूपमेव । तस्मिन् परिवारे सर्वेषां व्यक्तित्वस्य विकासनं सर्वेषां जीवनधाराया उदात्तीकरणं च रामचरितस्य वैशिष्ट्यम् । रामकृष्णौ वैदिकसाहित्येऽपि प्राक्कलितौ ।[2]

महाकाव्यानि

भारते महाकाव्यसाहित्यस्य प्रवर्तनं महाभारतरामायणादिभिः काव्यैर्भवति तत्र रामायणमादिकाव्यम् । अश्वघोषेण रचितं महाकाव्यमिति ख्यातं बुद्धचरितं प्रथमेव । अश्वघोषस्य द्वितीयं महाकाव्यं सौन्दरनन्दमस्ति । द्वयोर्महाकाव्ययोर्वर्ण्यविषयो गौतमबुद्धस्य व्यक्तित्वमधिकृत्य वर्तते । बुद्धचरिते गौतमस्य बाल्यतः प्रभृति चरितगाथा वर्तते । गौतमोऽयं भारतस्य सांस्कृतिकाभ्युत्थानकारिणामेक एव महर्षिरासीत् ।

सौन्दरनन्दे गौतमस्योपदेशानुकूलं नन्दस्य व्यक्तित्वविकसनप्रक्रिया प्रकटीकृता । कामुको नन्द उपराजपदं परित्यज्य कथं निर्वाणपथमचरत्, मानवतायाः कल्याणाय किमकरोदिति सौन्दरनन्दे वर्णितम् ।

कालिदासो रघुवंशस्य कुमारसम्भवस्य च रचयितास्ति । रघुवशे रघुवंशीयराजानां

---

१. आदिपर्वणि ६२.२३,५३ तथा स्वर्गारोहणपर्वणि ५.४६ ।
२. राम ऋग्वेदे १०.९३.१४ मन्त्रे कृष्णाश्च ऋग्वेदे ८-८५-१३ मन्त्रे ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुख्यतो रामस्य चरितं वर्णितम् । आत्मनः काव्यप्रवृत्तिमालोचयन् कालिदासः प्रोक्तवान्—

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥

उपर्युक्तश्लोकेन वर्ण्यविषयस्योदार्यं व्यज्यते । दिलीपस्य गोचारणप्रसङ्गेन रघोः कौत्ससाहाय्यप्रकरणेन चोपर्युक्तव्यवहारः प्रमाणीक्रियते ।

कुमारसम्भवे देवानां मानवानां च साहाय्यं कुमारस्य कार्तिकेयस्य जन्मकथा वर्णिता ।

किरातार्जुनीयम्, शिशुपालवधम्, नैषधचरितञ्चान्यानिप्रमुखमहाकाव्यानि सन्ति । प्रमुखमहाकाव्यानां वर्ण्यविषस्य दिङ्मात्रनिर्देशेन तस्य वैविध्यं प्रमाणितं भवति । तत्र कतिपयमहाकाव्यानामितिवृत्तानि महाभारतादुद्धृतानि सन्ति । इतिवृत्तानामियत्ता महाकविभिः कदापि न स्वीकृता । आवश्यकतानुसारं मनोरमवर्ण्यविषयाणामुपरिष्टात् संयोजनं सदैव समीचीनं मतम् ।

महाकाव्यानां वर्ण्यविषयमधिकृत्य परिभाषितं साहित्यदर्पणे—

क्वचिन्निन्दा खलादीनां सतां च गुणकीर्तनम् ।
सन्ध्यासूर्येन्दुरजनीप्रदोषध्वान्तवासराः ।
प्रातर्मध्याह्नमृगयाशैलर्तु वनवासराः ।
सम्भोगविप्रलम्भौ च मुनिस्वर्गपुराध्वराः ।
रणप्रयाणोपयममन्त्रपुत्रोदयादयः ।
वर्णनीया यथायोगं साङ्गोपाङ्गा अमी इह ॥ ६.३१९, ३२२–३२४

उपर्युक्तविवेचनेन स्पष्टं प्रतिभाति यत् वर्ण्यविषयद्वारा महाकाव्येषु मानवतायाः समक्षमादर्शरूपेण महापुरुषाणां देवानामामृषीणां च चरितानि प्रस्तावितानि । अपरं च—प्रकृतौ मानवकृतिषु यानि परमौदार्यसम्पन्नानि मनोहराणि च वस्तूनि वर्तन्ते, तेषां काव्यमस्वरूपाणि महाकाव्येषु समुपस्थापितानि ।

नाटकानि

नाटचसाहित्यसमारम्भोऽश्वघोषस्य रूपकत्रयेण भवति ।[1] तेषु प्रथमं शारिपुत्र-प्रकरणम् । अस्मिन् प्रकरणे बुद्धोपदेशं श्रुत्वा शारिपुत्रस्य मौद्गल्यायनस्य च भिक्षुव्रत-धारणकथा वर्तते ।

१. अश्वघोषस्यनाटकानां परिपक्वतां दृष्ट्वा स्पष्टमेव प्रतिभाति यत् नाट्यकला तस्मिन् युगे विकसिता-ऽऽसीत् । अतः न तानि रूपकाणि नाट्यसाहित्ये प्रथमं स्थानमर्हन्ति । अपरं च पूर्वकालीन-साहित्ये पाणिनिसूत्रेषु महाभाष्ये च नाट्यसाहित्यस्योल्लेखाः प्राप्यन्ते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भासस्य त्रयोदशनाटकेषु कतिपयरामायणमहाभारतकथा उपनिबद्धाः। सर्वाः कथा वीरभावपूर्णा औदार्यसम्पन्ना वा प्रतिभान्ति। तद्यथा—कर्णभारानुसारं कर्ण इन्द्राय कवचकुण्डले प्रदत्तवान्। ऊरुभङ्गे दुर्योधनभीमयोर्युद्धं वर्णितम्। कतिपयनाटकेषु प्रणयकथा निगदिताः। तद्यथा—चारुदत्ते वसन्तसेनाचारुदत्तयोः, स्वप्नवासवदत्तायामुदयनपद्मावत्योश्च प्रेमकथा वर्तते। मध्यमव्यायोगे ब्राह्मणकुलरक्षणार्थं भीमस्य केनचिद्राक्षसेन सह युद्धं वर्णितम्।

शूद्रकस्य मृच्छकटिके विशुद्धप्रेम्णो गाथा विद्यते। प्रेममार्गस्य बाधा असंख्याता भवन्ति। अन्ततो राजकीयप्रपंचेन प्रणयकथाया नायकस्य चारुदत्तस्य मृत्युदण्डो घोषितः। तदनन्तरं चारुदत्तस्य सहायक आर्यको राजानं हत्वा स्वयमेव शासको भवति। अस्मिन् नाटके तदानीन्तनसमाजस्य विविधवर्गाः—व्यापारी, वेश्या, चौरः, द्यूतकारः, धूर्तः, कुट्टनी चोपवर्णिताः।

कालिदासस्य नाटकत्रयेषु—मालविकाग्निमित्रविक्रमोर्वशीयाभिज्ञानशाकुन्तलेषु इतिवृत्तं प्रणयात्मकं सर्वत्र विद्यते। तेषां कथानामारम्भः संयोगवशादेव प्रणयिजनानां समागमेन भवति। अन्ततो विवाहस्य पश्चात् गार्हस्थ्यजीवनस्य सुखप्रदसंयोजनं सर्वत्र विद्यते।

प्रायः सर्वेषु परवर्तिनाटकेषु प्रणयकथा इतिवृत्तिरूपेण स्वीकृता। तद्यथा—श्रीहर्षस्य रत्नावली-प्रियदर्शिका-नागानन्दानि, भवभूतेः मालतीमाधवमुत्तररामचरितं च। अपवादरूपेण भवभूतेर्महावीरचरितं भट्टनारायणस्य वेणीसंहारं विशाखदत्तस्य मुद्राराक्षसं च वर्तन्ते। महावीरचरिते रामायणस्य प्रायः सम्पूर्णा कथा नाट्यरूपेण प्रस्तुता। वेणीसंहारे द्रौपद्या वेणीसंहारार्थं दुर्योधनस्योरुयुगलस्य शोणितं प्राप्तुं तेन सह युद्धं वर्णितम्। मुद्राराक्षसे कौटिल्यस्य कुटिलत्वेन चन्द्रगुप्तस्य पक्षे राक्षसस्य पतनं वर्णितम्। राजनीतेः कश्चिदपूर्व एव चमत्कारोऽस्य वर्ण्यविषयः। राजशेखरस्य द्वे नाटके बालरामायणं बालभारतं च क्रमशः रामायणमहाभारतयोः कथामुपनिबध्नीतः।

शृङ्गारप्रधानेषु काव्येषु क्वचिदुच्चादर्शाः कथामाध्यमेन प्रतिष्ठापिताः। तथा हि—नागानन्दे जीमूतवाहनः नागानां प्राणरक्षणायात्मबलिदानं करोति। उत्तररामचरिते तु रामः—

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा॥

इति प्रतिज्ञां सत्यापयति।

प्रणयप्रधाने नाटकसाहित्येऽपि भारतीयसंस्कृतेः सर्वोच्चादर्शाः संघटिता एव। निःसन्देहं कवयो नाटकेषु मानवानामुदात्तवृत्तिं प्रोत्तेजयितुं प्रयतवन्तः। प्रकृतेरौदार्यस्य निदर्शनमपि तदुद्दिश्य कृतं प्रतिभाति।[1]

---

१. उदाहरणार्थमभिज्ञानशाकुन्तले चतुर्थोऽङ्को द्रष्टव्यः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इदं परिलक्ष्य नाटकानामितिवृत्तमधिकृत्य साहित्यदर्पणे प्रोक्तम्—

नाटकं ख्यातवृत्तं स्यात्पंचसन्धिसमन्वितम् ।
विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥
नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् ।
आवश्यकानां कार्याणामविरोधाद्विनिर्मिताः ॥
दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः ।
विवाहो भोजनं शापोत्सर्गौ मृत्यू रतं तथा ॥
दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीडाकरं च यत् ।
शयनाधरपानादि नगराद्यवरोधनम् ॥
स्नानानुलेपने चैभिर्वर्जितो नातिविस्तरः ।
देवीपरिजनादीनाममात्यवणिजामपि ॥
प्रत्यक्षचित्रचरितैर्युक्तो भावरसोद्भवैः । ६.७,९,१४,१६-१९

उपर्युक्तवर्ण्यविषयाणां समाहारो भारतीयसंस्कृतिशिष्टाचारादिकमनुसृत्य कृत इति प्रत्यक्षम् ।

नायकान् परिलक्ष्य सिद्धान्तितं यत्—

नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ॥

तत्र धीरोदात्तो दशरूपके—

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ।
स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः ॥ २.१,२,४,५,

प्रायः सर्वेषु नाटकेषु सत्यस्य धर्मस्य च जयोऽन्यथा पराजयोऽभिव्यक्तः ।

कथाः

कथानां लोकप्रियता स्वाभाविकी प्रतिभाति । कथासूत्रेण विविधविषयाणाम्—इतिहास-भूगोल-राजनीति-धर्मार्थशास्त्र-विज्ञानादीनां सरलरीत्या प्रभावोत्पादकविधिना च व्याख्यानमक्रियत ।

भारतीयकथानां प्रथमः संग्रहः इतिहासपुराणेषु जातककथादिषु च प्राप्यते । आसु

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कथासु प्रायो जीवनयात्राया विविधमार्गेषु कथं प्रवर्तितव्यम् इति वर्णितम् । कथासु मनोरंजकसामग्री प्रचुरं विद्यते ।

संस्कृतभाषायां लघुकथानां सुप्रसिद्धसंकलनं पंचतन्त्रे विद्यते । तत्र कथानां पंचश्रृंखला:—मित्रभेद:, मित्रसम्प्राप्ति:, काकोलूकीय:, लब्धप्रणाश:, अपरीक्षितकारकश्च सन्ति । मित्रभेदतन्त्रे मित्राणां परस्परभेदेन कार्यं साध्यते दुर्वृत्तिभि: जनैरिति निर्दशितम् । मित्रसम्प्राप्तितन्त्रे सद्वृत्तानां कार्यसाधनं सन्मित्राणां साहाय्येन भवतीति प्रदर्शितम् । काकोलूकीये तन्त्रे—'शत्रोर्विश्वासो न कर्तव्य:' इति प्रमाणीकृतम् । लब्धप्रणाशतन्त्रे 'विपत्तिकाले प्रत्युत्पन्नबुद्धया कार्यं सिद्धयति' इति बोधितम् । अपरीक्षितकारके 'परीक्षणं विना कृतं कार्यं साफल्यं न विदधाति' इति प्रतिपादितम् ।

उपर्युक्तो वर्ण्यविषय: सर्वासु स्थितिषु सिद्धिप्राप्तये समाहृत इति लेखकेन विष्णुशर्मणा प्रोक्तम्—

अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च ।
न पराभवमाप्नोति शक्रादपि कदाचन ॥

ख्रीष्टस्य पश्चात् सप्तमे शतके दण्डिनो दशकुमारचरितम्, सुबन्वो: वासवदत्ता, बाणस्य कादम्बरी च रचितानि । अस्मिन् ग्रन्थत्रये प्रायश: प्रणयकथा: सप्रपञ्चं वर्णिता: । तत्र कादम्बर्यां त्यागस्योत्तम आदर्शो विभावित: । सुहृत् मित्राय, पितरौ पुत्राय, सेवक: स्वामिने चोदात्तभावनाभि: प्रेरिता अनुत्तरं त्यागं कुर्वन्त: प्रशंसिता एव । अपरं च कादम्बर्यां मानवगन्धर्वपाताललोकानां सर्वेषां मनोरमाणां वस्तूनां वर्णनं हृदयं रमयति । बाणस्य हर्षचरिते महाराजस्य हर्षवर्धनस्यैतिहासिककथा वर्णिता ।

कथानामेकापरा श्रृंखला गुणाढ्यरचिताया बृहत्कथाया आरभते । गुणाढ्येन 'बड्ढकहाओ' इति कथाग्रन्थ: पैशाचीभाषायां लिखित: । 'बड्ढकहाओ' कालान्तरे विनष्टा, किन्तु तस्या: कतिपयभागा: सोमदेवस्य कथासरित्सागरे, क्षेमेन्द्रस्य बृहत्कथामंजर्याम्, जयरथस्य हरचरितचिन्तामणौ च संकलिता: । एषां ग्रन्थानां विश्लेषणेन स्पष्टं प्रतिभाति यत् 'बड्ढकहाओ' तदानीन्तनप्रसिद्धकथानां महासंग्रहोऽभवत् । जीवनस्य विविधक्षेत्रेषु सुखदु:खात्मकपरिस्थितिषु विविधपदयोग्यतादिकमादधाना: जना: कीदृशं व्यवहरन्तीति ज्ञातुं कथासागरोऽयमवगाहनयोग्य: ।

गेयकाव्यानि

सूक्तानां गानस्य प्रचलनं संस्कृते: समारम्भादेवाभवत् । वैदिकसंस्कृतौ यज्ञविधानेषु प्राय: सामगानमक्रियत । ऋग्वेदस्यासंख्यसूक्तानि गेयपदान्येव प्रयुक्तानि । तेषु उष:सूक्तानि सुप्रसिद्धानि । परवर्तिसाहित्ये—महाभारते, रामायणे, पुराणेषु च देवपराणि स्तोत्राणि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गेयपदानि सन्ति । स्तोत्रेषु देवानां पराक्रमाः, तेषां कृपाप्रवृत्तयश्च भक्तिभावेन विभाविता विद्यन्ते ।

गेयकाव्येषु प्रथमपदं कालिदासस्य मेघदूतेनाहितमिति सुविदितमेव । मेघदूते कस्यचिद्यक्षस्य विरहिणः संवादस्तस्य प्रेयसीं प्रति निवेदयितुमेको मेघोऽभ्यर्थितः । प्रोषितो यक्षः सौहार्दभावेन मेघे स्वसन्देशं सन्निधापयति, रामगिरेर्यक्षपुरीपर्यन्तमाकाशमार्गनिर्देशनं च करोति । मेघदूते भारतीयप्रकृतेः—पशु-पक्षि-पर्वत-नदी-वायु-सरोवरादीनां सामञ्जस्यपूर्णगतिविधेरपूर्वं वर्णनं ग्रथितम् । तत्र प्रकृतेस्तदेव वन्दनीयं स्वरूपं चित्रितं यदौदार्येण सहानुभूत्या च परिव्याप्तं वर्तते । तथा हि प्रकृतेः समस्ततत्त्वानि मेघस्य समादराय स्वागताय च समुत्सुकानि सन्ति । मेघोऽपि नैसर्गिकाभिरामगुणैः प्रायशः प्रकृतेरलङ्करणमेव ।

ऋतुसंहारे कालिदासः षड्तूनां प्राकृतिकसौरभं प्रभावं च नायकमुखेन नायिकासमक्षं प्रस्तौति । तत्र शृङ्गारमयी प्रवृत्तिः स्वभावतः प्रमुखा वर्तते । ऋतूनामाश्रयेण भारतीया प्रकृतिः कथं नित्यमेवाभिनवं स्वरूपं विदधाना सहृदयानां प्रोल्लसनाय भवतीत्यत्रैव द्रष्टव्यम् ।

भर्तृहरेः शतकानि—नीतिशृङ्गारवैराग्यपराणि सन्ति । तेषु शतकेषु क्रमशः नीतेः शृङ्गारस्य वैराग्यस्य च स्वरूपं विविच्य तेषां परमार्थदृष्ट्या मूल्याङ्कनं कृतम् । तत्र वैराग्यस्य सर्वोत्कृष्टता प्रतिपादिता, यतः वैराग्येणैवापवर्गाणां श्रेष्ठो मोक्षो लभ्यो भवति । शृङ्गारशतकेऽपि मनोरमा रामाः पुरुषस्याभ्युदयपथे विषपूर्णा भोगिन्यो मताः ।

अमरुकवेः शृङ्गारशतकं तस्यामरत्वं विदधाति । अस्मिन् शतके गार्हस्थ्यजीवनस्योदात्तशृङ्गारमयप्रवृत्तीनामनर्गलप्रवाहः सामस्त्येन दर्शनीयः ।

जयदेवस्य गीतगोविन्दे गीतकाव्यस्य मनोहारिस्वरूपमनुत्तरमेव । अस्मिन् काव्ये कृष्णस्य राधाप्रमुखगोपिकाभिः सह वृन्दावनकुञ्जेषु यमुनापुलिनेषु च केलिविलसितानां साङ्गोपाङ्गवर्णनमाकृतम् । गेयपदेषु शब्दध्वनिना सह भावानामपूर्वसामञ्जस्यं दृश्यते । ईदृशे शृङ्गारमये काव्येऽपि कृष्णभक्तो जयदेवः स्वकीयाराध्यदेवस्य सर्वातिशायिदेवानुभावं समारोपयति ।

गीतकाव्यस्य क्षेत्रं मुक्तकानां सप्तशतीग्रन्थैः समृद्धीकृतम् । खीष्टस्य प्रथमशतके प्राकृतभाषायां गाथासप्तशती रचिता । तामाश्रित्य गोवर्धनाचार्यः खीष्टस्य पश्चात् द्वादशे शतके आर्यासप्तशतीं रचितवान् । ततः परं हिन्दीकविः विहारीति ख्यातः 'सतसई' प्रणीतवान् । तासु सर्वासु सप्तशतीषु शृङ्गारमयभावानां नायिकानायकस्योद्दामव्यापाराणां च चित्रणमेव वर्तते ।

भाषा

संस्कृतभाषाया भावाभिव्यञ्जनक्षमत्वं वैदिककालतः सुप्रसिद्धम् । तथा हि—शब्दसंख्याया

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैपुल्यं सुप्तिङ्गां प्राचुर्यम्, कृत्तद्धितानां वाहुल्यम्, शब्दशक्तीनां वैविध्यम्, काक्वादीनां वैचित्र्यं च भावाभिव्यञ्जनस्य संवर्धनाय बभूवुः। संस्कृतभाषाया विशेषान् परिलक्ष्य विलियमजोन्समहोदयेनाशंसितम्—

Sanskrit language is of a wonderful structure, more perfect than Greek, more copious than Latin, and more exquisitely refined than either. Asiatic Researches Vol I p. 422.

रवीन्द्रनाथानुसारं संस्कृते किमप्यद्भुतमेव स्वरवैचित्र्यं, ध्वनिगाम्भीर्यं स्वाभाविकाकर्षणं च वर्तन्ते। एतेषां सामञ्जस्येनैकतानता जायते यस्यां कापि अनिर्वचनीयता समुत्पद्यते। कवयस्तु सनैपुण्यं एतैः प्रगुणैर्लोकाननुरंजयन्ति।

कण्ठाग्रकरणरीत्या संस्कृतभाषायाः स्वरूपं चिरं स्थिरं समवर्तत। व्याकरण-परम्परापि भाषायाः स्वरूपमपरिवर्तनसहमकरोत्।

सूक्ष्मविचारणायां स्वल्पतमशब्दप्रयोगेण कार्यसाधनं संस्कृतस्यानुत्तमो विशेषः। श्रीकीथमहोदयेन तदधिकृत्य निर्दशितम्—The extraordinary power of compression which Sanskrit possesses etc.[1] भाषेयं क्वचिद्रागतालनृत्यानुकूलतां विधातुं समर्था।[2]

शैली

काव्यस्य प्राथमिकशैल्या उदाहरणमृग्वेदे वर्तते। रचना प्रायो देवानां परितोषाय कृता। कवीनां मनीषायां देवानां माहात्म्यमत्यधिकमासीत्। विविधकामनानां पूर्तये देवाः समर्था इति तैर्मतम्। देवानामीदृशी प्रतिष्ठा तानधिकृत्य प्रगुणकाव्यसर्जनाय बभूवेति निःसन्देहम्।

वैदिकशैली सरला प्रभावोत्पादिका च वर्तते। लघुवाक्यानि प्रायः समासरहितान्येव प्रयुक्तानि बभूवुः। वैदिकशैली प्राथमिकयुगे विशेषणविशिष्टा लक्ष्यते। एकस्य पदस्य कतिपयविशेषणप्रदाने कवयः कलायाः साफल्यं मेनिरे। अलङ्काराणां प्रायोऽभावो बभूव। क्वचित् संवादात्मकशैलीमनुसृत्य कवयः श्रोतॄणां सामीप्यं प्राप्तवन्तः।

ध्वनिः कविभिः प्रेयान् मतः। ध्वनिवलेन क्वचिदग्निः पुरोहितः, यज्ञस्य देवः, ऋत्विक्, होता, रत्नधातमश्च विभावितः। ईदृशेषु काव्येषु रसभावादीनां व्यञ्जनं सर्वत्र सम्भवति।

छन्दसां परिपाकः समुन्नत एव ऋग्वेदे वर्तते। तत्र पंचदशच्छन्दसां प्रयोगोऽभवत्।

---

1. A History of Sanskrit Literature p. 178.
2, Ibid p. 338.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आदिकाव्ये रामायणे काव्यशैली भव्या वर्तते । तत्र छन्दसामलङ्काराणां च वैविध्यं भावाभिव्यक्तये सुप्रयुक्तमिति स्पष्टम् । वर्णनेषु प्रायः सर्वत्र कविदृष्टिर्वस्तूनामुदात्तस्वरूपं प्रस्तौति। वाक्यरीतिः सरला बोधगम्या च वर्तते सर्वत्र। अनेन विधिना रामायणे सरसता सम्पादिता ।

वाल्मीकेः काव्यशैली आदर्शभूता परवर्तियुगेऽश्वघोषकालिदासादिभिः स्वीकृता । तेषां कवीनां काव्येषु भावाभिव्यक्तिः काव्यस्य प्रधानतत्त्वं मतम् । अलंकाराणां संयोजनं तत्र वस्तुस्वरूपस्य स्पष्टीकरणाय बभूवेति प्रतिभाति । अलंकारास्तु वस्तुतः स्वल्पसंख्यकैः शब्दैर्वस्तूनां विशदस्वरूपस्य चित्रणाय समीहिताः । गणच्छन्दसां स्वरूपं प्रथममश्वघोषस्य काव्येषु लालित्यपूर्णमजायत ।

वैदर्भी रीतिः कालिदासस्य रचनाभिः सुवासिता एव ।[1] कालिदासस्य भाषा सरला सती लावण्यमयी प्रतिभासते । तस्य भावाः परिष्कृताः सदाशयनिर्भराश्च सन्ति ।

अभिनवा अपि समालोचकाः कालिदासस्य सरलरचनारीतिं सूक्ष्मालङ्कारतां च प्रशंसन्ति । तद्यथा कीथमहोदय :—

His was the golden mean of Virgil between rustic simplicity and clumsiness and that over-refinement which is specially fatal. Thus it results that his miniature-painting in its polished elegance often attains relative perfection.

A History of Sanskrit literature p. 101.

कालिदासस्य युगे संस्कृतकाव्ये कृत्रिमालङ्काराणां शब्दगुम्फनवैचित्र्याणां च समारम्भोऽभवत् । परवर्तियुगे शब्दाडम्बरस्य रीतिः सविशेषं प्रचलिता दृश्यते । तथा हि— महाकविः भारविः माघश्च सरलरीतिं विहाय क्वचित् पाण्डित्यप्रदर्शनार्थमेव शब्दजालं प्रस्तुतवन्तौ । परिणामतः एकाक्षरश्लोकरचना, विविधबन्धयुक्ताः श्लोकाश्च चमत्कारार्थं पुरस्कृताः । तथापि भारवेर्माघस्य च काव्यशैली विशेषगुणानादधती समादृता वर्तते । प्राचीनालोचका भारवेरर्थगौरवं शैलीं च प्रशंसन्ति ।

रसालङ्काररीतिव्यंजनादीनां चरमोत्कर्षः श्रीहर्षस्य नैषधीयचरिते प्राप्यते । कविः स्वयमेव स्वकाव्यस्य परिचयार्थं कथयति—

'यत्काव्यं मधुवर्षि' 'शृङ्गारामृतशीतगुः' चेति ।

शृङ्गारामृतमिदं न सर्वैरास्वादनीयमिति स्पष्टीकृतं श्रीहर्षेण—

ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञंमन्यमना हठेन पठिती मास्मिन्खलः खेलतु ।

१. माधुर्यव्यंजकैर्वर्णैं रचना ललितात्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भीरीतिरिष्यते ॥ साहित्यदर्पणे ९.२.३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादय-
त्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः ॥

नाटककाराः प्रायः सदैव प्रगुणरचनारीतेरनुयायिनो बभूवुः । नाटकानि सर्वजनबोधाय भवन्त्विति विचारणा तत्र वैदर्भीरीतिं प्रतिष्ठापयति । तथापि युगप्रभावस्य सर्वव्यापि-प्रवर्तनं भवत्येव । भासस्य कालिदासस्य च नाटकानि सरलानि सन्ति, किन्तु परवर्ति-युगस्य 'उत्तररामचरितम्' 'वेणीसंहारम्' 'मुद्राराक्षसम्' वा न सर्वत्र सरलानि । तेषु नाटकेषु भारतीयकाव्यसौरभं शैलीदृष्टितः प्रायोऽनुत्तरमेव ।

गेयकाव्यानि नाटकसदृशानि सरलभाषया निबन्धनमर्हन्ति । तेषु शब्दाडम्बरस्या-वकाशो नास्त्येव । स्थानाभाव एव तत्र कारणं वर्तते । सरलभाषया निगदिताः श्लोका विशेषतो भर्तृहरेः शतकेषु, गीतगोविन्दे वा सविशेषं प्रभावोत्पादका भवन्ति ।

काव्यशैली कथासाहित्ये द्विविधा प्रवर्तते । लघुकथासु श्लोकनिबद्धकथासु च प्रायः सर्वत्र मनोरमा सरलभाषा वैदर्भीरीतिमनुसरति । किन्तु महाकथासु, आख्यायिकासु वा भाषा प्रायः समासबहुला, अलङ्कारभाराक्रान्ता च प्रवर्तते । पंचतन्त्रस्य, कथासरित्सा-गरस्य च भाषा सुबोधा एव । किन्तु बाणस्य कादम्बर्यां हर्षचरिते वा शब्दाडम्बरो भयङ्कर एव । तदधिकृत्य बाणेन स्वयमेव प्ररोचितम्—

नवोऽर्थो जातिरग्राम्या श्लेषोऽश्लिष्टः स्फुटो रसः ।
विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम् ॥

अपरेऽपि कथाकाराः सुबन्धुर्दण्डी धनपालादयः समासबहुलां सालङ्कारां शैलीमेव समाददुः ।

संस्कृतकाव्यशैली वर्ण्यविषयाणामौदार्यानुकूला सदैव समुन्नता बभूव ।

कवीनां व्यक्तित्वम्

वैदिककवय ऋषय इति ख्याताः । साधारणतस्ते ऋषयो भरद्वाजात्रिवसिष्ठवामदेव-कण्वादयो ज्ञानविज्ञानतपोभिः परिपूता बभूवुरिति तेषां रचनाभिरपि स्पष्टं प्रतिभाति । कवेः प्रतिभा ब्रह्म इति प्रसिद्धा देवैः प्रदत्ता मता । तस्याः प्रसूतिः ऋतस्य सदनाद् बभूवेति धारणासीत् ।[1] हृदयमेव काव्यस्याधिष्ठानं व्याख्यातम् ।[2] सोमपानेन तेषामृषीणां काव्यरचनाशक्तिः समुत्तेजिता बभूव ।[3]

१. ऋग्वेदे ७.३६.१ ।
२. ऋग्वेदे २.३५.२ ।
३. ऋग्वेदे १०.११६ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैदिकयुगे राजानः, सैनिकाः, वैश्याः, आर्येतराः, स्त्रियो वा कवयो बभूवुः ।[१] तत्र राजानो युद्धभूमेः स्वकीयमनुभवं निवेदितवन्तः ।

आर्येतरकवय ऊर्ध्वग्रावा, अरिष्टनेमिश्च सुप्रसिद्धौ । स्त्रीकविषु श्रद्धा, शची च प्रख्याते ।

रामायणमहाभारतयो रचयितारौ वाल्मीकिर्व्यासश्च श्रेष्ठमहर्षी बभूवतुः ।[२] तपोभिरेव तयोः कवित्वं प्रस्फुटितमिति प्रतिभाति । आचार्यस्य व्यासस्य दर्शन-राजनीति-युद्धशास्त्रादेर्ज्ञानं प्रकाममेवासीत् । वाल्मीकेः काव्यरचना दिव्या भव्या च देवानुग्रहैर्बभूव । काव्यादर्शस्य वृत्तिमनुवर्त्तमाना ऋषयोऽपि शृङ्गारवीरादिरसात्मकानि काव्याङ्गानि उपवर्णितवन्तः ।

परवर्तियुगे कवयो राजाश्रयं प्राप्तवन्तः । प्रथमं तावदश्वघोषः कनिष्कस्य राजसभामलंकृतवानिति श्रूयते । तथापि अश्वघोषस्य रचनायां क्वचिदपि राज्ञां रुचेरनुवर्तनं न दृश्यते । तस्य काव्यप्रणयनोत्साह ऋषिवदेवासीत् । स बौद्धसंस्कृतेर्महानुन्नायकोऽभवदिति विदितमेव ।

परवर्तियुगीना राजानः कवयश्च परस्परं श्रद्दधते स्म । तथा हि वासुदेवः, सातवाहनः, शूद्रकः, साहसाङ्कः, विक्रमादित्यः, भोजश्च तादृशाः प्रमुखा राजानो बभूवुः । कालिदासः, मेण्ठः, अमरः, भारविश्च उज्जयिन्यां राजसमाश्रयं प्राप्तवन्तः । बाणो हर्षवर्धनस्य राजसभामलंकृतवान् । वाक्पतिराजो राजशेखरो श्रीहर्षश्च राजसमाश्रय लेभिरे । तत्र राजसभायां काव्यस्य समुन्नतेरवसरोऽविद्यत ।[३] परस्परस्पर्धया नित्यमेवोच्चतरकाव्यस्य रचना समभवत् । कतिपये राजानः श्रेष्ठकवयो बभूवुः ।

राजाश्रयं प्राप्यापि स्वल्पा एव कवयो राजप्रशस्ति कृतवन्तः । कविप्रतिभा राजधान्यामपि कुण्ठिता न बभूव । किन्तु शृङ्गाररसस्य वीररसस्य च प्राधान्यं राजकवीनां रचनासु स्वाभाविकमेवास्ति । ख्रीष्टतः प्राक् काव्यस्य प्रणयनं प्रायश्चतुर्वर्गाणाम्—विशेषतो धर्ममोक्षयोर्व्याख्यानाय बभूव । ख्रीष्टस्य पश्चात् काव्यरचना नागरिकाणां मनोरञ्जनेन सह तेषां चित्तवृत्तिसंस्काराय बभूव ।

'प्रतिभाशालिन एव विद्वांसः कविपद्धतिमनुसरन्तु' इति शाश्वतरीतिरभवत् । प्रति-

---

१. राजशेखरानुसारं तु–स यत्स्वभावः कविरस्तदनुरूपं काव्यम् ।

२. तत्र बहवो व्यासा बभूवुः । व्यासेषु प्रथमो द्वैपायन एव । भागवते ११.१६.२८, कतिपयव्यासानां नामानि विष्णुपुराणे ३.३.९–२१ स्थले प्रोक्तानि ।

३. इत्थं सभापतिर्भूत्वा यः काव्यानि परीक्षते ।
यशस्तस्य जगद्व्यापि स सुखी तत्र तत्र च ।।

काव्यमीमांसाया दशमाध्यायतः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भया सह व्युत्पत्तेरभ्यासस्य च सामञ्जस्यमपेक्षितम् ।[1] तत्र शास्त्रकवयः, काव्यकवयः, उभयकवयश्च सम्मताः । उभयकवयः श्रेष्ठाः समादृताः । 'सततमभ्यासवशतः सुकवेः वाक्यं पाकमायाति' इति राजशेखरः ।

राजशेखरः 'कवित्वस्य अष्टौ मातरः' इति प्रतिपादयति—

स्वास्थ्यं प्रतिभाभ्यासो भक्तिर्विद्वत्कथा बहुश्रुतता ।
स्मृतिदार्ढ्यनिर्वेदश्च मातरोऽष्टौ कवित्वस्य ॥

कविचर्यां निदर्शयन् स उपवर्णयति—'स्मितपूर्वमभिभाषणम्, रहस्यान्वेषणं परकाव्यदूषणवैमुख्यमनभिहितस्य' । तदनुसारं कविगृहं तु रमणीयमासीत् । तथा हि—तस्य भवनं सुसंमृष्टम्, ऋतुषट्कोचितविविधस्थानम्, अनेकतरुमूलकल्पितापाश्रयवृक्षवाटिकम्, सक्रीडापर्वतकम्, सदीर्घिकापुष्करिणीकम्, सबर्हिणहरिणहारीतम्, ससारसचक्रवाकहंसम्, सभूमिधारागृहयन्त्रलतामण्डपकम्, सदोलाप्रेङ्खं च स्यात् । राजशेखरः श्रेष्ठकाव्यस्य विरलत्वं मन्यते ।

काव्यशास्त्राणि

काव्यशास्त्रमधिकृत्य ग्रन्थानां प्रणयनं साहित्ययुगस्यादित एव सम्भावनीयम् । वेदाङ्गानामध्ययनं काव्याभ्यासस्य प्रथमं पदं प्रतिभाति । वेदाङ्गेषु व्याकरणच्छन्दोनिरुक्तशिक्षादेः सविशेषं महत्त्वं काव्यरचनार्थं भवति । तत्र व्याकरणच्छन्दसोः परम्परा सातत्येन विकसिता बभूव । पाणिनेर्व्याकरणं पिङ्गलस्य च छन्दःशास्त्रममरत्वमादधतुः ।

काव्यशास्त्रस्य सिद्धान्तानां प्राथमिकः संग्रहः भरतस्य नाट्यशास्त्रमेवोपलभ्यते । अस्मिन् ग्रन्थे काव्यसम्बन्धितत्त्वानां—रसालङ्कारच्छन्दोनृत्यताललयादीनां सम्यग् विवेचनं वर्तते । पश्चात् भामहदण्डिवामनानन्दवर्धनमम्मटविश्वनाथादिभिः कृतानि काव्यशास्त्राणि निबद्धानि । तत्र मम्मटः काव्यप्रकाशे शब्दशक्तिगुणदोषविवेचनपुरस्सरमलङ्काराणां वैशिष्ट्यानि प्रदर्शयति ।

काव्यशास्त्रमधिकृत्य प्रायः सर्वेषां प्रकरणानां सूक्ष्मदृष्ट्या भेदोपभेदनिदर्शनम्, शाखाप्रशाखाविवेचनं च तर्कसङ्गतप्रणालीमनुसृत्य कृतमिति ध्वनेरुपमाया भेदवैचित्र्योदाहरणेन स्पष्टं प्रतिभाति ।

प्राकृतकाव्यानि

प्राचीनयुगे संस्कृतं भारतस्य सर्वात्रिकमहत्त्वपूर्णा भाषा बभूव । वैदिकसंस्कृतेः सर्वे श्रेष्ठविद्वांसः संस्कृतभाषया काव्यं रचयामासुः । प्रारम्भिकयुगे बौद्धसंस्कृतेरनुयायिनः पालि-

---

१. बहुज्ञता व्युत्पत्तिः । उचितानुचितविवेको व्युत्पत्तिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भाषायाम्, जैनसंस्कृतेरनुयायिनोऽपभ्रंशमागधीशौरसेनीमहाराष्ट्रीभाषासु च धर्मग्रन्थानां प्रणयनं कृतवन्तः। धर्मग्रन्थेषु क्वचित् काव्यस्य दर्शनं भवति। तथा हि बौद्धानां सुत्तपिटके सुत्तनिपातादिषु लोकप्रियकाव्यस्य स्वरूपं प्रमीयते। जातकेषु प्राथमिककथासाहित्यं प्रवर्तते। थेरगाथाथेरीगाथादिषु पालिसाहित्यस्य गेयपदानां प्राथमिकसङ्ग्रहो विद्यते।

जैनानां प्राकृतकाव्यं चरितग्रन्थेषु, पुराणेषु, कथासु च प्रतिभासते। तेषां रचना साधारणतः समाजस्य प्राकृतजनेभ्यः कृता। अतएव तेषु ग्रन्थेषु भावालङ्कारादीनां प्रयोगो नाविरलः।

महाराष्ट्राश्रया प्राकृतभाषा द्वाभ्यां महाकाव्याभ्यां समलंकृता बभूव। तयोः प्रथमं महाराजप्रवरसेनेन निर्मितं सेतुबन्धमस्ति। अस्मिन् काव्ये रावणवधमधिकृत्य सेतुबन्धनोपकल्पनस्यातीव मनोरमं प्रभावोत्पादकं वर्णनं च विद्यते। मानवोपक्रमस्य तादृशं सम्भावनं भारतीयसाहित्येऽन्यत्र न समाज्ञायते। सेतुबन्धस्य काव्यशैली सविशेषमुदात्ता वर्तते। अस्मिन् महाकाव्ये वीररसस्याद्भुतरसस्य च चरमप्रकर्षो दर्शनीयः।

द्वितीयं महाकाव्यं गौडवधमिति वाक्पतिराजेन कृतम्। तत्र दिग्विजयनिरूपणप्रसङ्गे भारतस्य विशालप्राङ्गणस्य नैसर्गिक-विभूतीनां वनपर्वतमरुभूमिपथादीनामपूर्ववर्णनं विद्यते। कवेः प्रतिभाबहुज्ञता च सर्वथा विस्मयकारिणी प्रतिभाति।

प्राकृतभाषायां कतिपयनाटकानि रचितानि। तेषु कर्पूरमञ्जरी, चन्द्रलेखा च प्रमुखे। इमे द्वे सट्टके प्रणयकथोद्‌गूर्णे स्तः।

आर्येतरभाषाकाव्यानि

दक्षिणभारतस्य आर्येतरभाषा सुतामिल-कन्नड-तेलगुषु प्राचीनकाले सुसमृद्धं काव्यसाहित्यं रचितम्। तत्र तामिलभाषायाः साहित्यमुच्चकोटिकं वर्तते।

तामिलकाव्यानि

तामिलकाव्यस्य प्रादुर्भावो राजाश्रितेषु संघेषु बभूव। संघसंस्थायाः समारम्भः सम्भवतः खीष्टात् पूर्वं पञ्चमे शतके बभूव। प्रथमसंघस्य रचना तोल्खाप्पियमिति ख्याता व्याकरण-युद्धप्रेम-काव्यशास्त्राणि चाधिकृत्य बभूव। अस्या द्वितीयेऽध्याये तदानीन्तनसामाजिकदशाया वर्णनं विद्यते।

तृतीयसंघस्य मुख्यरचनाः एट्टुतोगै (अष्टचरितसंकलनानि), पत्तुपाट्टु (दशकाव्यानि), पदिनेङ्कील्कणक्कु (अष्टादश काव्यानि) च सन्ति।

एट्टुतोगैकाव्ये ५३० कवीनां २३०० कविताः प्राकृतिकदृश्य-प्रेमवर्णने अधिकृत्य संकलिताः। तत्र राजकुमाराणां वीराणां च मातृसमर्पणपराक्रमाणां साङ्गोपाङ्गवर्णनं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्यते । पत्तुपाट्टुकाव्ये विविधविषयानधिकृत्य रचितानि काव्यानि वर्तन्ते । तद्यथा— कार्त्तिकेयपराक्रमाः, 'कावेरिपट्टनम्', नौकाश्रयः, काञ्चीराज्यं, नगराणि; प्रेमगाथाः, ग्रामीणदृश्यानि करिकालचोलस्य पराक्रमाः, चोलराज्यस्याभ्युदयश्च ।

पदिनेङ्कील्कणक्कुसंग्रहेऽष्टादश काव्यानि प्रायो धर्मविषयकाणि सन्ति । तत्र काव्यात्मकोपदेशा मानवस्य सद्भावनायाः संवर्धनाय सन्ति । कतिपयभागेषु युद्धनियमाः, औषधिविज्ञानम्, राजचरितानि च वर्णितानि ।

खीष्टस्य पश्चात् द्वितीयशतके सप्तमशतके वा 'इलङ्गो अडिगल' इति ख्यातनामा कविः 'सिलप्पदिकारम्' रचितवान् । अस्मिन् काव्ये 'केवलन्' इति ख्यातस्य नायकस्य वेश्यापाशबद्धस्योपगतदारिद्र्यस्य मदुराप्रवासः प्रथमं वर्णितः । तत्र राजकुलस्य नूपुरं चोरितवानीति साभियोगः स राजाज्ञानुसारं मृषा वधं प्राप्तवान् । पश्चात् तस्य पत्नी कण्णकी साध्वी सती प्राणांस्त्यक्तवती । अस्य पापकर्मणः प्रभावात् सशोको राजा मृतः, मदुरा च प्रदाहेन दग्धा । सर्वं विनष्टम् । ततः परं कण्णकी मदुराप्रदेशस्य पूजनीया देवीति सम्मानिता ।

मणिमेक्कलै काव्यं 'कूलवाणिगन्' कवे रचना प्रसिद्धा । तत्र माधव्यास्तस्याः कन्यायाश्चरितगाथा वर्णिता । अन्तिमभागे धर्मोपदेशा विद्यन्ते ।

षष्ठशतकस्य पश्चात् शैव-वैष्णव-तान्त्रिकाणां साहित्यं समवर्धत । तेषां रचनासु 'तेवारम्' विशिष्टमेव । नवमे शतके 'मानिक्कवचक' इति ख्यातो महर्षिः 'तिरुवाचकम्' रचितवान् । द्वादशशतके शैवो नम्बिः 'पेरिय'-पुराणं रचितवान् ।

वैष्णवसम्प्रदायस्य प्राथमिकद्वादशमहर्षयः 'आल्वार' इति ख्याताः । तेषां रचना 'नालायिरप्रबन्दम्' काव्ये संकलिता । अस्मिन् प्रबन्धे तदानोन्तनदार्शनिकानां कवीनां विचारधाराऽवगाहनीया ।

द्वादशशतके 'कम्बर' कवी रामायणं प्रणीतवान् । तत्र काव्यकला, कथानकसंविधानं च कवेः प्रतिभा-वैशिष्टयं प्रमाणयतः । कम्बरस्य समकालिकः 'ओट्टकुत्तरः' नलवेण्हकाव्ये नलकथां वर्णितवान् । तस्मिन् युगे 'जयं कोण्डान्' कविः कलिङ्गत्तुपरणिकाव्ये कलिङ्गविजयं वर्णितवान् ।

कन्नडकाव्यानि

कन्नडभाषायां खीष्टाब्दस्य पश्चात् दशमशतकादारभ्य द्वादशशतकपर्यन्तं रामायणं महाभारतं चाश्रित्य काव्यसाहित्यं प्रवर्तितम् । जैनसंस्कृतेर्महापुरुषाणां चरितानि कतिपयकाव्यग्रन्थेषूपनिबद्धानि । पम्पकविः 'भारत' काव्ये अर्जुनस्य प्रतिरूपमिति कृत्वा स्वकीयस्याश्रयदातुः अरिकेसरिणश्चरितं वर्णितवान् । स आदिपुराणे प्रथमतीर्थङ्करस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चरितं निबद्धवान् । पम्पस्य समकालिकः पोन्नकवी रामकथां शान्तिपुराणं च रचितवान् । तस्य गदायुद्धकाव्ये भीमदुर्योधनयोर्गदायुद्धं वर्णितम् । ततः परं स रामचन्द्रचरितपुराणं मल्लिनाथपुराणं च रचितवान् ।

कन्नडभाषायां चावुण्डराजेन रचितं चावुण्डराजपुराणं सर्वोत्तमं गद्यकाव्यं प्रारम्भिकयुगे निबद्धम् । तस्य समकालिको नागवर्मा बाणस्य कादम्बरीमनूदितवान् ।

खीष्टस्य पश्चाद् द्वादशशतकादारम्य वचनमिति ख्यातस्य गेयकाव्यस्य रचना प्रारब्धा । वचनमुपासनापरं काव्यं ज्ञानमार्गस्य रहस्यमुद्घाटयति । वचनस्य प्रमुखरचयितारो बसवः, अल्लमप्रभुः, अक्कमहादेवी च बभूवुः ।

द्वादशशतके राघवङ्को हरिश्चन्द्रकाव्यमिति नाटकं रचितवान् ।

तेलगु-साहित्यम्

तेलगुभाषायाः प्रथमः कविः नन्नयः खीष्टस्य पश्चादेकादशशतके प्रादुरभवत् । स नारायणकवेः सहकर्मित्वेन महाभारतस्य त्रीणि पर्वाण्यनूदितवान् । द्वयोः कव्योः शब्दचयनं रसात्मिकता शैली च श्रेष्ठत्वेन परवर्तिकविभिः समादृता । परवर्तियुगे तिक्कनः कविः निर्वचनोत्तररामायणं रचितवान् । स महाभरतमंशतोऽनूदितवान् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वैदेशिकोऽनुबन्धः

वसुधैव कुटुम्बकमिति भारतानां सनातन-विचारधारा सकलपृथ्वीलोकं गृहप्राङ्गणमिव समलङ्कर्तुं प्रणोदयति। मनीषिणः भारतीयाः सांस्कृतिकनिधिमुदारभावेन विदेशिभ्यो जनेभ्यो वितरितवन्तः। तदर्थं सुदूरप्राचीनकालतो बहवो भारतीयाः विदेशेषु गत्वा भारतस्य सांस्कृतिकसन्देशं व्याख्यातवन्तः।[1] वैदेशिका अपि सहस्रशो भारते समागत्य सांस्कृतिकसागरे विगाहमाना जीवनस्य परमोद्देश्यं लब्धवन्तः।[2]

सांस्कृतिकपरिवेदनम्

प्राचीनयुगे मानवानामदम्योत्साहस्तेषामद्भुतपराक्रमाणामितिहासं प्रस्तावयति। निःसन्देहं तदा विज्ञानबलेन प्रस्तुतानां साधनानामभाव एवासीत्। तथापि हिमालयस्योच्चतरभागे बुद्धकालतो बहवः शिक्षणसंस्था निर्मिताः। तत्र शङ्कराचार्यस्य विश्वविद्यालयः स्थितः। तस्मिन्युगे हिमालस्योन्नतभागे आरोहणं दुष्करं बभूव। विदेशीया यात्रिणः फाह्यान–ह्वेनसांगादयो विद्यार्थिनः सहस्रं कष्टान्यगणयन्तः हिमालयस्योत्तुङ्गमार्गभागान्, अरण्यानि, सागरान् वा पद्भ्यां नौकाभिर्वा पारितवन्तः।[3] अनेन प्रकरणेन प्राचीनानां पुरुषार्थिनां भारतानां विदेशीयानां च मनोबलं ज्ञानपरत्वं च प्रमाणितम्।

संस्कृतेः प्रसारार्थं भारता वसुधैव कुटुम्बकमिति उदात्तभावनया प्रेरिता एवाचरन्ति स्म। ते सन्ध्यामन्त्रेषु नित्यं भुवः परिकल्पनं हस्तामलकवदकुर्वन्। विश्वस्य सांस्कृतिकावश्यकता भारताः स्वीकाया एव मत्वा तासां पूर्त्यर्थे प्रायतन्त। समादरणीयास्ते पूर्वपुरुषाः, ये विश्वं सकलं मानवतायाः सूत्रे संग्रन्थितुं निष्कामयोगिनो बभूवुः। तेषु मनस्विषु भरतानां संख्यात्यधिकासीत्।

---

१. एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥
मनुस्मृतौ २.२०

२. तद्यथा खीष्टस्य पश्चात् सप्तमे शतके इस्लामधर्मग्रहणात् पराङ्मुखाः पारसीकाः मुम्बईप्रदेशे शरणं प्राप्तवन्तः।

३. विदेशगमनमार्गाणांविवरणं [illegible] द्रष्टव्यम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्बन्ध-संवित्

वैदेशिकसम्बन्धाः पुरा प्रायः पञ्चविधा बभूवुः । तद्यथा–व्यापारिकः[1], धार्मिकः, राजनीतिकः, कलात्मकः, साहित्यिकश्च । व्यापारद्वारा राजनीतिधर्मकलादीनां विदेशे प्रसारः स्वयमेव भवतीति विदितमेव । राजनीतिकसम्बन्धस्य स्थापना क्वचित् व्यापार-संवर्धनाय भवति । व्यापारिभिः सह देशभ्रमणोत्सुका धर्मप्रचारकाः वा विद्वांसो विदेशेषु गत्वा वसतीः कृतवन्तश्च । पुरा धर्मप्रचारकाः प्रायः शिल्पकलादिषु निष्णाता बभूवुः । एतेषां सम्बन्धानां परिणतिः साहित्यिकादानप्रदानं बहुलीकरोति । अनेन प्रकारेण वैदेशि-कसम्बन्धस्य प्रायः सर्वे प्रकारा अन्योन्याश्रिताः प्रतिभान्ति ।

एतत्सर्वममेरिकीयेतिहासविदा विल दुरैण्टमहोदयेन सम्यक् समासितम्—

India was the mother-land of our race and Sanskrit the mother of Europe's languages, she was the mother of our philosophy; mother through the Arabs, of much of our mathematics; mother through the Buddha, of the ideals embodied in christianity; mother through the village community of self government and democracy. Mother India is in many ways the mother of us all.

धार्मिकप्रसारः

पुरा समस्ते जगति धर्मं प्रति परमोत्साहो बभूव । स्वदेशीयानां विदेशीयानां वा धर्मतत्त्वस्य ज्ञानं प्राप्य तदनुकूलं स्वजीवनविधिं विकासयितुं सर्वे समुत्सुका अभवन् । नासीत् तदा कोऽपि धार्मिकाभिनिवेशो यदवरोऽपि स्वधर्मोऽपरिवर्तनीयः अथवा श्रेष्ठोऽपि परधर्मोऽग्राह्य एव । जगति सर्वत्र धर्मप्रसारकाणां स्वागतं बभूव । यथाधुना विदेशीयाः ख्रीष्टधर्मोपासका विश्वस्य विविधभागेषु ख्रीष्टधर्मस्य प्रचारार्थं प्रयतन्ते तथैव प्राचीनयुगेऽपि ते भारतीया धर्मप्रचारका बभ्रमुः ।

सार्वत्रिकः प्रसारः

भारतीया स्वधर्मस्य देश-विदेशेषु च प्रचारार्थं परमधर्मस्य ज्ञानार्थं च पर्यट्य स्वदेशे समागच्छन् तत्रैव विदेशेषु न्यवसन् वा । विदेशेषु प्रागैतिहासिकावशेषाणां पुरातनकथादीनां च परिशीलनेन भारतस्यास्मिन् क्षेत्रे महानुपक्रमः परिचीयते । तदधिकृत्य विदेशीयविदुषा-

१. व्यापारिकसम्बन्धस्य परिचयोऽस्मिन् ग्रन्थे १८६-१९० पृष्ठे द्रष्टव्यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मेव मतमुल्लेखनीयम् । रामकथामधिकृत्य विलियमजोन्समहोदयो लिखति–Rama is Ramah of scriptures father of Cush (Genesis, Chapter X verse 7).[१]

वैदिकधर्मस्य प्रसारमभिलक्ष्य मैक्समूलरमहोदयो लिखति—The religious aspirations of that (Hindu) civilisation are found grandly expressed in the Rgveda. That civilisation pervades in every corner of the civilised world, and is aroused and about us every day of our lives.[२]

अमेरिकामहाद्वीपे बौद्धधर्मः

प्रथमं तावत् काबुलप्रदेशतः पञ्चभिक्षवः ४५८ ई० संवत्सरेऽमेरिकामहाद्वीपे गत्वा तत्र बौद्धधर्मस्य प्रचारमकुर्वन् । तेषां यात्रा जापानदेशात् स्थलमार्गेण कामटकास्का-एल्युसियाद्वीप-अलास्काप्रदेशान्तरेषु बभूव । कामटकास्का एशियामहाद्वीस्य पूर्वोत्तर-दिशि अलास्का चामेरिकायाः पश्चिमोत्तरदिशि वर्तते। एतयोरन्तरे बेहरिङ्ग इति सामुद्र-धुनी एल्युसियाद्वीपो वर्तते ।[3]

मैक्सिकोदेशस्य विदेशमन्त्रालये प्रकाशिते राजकीयेतिहासे स्पष्टमेव निर्दिष्टं यत् "प्रथमं भारता एवामेरिकादेशे बाह्यतः समागताः । तैः भारतैरत्र विशालमन्दिराणि निर्मितानि, आपणाः स्थापिताः, सुसंस्कृतेः प्रसारश्च कृतः ।" मैक्सिकोप्रदेशे शिवस्य, हनुमतः कूर्मावतारादीनां मूर्तयो मन्दिराणि च विविधभागेषु प्राक्तनभारतीयसंस्कृति-सम्बन्धं द्योतयन्ति ।

बौद्धधर्ममधिकृत्य गाथा वर्तते—The foot-prints of Buddha were worshipped by his followers and were called Phrabat. They were engraved on rocks and hills, where people flocked from all parts of the country to worship them...six such Phrabats are found in the East, one of them in Mecca, whither the Buddhist made pilgrimages long before the rise of Islam.[४]

अपरं च—The so-called Hermes scriptures (the name of the sacred writing of the Egyptians) contain a metaphysical treatise in the forms of a dialogue between Hermes and Thodh,

---

1. Asiatic Researches Vol II p 40.
2. India : What can It Teach us ? p 74.
3. मित्रगोष्ठीपत्रिकायां २.३ अङ्के विधुशेखरशर्मणो बौद्धानाममेरिकाविष्कारो लेखः द्रष्टव्यः ।
4. Count Bjornstjerna : Theogony of the Hindus p. 92. 93.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Bodh, Budh, which throughout exhibits the doctrines of Buddhism.[१]

कर्नलटाडमहोदयः कथयति—That a system of Hinduism pervaded the whole Babylonian and Assyrian empires, scripture furnishes abundant proofs in the medium of the various types of the Sun-god, Balnath, whose pillar adorned every mount and every grave.[२]

मानियरविलियममहोदयो विज्ञापयति—Pythagoras and Plato both believed in this doctrine (of the transmigration of souls), and that they were indebted for it to Hindu writers.[३]

मैकडानलमहोदयः समर्थयति—The hero of the story prince Josaphat, has an Indian origin, being in fact no other than Buddha. The name has been shown to be a corruption of Bodhisattva, a well known designation of the Indian reformer. Josaphat rose to the rank of a saint both in Greek and Roman churches. That the founder of an oriental religion should have developed into a Christian saint is one of the most astounding facts in religious history.[४]

खीष्टधर्मस्योपरि भारतीयधर्माणां प्रभावः The unknown life of Jesus-Christ इति ग्रन्थेन सम्यगुद्घाटितम् ।[५]

विंसेण्टस्मिथमहोदय आकलयति—Before the year 256 B. C. when the rock edicts were published collectively, the royal missiona ries had been despatched to all the protected states and tribes

---

१. Theogony of the Hindus p. 100.

२. Tod's Rajasthan Vol II p. 605.

३. Indian Wisdom p. 68.

४. Sanskrit Literature p. 420.

५. The Unknown Libe of Jesus Christ, translated from a manuscript discovered in a monastery of Tilet by the Russian explorer, Lutovitch. पुस्तकेऽस्मिन् खीष्टस्य द्वादशवर्षीयाज्ञातवासे भारतागमनं देशेऽस्मिन् बहुषु नगरेषु भ्रमणं ज्ञान-विज्ञानकेन्द्रेषु विद्वद्भ्यो ज्ञानार्जनं च सम्यगुपवर्णितम् । परवर्तियुगेऽपि भारतीय-दर्शनादीनां प्रभावः खीष्टधर्मे समभवत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

on the frontiers of the empire, Ceylon and to the Hellenistic monarchies of Syria, Egypt, Cyrene, Macedonia and Epirus........ The missionary organisation thus embraced three continents— Asia, Africa, and Europe.[1]

पुरा मध्येशियाभूभागे काचित् समृद्धिशालिनी संस्कृतिर्विकसिता बभूव। भारतीय-संस्कृत्या सह तस्या आदान-प्रदानं विनिवेशयन् रूसदेशीयो विद्वान् ख्मेल्नित्सकी पुरस्क-रोति—The people of Soviet Central Asia now remember the ageold cultural ties that bound them with the people of great India, ties which live on in the numerous forms of people's architecture, music and in everyday life. They remember that their ancient national culture not only drew upon the treasure house of Indian art, but in turn enriched it with the forms of their own monumental architecture, with the methods and technique of their brilliant miniature painting and poetry.

पारसीकदेशमधिकृत्य ह्वेनसांगोऽलिखत्—अत्र हिन्दुधर्मावलम्बिनः प्रायः सर्वेषु, नगरेषु स्वधर्मानुसारं जीवनयापनं कुर्वन्ति।[2] तत्र ख्वाजापर्वतस्योपरि बौद्धचैत्यानामवशेषा वर्तन्ते। बौद्धधर्मस्य प्रसारः इस्लामधर्मस्य प्रवर्तनात् प्राक् कास्पियनसमुद्रतटादारम्य जापानपर्यन्तं सर्वत्रासीत्।

चीने बौद्धधर्मः

भारतीयसंस्कृतिर्विशेषतो बौद्धधर्मः खीष्टसंवत्सरात् प्रागेव चीनदेशं प्राकाशयत्।[3] अगणितचीनदेशवासिनो विद्वांसः सोत्साहं पथि कष्टादिबाधानुपेक्ष्य भारते समागताः। ते नेपाल-स्याम-बङ्गादिप्रान्तेषु निवसन्तो भारतीयां संस्कृतिं स्वीकृतवन्तः। असंख्येया भारतीयबौद्धास्तत्र गताः।

चीनदेशाद् बौद्धधर्मानुयायिनो गणनातीता जना भारतमागत्य बौद्धविहारेष्वधीत्य बौद्धतीर्थयात्रां विधाय च प्रत्यागमनकाले बौद्धग्रन्थान् मूर्तीश्च नीत्वा कृतकृत्या बभूवुः। प्रथमं तावत् खीष्टात् प्राक् तृतीये शतके अष्टादश चीनदेशीया भारते समागताः। ततः परं कश्यपः, मातङ्गः, धर्मरत्नश्च खीष्टस्य पश्चात् ६८ संवत्सरे चीनं गत्वा तत्र पञ्च-ग्रन्थान् रचयामासुः। पश्चात् बौद्धधर्मस्य महापण्डितः कश्चित् पारसीको राजकुमारो भारतीयबौद्धपण्डितानां साह्येन कतिपयपालिग्रन्थान् संस्कृतेनानूदितवान्। स बहून् चैन-

१. Early History of India Vol I p. 194.

२. Beal : Buddhist Records Vol II.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३. भारतचीनदेशे 'इन्दुः' इति ख्यातम्।

विदुषोऽनुवादकर्म प्राशिक्षयत । ततः परं भारतीयानां चीनगमनं बहुशो बभूव । तेषु कुमारजीवः प्रख्याततमो बभूव । स चतुर्थशतके बन्दिरूपेण चीनदेशं प्रापितः । तत्र स द्वादशवर्षं शतप्रायान् ग्रन्थान् चीनभाषयानूदितवान् ।[1] स ४१३ खीष्टसंवत्सरे पञ्चत्वं गतः, किन्तु तस्य सहयोगिनः पुण्यत्रातः, बुद्धयशाः, धर्मयशाश्च ४१७ खीष्टसंवत्सर-पर्यन्तमनुवादकर्मणि प्रवृत्ता बभूवुः ।

खीष्टस्य पञ्चमशतके भारतीयानां बहवो वसतयश्चीनदेशस्य नगरेषूदभवन् । तत्र कश्मीरस्य राजकुमारो राजपदं परित्यज्य चीनदेशाधिपेनामन्त्रितः ४३१ खीष्टसंवत्सरे नान्किंगनगर्यामुषितवान् । एकस्मिन्नेव वर्षे स एकादशग्रन्थाननूदितवान् । सौराष्ट्र-निवासी धर्मगुप्तः काबुलसमीपस्थे कपिशानगरे द्विवर्षमुषित्वा, पश्चात् पद्भ्यामेव काश-गरनगरं गतवान् । स तत्रापि नीतिदीर्घमुषित्वा ५९० खीष्टसंवत्सरे चीनं गतवान् । धर्मगुप्तो बहूनां ग्रन्थानामनुवादं कृतवान् । तस्य कस्मिंश्चित् मौलिकग्रन्थे परिचितदेशानां विवरणं तत्रत्यकृषि-प्राकृतिक-परिवेश-गृहसामाज-शासन-भोजन-वस्त्र-शिक्षादिप्रकरणान्य-धिकृत्य निबद्धम् । परवर्तियुगे खीष्टस्य पश्चात् सप्तमशतकपर्यन्तं जिज्ञासूनां धर्मप्रचार-काणां च चीनगमनागमनं प्राचलत् । षष्ठशतके प्रायः ३००० बौद्धभिक्षवः, १०,००० भारतीयकुटुम्बानि च चीनदेशस्य लोयाङ्गप्रान्ते उषितवन्तः । बहून् ग्रन्थानपि ते पण्डिता-श्चीनं नीत्वा तत्रताननूदितवन्तः ।[2] चीनभाषया मौलिकग्रन्थास्तैर्विरचिताः ।

चीनदेशात् गुप्तयुगे बहवो धर्मजिज्ञासवो भारते समागताः । तथा हि खीष्टस्य पश्चात् तृतीयशतके विंशतिबौद्धश्रमणाश्चीनाद् भारते आजग्मुः । गुप्तवंशस्य कश्चित् महाराजो बोधगयासमीपे चीनश्रमणेभ्यो विहारं रचयामास । चीनदेशादागतेषु यात्रिषु फाह्यान-ह्वेनसांग-इत्सिंगादयः मुख्यतमा आसन् ।

खीष्टात् पश्चात् चतुर्थशतके फाह्यानो भारतमाजगाम । चीनदेशतः प्रस्थानकाले तस्याचार्यः कुमारजीव उपदिदेश "त्वया भारतीया संस्कृतिः सम्यगध्येया । येन चीनदेशे भारतस्य सन्देशं प्रसारयितुं समर्थो भवेः । त्वया न केवलं धर्म एवाध्येतव्यः" इति । फाह्यानः स्थलमार्गेण भारते समागत्य पाटलिपुत्रस्य विश्वविद्यालयेऽधीत्य पर्यटनं कृत्वा ४१४ संवत्सरे जलमार्गेण चीनं गतवान् । स भारतयात्रावर्णनं निबद्धवान् । चीनदेशे समग्रविनयपिटकस्य प्रचार एव तस्य यात्रायाः प्रमुखमुद्देश्यमासीत् ।

ह्वेनसांगो हर्षवर्धनस्य शासनकाले सप्तमे शतके भारतवर्षमाययौ । कश्मीरत आरभ्य

---

१. कुमारजीवस्य पिता कुमारायणो भारतीय आसीत् । स एशियामहाद्वीपस्य मध्यभागं गत्वा कुचीराज-वंशस्य गुरुरभवत् । तेन जीवां राजकन्यां परिणीय तस्यां कुमारजीव उदपादि । कुमारजीवः कश्मीरदेशेऽधीत्य पुनः कुचीप्रदेशं गत्वा तत्र विश्वविद्यालयं स्थापयामास । अस्मिन् विश्वविद्यालये दूरदेशेभ्यो विद्यार्थिनः समागताः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२. सिंगपाओनगरस्य पुस्तकालये धर्मदर्शनज्योतिषगणितायुर्वेदग्रन्थाः ८००० प्रायः वर्तन्ते ।

नालन्दापर्यन्तं सोऽनेकविद्यालयेषु धर्मदर्शनादीनां ग्रन्थानधीत्य नालन्दाविश्वविद्यालयस्योपकुलपतिपदमलमकरोत्। भारतस्य प्रायः सर्वेषु भागेषु स धर्मजिज्ञासया पर्यटत्। तस्य भारतयात्रावर्णनमतीव विशदं वर्तते। चीनगमनकाले सोऽनेकान् ग्रन्थानेव परमधनं मत्वानयत् चीनीभाषयानूदितवांश्च।

इत्सिगमहोदयः ६७१ संवत्सरे भारतं समागत्य नालन्दाविश्वविद्यालयेऽधीत्य भारतपर्यटनविषयकं ग्रन्थं रचितवान्। स ४०० ग्रन्थान् चीनदेशेऽनयत्। तेन चीनीसंस्कृतभाषात्मकोऽभिधानग्रन्थः प्रणीतः। अनेन ग्रन्थेन चीनदेशवासिनां संस्कृताध्ययने लाघवं जातम्।

चीने बौद्धधर्मस्य कतिपयाभिनवशाखाः प्रस्फुटिताः। तत्र ख्रीष्टस्य तृतीयशतके हरिवर्मणा प्रतिष्ठापिते सत्यसिद्धसम्प्रदाये हीनयानमहायानयोः शून्यवादस्य च समन्वयो बभूव।

तिब्बत-(त्रिविष्टप-) देशे बौद्धधर्मस्य प्रथमप्रसारः ख्रीष्टस्य सप्तमे शतके बभूव। अष्टमशतके राज्ञा निमन्त्रिता बङ्गविहारप्रदेशतो भिक्षवस्तत्र गताः। तिब्बतीया लिपिभारतीयां लिपिमनुसृत्य विकसिता। नालन्दाविश्वविद्यालयस्य प्राचार्यः शान्तरक्षितो राज्ञा निमन्त्रितः तिब्बतदेशे परं पूजितोऽभवत्। राजा तम् 'आचार्यबोधिसत्त्वः' इत्युपाधिना विभूषयाञ्चकार। स्वदेशस्य महोपाध्यायपदे प्रतिष्ठापितवांश्च। तदनुसारं तिब्बतप्रदेशे लामासम्प्रदायः प्रवर्तितः। पश्चात् चीनदेशस्य कस्यचिद् भिक्षोः प्रतिवादार्थं मगधस्य श्रेष्ठदार्शनिकः कमलशीलो राज्ञामन्त्रितः तिब्बतं गतवान्। नवमे शतके बङ्गविहारप्रदेशयोर्बहवो महापण्डिता रल्पचनेन राज्ञा निमन्त्रिताः तिब्बतं गतवन्तः। राजाऽतिशयधार्मिकोऽभवत्। स धर्मग्रन्थानां संस्कृतभाषातः तिब्बतभाषायामनुवादं कारितवान्। परवर्तियुगे एकादशशतके बङ्गदेशस्य महापण्डितोऽतिसो दीपङ्करो वा तिब्बते बौद्धधर्मस्य पुनरुत्थानमकरोत्। तत्र गमनात् प्रागेव दीपङ्करः सुवर्णद्वीपस्य चन्द्रकीर्तेः पादपद्मे द्वादशसंवत्सरमधीत्य स्वपाण्डित्यं परिणमितवान्। ततः श्रीलङ्कदेशमार्गेण पुनर्भारतमागतवान्। स विक्रमशिलाविश्वविद्यालयस्य कुलपतिर्बभूव। तस्मिन् युगे तिब्बतप्रदेशस्य राजा स्वदेशस्य धर्मक्षयं दृष्ट्वा २१ विदुषो भारते प्रेषयामास। तेषु विद्वत्सु १९ भारते मृताः, शेषौ द्वौ १३ भारतीयविद्वद्भिः सह प्रत्यावर्तिताः। तैर्विद्वद्भिः प्रशंसितो दीपङ्करो राज्ञो परं निमन्त्रणीयोऽभवत्। दीपङ्करः तिब्बतं गन्तुमनिच्छन्नपि पुनः पुनः प्रार्थ्यमानः तत्र गतवान्। स १३ संवत्सरान् तिब्बते पर्यटन् बौद्धधर्मस्य प्रचारं कृतवान्। दीपङ्करेण रचितेषु ग्रन्थेषु २५ ग्रन्थाः सुप्रथिताः। तस्य शतप्रायाणि धार्मिकव्याख्यानानि समायोजितानि।

असंख्या एव भारतीयविद्वांसः तिब्बतं गत्वा तत्र भारतीयसंस्कृतेः प्रसारं कृतवन्तः। तैर्विद्वद्भी रचिता ग्रन्थाः—'केङ्ग्‌र–तेङ्गरौ' इति सङ्ग्रहो प्रख्याताः। तेषु ग्रन्थेषु बहव ईदृशा अपि सन्ति, येषां मूलरूपं भारते न विद्यते। भारताः पुनरपि तेषां स्वदेशे समागमेनात्मानं बहु मन्यन्ते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कोरियाजापानयोः बौद्धधर्मः

भारतीयसंस्कृतिश्चीनतः कोरियाजापानयोः प्रसारिता। अष्टमशतकादारभ्य जापाने बौद्धधर्मस्य 'तेन्दई—केगोन—शिङ्गोन—जोदो—निचिरेन—जेन' शाखाः प्रस्फुटिताः। इमाः शाखा महायान-सम्प्रदायस्य कतिपयप्रमुखान् ग्रन्थानाश्रित्य स्थानीयस्थितेरनुकूला विकसिताः। कतिपयशाखाः प्रथमं चीनदेशे आविर्भूताः, पश्चात् जापाने प्रसृताः।

पूर्वद्वीपेषु भारतीयो धर्मः

एशियामहाद्वीपस्यैते पूर्वद्वीपाश्चीनभारतयोर्मध्ये वर्तन्ते। अतः तेषु देशेषु उभयदेशयोः प्रभावः लक्ष्यते। पुरा खीष्टाब्दस्यारम्भतो मलय-कम्बोडिया (कम्बुज)—अन्नम (चम्पा)–प्रायद्वीपेषु यव-सुवर्णद्वीप-बालिद्वीपेषु भारतानां राज्यानि स्थापितानि। तेषु राज्येषु भारतीयसंस्कृतिः सहजमेव प्रसृता बभूव। तत्र कतिपयप्रदेशेषु भारतीयवर्णव्यवस्थानुसारं सामाजिकसंघटनं बभूव। अद्यापि पूर्वकालीनसंस्कृतेः आभासः क्वचित् शुद्धभारतीयलक्षणानां स्वीकरणेन प्रत्यक्ष एव। तथा हि स्यामप्रदेशेऽधुनापि राज्याभिषेको भारतीयविधिमनुसृत्य संस्कृतमन्त्रोच्चारैः सह सम्पाद्यते। राजा समीपवर्तिजनान् वैदिकरीतिमनुसरन् सम्बोधयति। तेषु प्रदेशेषु पुरा बहव भारतीया वसतिं चक्रुः। चम्पाङ्कोरे—श्रीविजयादिस्थानेषु संस्कृतशिक्षाया बहूनि केन्द्राणि प्रादुर्भूतानि। यववालिद्वीपयोर्धार्मिककर्मकाण्डविधयोऽधुनापि भारतीया एव प्रतिभान्ति।[1] ब्रह्मविष्णुशिवादीनां बहूनि मन्दिराणि तेषु प्रदेशेष्वद्यावधि वर्तन्ते। शिवस्य कुटुम्बं विष्णोः कुटुम्बमवतारा दिक्पालादयश्च तत्र मूर्तीकृतानि।

शिवपूजा

मिस्रदेशे असीरिसनाम्ना शिवस्य पूजाभवत्। असीरिसस्य पत्नी आइसीसदेवी शक्तिसमा विद्यते। यूनान (ग्रीस) देशे लिङ्गपूजायाः प्रचलनमासीत्। तत्रत्यः डिओनेसास इति ख्यातो देवः शिवसदृशोऽभवत्। स्केण्डीनेवियादेशे 'ईश' शिव एव। तत्र ईशा शिवारूपा वर्तते। ईशीशपूजा तत्र हरगौरीपूजेति प्रतिभासते। सीरियादेशे वृषारोहिणः (शिवस्य) देवस्य सिंहवाहिन्या देव्याश्च पूजा १४०० ई० पू० कालेऽभवत्। मुद्रासु तयोः प्रतिरूपमङ्कितमासीत्पुरा।

मध्येशियाप्रदेशे शिवोपासना प्रचलितामासीत्। 'पंजिकेण्ट' स्थाने नीलकण्ठशिवस्य नर्तनदृश्यस्य चित्रांशाः प्राप्ताः सन्ति। शिवस्तु त्रिशूलधरोऽजिनपरिधानश्च चित्रितः।

---

1. Here (Bali) together with the Brahmanical religion is still preserved the ancient forms of Hindu municipal polity. Sir Stamford Raffles : Description of Java Vol. II Appendix

बालिद्वीपे त्रिलक्षहिन्दवो जाकर्तानगरे त्रिसहस्रहिन्दवश्च सन्ति। जाकर्तायां गान्धीस्मृतिविद्यालयोऽधुना प्रचरति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्रैव भारतीयवैभवानुसारिणीनां नर्तकीनां हस्तिनां च बहूनि चित्राणि प्राप्तानि सन्ति। एतस्मिन्प्रदेशे बुखारातो द्वादशक्रोशान्तरे वरक्षेतिख्याते पुरातननगरेऽष्टमशतके ऐसवीये निर्मितस्य प्रासादस्य भित्तिचित्रावली भारतीयशैलीमनुसरन्ति अश्व-चित्रक-शार्दूल-मृगादीनां प्रतिरूपाणि राजन्ते। तत्रैव हस्तिपृष्ठारोहिणां मृगयादृश्यमपि चित्रितम्। तत्र कतियनगरेषु बौद्धचैत्यविहाराः ख्रीष्टस्याष्टमशतके निर्मिताः। तेषु बौद्धसंस्कृतिपराणि चित्राणि मूर्तयश्च भग्नावस्थायां विद्यन्ते। खोरेज्मनगस्य दुर्गे सरस्वती-विष्णु-शिवादीनां वैदिकदेवानां मूर्तरूपाणि प्राप्तानि सन्ति।

राजनीतिकः सम्बन्धः

राज्यप्रसारः उपनिवेशाश्च

ख्रीष्टतः प्राक् षष्ठशतके पारसीकानां राज्यं भूमध्यसागरतः पञ्चनदप्रदेशपर्यन्तं विस्तृतमासीत्। तस्मिन्नेव युगे भारतीयाः सैनिकाः पारसीकदेशवासिपक्षे ग्रीसदेशं गत्वा युद्धे सभाजो बभूवुः।[2] परवर्तियुगे अलक्षेन्द्रः पारसीकान् पराजित्य ग्रीकसाम्राज्यं पंचनद-प्रदेशपर्यन्तं विस्तारितवान्। ततः पश्चात् मौर्यश्चन्द्रगुप्तो भारतीयसाम्राज्यं काबुल-कंधार-हिरातादिपर्यन्तं विस्तारितवान्। अनेन प्रकरणेन स्पष्टं प्रतिभाति यत् राजनीतिकक्षेत्रे पश्चिमोत्तरं भारतं प्राचीनयुगे वैदेशिकैः सह सम्बद्धमभवत्।

सीरियाप्रदेशस्य लेखकः जेनाबमहोदयः प्रमाणयति यत् द्वौ भारतीयसामन्तौ अरमीनियाप्रदेशे ख्रीष्टस्य प्राक् द्वितीयशतकेऽनुयायिभिः सह समायातौ। तत्र राजा ताभ्यां फरातनद्यास्तटे तारुनप्रदेशं भूमिभागं जीविकोपकल्पनाय प्रदत्तवान्। तत्र तौ नगरमेकमुपनिवेशितवन्तौ स्वदेशीयपूजापरम्परां विधातुं च कृष्णमूर्तिनिर्माणं कारयामासतुः। ख्रीष्टस्य पश्चात् चतुर्थशतकस्य प्रारम्भिकभागे सेण्टग्रेगोरीति ख्यातः ख्रीष्टमूर्तिविध्वंसकः तत्राक्रमणं कृत्वा मन्दिराणि भ्रंशयित्वा तेषां स्थाने 'चर्चम्' निर्मापितवानिति भारतीयोपनिवेशगाथासु रोमाञ्चकरमेकं वृत्तमुद्घाटयति।

सुदूरप्राचीनकाले भारतीयानामुपनिवेशाश्चीनतो भारते गमनागमनयोर्मार्गेषु प्रतिष्ठापिता बभूवुः। तत्र अपरबर्माप्रदेशे, ईरावतीसाल्वीनमेकाङ्गादीनां नदीनामुपत्यकासु चोपनिवेशा अवर्तन्त। कतिपयोपनिवेशेषु भारतीयानां राजशासनमासीत्। इण्डोचाइना-प्रदेशस्य मध्यभागेऽपि तादृशाः कतिपयोपनिवेशाः कारिताः।

---

१. प्रो० हर्बर्ट एफ. स्ट्रांग : The Serian Gods.
२. पश्चिमोत्तरभारतस्य कश्चित् राजा शशिगुप्तो बैक्ट्रियाप्रदेशस्य पारसीकानामलक्षेन्द्रविरुद्धं साह्यं कृतवान्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कम्बुजसाम्राज्यम्

भारतीयराज्यानां प्रथमावस्थितिर्मलयकम्बोडिया (कम्बुज)—अन्नमप्रदेशेषु जावा-सुमात्रा-बोर्नियो-बालिद्वीपेषु चाभवत् । कम्बोडिया तथा मलयप्रायद्वीपं पुरा विशाल-राज्यानां केन्द्रं बभूवतुः ।

कम्बोडियाराज्यस्य प्रसारः कम्बोडियां परितः कोचीनचीन-मेकाङ्गोपत्यकापर्यन्त-मासीत् । कम्बोडियाप्रदेशे प्रथमं तावत् स्त्रीराज्यमासीत् । तदार्धसभ्या जनाः परिधानं न गृह्णन्ति स्म ।

ख्रीष्टस्य पंचमशतकस्य प्रारम्भिकयुगे कश्चिद् भारतीयब्राह्मणः कौण्डिन्य इति ख्यातस्तत्र समागतः । स प्रजाभी राजपदे निर्वाचितः । कौण्डिन्यस्य सांस्कृतिकप्रतिभा समुज्ज्वलाऽऽसीत् । अचिरमेव तेन तस्मिन् महाराज्ये भारतानुरूप-धर्मव्यवस्था-जीवन-विन्यास-शिल्पादीनि च प्रचारयामास । तस्मिन् कौण्डिन्यवंशे जयवर्मा प्रख्यातो बभूव । तस्य राजदूतो नागसेनश्चीनसम्राजः प्रशस्तिं विदधानो महेश्वरबुद्धादीनां माहात्म्यमुप-वर्णयन् काव्यं रचयामास । ५१४ ख्रीष्टसंवत्सरे जयवर्मणि पंचत्वं गते रुद्रवर्मा राजा बभूव । तस्य प्रणिधयः ५१७–५३९ ख्रीष्टसंवत्सरान्तराले षट्कृत्वश्चीनसम्राज-मुपजग्मुः ।

सप्तमशतके रुद्रवर्माणं पराजित्य चित्रसेनः कम्बुजप्रदेशे साम्राज्यं प्रसारितवान् । तस्य वंशजाः सप्तशतवर्षाणि राज्यं चक्रुः । पूर्वतोऽन्नमराजेन पश्चिमतः स्यामदेशवासिभिश्चा-क्रान्तं कम्बुजराज्यं पंचदशशतके विघटितमेव ।

कम्बुजदेशस्य सप्तमशतकस्यैकस्मिन्नुत्कीर्णलेखे महाराजसोमशर्मणा प्रदत्तानां रामा-यण-महाभारत-पुराणादीनां प्रतिदिनं पारायणस्यायोजनमुपवर्णितम् ।[1]

श्रीविजयसाम्राज्यम्

श्रीविजयसाम्राज्यस्य संवर्धनं शैलेन्द्रवंशीयै राजभिः कृतम् ।[2] शैलेन्द्राणां प्रादुर्भावो मलयप्रायद्वीपे ७७५ ख्रीष्टाब्दे बभूव । शीघ्रमेव समग्रं मलयप्रायद्वीपं सुमात्रा-जावा च साम्राज्ये समन्वितानि ।

शैलेन्द्राणां दौत्यसम्बन्धश्चीनराजैः भारतीयराजैश्च सह समुदभवत् । दशमे शतके शैलेन्द्राणां राजधानीतो दश प्रणिधयश्चीने प्रेषिताः । कतिपयप्रणिधयो भारते पालानां चोलानां च राजसभासु समागताः ।

---

१. Indian Antiquary XVII 3 । M. A. Barth's Review of Inscriptions Sanskrites Der Combodge.

२. शैलेन्द्राः सम्भवतः कलिङ्गप्रदेशात् प्रथमं बर्मादेशं ततो मलयदेशं च जग्मुः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शैलेन्द्रराजानां भारतस्य सांस्कृतिकप्रकाशो रुचिकरोऽभूत् । तथा हि तेषां कतिपय-गुरवो भारतेभ्यः समानीताः । सुवर्णभूमेः शैलेन्द्रवंशीयो राजा बलपुत्रदेवो नालन्दायां विहारं प्रतिष्ठापयामास । तस्य कृते गौडराजेन देवपालेनोपराजगृहं पंचग्रामाणां दानं कारितवांश्च । नालन्दायामाधुनिकयुगे प्राप्तासु मूर्तिषु बहवो जावाद्वीपादानीता एव प्रतिभान्ति ।

शैलेन्द्रराजश्चूडामणिवर्मा स्वनाम्नाभिख्यातं विहारमेकं नागपत्तने (दक्षिणभारते) निर्मापितवान् । चोलराजो राजराजः १००५ खीष्टाब्दे कस्यचिद् ग्रामस्यायेन तस्य विहारस्य सुरक्षाव्यवस्थां पारितवान् ।

परवर्तियुगे चोलराजाः शैलेन्द्राणां शत्रवो बभूवुः । राजेन्द्रचोलो नौबलैः सुमात्रादीनां द्वीपानां विजयं सम्पादितवान् । किन्तु चोलाः पंचाशद्वर्षाणि शैलेन्द्राणां पराभवं कृत्वापि तेषां सुदूरप्रदेशेषु शाश्वतरूपेण शासनप्रतिष्ठां कर्तुमसमर्था अभवन् । १०९० खीष्टाब्दे द्वयो राजवंशयोः पुनरपि मैत्री बभूव । शैलेन्द्राणामभिनवा प्रगतिः प्रायः चतुःशतसमा यावत् प्रावर्तत । त्रयोदशशतके ते लङ्काविजयं चक्रुः । वीरपाण्ड्यः दक्षिणभारतस्याधिपतिः शैलेन्द्राणां जयेन १२६४ खीष्टाब्दे यशो लेभे । शैलेन्द्राणां राजवंशः षट्शतं वर्षाणि यावत् प्रावर्तत । तदियं भारतीयानां वैदेशिकराज्यप्रसारस्यापूर्वा गाथा ।

लघुराज्यानि

भारतीयानां राज्यानि मलयप्रायद्वीपे खीष्टस्य प्रथमशतकादारभ्य पंचमशतकपर्यन्तं प्रादुरभवन् । शैलेन्द्राणां शासनस्य पश्चात् पंचदशशतके तत्र मलच्चवंशीयानां राज्ञां शासनमासीत् । तदा कश्चिद्राजा मुसलमानस्त्रिया सह परिणीत एव न केवल स्वयमेव मुसलमानो बभूव अपि तु मलयप्रायद्वीपे दूरतरेऽपि इस्लामप्रवेशद्वारमुद्घाटयामास ।

कम्बुजप्रदेशतः पूर्वदिग्भागे अन्नमप्रदेशे 'चम्पा' इति ख्यातं भारतीयानां राज्यमासीत् । खीष्टस्य पश्चात् द्वितीयशतके चम्पायां श्रीमारस्याधिपत्यं बभूव । तस्मिन् प्रदेशे पंचदश-शतकपर्यन्तं पाण्डुरङ्ग-श्रीविजय—कौथर—अमरावती-प्रदेशीयैः भारतीयराजैः शासनं प्रतिष्ठापितम् । चीनमङ्गोलान्नमराजैः पुनः पुनः प्रतिहतस्यापि चम्पाराज्यस्य गौरवम-क्षुण्णमेव सुरक्षितं तत्रत्यानां बाहुबलैः । अन्तिमयुगेऽन्नमवासिभिः पादाक्रान्ता चम्पा स्वोत्कर्षं शाश्वतरूपेण त्यक्तवतीति प्रतिभासते । चम्पाप्रदेशस्य भारतीयसांस्कृतिकचरितानि शिलादीनि चाधुनापि तदानीन्तनगौरवगाथां मन्दं स्फोरयन्ति ।

जावा (यव) द्वीपे भारतवंशीयराज्यं खीष्टस्य प्रथमशतके प्रतिष्ठापितम् । खीष्टस्य द्वितीयशतके तत्रत्यो राजा देववर्मा चीनदेशे प्रणिधिं प्राहिणोत् । खीष्टस्य पष्ठशतके पूर्ण-वर्मा यवद्वीपस्य राजा बभूव । अष्टमशतके तत्र संजय इति ख्यातः महापराक्रमी राजा समजायत । परवर्तियुगे यवद्वीपः शैलेन्द्रसाम्राज्ये समन्वितो बभूव । शैलेन्द्राणां विनिपातस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पश्चात् पुनः यवद्वीपे क्रमशः त्रयो भारतीयराजवंशाः प्रादुर्भूताः। तेषु विल्वतिक्तानां साम्राज्यं यवद्वीपाद् बहिः सुदूरमपि प्रसृतं बभूव। विल्वतिक्तानामन्तिमराजः ख्रीष्टस्य पंचदशशतके भारतीयसंस्कृतेः सुरक्षार्थं युद्धं कुर्वाण एव बालिद्वीपे शरणं लेभे। बालिद्वीपेऽधुनाऽपि भारतीयवैदिकधर्मः शुद्धतमरूपेण प्रकाशमानो प्रतिभासते।

सुमात्राद्वीपः मलययवद्वीपयोर्मध्ये स्थिते भारतचीनमार्गे महत्त्वपूर्णोऽभवत्। ख्रीष्टाब्दतः प्रागेव तत्र भारतानामुपनिवेशस्थापना बभूवेति प्रतिभाति। शैलेन्द्राणामाधिपत्यं सुमात्रायां सुदीर्घकालिकमासीत्। तत्र श्रीविजयनगरं राजधानीदृष्टया'व्यापारमाहात्म्येन च प्रसिद्धमभवत्। शैलेन्द्राणां पश्चात् तत्र तलयुवंशस्य राज्ञां प्रभवोऽस्फुरत्। पंचदशशतके समुद्रवंशीया राजानस्तत्र प्रतिष्ठिता बभूवुः। परिवर्तितसमुद्रनामाधिकृत्य द्वीपोऽयं सुमात्रेति ख्यातः।

बोर्नियोद्वीपे ख्रीष्टाब्दस्य पश्चात् पंचमशतके भारतानां सुसमृद्धं राज्यं प्रादुर्भूतम्। तदा मूलवर्मेति ख्यातो महाराजोऽभवत्। मूलवर्मणश्चत्वार उत्कीर्णलेखाः प्राप्यन्ते। चतुर्दशशतकपर्यन्तं बोर्नियोद्वीपे भारतानामाधिपत्यं बभूव।

बालिद्वीपे सुदूरप्राचीनयुगे भारतानां राज्यं बभूव। पश्चाद्युगे तत्र यवद्वीपस्य राजनीतिकाधिपत्यं प्रसृतम्। 'कालान्तरे यवद्वीपस्य राजा तत्रैव शरणं लेभे' इति प्रागेव वर्णितम्।

भारतानां व्यापारिणामुपनिवेशाः सुदूरप्राचीनयुगे अफ्रीकामहाद्वीपस्य मिसर-इथिओपिआ-अबीसीनियाप्रदेशेषु प्रतिष्ठिताः। चीन-तिब्बत-मध्य-एशियादिभूभागेषु विदुषां धर्मप्रचारकाणां चावस्थितिः प्रागेवोपवर्णिता।

दौत्यसम्बन्धाः

भारतीयराजानां वैदेशिकराजैः सह दौत्यसम्बन्धपरम्परा प्रायः सदैव प्रावर्तत। प्रथमं तावत् मौर्यराजानां ग्रीकराजैः सह दौत्यसम्बन्धः प्रख्यात एव। चन्द्रगुप्तस्य राजपरिषदि मेगस्थनीज इति ख्यातस्य राजदूतस्य महत्त्वपूर्णं पदमासीत्। ततः परं बिन्दुसारस्य राज्यपरिषदं ग्रीकदूतः अयनीसियसोऽलंचार। अशोकस्य दौत्यसम्बन्धा वैदेशिकराजैः सह मैत्रीसंस्थापनार्थं बभूव। अशोकस्य धर्मदूताः पश्चिमैशियायां, मिसरे, योरपे च पर्यटनं चक्रुः। रोमराजानां ट्राजनस्य (९८-११७ ख्रीष्टाब्दम्) हैड्रियनस्य (११७-१३८ ख्रीष्टाब्दम्) अण्टोनियसस्य (१३८-१६१ ख्रीष्टाब्दम्) हेलिओगबलसस्य (२१८-२२२ ख्रीष्टाब्दम्) आरलियनस्य (२७०-२७५ ख्रीष्टाब्दम्), कांस्टैन्टाइनस्य (३२३ ३५३ ख्रीष्टाब्दम्) जूलियनस्य (३६१-३६३ ख्रीष्टाब्दम्) समीपे भारतीयप्रणिधीनां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

समागमः सुप्रमाणितः। ख्रीष्टाब्दतः प्राक् प्रथमे शतके विदिशायां ग्रीको हेलियोदोरो राजदूतो बभूव।[1]

ह्वेनसांगस्य प्रभावेण हर्षः चीनराजस्य तांगस्य समीपं दूतं प्राहिणोत्। मुहम्मदतुगलकः इब्नबतूतां चीनदेशे स्वप्रणिधिं कृत्वा प्रेषितवान्।

दक्षिणभारतस्य चालुक्यवंशीया राजानः पारसीकराजानां समीपं दूतान् प्रेषितवन्तः। कश्चित् दौत्यसम्बन्धोऽजन्ता-गुफाचित्रेष्वद्युनापि अमरीकृतः। १०७७ ख्रीष्टसंवत्सरे कुलोत्तुङ्गः प्रथमः चीनराजस्य समीपं व्यापारिकप्रतिनिधिमण्डलं प्रेषितवान्। मण्डलेन बहुभिर्बहुमूल्योपहारवस्तुभिश्चीनराजस्य परितोषः कृतः।

उपहाराः

मौर्यवंशीयानां राज्ञामुपहाराः सुपरिचिता एव। बिन्दुसारः सेल्यूकसं ग्रीकदेशोद्भवां मदिरां द्राक्षां च प्रार्थितवान्। तस्माद्देशात् दार्शनिकस्योपहारमपि सोऽभिलषितवान्। प्रथमे द्वे वस्तुनी स प्राप्तवान्। सम्राजाशोकेन विदेशनृपेभ्य ओषधीनां बहुमूल्योपहारः प्रेषितः। ख्रीष्टात् प्राक् २१ संवत्सरे रोमसम्राज आगस्टसमहाभागस्याभिषेकोत्सवे भारतीयचित्रकस्य नाट्यमंचे प्रदर्शनं कृतम्। असौ चित्रक उपहारद्वारा प्राप्तः।

ख्रीष्टाब्दस्यारम्भिकयुगे वाणमंग इति चीनदेशस्य राज्ञा काम्बोराजाय स्वदेशस्य बहुमूल्यानि बहूनि वस्तूनि प्रेषितानि। चीनराजस्याभीष्टो गण्डकः काम्बोराजेन प्रत्युपहारितः। ख्रीष्टस्य पश्चात् द्वितीयशतके सिन्धुवासिभिश्चीनराजाय बहुमूल्योपहारः प्रेषितः।

ह्वेनसांगस्य भारतीयमित्रैः सह पत्रव्यवहारोऽभवत्। स्थविरदेवस्तस्मै वस्त्रयुग्मेन सह पत्रं प्रेषितवान्। ह्वेनसांगः प्रज्ञदेवाय उपहारं प्रेषितवान्, कतिपयग्रन्थानां कामनां कृतवांश्च। तस्याभीष्टं सम्पादितम्।

श्रीलङ्कस्य राजा चीनराजाय महाप्रज्ञापारमितासूत्रमिति ख्यातं ग्रन्थं प्रेषितवान्। उपहारेण सह विद्वन्मण्डलं चीने प्रेषितम्।

१४१४ ख्रीष्टसंवत्सरे सैयदुद्दीन इति ख्यातो भारतीयराजः अफ्रीकादेशतः प्राप्तं 'जुर्राफा' पशुं मिंगवंशीयाय चीनराजाय प्रेषितवान्।

---

१. इदमधिकृत्य शिलालेखस्तत्र वर्तते—
देवदेवस वासुदेवस गरुडध्वजे अयं कारिते इअ हेलिओदरेण भागवतेन दियसपुत्रेण तखसिलाकेन योनदूतेन आगतेन महाराजस अन्तलिकितस उपता सकासं रञो कासीपुत्रस भागभद्रस त्रातारस वसेन चतुदसेन राजेन वधमानसः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

साहित्यम्

भारतीयसाहित्यं जगति प्राचीनतममिति निःसन्दिग्धमेव । यत्र यत्र भारता गतास्तत्र तत्र भारतीयसाहित्यमपि तैः सह प्रचारितम्।[1] पुरा जगति भारतीयसाहित्यं क्वचिदनुवादरूपेण, क्वचित् विशुद्धभारतीयभाषानुबद्धमेव क्वचित् छायारूपेण च परिव्याप्तं बभूव । संस्कृतं तु आर्या भाषास्ति ।

पाश्चात्त्यदेशेषु व्यापकत्वम्

भारतीयकथासाहित्यस्य पाश्चात्त्यदेशेषु विशेषसमादरो बभूव । प्रथमं तत्र षष्ठशतके पारसीकदेशीयेन राज्ञा खुसरूनौसेरवामहोदयेन प्रेषितः बरजोयमहोदयो भारते समागत्य पंचतन्त्रस्यानुवादं कृतवान् । ५७० खीष्टसंवत्सरे बूद इति ख्यातः सीरियादेशीयो विद्वान् मातृभाषायां पंचतन्त्रस्यानुवादं कृतवान् । तदनुसृत्य ७५० संवत्सरे अब्दुल्लाह-इब्नुल-मोक्कफमहोदय अरबभाषायां पंचतन्त्रस्यानुवादं कृतवान् । अयमेवारबदेशीयानुवादो योरपीयभाषाभिः पंचतन्त्रस्यानुवादस्याधारः ।

एकादशशतके पंचतन्त्रस्यानुवादः ग्रीकभाषायां बभूव । ततः परं १५८३ संवत्सरे इटलीप्रदेशस्य भाषायां लैटिनभाषायां जर्मनभाषायां स्लवभाषायां च पंचतन्त्रस्यानुवादाः संजाताः । पंचतन्त्रस्य हेब्रूभाषायामनुवादः सर्वत्र समादृतो बभूव । पंचतन्त्रस्य परवर्तियुगे जर्मनानुवादमनुसृत्य हालैण्ड-डेनमार्क-आइसलैण्डादीनां भाषासु पुनरनुवादाः कृताः । पंचतन्त्रस्य स्पेनभाषायामनुवादः (१४९३ सं०) ततः इटलीभाषायां (१५४६ सं०), ततः फ्रांसभाषायां (१५५६ सं०) चानुवादा बभूवुः । इटलीभाषायां १५५२ खीष्टसंवत्सरे पंचतन्त्रस्य स्वतन्त्रानुवादो बभूव । तस्य प्रथमखण्डस्य १५७० खीष्टसंवत्सरे टामसमहोदयेनानुवादः कृतः ।

अनुवादानामपरा परम्पराऽरबदेशतः एकादश-शतकादारब्धा । अरबभाषातः पारसीकभाषायां पंचदशशतकेऽनुवादो बभूव । तस्य परिचयः फ्रांसदेशेऽनुवादेन सप्तदशशतके प्रसृतः । ततः परं तस्यानुवादः आंग्लभाषायां जर्मनभाषायां स्वीडिशभाषायां च बभूव । पारसीकानुवादस्यापरा परम्परा टर्की-जर्मनी-हंगरी-हालैण्डादीनां भाषासु कालान्तरेऽनुवादेन योरपीयदेशेषु प्रसृता । अपरेऽपि बहवोऽनुवादाः संजाताः । तेषां परम्परापि प्रसारवती संजाता ।

शुकसप्ततिग्रन्थस्यानुवादपरम्परा योरोपीयदेशेषु प्रसृता बभूव । प्रथमं पारसीकभाषायां तस्या अनुवादश्चतुर्दशशतके बभूव । पारसीकानुवादतः टर्कीभाषायां तस्या अनुवादः संजातः । पारसीकानुवादतो योरपीयभाषासु शुकसप्ततेः प्रचारोऽभवत् ।

---

१. अस्मिन्नेवाध्याये धार्मिकप्रसारप्रकरणे कतिपयभारतीयपुस्तकानां विदेशे प्रसारो वर्णितः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपर्युक्तपद्धत्या बहवो भारतीयकथा योरपीयदेशेषु लोकप्रचलिता बभूवुः। तासु कथासु 'अरबियननाइट्स' इति प्रख्यातसाहित्यं भारतादरबदेशे ततः योरपीयमहाद्वीपे प्रसृतमिति सुविदितमेव।

पूर्वद्वीपसमूहे व्यापकत्वम्

पूर्वद्वीपसमूहे संस्कृतभाषायामुत्कीर्णलेखा गणनातीताः सन्ति। तत्र कम्बुज-चम्पा-प्रदेशयोर्लेखाः कतिपयशतानि सन्ति। मलय-यव-बोर्नियो-सुमात्रादिद्वीपेषु कतिपयलेखाः प्राप्ताः। इमे लेखाः प्रायः लघुकाव्यान्येव सन्ति। कतिपयेषु तेषु शतादधिकाः त्रिशत-पर्यन्ताश्च श्लोका विद्यन्ते। तेषां लेखकानां संस्कृतभाषायाः प्रकामाधिकारः प्रतिभाति।[1] कतिपयभारतीयपण्डितास्तत्र गत्वा लेखान् विरचयामासुः। अपरे तु बहवो जिज्ञासवो भारते समागत्य स्वपाण्डित्यं परिपक्वं चक्रुः, पश्चात् स्वदेशेषु साहित्यकारा बभूवुः।

भारतीय-यवसाहित्यं विशेषवर्णनामर्हति। तस्य साहित्यस्य वर्ण्यविषया भारतीया एव, तस्मिन् प्रयुक्तानि छन्दांसि संस्कृतसमानि सन्ति। अपरं च, साहित्ये संस्कृतशब्दानां श्लोकानां च समाहारः समाहृतः। तत्र महाभारतस्यानुवादः गद्येन कृतो विशिष्ट एव वर्तते। रामायणीकथापि गद्येन निबद्धा। किन्तु भारतीयरामायणात् क्वचिद्भिन्ना वर्तते सा कथा। तत्र सीताया निर्वासनं मृत्युर्वा न वर्णितः। अपरे कतिपयवर्ण्यविषयाः पुराणेतिहासेभ्यो गृहीता भारतीय-यवसाहित्ये उपनिबद्धाः। तथा हि निवातकवचेनार्जुनस्य युद्धम्, कृष्णस्य रुक्मिणीहरणम्, मालापातेन इन्दुमतीमरणम्, कौरवपाण्डवयुद्धम्, शिवेन कामदहनम्, नरकासुरेणेन्द्रादीनां पराजयः, कार्तवीर्येण रावणस्य पराजयः, समुद्रमन्थनम्, वृत्रनहुषयोर्विजयः, कालयवनकथा, तिलोत्तमायाः प्राप्तये सुन्दोपसुन्दयोः युद्धम्, वासवदत्तोदयनयोः प्रणयकथा, सावित्रीसत्यवतोः कथा—अपरे च तादृशा विषयाः कथासाहित्ये निबद्धाः। अपरं च भारतीय-साहित्यनिधिः—पुराणेतिहासाधिकृताः सृष्टिकथाः, नीतिकथाः, व्याकरणच्छन्दःकोशायुर्वेदकामशास्त्रादि वर्णितम्। बालिदेशस्य भारतसम्बन्धमधिकृत्य रवीन्द्रनाथठक्कुरेण रोचककाव्यं रचितम्।

अन्यदेशेषु व्यापकत्वम्

मेडेगास्करप्रदेशस्य भाषा संस्कृतेन प्रभाविता वर्तते। चीनीतुर्किस्तानप्रदेशे खोतान-समीपं ५०० गुहा वर्तन्ते। तत्र कस्याञ्चित् गुहायां संस्कृतचीनीतिब्बतीभाषाणां ग्रन्थाः प्राप्ताः। बौद्धधार्मिकसाहित्यं विहाय तत्र दर्शनसाहित्येतिहासभूगोलादीनां विषयाणां ग्रन्था वर्तन्ते। इमानि पुस्तकानि ख्रीष्टाब्दस्य एकादशशतके विध्वंसकानामाक्रमणाद्रक्षितुं गुहायां निगूहितानि। १९०० ख्रीष्टसंवत्सरे बंगताओ इति ख्यातः चीनदेशीयो विद्वान्

---

१. कम्बोडिया—फिलीपाइनद्वीपयोर्लेखनकला भारतीयलिप्युनुरूपा वर्तते। तत्रत्यभाषासु संस्कृतभाषा-तस्तद्भवशब्दानां प्राचुर्यं वर्तते।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तेषां पुस्तकानामुद्धारं कृतवान् । तत्र पुस्तकानां संख्या १५,००० प्राया वर्तते । ३००० ग्रन्था मध्यैशियाया ब्राह्मीलिप्या लिखिता वर्तन्ते ।[१] चीनदेशे ६६८ खीष्टसंवत्सरे भारतीयकथानां विश्वकोशो रचितः । कोशेऽस्मिन् २०२ पुस्तकेभ्योऽसंख्याः कथाः सङ्गृहीताः । चीनदेशीयाः संस्कृतपालिभाषयोः पण्डितप्रकाण्डानि बभूवुः ।[२]

बौद्धभिक्षुर्बोधिसेनः ७३६ खीष्टसंवत्सरे जापानदेशीयेभ्यः पुरोहितेभ्यः संस्कृतभाषां शिक्षितवान् ।

कला

भारतीयकलानां प्रसारः विदेशेषु सविशेषमेव बभूव । प्रथमं तावत् प्रायः ७० खीष्टसंवत्सरे निर्मिता हस्तिदन्तमूर्तिर्लक्ष्मीप्रतीकेति पाम्पियाई नगरे प्राप्ता । सुमेरु-प्रदेशस्य प्राचीनमन्दिराणां रचना तत्र पूजाविधानं च दक्षिणभारतसमं प्रतिभासते ।

चीनप्रदेशे तोनहुअङ्गे युनकाङ्गे, लाङ्गमेने च भारतीयशैलीमनुसृत्य कारिता गुहा विद्यन्ते। तत्र बुद्धस्य विशालमूर्तयश्चित्राणि च विराजन्ते। पुरा भारतीयाः चीनदेशीयाश्च चीनगमनकाले भारतात् मूर्तीस्तासां चित्राणि च निन्युः ।[३]

तिब्बतप्रदेशस्य यात्रिणो भारतीयकलाकृतीः क्रीत्वा स्वदेशं निन्युः । तासु कृतिषु बहवोऽधुनापि प्राप्यन्ते । तासु प्रमुखो बोधगयामन्दिरस्यादर्शो विद्यते । अजन्ता-कलानुरूपाणि बहूनि चित्रपटानि तिब्बतप्रदेशे विराजन्ते । भारतीयशैलीमनुकृत्य शतादधिकाः कांस्यमूर्तयः तिब्बते विद्यन्ते । प्राचीनयुगस्य जापानदेशस्य चित्राणि भारतीयकलानुरूपाणि वर्तन्ते । खोतानप्रदेशस्य भित्तिषु कौशेयपटेषु च भारतीयशैलीमनुकृत्य चित्राणि रचितानि । मध्येशियाभूभागे भारतीयवास्तुमूर्तिचित्रकलादीनां चरमविकास ऐसवीये षष्ठशतकादारभ्याष्टमशतकं यावद् बभूव ।

पूर्वद्वीपसमूहस्य मूर्तिकला वास्तुकला च भारतीयां कलामनुसृत्य विकसिते । तत्रत्यकलाया आदर्शो गुप्तयुगस्य भारतीय एव । 'अङ्कोरनगरस्य मन्दिराणि भारतीयपरम्परामतिशेरते' इति स्पष्टमेव विभाव्यते । तादृशानि वास्तूनि भारतेऽधुना न विद्यन्ते । कम्पोडियाप्रदेशे काश्मीरवास्तुकला विकसिता । तत्र भारतीयैः कारितानि मन्दिराणि सविशेषं कौशलं समाज्ञापयन्ति । यवद्वीपे भारतीयदेवतानां मूर्तयोऽसंख्या एव विद्यन्ते । महिषासुरमर्दिन्या मूर्तेर्दश बाहवः कृताः । बोरोबुदुरनगरस्य मन्दिराणि तत्रत्यकलाकाराणां परमाश्चर्यकरं चमत्कारं प्रमाणयन्ति । सर्वत्र दक्षिणभारतस्य द्राविडशैल्याः प्रभावः परिस्फुरति ।

---

१. खोतानप्रदेशे खीष्टाब्दस्य तृतीयशतके संस्कृतभाषायाः प्रचारस्तस्य प्रदेशस्य भारतीयशासकैः कृतः ।

२. चीनीभाषायां संस्कृतध्वनीनां वर्णमालायाश्च निवेशनस्य प्रयत्नं शवेन इति ख्यातो भिक्षुः कृतवान् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३. फाह्यानस्य मूर्तिनयनस्य वृत्तं सुविदितमेव ।

सांस्कृतिकसंस्था:

पुरा समग्रं भारतमेव जिज्ञासूनां कृते तीर्थमासीत् । भारतीयविश्वविद्यालयेषु शिक्षितुं सर्वेभ्यो देशेभ्यो दूरतोऽपि विद्यार्थिन: समागता: । भारतागमनमार्गेषु बहव: शिक्षणसंस्था: पूर्वत: पश्चिमतश्चाजिगमिषूणां कृते समुत्थापिता: । तद्यथा चम्पा, अङ्गकोर:, श्रीविजय: संस्कृतविद्याया: केन्द्राणि बभूवु: । काशगरस्य विश्वविद्यालय: प्रख्यात एवासीत् ।

चीनदेशे बहव: संस्था: भारतीयग्रन्थानामनुवादाय, चीनीभाषायां मौलिकग्रन्थानां प्रणयनाय च स्थापिता: । काचित् संस्था नवमे दशमे वा ख्रीष्टशतके 'महाव्युत्पत्ति:' इति ख्यातं संस्कृततिब्बतीचीनीभाषाणां कोशं प्रणिनाय ।

विदेशेष्वौद्योगिकप्रगतये भारतानां प्रयत्न: श्लाघ्य: । तथा हि जापानदेशे कर्पासवपनस्य कर्पासवस्त्रनिर्माणस्य च विधिर्भारतै: शिक्षित: । चीनदेशस्य पौतवमानादयो भारतीयप्रणालीमनुसृत्य कारिता: ।

•

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपसंहारः

भारतीयसंस्कृति-सागरेऽवगाह्य कानिचिद् रत्नानि संगृह्य पाठकेभ्यो मया समर्पितानि। तेषामालोकैः पुरा देशोऽयं समुज्ज्वलो बभूव । विश्वगुरुश्चासीदस्माकं देशः सदाचारस्य सर्वजनीनपथनिर्माणेन । अहो महापौरोभाग्यमस्माकं यद्वयं सर्वं तत्तेजसं समुपेक्ष्य यत् किंचिदवरमासीत्, तदेव स्वीकुर्वाणाः स्वयमेव परापतिताः । मानवीपद्धतिं परित्यज्य वयं हीना अपरानुकारिणोऽन्धेनैव नीयमाना यथान्धा एव ।

भारतीयसंस्कृतेः सर्वोच्चविकास आध्यात्मिकपथेन समभवत् । आध्यात्मिकानन्दस्य प्राप्तिर्जीवनस्य प्रमुखोद्देश्यमिति निर्धार्य तदनुकूलं धर्मार्थकामानां स्वरूपं विहितम् । आध्यात्मिकपृष्ठभूमौ आधिभौतिकक्षेत्रे सर्वत्र कर्मण्यता, सदाशयता, उदारता, परोपकारशीलता, समृद्धिशालिता च पुरस्कृताः । अधुनापि तथैव भवितव्यमिति समीहामहे ।

प्राचीनसंस्कृतेः प्रकाशस्तम्भानां पंचशीलादीनां विश्वप्राङ्गणे प्रवर्तनं तदा भविष्यति यदा भारते प्रथमं व्यक्तिशः समष्टिशश्च तेषां शीलानां परिग्रहेण कश्चिदभिनवोऽभ्युदयो जायेत । अनेन प्रकारेण भारतस्य जगद्गुरुत्वं पुनरुदेष्यति ।

भारतस्य प्राचीनसंस्कृतिर्भारतीयनिसर्गानुकुला सती भारतवासिनां परमकल्याणाय वर्तते ।आधुनिकयुगे तस्याः संस्कृतेर्युगानुरूपो विन्यासो विवेकानन्द-लोकमान्यतिलक-मदनमोहनमालवीय-रविन्द्रनाथठक्कुर-गांधिमहात्मादिभिर्महाभागैः प्रस्तावित एवास्माकं समक्षं विद्यते । इदानीं भारतस्य सांस्कृतिकनिर्माणे तेषां महाभागानामादर्शा ग्राह्याः । तत्र एष श्लोक :—

इदं नमः ऋषिभ्यः पूर्वजेभ्यः
पूर्वेभ्यः पथिकृद्भ्यः ॥

•

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शब्दानुक्रमणिका

अङ्गमर्दन १४८
अजन्ता ३३०
अजीव २८१
अतिथियज्ञ ६३
अध्ययन-विधि ३५
—विषय ४४
अध्यापन-सत्र ५२
अनुमान २७०
अन्नप्राशन २१
अलङ्कार १५३
आकल्प १५०
आकाशयात्रा १७०
आचार्य ५७
—सेवा ५५
आयुर्वेद ३६१
—शिक्षा ४८
आराधना ३१३
आर्येतर धर्म २९१
आवास १६३
आश्रम ३३
आहार १३६
इन्द्रजाल २२२
उपजाति १०६
उपनयन २२
उपभोग्य १३६
उपवन १७९
ऋग्वेद ३७४
ऋतुसंहार ५
कटिभूषण १५६
कथा २१४
कन्नडकाव्य ३८७
कन्या ११७
कर्णालङ्कार १५४
कर्मफल ९
कर्मण्यता ६६
कर्मयोग ८१
कर्मयोगाधिकारी ८२
कवि-व्यक्तित्व ३८३
कापाल ३१७
कालामुख ३१७
काश्मीर शैव ३१७
कुटुम्ब ११३
कृषि १७३
—रचना १५२
—विज्ञान १७४
केश-संस्करण १४८
कौमुदी-महोत्सव २२५
गणतन्त्र २६३
गणित ३५४
गर्भाधान १७
गाणपत्य ३१८
गृहपति १२०
गृहपत्नी १२०
गृहस्थाश्रम ६०
गोष्ठी २१७
ग्रीवालङ्कार १५५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चित्र ३२७
—शैली ३३३
चूडाकरण २१
चैत्य ३५०
जन्मान्तरवाद ८
जलयात्रा १७०
जलविहार २१८
जातकर्म १८
जीव २८०
जीविका-साधन १०७
जैन दर्शन २८०
जैन धर्म ३२५
ज्ञानप्रतिष्ठा ३३
ज्योतिष ३५७
तत्त्वज्ञान ७४
तप ७४
तपस्विता ६६
तामिलकाव्य ३८६
ताम्बूल १४२
तीर्थ ३०५
तेलगु-साहित्य ३८८
त्रिदेव ३०७
दन्तधावन १४८
दर्शन २६६
दान ३०६
दार्शनिक व्यक्तित्व २८४
दास १२७
दुर्गा ३०८
देव ८४
—प्रतिष्ठा २९७
—यज्ञ ६१
देवोत्सव २२६
दौत्यसम्बन्ध ४००
द्यूतक्रीडा २२१
धर्मपरिधि २८९
—सङ्क्रम २९१
—स्वरूप २८९
धातुशास्त्र ३७२
धार्मिक प्रवृत्ति २८९
—सहिष्णुता ३१९
धूम्रपान १४२
नदीसेवन ३०५
नाट्याभिनय २०३
नामकरण १९
नारी-सम्मान १३३
—सामाजिक प्रतिष्ठा १३१
—हीनत्व १३२
नालन्दा-विहार ४३
निर्वाण २७५
नि:सीमता १०
निष्क्रमण २०
नृत्त २०७
नृत्य २०७
न्याय-व्यवस्था २५४
पण्य १८८
परमाणुवाद २७८
परिधान १६१
पशुपालन १८३
पशुसमृद्धि १८५
पादभूषण १५७
पार्वणोत्सव २२८
पाशुपत सम्प्रदाय ३१६
पितृयज्ञ ६२
पुंसवन १७
पुत्र ११६
पुराण-कथा ३०६
पेय १४३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रजासभा २३९
प्रतिवेशी १२३
प्रमेय २७२
प्रसाधन १५०
प्राणिशास्त्र ३७१
प्रावरण १६२
बहुपत्नीत्व १३४
बाद्य ३३१
बादामि गुहाचित्र ३३१
बालक्रीडा २२१
बौद्ध दर्शन २८२
—धर्म ३२१
ब्रह्म ८४
ब्रह्मचर्याश्रम ३३
ब्रह्मचारि नियम ५४
बह्मयज्ञ ६१
—सभा २१५
भक्ति ३०३
भुजालङ्कार १५५
भूतयज्ञ ६२
भूमा ३
भृत्य १२४
भोजन विधि ६५
भोज्य १३८
भौतिक विज्ञान ३७०
भ्राता ११८
मनोविनोद २०३
मन्त्रिपरिषद् २३९
मन्त्रिमण्डल २४०
मन्दिर ३५१
मरणोत्तर विधान २६८,३००
मल्लयुद्ध २२४
महायज्ञ ६०
महायान ३२३
महाभारत ३७५
मांसत्याग १३६
माता पिता ११४
मानव ८५
—धर्म ३०१
मार्ग १७१
मालाधारण ३०६
माहेश्वर योग ३१६
मुक्ति २७५
मुद्रा १९४
मूर्तिकला ३३४
मूर्तिपूजा ३१९
मृगया २१९
मृण्मयमूर्ति ३४३
मोक्ष २७५
यज्ञ ३०२
—उत्सव २२६
यन्त्रविज्ञान ३७२
यात्रासाधन १६८
युद्ध २३५
—विज्ञान २५१
युद्धाचार २५०
रणशिक्षा ४७
रत्नि २४०
रसायन-विज्ञान ३६९
राजकर्म २३२
राजकीय आय २५८
राजकीय व्यय २६०
राजगुण सम्पत् २३५
राजनीति शिक्षा ४८
राजपद योग्यता २३७
राजसभा २१५
राजा ५

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राज्य विस्तार २३८
रात्रिकृत्य ६६
रामायण ३७५
लक्ष्मी ३०८
लोककल्याण ३०९
वज्रयान ३२३
वन विहार २१७
वनस्पति-विज्ञान ३७१
वन्य चित्र ३२७
वन्यवृत्ति ७१
वर्ण परिवर्तन ९७
वर्णव्यवस्था ८६
—विरोध १११
—आरम्भ ८६
वसन्तोत्सव २२४
वस्त्रविन्यास १५७
वस्त्रालङ्करण १५९
वाग्युद्ध २५१
वाद्य २१२
वानप्रस्थ ६९
वास्तुकला ३४७
विक्रम शिलाविहार ४३
विज्ञान ३५४
विद्यालय ३७
विमान-विज्ञान ३७३
विवाह २६
विष्णुबलि १८
विहार ३५१
वीरशैव ३१७
वृक्षविज्ञान १८१
वैदिक दर्शन २६७
वैदेशिकोऽनुबन्ध ३८९
वैष्णव धर्म ३१२
व्यापार १८८
—साधन १९०
व्यवसाय १७२
—शिक्षा ४८
व्यापारिसाहस १९७
—वर्चरिचता १९८
व्यावसायिक संघ २००
व्रत ३०४
शयनासन १६७
शाक्त ३१८
शासनतन्त्र २४२
शिक्षणविधि ४९
शिरोलङ्कार १५४
शिरोवस्त्र १६१
शिल्पसाधना ३२७
शिल्पाध्ययन ४६
शूद्रविद्याधिकार ३६
शैवधर्म ३१५
शौच ६५
श्रीविजय साम्राज्य ३९८
संन्यास ७७
संस्कार १६
संस्कृति २
सङ्गीत २१०
सती १३४
सत्कार्यवाद २७९
सदाचार ६४
सन्ध्या ६५
सभ्यता १२
समावर्तन २४
समाज २१७
सम्पत्त्यधिकार १२६
सागर ४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सीमन्तोन्नयन १९७
सुरा १४४
सुराज्यादर्श २६५
सुहृद् १२३
सूचीकर्म १६१
सृष्टिसमारम्भ २८९
सेचन-साधन १७५
सेना २४५
सोमरस १४४
सौन्दर्यसाधन १४७
सौरसम्प्रदाय ३१८
स्तूप ३४९
स्त्रीविद्याधिकार ३६
स्थलयात्रा १६९
स्नान १४८
स्वभाववाद २८४
स्वयंवर ३१
स्वातन्त्र्य-प्रेम ३०२
स्वास्थ्य-साधन १४६
हिमालय ३
हीनयान ३२३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चौखम्बा विद्याभवन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection.

वाराणसी